Base, *a.* नीच, अनार्य, खल, दुष्ट, कदर्य, जघन्य, अधम, नि-अप-कृष्ट. **2** विजात, हीनजाति, अनभिजात, अकुलीन. **3** कुपण. **4** (Notes) धीर, गंभीर; 'b. metal' कुट्यं. —*s.* अधोभागः, मूलं, तलं, उपष्टंभः. **2** मूर्धन् *m.*, भूमि *f.* **3** वास्तु *n.*; पीठः; 'based on' ex. by मूल in comp.; 'delusion b. ed on ignorance' अज्ञानमूलका भ्रांतिः. **-ly,** *adv.* नीचतया, अधमं &c. **-less,** *a.* निर्मूलक, निराधार, अमूल. **-ness,** *s.* अधमता, अनार्यता, निकृष्टता; अकुलीनता, वैजात्यं; गांभीर्यं.

Bashful, *a.* व्रीमत्, लज्जावत्, सव्रीड, त्रपित, सलज्ज, शालीन, सत्रप, विनीत, भीरु. **-ly,** *adv.* सलज्जं, सत्रपं, सव्रीडं; 'his face b. bent down' लज्जावनतमुखः. त्रयाधोमुखः. **-ness,** *s.* लज्जा, त्रपा, व्रीः; व्रीडा, शालीनता, विनयः, भीरुता.

Basil, *s.* तुलसी, कुठेरकः, पर्णासः.

Basin, *s.* भांडं, द्रोणी. **2** जलाशयः, तडागः, कासारः. **3** आलवालं, आधारः, आवापः, आवालं. **4** खातं. **5** सरित्तटप्रदेशः, रयपथः.

Basis, *s.* मूलं; योनि *f.*; आधारः.

Bask, *v. t.* सूर्यातपं नि-आ-सेव् 1 A; 'b. s in the morning sun' बालातपं निषेवते.

Basket, *s.* मंजूषा, पि(पे)टकः, करंडः, कंडोलः. **-maker,** *s.* वैणवः, वैदलकारः. **-work,** *s.* वैदलं.

Bass, *s. See* **Base 4. 2.** कटः; 'b. relief' प्रतिच्छाया.

Bastard, *a., s.* जारज, कुंड, कुलदोत्पन्न; कौलटेय, कानीन, विजन्मन्, दासीपुत्रः (त्री *f.*), विजात.

Baste, *v. t.* लगुडेन तड् 10 or प्रह् 1 P or आहन् 2 U. **2** सिव् 4 P. **-Bastinade,** *s.* लगुडाघातः, गदाप्रहारः, ताडनं.

Bastile, *s.* प्राकारयुक्तं दुर्गं.

Bastion, *s.* वप्रः-प्रं.

Bat, *s.* जतुका, अजिनपत्रा, परोष्णी, तैलपायिका. **2** यष्टि *f.*, गदा, लगुडः.

Batch, *s.* गणः, संघः, समूहः.

Bate, *See* **Abate.**

Bath, *s.* स्नानागारं, स्नानकुंडं, अवगाहनस्थानं.

Bathe, *v. i.* स्ना 2 P, मस्ज् 6 P. (loc.); गाह् 1 A, वि-अव-गाह् (with acc.). *-v. t.* स्ना c. (स्ना-स्न-पयति); प्रक्षाल् 10, धाव् 10; अभिषिच् 6 P, निमस्ज् c. (मज्जयति). **-ing,** *s.* स्नानं, निमज्जनं, अवगाहनं, अभिषेकः. *-a.* स्नानीय; 'b. cloth' स्नानीयवस्त्रं.

Bathos, *s.* नीचता. **2** गांभीर्यं.

Bating, *prep. See* **Except.**

Batlet, *s.* राजकप्रयुक्तः काष्ठमुद्गरः.

Baton, Batoon, *s.* दंडः, गदा, यष्टि *f.*, लगुडः.

Battalion, *s.* गुल्मः-ल्मं, वाहिनी, सैन्यदलं.

Batten, *v. i.* आप्यै 1 A, स्फाय् 1 A; 'the wolf b. s on the lamb' अजा (मांस) भक्षणेनात्मानमाप्याययति; उदरं भृ 3 U. *-v. t.* प्यै c., संवृध् c., पीन *a.* कृ 8 U.

Batter, *v. t.* मृद् 9 P, चूर्ण् 10, मंथ् 9 P, निष्पिष् 7 P, प्रभंज् 7 P. **-y,** *s.* मर्दनं, पेषणं. **2** कामानश्रेणी.

Battle, *s.* युद्धं, रणः-णं, समरः, संग्रामः, संख्यं, प्रधनं, आहवः, आजि *f.*, समिति *f.*, युध् *f.*, 'b. array' व्यूहः, सैन्यविन्यासः; 'b. axe' परशुः; 'b. cry' सिंहनादः, क्ष्वेडितं; 'b. field' रण-समर-&c. भूमि *f.*, रणांगणं. *-v. i.* युध् 4 A. **-ment,** *s.* सच्छिद्रः प्राकारः, भित्ति *f.*

Battue, *s.* संकुलवधः-निधूदनं.

Bauble, *s.* अल्पमूल्यं आभरणं, अल्पार्थं क्रीडनकं.

Bawd, *s.* कुट्टिनी, दूती, शंभली. **-ry,** *s.* दूतीकार्यं; कुट्टिनीकर्मन् *n.* **-y,** *a.* गर्हित, अशुद्ध, अविनीत, नीच, 'bawd-house' वेश्याश्रमः, वेशः.

Bawl, *v. i.* आ-उत्-क्रुश् 1 P, उच्चैः-तारस्वरेण शब्दायते (D.); रट् 1 P, नद् 1 P, उद्घुष् 10. **-er,** *s.* आ-उत्-क्रोष्टृ *m.*, उद्घोषकः. **-ing,** *s.* उत्क्रोशः, उद्घोषणं.

Bay, *a.* पिंग, पिंगल. *-v. i. See* **Bark,** *-s.* खातं, वंकः; 'turn to b.' 'stand at b.' शत्रोरभिमुखं स्था 1 P; 'b. salt.' समुद्रलवणं, सैंधवं.

Bayonet, *s.* निस्त्रिंशः, शुलिकाप्रक्षेपणीसंसक्ता छुरिका.

Bazar, *s.* आपणः-णं, पण्यवीथिका-वीथी, विपणि-णी *f.*, हट्टः, निषद्या.

Be, *v. i.* भू 1 P, अस् 2 P, वृत् 1 A, विद् 4 A; 'b. it so' भवतु, एवं-तथा-अस्तु. **-Being,** *s.* भावः, अवस्था, वृत्ति *f.*, अस्तित्वं, सत्ता. **2** भूतं, सत्वः-त्वं; 'rational b.' सचेतनः, प्राणिन् *m.*; 'corporal b.' शरीरिन् *m.*, देहिन् *m.*; 'Supreme B.' परमेश्वरः, परमात्मन् *m.* **2** जन्मन् *n.*, संभवः, उत्पत्ति *f.* *-a.* सत्, वर्तमान: 'b. that' यतः, यस्मात्; ex. by abl. or instr. of nouns.

Beach, *s.* (समुद्र-) तीरं, कूलं, वेला, तटं-टी. **-y.** *a.* तटयुक्त, कूलमय (यी *f.*).

Beacon, *s.* आकाशदीपः, महोल्का.

Bead, *s.* गुली, गुटिका; 'a string of b. s' माला; हारः; 'a rosary of b. s' जपअक्षमाला; 'telling b. s' जपमालां गण् 10. **-man,** *s.* जपकरणे नियुक्तो जनः.

Beadle, *s.* दंडधरः.

Beak, *s.* चंचु *f.*, चंचूः, मुखं, तुंडः-डं. **-ed,** *a.* चंचुमत्, तुंडयुक्त. **-er,** *s.* काचपात्रं.

Beam, *s.* तुला, स्थूणा; 'of a balance' दंडः, यष्टि *f.*; 'of a carriage' धुर् *f.* **2** किरणः, अंशुः; *See* **Ray.** *-v. i.* प्रोत्-वि-लस् 1 P, स्फुर् 6 P; 'a face b. ing with joy' मुदा विलसदाननं. **-less,** *a.* निष्प्रभ, निस्तेजस्. **-y,** *a.* भास्वत्, भासुर, देदीप्यमान, अंशुमत्.

Bean, *s.* माषः, शिंबिकः.

Bear, *v. t.* वह् 1 P, नी 1 P. **2** भृ 1 P, आलंबू 1 A, भृ 3 U (राज्यभारमुवाह-बभार). **3** सह् 1 A, मृष् 4 P, 10, क्षम् 1 A. **4** प्रसू 2 A; उत्पद् c., जन् c. (जनयति); 'Satyavati bore two sons to the king' नृपेण सत्यवत्यां पुत्रौ जातौ, -उत्पादितौ, नृपः सत्यवत्यां पुत्रावजीजनत्; the same sense ex. in स नैषधस्य सुतायां पुत्रमुत्पादयामास (R. XVIII. 1) 'he had a son by the daughter' &c. **5** (Cherish) भृ 3 U, धृ 1 P; 'I b. no malice to you' तवोपरि द्वेषं न धारयामि, or न त्वं मम द्वेषपात्रं-स्थानं; 'he bore himself bravely on the occasion' तस्मिन्नवसरे तेन साधु आचरितं, धीरं विक्रांतं; 'b. witness' साक्ष्यं दा 3 P

(with gen.) ; ' b. company ' सहचरः (री *f.*) भू 1 P; ' b. name ' नाम भू 3 U, or धृ 10; व्यपदेशं भज् 1 A; (एवंव्यपदेश-भाजिनः U. 6); ' b. fruit ' सफलीभू, फल् 1 P; ' b. in mind ' चित्ते अवधृ 10, मनसि कृ, अनुस्मृ 1 P, **-s.** ऋक्षः, भल्लुकः, भालुकः. **-Born,** *a.* जात, उत्पन्न, प्रसूत, संभूत; ' to be b. ' जन् 4 A; उत्पद् 4 A; प्रसू pass., उद्भू 1 P, संभू; 'was b. in the form of a dwarf' वामनरूपेण जातः-अवतीर्णः. **-back,** *v. i.* परा-प्रति-नि-वृत् 1 A. **-down,** *v. t.* अपाकृ 8 U; पराजि 1 A, निपत् c.; ' bore down all opposition' सर्वमंतरायमपाकुर्वन्. **-on,** *v. i. See* **Apply. -out** *v. t.* (fig.) दृढयति (D.); समर्थ् 10. **-up,** *v.* उद्वह् c., उत्तंभ् c., as in झटिति घटनोत्तंभितमिव (U. 3). **2** सह् 1 A; 'b. under grief' दुःख-प्रतिकारं कुरु, शोकवशं मा गमः. **-er,** *s.* वाहः, हरः, वाहकः, in comp. वार्ताहरः ' b. of news ' **-ing,** *s.* अवस्थानं, स्थिति *f.* **2** वृत्ति *f.*, वर्तनं, आचरणं, रीति *f.*

Beard, *s.* श्मश्रु *n.*, कूर्चं; मुखरोमन् *n*;' wearing long b. s. ' दीर्घकूर्चाः (pl.). **2** शूकं, किंशारुः. **3** फलं, कर्णः. **-***v. t.* न्यक्कृ 8 U, समक्षं अवज्ञा 9 U or निर्भर्त्स् 10 A or अधिक्षिप् 6 P. **-ed,** *a* सश्मश्रु; श्मश्रुल, कूर्चधर &c. **-less,** *a.* श्मश्रुहीन; अजात-अनुद्भिन्न-श्मश्रु. **2** अप्राप्तव्यवहार.

Beast, *s.* पशुः, मृगः, जंतुः ; ' b. of prey ' श्वापदः; ' b. of burden ' धुर्यः, धुरीणः ; ' b. in the form of man ' नरपशुः. **-fal, -ly,** *a.* पशुतुल्य; जवन्य, पशुशील.

Beat, *s.* आघातः, प्रहारः ; ताडनं. **2** स्पंदनं, स्फुरणं. **-***v. t.* तड् 10, प्रह् 1 P, तुद् 6 P, अभिहन् 2 P, आहन् 2 A, (आहतायां प्रयाणभेर्यां). **2** (defeat) विध्वंस् c., भंज् 7 P, पराजि 1 A, पराभू 1 U. **3** आलुड् c., चूर्ण् 10. **-***v. i.* स्पंद्-कंप्-वेप् 1 A, स्फुर् 6 P; ' b. very fast ' धमधमायते (D.). **-down,** निपत् c.; (price) न्यूनीकृ. **-into,** ताडनेन कृ or निर्मा 3 A: ' I shall b. thee into a good boy ' ताडयित्वा ताडयित्वा त्वामहं विद्वांसं करिष्यामि. **-off,** विद्रु c., प्रतिहन्. **-about the bush,** (lit.) वनं ग्रह् 9 P or आलुड् 10; (fig.) अप्रस्तुतमालप् 1 P. *See* **Bush.**

Beatify, *v. t.* परमानंदं दा 3 U. **2** अमरेषु गण् 10, स्वर्गीयलोकमध्ये आरुह् c. **-ic,** *a.* अपवर्गद, मोक्षप्रद.

Beatitude, *s.* मोक्षः, मुक्ति *f.*, निःश्रेयसं, अपवर्गः, निर्वाणं, परमा गतिः, कैवल्यं; ' desirous of b. मुमुक्षुः.

Beau, *s.* सुवेषः, सुभगंवन्यः.

Beauty, *s.* सौंदर्यं, चारुता, लावण्यं, शोभा, कांति *f.*, रूपं, रमणीयता, अभिरूपा, मनोज्ञत्वं, श्रीः, लक्ष्मीः. **-Beautify,** *v. t.* शुभ् c., भूष् 10, अलंकृ 8 U. **-Beautiful, Beauteous,** *a.* सुंदर (री *f.*), रम्य, रमणीय, कांत, मनोज्ञ, सुरूप, लावण्यवत्, रुचिर, शोभन, चारु (रु *f.*), मंजुल oft., by सु in comp.; सुमुखं-सुस्थलं. **-ly,** *adv.* साधु, सुंदरं, सुष्ठु, सु in comps.

Beaver, *s.* शिरस्त्राणभागः.

Becalm, *v. t.* निर्वात *a.* कृ 8 U, प्रशम् c. (शमयति); *See* **Calm.**

Because, *conj.* इति, हि (not at the beginning of a statement); यतः, यत्; more oft. ex. by कुतः, कस्मात् with abl.; by abl. or instr.; ' b. he is liable to the charge of inequality and cruelty ' (नेश्वरो जगतः कारणमुपपद्यते) कुतः वैषम्य-नैर्घृण्यप्रसंगात् ' b of ' ex. by instr. or abl.; हेतोः, कारणात्; ' b. of this ' इति हेतोः.

Beck, *s.* संज्ञा; संकेतः. **-on,** *v. t.* शिरसा-हस्तेन संज्ञां-संकेतं दा 3 U. **2** संज्ञया आह्वे 1 P.

Become, *v. i.* भू 1 P, संपद् 4 A; वृत् 1 A, जन् 4 A; in majority of adjectives ex. by nouns with गम्, प्राप् &c.; ' became dejected' विषादं गतः, विषण्णो बभूव; 'b. s hated ' द्वेष्यतां याति; 'became amazed' विस्मयमापेदे; ' b. ing curious ' समुपजात-कुतूहलः; ' what became of the queen Sita ' सीतादेव्याः किं वृत्तं (U. 2), किमभवत्. **-***v. t.* युज् pass., उपपद् 4 A, (with loc.); gen. ex. by अनुरूप, सदृश (शी *f.*), उचित, उपपन्न (all with gen.); ' does this b. thy matted hair ' किमिदं जटानामनुरूपं, युक्त-सदृशं &c. **-ing,** *a.* उचित, अनुरूप, युक्त, उपपन्न; ' it is b. ' सांप्रतं. **-ingly,** *adv.* यथोचितं, यथार्हं, युक्तं, अनुरूपं.

Bed, *s.* शय्या, शयनं, तल्पः-ल्पं, सस्तरः, शयनीयं; ' leave the b. ' मुंच शय्यां; 'confined to b. ' ' b. rid ' शय्यागत, शय्याग्रस्त ; ' polluter of other's b. ' परतल्पिकः, परतल्पगः ; ' go to b. ' स्वप् 2 P, शी 2 A; ' b. chamber, ' ' b. room ' शयनागारं, शयनगृहं, वासगृहं ; ' b. clothes ' शय्योपस्कराः ; ' b. sheet ' शयनास्तरणं, उत्तरच्छदः ; ' b. stead ' पर्यंकः, खट्वा, मंचः. **2** (of a river) मध्यं, रथपथः. **3** फलकः. **-Bedding,** *s.* शय्योपकरणं, शयनसामग्री.

Bedash, Bedaggle, *See* **Stain.**

Bedaub, *See* **Daub.**

Bedeck, *v. t.* विभूष् 10, *See* **Adorn.**

Bedew, *v. t.* आर्द्रीकृ 8 U, क्लिद् c., प्रोक्ष् 1 P, सिच् 6 P.

Bedim, *v. t.* मलिनीकृ 8 U, कलुषीकृ; ' eyes b. ed with tears ' बाष्पप्रकरकलुषा दृष्टिं (S. 6).

Bedizen, *v. t.* परिष्कृ 8 U. *See* **Adorn,**

Bedlam, *s.* उन्मत्तानां निवासः, वातुलालयः. **-a.,** **-ite,** उन्मत्त, वातुल.

Bee, *s.* अलिः, भ्रमरः, द्विरेफः, शिलीमुखः, भृंगः, मधुकरः, षट्पदः; ' honey b. ' सरघा, मधुमक्षिका; ' b. hive ' मधुकोषः; ' bees-wax ' मधुजं, शिक्थं.

Beef, *s.* गोमांसं.

Beer, *s.* यवसुरा-रं, यवमद्यं.

Beetle, *s.* पिंगकपिंशा. **2** मुद्गरः. **-v. i.** *See* **Jut.**

Befall, *v. t.* आ-समा-पत् 1 P; ' such incidents b. worldly persons ' आपतंति हि संसारपथमवतीर्णानामेते वृत्तांताः (Ka. 175); उपस्था 1 U, उपनम् 1 P (with gen.); कस्यात्यंतं सुखमुपनतं दुःखमेकांततो वा (Me. 109) संपद् 4 A, घट् 1 A.

Befit, *v. t.* **Become.**

Befool, *v. t.* व्यामुह् c., विभ्रम् c. (भ्रमयति).

Before, *prep.* (Time) प्राक्, पूर्वं, अर्वाक्, (with abl.). **2** (Place) पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात् (with gen.); समक्षं, साक्षात्, प्रत्यक्षं. **-***adv.* (place) *See* above. **2** (Time) पूर्व in comp.; ' not heard b ' अश्रुतपूर्व. **-***conj.* यावत् न-तावत्; ' study your lesson b. he comes ' यावदसौ नागच्छति तावत्पाठमधीष्व; एकस्य दुःखस्य न यावदंतं गच्छामि तावद्द्वितीयं समुपस्थितं मे; ' b. hand ' प्रागेव, पूर्वमेव; प्रथममेव, अग्रे; ' b. mentioned ' पूर्वोक्त, प्रागुक्त; ' as b. ' यथा पुरा, यथापूर्वं; पूर्ववत्, ' in times gone b. ' पुरा, गतकाले.

Befoul, *v. t.* दुष् c. (दूषयति); *See* **Stain.**

Befriend, *v. t.* अनुग्रह् 9 P; उपकृ 8 U, साहाय्यं कृ (with gen.),

Beg, *v. i.* भिक्ष् 1 A, भिक्षाटनं कृ 8 U, भिक्षां याच् 1 A. **-***v. t.* अंजलिं बद्ध्वा-पादयोः पतित्वा विज्ञा c (ज्ञापयति) or निविद् c. **2** याच् 1 A; अभि-प्र-अर्थ् 10 A; ' b. s. to say ' विज्ञापयति; ' b. favour of ' प्रसद् c., अनुनी 1 P. **-ging,** *s.* याच्ञा, प्रार्थना. **2** भिक्षा, भिक्षाटनं. **-Beggar,** *v. t.* दरिद्रीकृ 8 U, सर्वस्वं हृ 1 P; ' b. s description ' वर्णनातीत. *s.* **-**प्रार्थकः, अर्थिन् *m.*, भिक्षुः, याचकः, दरिद्रः. **-ly,** *a.* निर्धन, कृपण. **2** नीच, अपकृष्ट. **-y,** *s.* दैन्यं, कार्पण्यं, दारिद्र्यं, भैक्ष्यं.

Beget, *v. t.* जन् c. (जनयति): उत्पद् c.; प्रसू 2 A, सृज् 6 P. **-ter,** *s.* जनकः, उत्पादकः, जनयितृ *m.*

Begin, *v. t.* आ-प्रा-रभ् 1 A; प्र-उप-क्रम् 1 A, प्रस्तु 2 U, (प्रस्तूयतां भोः), प्रवृत् 1 A; ' the wind began ' वातोग्रेसरोभूत्. **-ner,** *s.* आरब्धृ *m.*, नवच्छात्राः. **-ning,** *s.* आरंभः, उपक्रमः. **2** आदि *m.*; ' having no b. ' अनादि. **3** मूलं, योनि *f.*, प्रभवः; ' b. with ' आदि-आद्य- in comp.; ' in the b. ' आदौ; ' from the b. ' आमूलात्, आदितः; ' God has neither b. nor end ' अनाद्यनंत ईश्वरः.

Begird, *v. t.* परिवेष्ट् 1 A or c., अवरुध् 7 U, आ-परि-वृ 5 U; वलय, रसना, in comp,; समुद्ररसना-उदधिवलया-पृथ्वी ' earth begirt by sea '.

Begone, *interj.* अपेहि, अपसर, अपयाहि.

Begrease, *v. t.* वसया लिप् 6 P, or स्निग्धीकृ 8 U.

Begrime, *See* **Soil.**

Begrudge, *See* **Envy,** *v. t.*

Beguile, *v. t.* विनुद् c., अतिवह् c. (of time) (कथाभिर्दिवसमत्यवाहयत्). **2** व्यामुह् c., वंच् 10, विप्रलभ् 1 A, आकृष् 1 P; प्र-वि-लुभ् c.

Behalf, (on or in) अर्थे, अर्थं, हेतोः, कारणात्, कृते (with gen).

Behave, *v. i.* आचर् 1 P, वृत् 1 A, व्यवह 1 P; *See* **Act.** **2** वृत्तिं कृ 8 U, अनुष्ठा 1 P; ' well b. ed ' सदाचारः. **-Behaviour,** *s.* आचारः, वृत्ति *f.*, व्यवहारः, चेष्टितं, चरितं, आचरणं.

Behead, *v. t.* शिरः (*n.*) छिद् 7 P or कृत् 6 P. **-ing,** *s.* शिरश्छेदः; ' worthy of b. ' शीर्षच्छेद्यः.

Behest, *See* **Command** (*s.*)

Behind, *prep.* पश्चात्, पृष्ठतः, (with gen.) अनु (with acc.); ' concealing his body b. the creepers ' लतांतरित-लताव्यवहितविग्रहः; ' he is far b. (backward) ' मंदः, मंदधीः; ' b. the scenes ' नेपथ्ये. **-***adv.* पृष्ठतः; ' from b. ' पश्चादेत्य, पृष्ठेनागत्य **2** अवरतः, अधस्तात्. **3** दूरे, दूरतः; ' b. part ' पश्चाद्देशः, पृष्ठं, नितंबः.

Behold, *v. t.* दृश् 1 P, ईक्ष् 1 A; *See* **See.** **-en,** *a.* उपकृत, कृतोपकारेण पराधीन. **-er,** *s.* प्रेक्षकः, दर्शकः, द्रष्टृ *m.*

Behoof, *s.* अर्थः, फलं, वृद्धि *f.*, लाभः.

Behove, *v. t.* Ex. by pot. pass. part. pot. mood, or अर्ह् 1 P; ' it b. s thee to assist me ' त्वया मम साहाय्यं कर्तव्यं, साहाय्यं कर्तुमर्हसि &c., *See* **Become,** *v. t.*

Belabour, *v. t.* *See* **Beat.**

Belate, *v. i.* चिराय or चिरय् D.

Belay, *v. t.* प्रति-उप-रुध् 7 U.

Belch, *v. t.* उद्गम् 1 P, उद्गृ 6 P. **-ing,** *s.* उद्गमनं, उद्गिरणं, उद्गारः.

Beleaguer, *See* **Besiege.**

Belie, *v. t.* असत्यं आरुह् c. (रोपयति); मिथ्याभियोगं कृ 8 U; परि-अप-वद् 1 A.

Believe, *v. t.* विश्वस् 2 P, (with loc.), श्रद्धा 3 U (with loc. of person and acc. of thing); प्रति-इ 2 P, (with acc.). **2** संभू c., तर्क् 10, मन् 4 A. **-er,** *s.* विश्वासिन् *m.*, श्रद्धालुः, श्रद्धान्वितः. **-Belief,** *s.* विश्वासः, विश्रंभः, प्रत्ययः, **2** श्रद्धा, आस्तिक्यबुद्धि *f.* **3** मति *f.*, बुद्धि *f.*, 'it is my b.' इति मे मतिः or मतं, इत्यहं मन्ये.

Belike, *adv.* अपि नाम, किंस्वित्.

Belittle, *v. t.* लघूक् 8 U.

Bell, *s.* घंटा; 'small b.' किंकिणी; 'b. metal' कांस्यं, पीतलोहं; 'b. clapper' घंटावादकः.

Belladonna, *s.* कंटकारिका.

Belle, *s.* सुंदरी, रूपवती स्त्री; सुभगमन्या.

Belles letters, *s.* वाङ्मयं.

Bellicose, *a.* कलहप्रिय,-शील, रणोत्सुक, युयुत्सु.

Belligerent, *a., s.* बद्धसमर; योधनशील, युयुत्सु.

Bellow, *v. i.* नद् 1 P, निनद्, गर्ज् 1P, रस् 1 P, रद् 1 P, नर्द् 1 P. **-ing,** *s.* गर्जित, निनादः, गर्जनं, रसितं.

Bellows, *s.* भस्त्रा, दृति *f.*, भस्त्री, चर्मप्रसेविका.

Belly, *s.* उदरं, जठरं, तुंदं, कुक्षिः; 'b. ache' उदरशूलः-लं; 'b. full' आकंठं; उदरपूरणं (*s.*); 'b. bound' आनद्ध; बद्धोदर; 'b. god' उदरंभरिः, औदरिकः; 'b. worm' क्रिमिः; कृमिः.

Belong, *v. i.* अस् 2 P, विद् 4 A, भू 1 P, with gen.; or by an adj. from noun; 'this book belongs to me' ममेदं पुस्तकं, or मदीयमेतत् पुस्तकं, 'b. ing to spring' वासंतिक (की *f.*); 'b. ing to the king;' राजकीय. **2** संबंध् pass.; 'this does not b. to you' नायं तव व्यापारः.

Beloved, *a.* प्रिय, इष्ट, दयित, वल्लभ; 'b. person' दयितजनः, &c.

Below, *prep.* अधः, अधस्तात्, तले, (with gen.). **2** ऊन in comp. **3** अयोग्य, अनर्ह, अननुरूप, असदृश (शी *f.*;); 'the gods are b. Hari' अनु हरिं सुराः (S. K.). *-adv.* अधः, अधस्तात्; अधोभागेलोके (in hell). **2** नीचे, अवरतः. **3** इह, इह लोके.

Belt, *s.* मेखला, रस(श)ना, कांची. *-v. t.* मेखलारूपेण परिवृ 5 U or परिवेष्ट् 1 A.

Bemangle, *See* **Mangle.**

Bemire, *v. t.* पंकेन मलिनयति (D.). or दुष् c. (दूषयति).

Bemoan, *See* **Lament.**

Bench, *s.* पीठं; फलकः; 'b. of justice' धर्मासनं, व्यवहारासनं.

Bend, *v. t.* नम् c. (न-ना-मयति), अव-आ-नम् c. (नमयति), नम्रीकृ 8 U, आवृज् 10, वक्रीकृ, भुज्-, वि-आ°-, 6 P; 'bent under the load of breasts' कुचभारानमिता, स्तनभरेण नम्रतामानीता, स्तनभारेणावर्जिता; 'b. the brow' भ्रूभंगं कृ; he 'bent his mind again to his task' स पुनरपि स्वकार्ये मनोन्यदधात्-बबंध-न्यवेशयत्; 'b. to one's will' वशीकृ. *-v. i.* आ-अव-प्र-नम् 1 P, नम्र-लीन- *a.* भू 1 P; 'trees b. down under the load of fruits' भवंति नम्रास्तरवः फलागमैः (S. b) **-Bent,** *a.* आनमित; ना-न-मित, आसुग्न; प्रवण, प्रह्व, आवर्जित; 'b. on' कृतनिश्चय, सुनिश्चय, कृतसंकल्प, विहितप्रतिज्ञ; 'eagerly b. on killing each other' परस्परवधोद्यतौ. *-s.* नति *f.*, वक्रता, जिह्मता. **2** वंकः, पुटभेदः. **3** शीलं, वांछा, निश्चयः, प्रवृत्ति *f.*, अभिनिवेशः, **-ing,** *s.* नति *f.*; नमनं, अवनमनं.

Beneath, *prep., adv.* *See* **Below.**

Benedict, *s.* नवोढः, नवपरिणीतः.

Benediction, *s.* आशिस् *f.*, आशीर्वादः; नांदी (in dramas); आशास्यं, *f.* धन्यवादः. **2** स्तवः, स्तुति *f.* **-Benedictory,** *a.* मांगलिक (की *f.*); 'b. stanza' नांदीश्लोकः; नांदी.

Benefaction, *s.* उपकारः, उपकृतं, हितं.

Benefactor, *s.* उपकर्तृ *m.*, उपकारिन् *m.*, हितकृत् *m.*, उपकारकः, हित-प्रिय-करः.

Benefice, *s.* धर्मशिक्षकवृति *f.*

Beneficence, *s.* उपकारशीलता, परोपकारः; उपकारः, हितं, दया, कृपा, त्यागिता.

Beneficent, *a.* दान-त्याग-शील, परोकारिन्, उपकारपर. **2** (thing) हितकर (री *f.*), हितकारिन्, हितावह.

Beneficial, *a.* हित, हितावह, उपकारक, लाभजनक; कल्याणकारक, सुखप्रद.

Benefit, *s.* उपकारः, हितं, अनुग्रहः. **2** फलं, लाभः; 'for public b.' जनहितार्थं. *-v. t.* उपकृ 8 U, अनुग्रह् 9 P, हितं कृ, लाभं दा 3 U.

Benevolence, *s.* परहितेच्छा, परोपकारिता, दया, कृपा, उदारता, **-Benevolent,** *a.* हितैषिन्, उपकारपर, परोपकारशील, दयालु, परहितेच्छु. **-ly,** *adv.* परहितेच्छया, कृपया, दयापूर्वं.

Benight, *v. t.* तमसा आच्छद् 10. **-ed,** *a.* तमोवृत्, नैशतमसाक्रांत; (fig.) अज्ञानतमोवृत.

Benign, Benignant, *a.* दयालु, प्रेमपर, सदय, सुखप्रद, कृपालु. **-ity,** *s.* दया, प्रीति *f.*, कृपा, अनुग्रहः, दयालुत्वं.

Benison, *s.* आशिस् *f.*, आशीर्वादः.

Benumb, *v. t.* जडयति (D.), जडीकृ 8 U, स्तंभ् 9 P.

Bequeath, *v. t.* मृत्युसमये इच्छापत्रेण दा 3 U or ऋ c. (अर्पयति), or प्रतिपद् *c.* **-Bequest,** *s.* रिक्थप्रदानं.

Bereave, *v. t.* विनाकृ 8 U, वियुज् 10, (with instr. for ' of '); ' b. ed of Madana ' मदनेन विनाकृता. **2** अपनी 1 P, भंश् c., ' to be b. ed ' परिड्ना pa-s., विद्युज् pass. **-ed, Bereft,** *a.* रहित, हीन, वियुक्त, हृत-गत in comp. **-ment,** *s.* वियोगः; विरहः.

Berry, *s.* गुली, गुटिका.

Berth, *s.* शयनागारं, वासगृहं (नाकायां).

Bescatter, *See* **Scatter.**

Beseech, *v. t.* अनुनी 1 P, प्रसद् c., विनयेन याच् 1 A or प्रार्थ् 10 A. **-er,** *s.* प्रार्थकः, याचकः, आथनृ *m.*

Beseem, -ly, *See* **Become.**

Beset, *v. t.* रुध् 7 U, आकुलीकृ 8 U, आक्रम् 1 U, 4 P, संबाध् 1 A, उपपीड् 10, अभिभू 1 P. *-a.* आकुल, अभिभूत; ' b. with difficulties or dangers ' सकटाकुल, अनर्थसंबाध, विपदभिभूत.

Beshrew, *v. t.* अमंगलं प्रार्थ् 10 A, शप् 1 A.

Beside, *prep.* पार्श्वे, समीपं -पे; अभितः, परितः (acc.); निकटं-टे (gen). **2** असंबद्ध *a.*; ' b. oneself with joy ' आनंदपरवशः, आनंदेन विगतचेतन इव भूत्वा; ' this is b. the question ' अप्रास्ताविकं-अप्रासंगिकं-एतत्, अप्रकृतं.

Besides, *prep.* Ex. by भिन्न, व्यतिरिक्त, अपर, इतर, in comp., or with abl. *-adv.* अपरंच, अन्यच्च, किंच, अपिच, अधिकं.

Besiege, *v. t.* रुध् 7 U, अव-उप-रुध्, परिवेष्ट् 1 A or c., आक्रम् 1 U, 4 P **-er,** *s.* अव-उप-रोधकः. **-ing,** *s.* उप-अव-रोधः, राधनं.

Beslave, *v. t.* वशीकृ 8 U, दम् c. (दमयति).

Besmear, *a. t.* वि-आ-अनु-लिप् 6 P, अंज् 7 P. दिह् 2 U. **-ed,** *a.* लिप्त, अक्त, दिग्ध; विषदिग्धः शरः 'b. with poison'; रक्ताक्तः ' b. with blood '.

Besmirch, *v. t. See* **Besmear.** **2** मलिनी कृ 8 U.

Besom, *s.* मार्जनी, शोधनी.

Besort, *v. i.* युज् pass., उपपद् 4 A.

Besot, *v. t.* मुह् c., जडीकृ 8 U. **-ted,** *a.* मूढबुद्धि, मूढात्मन्.

Bespangle, *v. t.* नक्षत्राकारभूषणैः अनुव्यध् 4 P or उप-शुभ् c. or भूष् 10.

Bespatter, *v. t.* मलेन सिच् 6 P, मलिनयति (D.), कलुषयति (D.).

Bespeak, *v. t.* सूच् 10, दृश् c., कथ् 10, *See* **Indicate;** आकृतिरेवानुमापयत्यमानुषतां (Ka.132) 'b. s its being superhuman.'

Bespeckle, Besprinkle, *See* **Speckle, Sprinkle.**

Best, *a.* प्रशस्ततम, उत्तम, श्रेष्ठ, परम, परार्ध्य; 'to the b. of one's capacity or power' यथाशक्ति, यावच्छक्यं; 'to the b. of one's belief' यथामति; 'b. of' ex. by रत्न or वर in comp.; स्त्रीरत्नं, मुनिवरः.

Bestain, *See* **Stain.**

Bestead, *v. t.* लाभाय भू 1 P, हिताय कृप् 1 A.

Bestial, *See* under **Beast.**

Bestir, (oneself) चेष्ट् 1 A, घट् 1 A, प्रयुज् 1 A. उद्यमं कृ 8 U, व्यवसो 4 P.

Bestow, *v. t.* दा 1 P, 3 U, प्रदा, प्रतिपद् c., (with dat.) विधृ 1 P (with loc.). **2** प्रयुज् 7 A, 10, निक्षिप् 6 P; ' b. ing wealth on proper persons ' वित्तस्य पात्रे व्ययः, ' great care seems to be b. ed on this picture ' इदमालेख्यं प्रयत्नतः-सुनिपुणं-निर्मितमिति अनुमीयते; 'b. oneself' सेव् 1 A, आस्था 1 A, मनो निविश् c. **-al,** *s.* दानं, प्रतिपादनं. **-er,** *s.* दातृ *m.*, प्रदः in comp.

Bestraught, *a.* व्यग्र, चिंताकुल; *See* **Anxious.**

Bestrew, *v. t.* आस्तृ-स्तृ 5–9 U.

Bestride, *v. t.* पादौ पृथक् कृत्वा आ-अधिरुह् 1 P or अधिक्रम् 1 U, 4 P.

Bestud, *v. t.* अनुव्यध् 4 P, खच् 10.

Bet, *s.* पणः, प्रतिज्ञा. *-v. t.* पण् 1 A (with gen. of thing staked); शतस्य पणते (S. K.)

Betake, (oneself to) *v. t.* आधि 1 U, अंगीकृ 8 U; अरण्यवासमंगीचकार ' betook himself to forest residence'.

Betel, *s.* (tree) तांबूली, पुन्नागवल्ली, नागलता; ' b. box ' तांबूलकरंकः, पूगपात्रं; 'b. nut' पूगं, तांबूलं; 'b. box bearer' तांबूलकरंकवाहिन्.

Bethink, *v. t.* अनुध्यै 1 P, स्मृश् 6 P; *See* **Think.**

Betide, *v. t.* आपत् 1 P, उपस्था 1 U, (gen.) *See* **Befall;** ' may woe b. him ' अभद्रं तस्य भूयात्.

Betimes, *adv.* प्रभाते, प्रातः, प्रत्यूषे. **2** यथासमयं, वेलायां, यथावसरं.

Betise, *n.* मौर्ख्यं, मूढता. **2** मौर्ख्यविलसितं.

Betoken, *v. t.* सूच् 10, दृश् c., *See* **Indicate.**

Betray, *v. t.* शत्रुकरेषु क्र c. (अर्पयति), विश्वासघातेन क्र c. **2** भिद् 7 U; 'b. ed the secret' रहस्यं विभेदं. **3** Indicate, q.v. **4** वंच् 10, *See* **Cheat;** 'b themselves' आत्मस्वरूपं प्रकटयंति. **-er,** *s.* विश्वासघातकः, वंचकः.

Betrim, *v. t.* भूष् 10, अलंकृ 8 U.

Betroth, *v. t.* (वाचा) दा 3 U, प्रतिपद् c., प्रतिश्रु 5 P, (dat.). **-al,** *s.* वाग्दानं, वाक् प्रदानं

Betrust, *See* **Entrust.**

Better, *a.* श्रेयस्, भद्रतर, गरीयस्, प्रशस्तर, साधीयस्; 'b. than' वरं-न; 'better death than disgrace (I prefer death to disgrace)' वरं मृत्युर्न पुनरपमानः. **2** (In health) ex. by विशेषः; 'I am b. to-day' अस्ति मे विशेषोऽद्य (S. 3). *–adv.* वरं, श्रेयः, भद्रतरं, अधिकतरं, अधिकं. **2** (With verbs) ex. by वरं; 'he cooks b. than Ra'ma' रामान्न वरं पचति. *–s.* श्रेष्ठता, प्रशस्यत्वं, वरेण्यं; 'get the b. of' अभिभू 1 P, अतिरिच् pass., *See* **Excel.** *–v. t.* वृध् c.; कृ with (*a.*). **–Betters,** श्रेष्ठाः (pl.).

Between, Betwixt, *prep.* मध्ये, अभ्यंतरे, अंतरे, मध्यस्थाने; oft. ex. by gen. of nouns; देशयोरंतरं 'distance b. the two countries'; 'b. joy and sorrow (tears)' शोकानंदमध्यवर्तिनी (Ka. 318).

Beverage, *s.* पानं, पेयं, पानीयं; 'b. of the Gods' अमृतं.

Bevy, *s.* गणः, संघः, समवायः.

Bewail, *v. t.* विलप् 1 P, शुच् 1 P, *See* **Lament.** **–ing,** *s.* शोकः, विलापः, परिदेवनं.

Beware, *v. i.* सावधान-अप्रमत्त-अवहित *a* भू 1 P;; 'b. of your enemies' शत्रुविषये सावधानो भव; 'b. lest you will be seduced by pleasures' सावधानो भव नोचेद्विषयैः प्रलोभ्येथाः; or तथा प्रयतेथा यथानाक्षिप्यसे विषयैः (Ka. 109).

Beweep, Bewet, *See* **Weep, Wet.**

Bewilder, *v. t.* आकुलीकृ 8 U, विक्लवीकृ, व्या-सं-मुह् c., संभ्रम् c. (भ्रमयति), जडीकृ. **–ed,** *a.* विक्लव, आकुलीभूत, आ-व्या-कुल, विमूढ, विह्वल, संभ्रांत; 'b. what to do' किंकर्तव्यतामूढः, प्रतिपत्तिमूढः. **–ment,** *s.* संभ्रमः, वैक्लव्यं, संमोहः, व्याकुलत्वं.

Bewitch, *v. t.* मुह् c., सं-वि-परि°, वशीकृ 8 U, मद् c. (मनो मदयति ये Mal. 2); मंत्रेण वशीकृ. **2** मनो हृ or आकृष् 1 P. **–ing,** *a.* मोहन (नी *f.*), हारिन्. **–ment,** *s.* मोहनं, मोहः, वशीकरणं, माया, आकर्षणं.

Bewray, *See* **Betray.**

Beyond, *prep.* परतः (with abl.) अतिक्रम्य, अतीत्य, (with acc.); 'b. the forest is the Kailàsa' तदरण्यमतिक्रम्य कैलासगिरिः (Ka. 121); 'Oh! Change b. belief' अहो विश्वासातिक्रांतो (अविश्वास्यः) दशाविपर्यासः; 'b comprehension' अगम्य, दुर्ज्ञेय, दुर्बोध; 'b. expectations' मनोरथानामभूमिः (S. 7); gen. ex. by अति pr.; अधिकं, 'b. measure' अतिमात्रं; 'b. human power' अतिमानुषं; 'b. this continent' द्वीपांतरे; 'lives b. his means' आयाधिकं व्ययं करोति. *–adv.* दूरे, परि-रं; 'go or pass b.' अतिक्रम् 1 U, अति-इ 2 P.

Bias, *s.* स्पृहा, अभिलाषः. **2** शीलं, भावः. **3** पक्षपातः, पक्षपातित्वं. **4** प्रोत्साहनं, प्रवर्तन. *–v. t.* प्रवृत्, c., प्रणुद् 6 P, प्रोत्सह् c. **2** साचीकृ 8 U; दुष् c. (दूषयति).

Bibber, *s.* मद्यपायिन् *m.*, सुरापः, मद्यपः.

Bibliography, *s.* पुस्तकविद्या.

Bibliomania, *s.* दुर्लभपुस्तकसंग्रहणोन्मादः or **–व्यग्रता.**

Bibulous, *a.* जलशोषक.

Bicentenary, *a.* द्विशतसांवत्सरिक.

Bicker, *v. i.* कलहं कृ 8 U, विवद् 1 A. वाग्युद्धं कृ. **–ing,** *s.* कलहः, विवादः, कलिः. **2** विग्रहवः.

Bicycle, *s.* द्विचक्रं वाहनं.

Bid, *v. t.* आ-व्या-दिश् 6 P, आज्ञा c.. (ज्ञापयति). **2** मूल्यं ख्या c. (ख्यापयति) or उद्घुष् 10. **3** निमंत्र् 10 A; 'b. welcome' स्वागतं वद् 1 P, or व्याहृ 1 P; 'b. adieu or farewell' आमंत्र् 10 A, आपृच्छ् 6 A; 'b. defiance' धृष् 5 P, आह्वे 1 A. **–der,** *s.* क्रेतृ *m.* **–ding,** *s.* आज्ञा, आदेशः, शासनं. **2** मूल्यख्यापनं, अर्घघोषणा.

Bide, *v. t.* स्था 1 P, वृत् 1 A. *–v. t.* प्रतीक्ष् 1 A. **2** सह् 1 A.

Bidental, *a.* द्विदत्, द्विरद.

Biennial, *a.* द्विवार्षिक (का *f.*), द्विवर्षीण, द्वैवर्षिक.

Bier, *s.* शवयानं, कूटः, खाटः -टी.

Bifold, *a.* द्विगुण, द्वैध (धी *f.*).

Biformed, *a.* द्विरूप.

Bifurcate, *v. t.* द्विधा कृ 8 U, विभिद् 7 P or c. **–ed,** *a.* द्व्यग्र. **2** विश्लेषित, द्विधा कृत.

Big, *a.* महाकाय, बृहत्काय (of animate creatures); महाप्रमाण, अतिप्रमाण, स्थूल, विपुल, बृहत्, पृथु (थुः, थ्वी *f.*). **2** Pregnant q. v. **3** संकुल, पूर्ण, संकीर्ण; आकीर्ण; 'as b. as' परिमाण, परिमित, मात्र, in comp; बिल्वमात्र 'b. as Bilwa.' **–ness,** *s.* स्थूलता, वैपुल्यं &c. **2** परिमाणं, प्रमाणं.

Bigamy, *s.* (एककाले) द्विपत्नीकरण; द्विभर्तृकरणं. **–ist,** *s.* द्विपत्नीकः; द्विभर्तृका.

Bight, *s.* अ(आ)खातं.

Bigotry, *s.* स्वमतासक्ति *f.*, स्वमताग्रहः. सनिर्बंधं स्वमतावलंबनं. **–Bigoted,** *a.* Bigot, *s.* निर्बंधशील, (अविचार्य) स्वमतरक्षिन्, निर्बंधेन स्वमतावलंबिन्.

Bijou, *s.* क्षुद्र-अलंकारः-भूषणं.

Bilbo, *See* **Sword.**

Bile, *s.* पित्तं, मादुः. **–ous,** पैत्तिक (की *f.*), मायुमय (यी *f.*).

Bilingual, *a.* द्विभाषावादिन्.

Bilinguous, *a.* द्विजिह्व.

Bilk, *See* **Cheat.**

Bill, *s.* पत्रं, लेखः. **2** चंचु (चू) *f.*, तुंडं. **3** दात्रं, स्तंबघ्नः. **-***v. t.* *See* **Kiss,** or **Embrace;** 'b. of fare,' भोजनवस्तुपत्रिका.

Billet, *s.* पत्रं, लेखः, लेख्यं. **2** काष्ठखंडं. **-***v. t.* सैन्यानि वस् c.

Billion, *s.* खर्वः.

Billow, *s.* महोर्मि *f.*, कल्लोलः, तरंगः. **-***v. i.* तरंगायते (D.). **-y,** *a.* कल्लोलमालाकुल, प्रचलदूर्मिमालाकुल; तरंगित.

Bimetallic, *a.* द्विधातुक, द्विधातुमय.

Bin, *s.* कुशूलः, धान्यकोष्ठः.

Binary, *a.* द्विगुण, द्वैध (धी *f.*).

Bind, *v. t.* बंध् 9 P, (lit. and fig.); नि-सं-यम् 1 P; 'bound by affection' स्नेहनिबद्धः; नियंत्र् 10; 'I am not bound by these rules' नाहमेभिर्विधिभिर्नियंत्रितोस्मि. **2** आनह् 4 P, पिनह्; 'b. together' सं-बंध्, संश्लिष् c.; ग्रंथ् 9 P, संहृ 1 P, संयुज् 7 U, 10; 'b. oneself' प्रतिज्ञा 9 U, प्रतिश्रु 5 P; 'b. by oath' शप् c.; 'b. on' ex. by pot. pass., part., or अर्ह् 1 P; 'the protection of your wife is b. ing on you' त्वया भार्यापोषणमवश्यमेव कर्तव्यं. **-ing,** *s.* बंधः, बंधनं, वेष्टनं, पट्टः, आवरणं. **-Bound,** *a.* बद्ध, निबद्ध, संयत, नियंत्रित, आनद्ध; 'you are b. to obey my orders' त्वया ममादेशा अनुरोद्धव्या एव, आदेशाननुरोद्धुमर्हसि; 'where are you b., कुत्र गंतुं कृतनिश्चयोसि-कुत्र गंतुकामोसि.

Binocular, *a.* द्विनेत्र, द्विनयन.

Biography, *s.* चरितं, जीवनवृत्तांतः. **-er,** *s.* वृत्तांतलेखकः-आख्यातृ *m.*, चरितनिवेदकः.

Biology, *s.* प्राणिशास्त्रं.

Bipartition, *s.* द्विधाकरणं.

Biped, *s.* द्विपाद् *m.*, or द्विपदः.

Biplane, *s.* द्विपृष्ठं विमानं or आकाशयानं.

Birch, *s.* भूर्जः, मृदुत्वचः, प्रतिविषा. **-en,** *a.* भूर्जमय (यी *f.*), भूर्जनिर्मित.

Bird, *s.* विहगः, विहंगः,-गमः, पक्षिन् *m.*, खगः, शकुंतः, पतत्रिन् *m.*, गरुत्मत् *m.*, द्विजः, पत्रिन् *m.*, शकुंतिः, अंडजः, पतंगः, शकुनिः; 'bird's eye view' उच्चस्थानादालोकनं, स्थूलदर्शनं, असूक्ष्मदृष्टिः.

Birth, *s.* जन्मन् *n.*, उद्भवः, संभवः, उत्पत्ति *f.*, जनि *f.*, उत्पादनं, प्रसूति *f.*; 'rich from his b.' गर्भेश्वरः; 'high or noble b.' कुलं, कुलीनता, अभिजातता, अभिजनः, कुले जन्म. **2** वंशः, कुलं, अन्वयः. **3** योनि *f.*, मूलं; 'pride of b.' कुलाभिमानः; 'blind from b.' जात्यंध, जन्मांध, जनुषांध. **-day,** *s.* जन्मदिवसः-दिनं. **-place,** *s.* जन्मस्थानं-भूमि *f.* **-right,** *s.* जन्मतो लब्धोधिकारः; पैतृकं स्वत्वं.

Biscuit, *s.* अपूपः, पिष्टकः, पूपः.

Bisect, *v. t.* समांशद्वयेन विभज् 1U, द्विखंडीकृ 8 U, द्विधा छिद् 7 P.

Bishop, *s.* धर्माध्यक्षः. **-ric,** *a.* धर्माधिकारः.

Bison, *s.* वनवृषभः.

Bit, *s.* खलीनः-नं, कविका. **2** खंडः, लवः, भागः; 'not a b.' न मनागपि, न स्तोकांशेनापि; गंधः (क्रियायाः गंधमात्रस्यापि अनुप्रवेश इह नोपपद्यते S. B. 74). **3** पिंडः, ग्रासः. **-** *v. t.* खलीनेन नियंत्र् 10.

Bitch, *s.* शुनी, कुक्कुरी, सरमा.

Bite, *v. t.* दंश् 1 P; 'bit off a large piece' दंतैर्महाखंडं संदष्टवान्-चर्वितवान्; उत्पट् 10, चर्व् 1 P, खाद् 1 P. **2** शीतेन पीड् 10. **3** अधिक्षिप् 6 P, *See* **Censure.** **4** पीड् 10, अर्द् 1 P, 10. **-***s.* दंशः, दंशनं. **2** दंतपदं, दशनांकः. **-ing,** *s.* दंशनं; 'b. of conscience' मनसोनुतापः. **-***a.* दंशक. **2** पीडाकर (री *f.*).

Bitter, *a.* कटु, तिक्त. **2** (Touching) मर्मभिद्-छिद्. **3** उग्र, निष्ठुर, परुष, तीक्ष्ण, कठोर. **-ly,** *adv.* निष्ठुरं, परुषं. **2** अत्यंतं. **3** प्रमुक्तकंठं (weeping b.). **-ness,** *s.* कटुता, शुक्तता, तीक्ष्णता. **2** दुःखातिरेकः, उग्रशोकः; 'in b. of soul' दुर्मनायमानचित्त *a.*, समन्युना चेतसा. **3** कठोरता, परुषता, निष्ठुरता. **4** मात्सर्यं, पैशुन्यं.

Bitumen, *s.* शिलाजतु *n.*, गिरिपुष्पकं, गैरेयं, गिरिजं, अश्मजं, अर्थ्यं.

Bivalve, *a.* द्विकोष.

Bizarre, *a.* *See* **Grotesque.**

Blab, *v. i.* रहस्यं भिद् 7 P. **-ber,** *s.* रहस्यभेदकः.

Black, *a.* कृष्ण, श्याम, कृष्णवर्ण, काल. **2** निष्प्रभ, तिमिर, असित, नील, मेचक. **3** (fig.) निंद्य, घोर, दारुण; 'b. deed' अपयशोमलिनं कर्म; 'b. guard' दुर्वृत्तः, दुराचारः, अधमः, खलः. **-***s.* कृष्णः, कृष्णवर्णः; 'clothed in b.' नीलवस्त्रः. **-en,** *v. t.* कृष्णीकृ 8 U, श्यामी-नीलीकृ. **2** दुष् c. (दूषयति), कलंकयति (D.), *See* **Stain.** **-ish,** *a.* ईषत्कृष्ण, आनील. **-ness,** *s.* कृष्णिमन् *m.*, श्यामत्वं, नीलता, कालिमन् *m.*, तमस् *n.*, तिमिरं. **-smith,** *s.* कर्मकारः, लोहकारः, अयस्कारः.

Bladder, *s.* मूत्राशयः, बस्ति *m.*, *f.*

Blade, *s.* (Of a sword) धारा, पत्रं, फलं. **2** (Of grass) दलं, कांडं, अंकुरः. **3** स्कंधास्थि *n.*

Blain, *s.* स्फोटः, व्रणः-णं.

Blame, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, उपालभ् 1 A; दोषं क्षिप् 6 P, or आरुह् c. (रोपयति), *See* **Censure,** 'I am not to b.' नाहमपराधी, न ममायं दोषः. **-***s.* दोषः, अपराधः. **2** गर्हा, आक्षेपः, उपालंभः, निंदा, जुगुप्सा; 'lays the b. on another' अन्यस्मिन्दोषं

क्षिपति. **-able**, *a.* निंद्य, निंदनीय, गर्हणीय, गर्ह्य, वाच्य; 'he is not b. or to blame' स न दोषास्पदं-दोषपात्रं. **-er**, *s.* निंदकः, परिवादकः, अधिक्षेपकः, **-less**, *a.* अनिंद्य, निर्दोष, निष्कलंक, विशुद्ध (pure). **-lessness**, *s.* अनिंद्यता, अनवद्यता (अहो अनवद्यता रूपस्य M. 2), अवाच्यता, दोषाभावः.

Blanch, *v. t.* शुक्लीकृ 8 U, धवलीकृ. **2** निस्तुषयति (D.), त्वचं निष्कुष् or अपनी 1 P. **3** Avoid, q. v.

Bland, *a.* मृदु, कोमल, मसृण, सौम्य श्लक्ष्ण; 'b. in speech' प्रियंवद, **-ish**, *v. i.* शां-(सां)त्वं 10, चाटूक्तिभिः तुष् c., अनुनी 1 P, उपच्छंद् 10. **-ishment**, *s.* विलासः, विभ्रमः. **2** प्रियवाक्यं, चाटूक्ति *f.*, मधुरभाषितं, उपच्छंदनं, अनुनयः.

Blank, *a.* शुभ्र, शुक्ल; 'b. with fear' भयविवर्णः-र्विवर्णाननः. **2** शून्य, रिक्त, लेखारहित. **3** एकांत, अत्यंत; 'b. despair' एकांततो नैराश्यं. **4** अनुप्रास-यमक-हीन (verse). *s.* लेखाशून्यं पत्रं. **2** शून्यता; रिक्तं, शून्यं.

Blanket, *s.* कंबलः, ऊर्णायुः, रल्लकः

Blare, *v. i.* उच्चैः नद् *s.* उच्चनादः, उद्घोषः.

Blarney, *s.* *See* **Flattery.**

Blaspheme, *v. t.* ईश्वरं निंद् 1 P or अवमन् 4 A, or अभिशप् 1 U. **-ous**, *a.* ईश्वरनिंदक, पाषंडीय. **-y**, *s.* पाषंडता, ईश्वरनिंदा.

Blast, *s.* वात्या, वातः, वायुवेगः, प्रभंजनः, जवानिलः. **2** ध्मानं (of horns). **3** विनाशः, क्षयः, अपायः. *v. t.* विनश् c., विहन् 2 P, म्लानीकृ 8 U, विशृ c., क्षै c. (क्षपयति); 'b. ed by lightning' अशनि-विद्युत्-हत **-er**, *s.* विनाशकः.

Blatant, *s.* *See* **Noisy.**

Blaze, *v. i.* ज्वल् 1 P, प्र-उत्°, दीप् 4 A, सं-उत्-प्र-°; 'b. ing' उज्ज्वल, पदीप्त, देदीप्यमान, भास्वर, *See* **Bright**, 'b. abroad' प्रकाशू c., प्रख्या c. (ख्यापयति). *s.* प्रभा, अर्चिस् *f.*, *n.*, दीप्ति *f.*, ज्वाला; 'b. of light' रश्मि-अंशु-जालं.

Blazon, *v. t.* भूष् 10, अलंकृ 8 U. **2** प्रख्या c. (ख्यापयति); प्रकाशू c., उद्घुष् 10.

Bleach, *v. t.* निर्णिज् 3 U, धाव् 1 P, 10, धवलीकृ 8 U. **-ed**, *a.* धौत, निर्णिक्त. **-er**, *s.* धावकः, वस्त्रनिर्णेजकः.

Bleak, *a.* अतिशीत (winter); शिशिर, हैमंत (ती *f.*), हिमशीत. **2** (fig.) निरानंद, असुभग.

Blear-eyed, *a.* क्लिन्नाक्ष, चुल्ल, चिल्ल, पिल्ल; 'b. eye' चुल्लः &c.

Bleat, *v. i.* रेभ् 1 A, मेंमें शब्दं कृ 8 U, उ 1 A. **-ing**, *s.* रेभणं, मेषरुतं, उरभ्रनादः.

Bleed, *v. t.* रक्तं-रुधिरं &c. (blood) मुच् c. or स्रु c. or मोक्ष् 10, with gen. of person or part bled: 'they b. the wound' क्षते रक्तमोक्षणं कुर्वंति. *v. i.* रक्तं-रुधिरं स्रु 1 P, or मुच् 6 P, or प्रवह् 1 P; 'his hand b. s' तस्य हस्ताद्रुधिरं स्रवति; 'b. ing profusely' रुधिरप्राग्भारनिस्यंदिन् (Mal. 5); 'to b. for one's country' स्वदेशार्थं जीवितं त्यज् 1 P. **-er**, रक्तस्रावकः-मोचकः. **-ing**, *s.* रक्तस्रावः, रक्तमोक्षणं, रक्तस्रुति *f.*, रुधिरक्षरणं.

Blemish, *s.* दोषः, कलंकः, छिद्रं; 'un-b. ed' निष्कलंक, निर्दोष. **2** अपयशस् *n.*, अकीर्ति *f.* *v. t.* मलिनयति (D.), कलंकयति (D.), दुष् c. (दूषयति).

Blench, *v. i.* सहसा संकुच् 1 P. **2** सहसा अपस् 1 P or अपक्रम् 1 U, 4 P or निवृत् 1 A; पराङ्मुख (खी *v.*) भू 1 P.

Blend, *v. t.* मिश्र् 10, संयुज् 10, एकत्र कृ 8 U; 'to be b. ed' संकृ pass.; संमिल् 6 P, एकीभू 1 P. **-ed**, *a.* संमिश्र, श्यामिश्र, संकीर्ण संसृष्ट, मिश्रीकृत. **2** एकरूप, एकीभूत.

Bless, *v. t.* Gen. ex. by Imperative or Benedictive of verb; '1 b. that you may get a son' पुत्रं लभस्व or लप्सीष्टाः. **2** आशास् 2 A, आशिषं दा 3 U, विधू 1 P (with loc.); त्वयि वितरतु भद्रं (U. 3) 'b you with auspicious good. **3** सुखिन्-धन्य *a.* कृ 8 U, 'was b. ed with a son' सुतलाभेन कृती बभूव. **-ed**, *a.* धन्य, महाभाग, कल्याण (णी *f.*), मंगल, सुखिन्, सुखभाज्; 'of b. memory or name' सुगृहीतनामन् *a.* (म्नी *f.*), पुण्यश्लोक. **-edness**, *s.* धन्यता, कृतार्थता. **2** परमानंदः, परमसुखं; परं पदं, अपवर्गः. **-ing**, *s.* आशिस् *f.*, आशीर्वादः, आशीर्वचनं. **2** वरः, हितं, उपकारः, कुशलं, धन्यत्वं; लाभः, सुखं.

Blight, *v. t.* विफलीकृ 8 U, नशू c., *See* **Blast**; 'schemes of policy b. ed by opposing fate' विगुणविधियोगान्नयाः फलैर्हीनाः (Mu. 6). *s.* नाशः, क्षयः.

Blind, *a.* अंध; 'born b.' जन्मांधः, 'b. following the b.' अंधपरंपरा; 'b. of one eye' अक्ष्णा काणः. **2** अज्ञान, हतज्ञान. *v. t.* अंधीकृ 8 U, अंधयति (D.); 'b. ed by rage' क्रोधांधः; 'b. ed by lust' कामांधः, &c. *s.* तिरस्करिणी, व्यवधानं, यवनिका. **2** छद्मन् *n.*, कपटं. **-fold**, *v. t.* वस्त्रेण नयने पिधा 3 U or बंध् 9 P or अवरुध् 7 U: 'b. ed' बद्धनेत्र, अवरुद्धनयन. **-ly**, *adv.* अंधवत्, असमीक्ष्य, रभसा, साहसेन. **-ness**, *s.* अंधता. **2** अज्ञानं, मोहः.

Blink, *v. i.* निमील् 1 P, निमिष् 6 P. *s.*, **-ing**, निमि(मे)षः, दृष्टिनिपातः, निमीलनं.

Bliss, *s.* परमसुखं, सुखातिशयः, प्रहर्षः, धन्यता, अत्यंतसुखं. **2** अपवर्गः; *See* **Beatitude.**

-ful, *a.* आनंदमय (यी *f.*), धन्य, सानंद, परमसुखभाज्; सुखावह. **-fully,** *adv.* परमानंदपूर्वकं, सानंदं, ससुखं. **-less,** *a.* सुखहीन-रहित, निरानंद.

Blister, *s.* त्वक्स्फोटः, शोफः; व्रणः-णं, 'b. on the foot' पादस्फोटः, विपादिका. **2** स्फोटजननः उपनाहः. *-v. t.* स्फोटं उत्पद् c.

Blithe, Blithesome, *a.* हृष्ट, प्रमुदित, सानंद, प्रसन्नवदन. **-ly,** *adv.* सहर्षं, सानंदं, हृष्टमनसा. **-ness,** *s.* प्रहर्षः, आह्लादः, आनंदः.

Blizzard, *s.* सहिमवात्या, हिमवर्षयुतः प्रभंजनः.

Bloat, *v. t.* श्वि c., आप्यै c., पीनीकृ 8 U. *-v. i.* स्फाय् 1 A, श्वि 1 P, आप्यै 1 A. **-ed,** *a.* शून, पीन, स्फीत, आप्यायित. **2** हृष्ट.

Block, *s.* काष्ठं, शिला (of stone); 'b. of snow' शिलीभूतं हिमं, घनं हिमं. **2** वध्यशिलाकाष्ठं. **3** उपरोधः, प्रत्यूहः, अंतरायः. **4** पिंडः, भारः. **-up,** *v. t.* नि-,अव-,प्रति-,रुध् 7 U, स्तंभ् 9 P, प्रतिबंध् 9 P, आवृ 5 U, (आवृत्य पंथानमजस्य तस्थौ R. vii. 31). **-ade,** *v. t.* रुध् 7 U, *See* **Besiege.** *-s.* उप-अव-रोधः, परिवेष्टनं. **-head,** *s.* मूर्त्पिंडबुद्धिः, स्थूलधीः, मूढः, दुर्बुद्धिः, मूर्खः.

Blood, *s.* रक्तं, रुधिरं, शोणितं, लोहितं, असृज् *n.*, 'shed b.' रुधिरं पत् c.; 'take one's b.' हन् 2 P. **2** गोत्रं, वंशः, कुलं; 'of whole b.' सोदर, सोदर्य, सगर्भ; सनाभि; 'of noble b.' कुलीन, अभिजात; 'of royal b.' राजकुलप्रसूत. **3** (Temper) शीलं; 'not-b. ed' तीव्रकोप, सुलभकोप; 'b. rising to the cheeks' कोपप्रदीप्तानन. *-v. t.* रक्तेन लिप् 6 P or अंज् 7 P. **-less,** *a.* रक्तहीन. **2** रक्तस्रावं विना. **-letter,** *s.* रक्तस्रावकः, रुधिरमोक्षकः. **-red,** *a.* रक्त-लोहितवर्ण. **-shed,** *s.* रक्तस्रावः-पातः, वृहत्या. **-shot,** *a.* रक्तपूर्ण, शोणितप्लुत. **-thirsty,** *a.* रुधिरप्रिय; जिघांसु, वधोद्यत. **-vessel,** *s.* रक्तवाहिनी, नाडी, शिरा, असृग्वहा, धैमनी. **-y,** *a.* रक्तमय (यी *f.*), रक्ताक्त. **2** क्रूर, मारात्मक, वृशंस; 'a b. battle it was' तस्मिन् युद्धे महारक्तस्रावोऽभूत्.

Bloom, *s.* *See* **Blossom** below; 'b. of youth' यौवनभरः, नवयौवनं; 'in the b. ing youth' प्रथमे वयसि, नवयौवने. **2** रागः (कपोलरागः). *-v. i.* फुल्ल् 1 P, विकस् 1 P, स्फुट् 6 P, **2** वर्ध् 1 A, एध् 1 A.

Blossom, *s.* पुष्पं, कुसुमं, मुकुलः-लं, प्रसवः, *-v. i.* स्फुट् 6 P, प्रफुल्ल् 1 P, भिद् pass.; विकस् 1 P, मुकुलैः संनद्ध *a.* भू. **-ed, -ing,** *a.* स्फुटित, प्रफुल्ल, विकसित, भिन्न, विकच, स्फुटितकुसुम; स्मित.

Blot, *s.* कलंकः, दोषः, लक्ष्मन् *n.*, अपयशस् *n.* **2** लोपः, व्यामर्शः. *-v. t.* मलिनयति (D.), दुष् c. (दूषयति), कलंकयति (D.), क्वण्णीकृ 8 U. **2** अस्पष्टीकृ; 'b. out' विनशृ c., उच्छिद् 7 P, विलुप् c., व्यामृज् c., व्यामृश् c., 'b. ing paper' मसीशोषकः, °कं पत्रं.

Blotch, *s.* किलासं, सिध्मं; स्फोटः, विस्फोटः व्रणः-णं, सिध्मन् *n.*; 'having b. es' किलासिन्, सिध्मल. *-v. t.* मलिनयति (D.).

Blow, *s.* आ-अभि-घातः, प्रहारः; पातनं, निर्घातः; 'Oh! the hard b. of Fate' अहह दारुणो दैवनिर्घातः (U. 2); 'b. with the fist' मुष्टिघातः-प्रहारः; 'to strike a b.' मुष्टिना तड् 10 or हन् 2 P or प्रह् 1 P or अभि-आ-हन् 2 P; युध् 4 A, युद्धार्थं संमिल् 6 P. **2** स्फुटनं, विकासः, फुल्लनं. *-v. i.* *See* **Blossom**; oft. by सि 1 A; 'b. n Pâtala flower' सितपाटलं. **2** वा 2 P, वह् 1 P, प्रवह्. **3** श्वस् 2 P, उद्धम्, विनिश्वस्. *-v. t.* उद्-हन् 2 P, उद्-धू 9 U, उत्-क्षिप् 6 P, वह् **2** उत्-, श्वि c., स्फाय् c. (स्फावयति).; 'dust b. n by wind' अनिलोद्धतं रजः. **3** (As an instrument) ध्मा 1 P, मुखमारु. तेन पूर् 10, (स्नानशंखानामापूर्यमाणानां Ka. 16); 'b. hot and cold' निग्रहानुग्रहौ (युगपत्) प्रकटयति (D.). **-away,** उद्-हन्, उद्धू, उत्क्षिप्. **-out,** निर्वा c. (निर्वापयति). **-up,** वि-उत्-धू, सहसा उन्मूल् 10. **-upon,** वीज् 10. **-ing,** *s.* विकासः, व्याकोशः, स्फुटता, प्रोत्फुल्लता. **2** नादः; ध्मानं. **-pipe,** *s.* धमनी; वेणुधमनी.

Blubber, *s.* तिमिमेदस् *n.* *-v. i.* अतिरोदनात् उच्छ्वनमुख *a.* (खी *f.*) भू. **-ed,** *a.* उच्छ्वन, स्फीत.

Bludgeon, *s.* लगुडः, गदा.

Blue, *a.* नील, श्याम. *-s.* नीलः, नीलिमन् *m.*, नीलवर्णः. **-ish,** *a.* आनील, इषन्नील.

Bluff, *a.* स्थूल; *See* **Big.** **2** रूक्ष, परुष, उग्र.

Blunder, *s.* प्रमादः, स्खलितं, दोषः. *-v. i.* प्रमद् 4 P, स्खल् 1 P, भ्रम् 1, 4 P. **-er,** *s.* प्रमादिन् *m.*, स्खलनशीलः. **-ing,** *a.* प्रमादिन्, प्रमत्त, अनवधान, अदक्ष. **-ingly,** *adv.* सप्रमादं, स्खलनपूर्वं.

Blunt, *a.* धाराहीन, अतीक्ष्ण, कुंठित, निस्तेजस्. **2** स्थूल, घन; मंद, अविदग्ध. **3** सरल, अजिह्म, ऋजुप्रकृति. **4** रूक्ष, परुष, कर्कश, असभ्य. *-v. t.* कुंठीकृ 8 U, तीक्ष्णतां विलुप् c.; कु with (*a.*); तेजो हृ 1 P. **2** न्यूनीकृ, शम् c. (शमयति). **-ly,** *adv.* सरलतया, अजिह्मं; परुषोक्त्या, सपारुष्यं; अविदग्धं **-ness,** *s.* अतीक्ष्णता, स्थूलता, पारुष्यं, &c.

Blur, *s.* कलंकः, मलं, दूषणं. *-v. t.* मलिनयति (D.), मलेन लिप् 6 P.

Blurt, *v. t.* असमीक्ष्य-अविचार्य-वद् 1 P.

Blush, *v. i.* लज्जां नद् 10, व्रीड् 3 P, लज्ज् 6 A, त्रप् 1 A; व्रीडया-त्रपया-अधोमुख *a.* (स्त्री *f.*) भू 1 P. **2** अरुणीभू, लोहितायते (D.). **-v. *t.*** अरुणीकृ 8 U. **-s.** अरुणिमन् *m.*, रक्तिमन् *m.*, कपोलरागः. **2** लज्जा, व्रीडा, त्रपा, व्रीः; 'put to b.' व्रीड् c. (व्रेडयति). **-ing,** *a.* प्रफुल्ल, विकसित; 'bears b. honors' संमानरूपाणि विकसितकुसुमानि धारयति, संमानरूपपुष्पभरेणानतः. **2** (Blushful) लज्जित, सव्रीड, सत्रप, लज्जावनत, व्रीडपरिगत, त्रपाधोमुख (स्त्री *f.*).

Bluster, *v. i.* गर्ज् 1 P, तुमुलं-कोलाहलं कृ 8 U, उच्चैः आरट् 1 P, उत्क्रुश् 1 P. **2** विकत्थ् 1 A, श्लाघ् 1 A. **3** तर्ज् 10 A, भर्त्स् 10 A. **-er,** *s.* कलहकारः, दांभिकः, विकत्थिन्; आत्मश्लाघापरः. **-s.,** **-ing,** *s.* गर्जनं, तुमुलं, कोलाहलः; उच्चैः आरटनं, उत्क्रोशः.

Boa-constrictor, *s.* अजगरः, शयुः, वाहसः.

Boar, *s.* वराहः, किरिः-रः, शू(सू)करः, कोलः, घृ(गृ)ष्टिः, पोत्रिन् *m.*, किटिः, दंष्टिन् *m.*, घोणिन् *m.*, स्तब्धरोमन् *m.*, क्रोडः, भूदारः. **-ish,** *a.* वाराह (ही *f.*). **2** असभ्य, ग्राम्य.

Board, *s.* फलकः-कं; भोजनासनं, काष्ठखंडं. **2** ग्रासः, भोजनं, आहारः. **3** सभा, परिषद् *f.*, समाजः, गणः, वर्गः. **4** नौकातलं-पुटं; 'to go on b. a ship' पोतं आ-अधि-रुह् 1 P; 'on b.' नौकारूढ *a.*, नौतले. **5** अष्टापदं, क्षारिफलं. **-v. *t.*** बलात् नावं आरुह् 1 P. **2** फलकैः आस्तृ-स्तृ 5, 9 U. **-er,** *s.* निरूपितमूल्येन भोक्तृ *m.*

Boast, *v. i.* विकत्थ् 1 A दृप् 4 P, (with instr.) नात्मना दृप्यति; आत्मानं श्लाघ् 1 A, गर्वं वह् 1 P (with gen.); (सुधा यौवनगर्वं वहसि M. 4). **-er,** *s.* आत्मश्लाघिन् *m.*, विकत्थनशीलः, शूरंमन्यः. **-ful,** *a.* आत्मश्लाघापर, विकत्थन, दृप्त, गर्वित, अवलिप्त. **-fully,** *adv.* गवण, सदर्पं, विकत्थनपूर्वं. **-ing,** *s.* आत्मश्लाघा, अहंकारोक्ति *f.*, दर्पः, विकत्थनं, गर्वः. **-ingly,** *adv.* सगर्वं, सदर्पं.

Boat, *s* नौः, तरीः, तरणि-णी *f.*; 'a small b.' उडुपं, नौका, प्लवः, कोलः; 'b. man' *s.* नाविकः, पोतवाहः, औडुपिकः; 'b. swain' *s.* मुख्यनाविकः, कर्णधारः.

Bob, *v. t.* तड् 10; *See* **Beat.** **2** Crop, q. v. **-v. *i.*** इतस्ततो लुड् 6 P, 1 A, स्फुर् 6 P, चंच् 1 P.

Bobbin, *s.* तंतुकीलः, कपालनाडिका.

Bobtail, *s.* छिन्नपुच्छधारिन् *m.* छिन्नपुच्छः.

Bode, *v. t.* शुभाशुभं सूच् 10; आविद् c., कथ् 10., प्राक् शंस् 1 P, *See* **Predict**; 'absence of delay b. s future success' अव्याक्षेपो भविष्यत्याः कार्यसिद्धेर्हि लक्षणं (R. x. 6). 'b. s evil to the country' जनपदस्य अनिष्टशंसि-सूचक, अशुभचिह्नं-लक्षणं. **-ment,** *s.* शुभाशुभलक्षणं; पूर्वचिह्नं, निमित्तं.

Bodice, *s.* कंचुकः, चोलः, कूर्पासकः-कं.

Bodkin, *s.* सूचि-ची *f.* **2** छुरिका, वेधनिका, कृपाणिका.

Body, *s.* शरीरं, कायः, देहः, विग्रहः, अंगं, वपुस् *n.*, कलेवरं, तनु-नू *f.*, गात्रं; 'dead b.' शवः-वं,, कुणपः. **2** (Some b.) कः or का or किम्-अपि or चित् or चन; जनः, लोकः. **3** पदार्थः, वस्तु *n.* **4** समवायः, समूहः, संघातः, वृंदं, समाजः, समुदायः; 'in a b.' समेत *a.*, संहत *a.*, एकत्र मिलित *a.* **5** समागमः, श्रेणी. **6** कांडः-डं, स्कंधः; 'b. of the house' गर्भः, अभ्यंतरं, उदरं; b. of troops' सैन्यदलं; 'b. guard' आसन्नपरिचारकः-रिका, परिवारगणः. **-Bodiless,** *a.* अ (अन्) in comp. with (*s.*); अनंग, &c. **-Bodily,** *a.* शारीरिक-दैहिक-कायिक (की *f.*); gen. (*s.*) in comp.; 'b. pain' शरीरवेदना, देहक्लेशः &c. **-*adv.*** सशरीरं, सांगं. **2** साकल्येन.

Bog, *s.* अनूपः, कच्छभूः, पंकः. **-Boggy,** पंकिल, आनूप (पी *f.*).

Boggle, *v. i.* वि-आ-शंकू 1 A, संदिह् 2 U, विकत्थ् 1 A. **-er,** *s.* शंकितमतिः, शंकाशीलः

Bogus, *a.* छाद्मिक.

Bogy, *s.* पिशाचः, भूतः.

Boil, *v. t.* पच् 1 P, उत्कथ् 1 P, श्रा 2 P. **-*v. i.*** कथ् pass., तप्-पच् pass.; 'b. ing with anger' कोपपरीतमानसः, संतप्तचित्तः. **2** फेनायते (D.). **-*s.*** व्रणः-णं, स्फोटः, विस्फोटः, पिटकः, पिट(टि)का, गंडः. **-ed,** *a.* उरुव्य, पक्व, स्थालीपक्व. **2** श्राण, शृत. **-er,** *s.* स्थाली, पिठरः-रं; उखा.

Boisterous, *a.* गर्जनकारिन्; प्रचंड, उत्कट; 'b. noise' कोलाहलः, तुमुलरवः, उच्चैराक्रोशः. **2** कलह-तुमुल-कारिन्; 'b. laugh' अट्टहासः. **-ly,** *adv.* प्रचंडं, उत्कटं, कोलाहलेन. **-ness,** *s.* प्रचंडता, &c.

Bold, *a.* शूर, साहसिक (की *f.*), साहसपर. **2** (Of things) साहसाभास, साहसं, (इति वचनं साहसमात्रं S. B 79). **3** (Rude) धृष्ट, निर्लज्ज, अविनीत. **4** प्रगल्भ, निर्विशंक, निर्भय, निर्भीक. **5** सुप्रकाश, स्पष्ट; 'he made b. to say' स निर्भयमुवाच; 'to be b.' धृष् 5 P. **-ly,** *adv.* साहसेन, निर्भयं, प्रगल्भं; धृष्टतया. **-ness,** *s.* साहसं, शौर्यं. **2** धृष्टता, अविनयः. **3** प्रगल्भता, निर्भयता.

Bole, *s.* स्कंधः, प्रकांडः.

Boll, *s.* नाडि-डी *f.*; कांडः-डं.

Bolster, *s.* उपधानं, उपबर्हः; बधः; आलंबः. **-*v. t.*** (up) संस्तंभ् 9 P. समालंब् 1 A.

Bolt, *s.* अर्गलाबंधः, अर्गलं, कालकं, कालः-लं. **2** शूलः-लं, शकुः, शरः. **-***v. t.* अर्गलेन रुध् 7 U or पिधा 3 U or बंध् 9 P; कीलयति (D.). **2** तितउना क्षुद् c. or चल् c. **-***v. i.* (away, out) सहसा-अलक्षित निर्गम्-निःसृ 1 P, or अपक्रम् 1 U, 4 P, or अपया 2 P.

Bolus, *s.* गुली, गुलिका.

Bomb, *s.* अग्न्यस्त्रं. **-ard,** *v. t.* अग्न्यस्त्रेण अवमृद् 9 P, or विदु 9 U, 10, or चूर्ण् 10.

Bombast, *s.* दर्पवचनं, अतिशयोक्तिः *f.*, असारं वाक्यं, निःसारा उक्तिः. **-ic, -ical,** *a.* असार; दर्पधमात.

Bonafide, *a.* निर्व्याज, निर्व्यलीक. **2** *adv.* वस्तुतः, तत्त्वतः. **-s,** *s.* निर्व्याजता, निर्व्यलीकता.

Bond, *s.* बन्धः, बंधनं, पाशः, जालं; (fig. also); निगडाः (pl.); 'b. of love' प्रेमबंधः-पाशः. **2** संश्लेषः, संहति *f.*, संधिः, संबंधः. **3** प्रतिज्ञापत्रं-लेख्यं, समयपत्रं. **4** समयः, नियमः, संविद् *f.* **-age,** *s.* बंधनं, दासत्वं; 'died in b.' का गृहे-दासावस्थायां मृतः; 'bond-maid' दासी, चटी; 'bondman' दासः, भृत्यः, किंकरः.

Bonbon, *s.* मोदकः, शर्करान्वितं द्राक्षं.

Bone, *s.* अस्थि. *n.*; 'set a b.' त्रुटितास्थि संधा 3 U. **-less,** *a.* अस्थिहीन, निरस्थि. **-y,** *a.* अस्थिमय (यी *f.*). **2** अस्थिमत्, अस्थिपूर्ण.

Bonfire, *s.* जयसूचकः अग्निः.

Bonhomie, *s.* सौजन्यं, सुजनता.

Bonmot, *s.* नर्मवचनं, रसिकोक्ति *f.*

Bonnet, *s.* स्त्रीधृतं शिरोवेष्टनं, शिरस्कं.

Bonny, *a.* सुंदर (री *f.*); रूपवत् *See* **Beautiful.** **2** हृष्ट, सुप्रीत, प्रमुदित. **3** हृष्टपुष्ट, सुललित.

Bonton, *s.* विनीताचारः, सुजनता.

Bonus, *s.* वेतनाधिकं दानं.

Bonvivant, *s.* सुखैकवृत्ति *m.*

Booby, *s.* मंदबुद्धिः, मूढः, मूर्खः.

Book, *s.* पुस्तकं, ग्रंथः; 'part of a b.' अध्यायः, पर्वन् *n.*; 'b. case' ग्रंथाधारः, ग्रंथकुटा; 'b. mate' सहाध्यायिन् *m.*; 'b. worm' ग्रंथवाचनासक्तः. **-***v. t.* लेख्ये आरुह् c. **-ish,** *a.* पुस्तकपठनाच्छब्धः; व्यवहारविसंवादिन्, अव्यवहार्य.

Boom, *s.* वातवसनयष्टि, *f.* **2** नौकाश्रयद्वारावरोधकं.

Boon, *s.* वरः, पसादः, अनुग्रहः. **-***a.* हृष्ट, विलासिन्, उदार, प्रमुदित. 'b. companion,' *s.* सहपायिन् *m.*, सहभोजिन् *m.*

Boor, *s.* ग्राम्यः जनः, ग्रामिकः, वृषलः. **-ish,** *a.* ग्राम्य, अशिष्ट, असभ्य.

Boot, *v. t.* or *s. See* **Avail.** **-***s.* उपानह् *f.*, पादुका, पादत्रं. **-less,** *a.* निष्फल, व्यर्थ, निरर्थक, मोघ, निर्गुण.

Booth, *s.* पटमंडपः, उपकार्या, पटभवनं.

Booty, *s.* लोप्त्रं, लुंठितं, लुटनं.

Borax, *s.* रसशोधनः, विडं.

Border, *s.* पर्यंतः-न्तं, प्रांतः, परिसरभूमि *f.*, उत्संगः, उपांतः. **2** (Of a garment) अंचलः, दशा. **3** समंतः, सीमा, सामंतं. **4** तीरं, कूलं, तटं (of a river); 'b. of a forest' वनांतः. **-***v. i.* (on, upon) Ex. by वृत् 1 A, स्था 1 P, with (*s.*); जनस्थानपर्यंतानि दीर्घारण्यानि (U. 2) 'large forests b. ing on Janasthāna'; 'his age b. s on 20' विंशतिवर्षवयोवस्थां स्पृशति, विंशतिवर्षदेशीयोसौ. **2** कल्प, प्राय, in comp.; 'his condition b. s on poverty' तस्य दशा दारिद्र्यात्किंचिदूना, दारिद्र्यकल्पा. **-***v. t.* प्रांतयति (D.), पर्यंतं कृ 8 U; पर्यंते निविश् c.; 'garment b. ed with silk' निर्मितकौशेयप्रांतं वसनं. **-ing,** *a.* प्रत्यंत, पर्यंतस्थ, निकटस्थ.

Bore, *s.* छिद्रं, रंध्रं. **2** वेधनी. **3** छुरिरं, छिद्रव्यासः. **4** वेलोर्मि *f.*, वेलातरंगः. **-***v. t.* व्यध् 4 P, छिद्रं कृ 8 U. **-er,** *s.* वेधकः.

Boreal, *a.* उदीचीन, उत्तर.

Boreas, *s.* उत्तरवायुः.

Borrow, *v. t.* ऋणं कृ 8 U, or प्रार्थ् 10 A or ग्रह् 9 P. **2** अन्यस्माद् ग्रह् or आदा 3 A, or लभ् 1 A. **-er,** *s.* ऋणकर्तृ-गृहीतृ *m.*, ऋणयाचकः.

Bosom, *s.* वक्षस् *n.*, उरस् *n.*, क्रोडं, वक्षःस्थलं. **2** गर्भः, अभ्यंतरं. **3** हृदयं, चित्तं, मनस् *n.*; 'b. friend' हृदयंगतः सखा, नियतहृद्. **4** स्तनः, कुचः, वक्षोजः.

Boss, *s.* गंडः. **2** नियामकः. **-ed,** *a.* गंडानुविद्ध.

Botany, *s.* उद्भिद्विद्या, औषधिशास्त्रं, वनस्पतिशास्त्रं. **-ist,** *s.* औषधिशास्त्रज्ञः.

Botch, *s.* व्रणः-णं, स्फोटः. **2** छिद्रं, दोषः. **-***v. t.* जीर्णवस्त्राणि सिव् 4 P, सूच्या संधा 3 U.

Both, *pron. a.* उभौ, उभे; उभय-द्वि in comp.; उभयं, द्वयं; 'b. sides' उभयपक्षौ; 'on b. sides' उभयतः; 'in b. ways' उभयथा; 'in b. places' उभयत्र. **2** Ex. by च-च, तथा; 'does b. good and bad' शुभं चाशुभं च विदधाति.

Bother, *v. t.* क्लिश् 9 P, पीड् 10, बाध् 1 A.

Bottle, *s.* काचकूपी-पात्रं-भाजनं. **-***v. t.* काचकूप्यां निविश् c.

Bottom, *s.* तलं, अधोभागः; 'examine it to the b.' आमूलं-तलं परीक्षस्व तत्; 'you are at the b. of this plot' अस्य कपटप्रबंधस्य त्वं मूल-प्रधान-कारणं, त्वं प्रधानः प्रवर्तकः. **2**

दरी, उपत्यका, निम्नभूः, पादः. 3 मलं, शेषं, अवशेषं. –*v. i.* (upon) आलंब् 1 A, मूल in comp. **–less**, *a.* अगाध, अतलस्पर्श.

Boudoir, *s.* नेपथ्यगृहं.

Bouffant, *a.* नेपथ्य-वेश-आध्मात.

Bough, *s.* शाखा, विटपः.

Boulder, *s.* *See* '**Rock.**'

Bounce, *v. i.* प्रपत् 1 P, अभि-उत्-प्लु 1 A, सत्वर्-सवेगं-धाव् 1 P or पलाय् 1 A. 2 स्वन्-ध्वन् 1 P. 3 **Boast**, q. v. –*s.* स्फोटः, ध्वनिः, अकस्मादाघातः.

Bound, *s.* प्लुति *f.*, प्लुतं, वल्गनं. 2 मर्यादा, सीमन् *f.*, सीमा, प्रांतः, पर्यंतः, अंतः. 3 प्रतिघात, उत्पतनं. –*v. t.* Ex. by सीमा, प्रांत; 'b. ed on the south by the ocean' अस्य दक्षिणा सीमा सागरः; 'b. ed by dales on all sides' दरीपरिगतः; *See* **Border.** 2 नियम् 1 P, निग्रह् 9 P. –*v. i.* उत्प्लु 1 A, वल्ग् 1 P. **–up**, उत्पत् 1 P. **–less**, *a.* अनंत, अमित, निःसीम, निरवधि. **–Boundary**, *s.* सीमा, सीमन् *f.*, मर्यादा, पर्यंतः, प्रांतः, अवधिः.

Bounteous, Bountiful, *a.* वदान्य, उदार, मुक्तहस्त, दान-त्याग-शील. **–ly**, *adv.* अतित्यागेन, उदारवत्, मुक्तहस्तं. **–Bounty, –ness**, *s.* औदार्यं, वदान्यता, मुक्तहस्तता, त्यागिता. 2 प्रदानं, पारितोषिकं. 3 कृपा, अनुग्रहः, प्रसादः.

Bouquet, *s.* कुसुमस्तबकः, पुष्पगुच्छः.

Bourn, *See* **Boundary.**

Cogitate, *v. t.* चिंत् 10, ध्यै 1 P, विचर् c., विमृश् 6 P, आलोच् 10, वितर्क् 10. **-ion,** *s.* चिंता, विचारः, आलोचनं, विमर्शः, वितर्कः. **-ive,** *a.* चिंतनक्षम. **2** चिंतनपर. **-Cogitable,** *a.* चिंत्यं, मनोगोचर.
Cognate, *a.* सजाति, एकजातीय, सगोत्र, संबंधिन्, तुल्य-समान-प्रभव. **-***s.* सनाभि *m.*, ज्ञाति *m.* **-ion,** *s.* बंधुता, ज्ञाति-भावः, संबंधः सजातीयत्वं.
Cognition, *s.* ज्ञानं, प्रज्ञानं.
Cognis(z)e, *v. t.* अभिज्ञा 9 U. **-able,** ज्ञेय, बोध्य. **2** विचार्य, अनुसंधेय.
Cognizance, *s.* विचारणं, अनुसंधानं, चर्चा; अनुयोगः. **2** चिह्नं, लक्षणं, संज्ञा, लिंगं; 'take c. of' अनुसंधा 3 U, विचर् c., अनुयुज् 7 A, ज्ञा 9 U, अवेक्ष् 1 A. 'To have c. of,' अभिज्ञा 9 U.
Cognomen, *s.* उप-कुल-नामन् *n.*
Cohabit, *v. i.* संवस् 1 P; अभिगम् 1 P. (with another's wife), संभोगं कृ 8 U.
Coheir, *s.* सहदायभाज् *m.*
Cohere, *v. i.* संसंज्-संयुज्-संहन्-संश्लिष्-pass. **2** युज् pass. **-ence,** *s.* संसक्ति *f.*, संश्लेषः, संयोगः. **2** संबंधः, संगति *f.*, अन्वयः, संदर्भः, अविरोधः. **-ent,** *a.* संसक्त, संश्लिष्ट, संहत, संलग्न. **2** संगत, अविरुद्ध, संबद्ध, अनुरूप, सान्वय. **-Cohesion,** *s.* संसक्ति *f.*, संयोगः, संश्लेषः, संलग्नता. **-Cohesive,** *a.* सांद्र, संलग्नशील, स्निग्ध.
Cohobate, *v. t.* पुनः संधा 3 U.
Cohort, *s.* सैन्यदलं-गुल्मं.
Coif, *s.* मुकुटः, शिरस्त्रं, शिरोवेष्टनं.
Coil, *s.* मंडलं, व्यावर्तनं, आवेष्टनं; गुणः (of a rope). **2** तुमुलं, व्यस्तता; 'mortal c.' नश्वरदेहः. **-***v. t.* मंडलीकृ 8 U, वर्तुलीकृ पुटीकृ; व्यावृत् c., आ-परिवेष्ट् c.
Coin, *s.* मुद्रा, नाणकं, टंकः; 'copper c.' पणः; 'I paid him in his own c.' यथैव स मयि व्यवाहरत्तथैवाहं तस्मिन्नाचरं. **-***v. t.* मुद्रयति (ऽ), मुद्रया अंक् 10. **2** सृज् 6 P, कल्प् c., निर्मा 3 A. **-age,** *s.* मुद्रा; कल्पना, सृष्टि *f.* **-er,** *s.* मुद्राकारः, कल्पकः.
Coincide, *v. i* एकीभू 1 P, संगम् 1 A, संसन्निपत् 1 P; संधा-संयुज्-pass. **2** संमन् 4 A, एकाचित्तीभू; *See* **Agree** **3** अनुरूप *a.* भू, युज् pass., अनुवृत् 1 A. संवद् 1 P, तुल्य-समान-*a.* भू. **-ence,** *s.* संनिपातः, संगमः; संयोगः. **2** संमति *f.*, ऐकमत्यं, संधिः, एकाचित्तता. **3** संवादः, अनुरूपता, आनुगुण्यं. **4** दैवयोगः-घटनं; 'by an unlucky c.' दुर्दैवात्. **-ent,** *a.* संपातिन्. **2** समकालीन **3** अविरुद्ध, अनुरूप, संवादिन्.
Coinstantaneous, *a.* समकालीन.
Coir, *s.* नारिकेलत्वक्तंतु *m.*
Coition, *s.* मैथुनं, सुरतं, रतिक्रिया.
Coke, *s.* अर्धदग्धांगारोच्छिष्टं.
Colaborator(teur), *s.* सह-कारिन्-कृत् *m.*
Colander, *s.* चालनी, शोधनी, तितउः.
Colation, *s.* शोधनं, चालनं.
Cold, *a.* शीत, शिशिर, हिम, शीतल, तुषार, अधर्म; 'c. rayed' (moon) हिमांशुः, शीतकरः, &c.; 'c. season' हिमागमः, शिशिरः,

शीतकालः. 2 (fig.) अनादरयुक्त, विरक्त, निःस्नेह, निरुत्साह, उदासीन; 'gave me a c. welcome' निरुत्साहं स्वागत मां व्याजहार, मत्संभावनायां तेन औदासीन्यं दर्शितं; 'in c. blood' प्रकोपनं विना; पूर्वसंकल्पेन; 'c. blooded or hearted,' *a.* निर्दय, निष्ठुर; 'to take or catch c.,' *v. i.* शीताकुल *a.* भू 1 P; 'to give the c. shoulder to,' अनादरं दृश् c. 2 निराकृ 8 U. **-s.** शीतं, शैत्यं; शिशिरः, हिमः. 2 प्रतिश्यायः; 'suffering from c.' शीतार्त. **-ly,** *adv.* शीतं, शैत्येन. 2 निरुत्साहं, विरक्तं, उदासीनतया. **-ness,** *s.* शीतता, हिमता, शैत्यं. 2 अनादरः, निःस्नेहता, विरागः, विरक्ति *f.*, औदासीन्यं.

Colic, *s.* शूलः-लं, उदर-जठर-व्यथा-शूलं. **-a.** उदरव्यथाजनक.

Collapse, *v. i.* क्षयं-लयं-गम् 1 P, अ- इ 1 P. 2 संह-हृ. pass.; संकुच् 1 P; सं- पत् 1 P. **-s.** संकोचः. 2 संहारः, क्षयः, अवसादः. 3 सन्निपातः, शक्तिपातः, लय.

Collar, *s.* ग्रैवेयं-वेयं, कंठभूषणं, माला. 2 ठपाशः. **-v.** *t.* ग्रैवेये-ग्रैवे-धृ 1 P. **-bone,** *s.* ग्रीवास्थि *n.*, जत्रु *n.*

Collate, *v. t.* समवलोक् 10, परीक्ष् 1 A; उपमा 3 A, संशुध् c. 2 वृत्तिं प्रदा 3 U. **-ion,** *s.* संपरीक्षणं, संशोधनं, उपमानं. 2 कल्यवर्तः, प्रातर्भक्ष्यः फलादिसंभारः, प्रातराशः. 3 वृत्तिप्रतिपादनं.

Collateral, *a.* आनुषांगिक-प्रासंगिक (की *f.*) असरल. 2 भिन्नशाख, उपलोम. 3 समानोदक, सपिंड. 4 पार्श्वापार्श्विगत. **-s.** समकालीनः. 2 सपिंडः **-ly,** *adv.* पार्श्वापार्श्वि; असरलं, वक्रं, प्रसंगतः.

Colleague, *s.* सहायः, सहकारिन् *m.*, समानव्यापारः, एकाधिकरणिन् *m.*

Collect, *v. t.* चि 5 U, अव-वि-सं-नि-°, समानी 1 P, संग्रह् 9 P, समाहृ 1 P, संभृ 3 U, समाक्षिप् 6 P, पिंडीकृ 8 U, राशीकृ, एकत्र कृ. 2 अनुमा 3 A, ऊहृ 1 A, अवगम् 1 P; 'c. ed his mind into itself' चित्तं समादधौ; 'c. oneself' संज्ञां-चेतनां-लभ् 1 A or आ-प्रति-पद् 4 P, चेतः-मनः-समाधा 3 U. **-***v. i.* संभिल् 6 P, समागम् 1 P; *See* **Assemble, -ion,** *s.* गणः, संघः, समवायः, निवहः, चयः, समूहः, ओघः, समुच्चयः, समाहारः, समुदायः, वृंदं. **-ive,** *a.* समवेत, संहत, समाहृत, गणीभूत, समवायिन्, एकीकृत. **-ively,** *adv.* एकीभूय, संभूय; संघशः, साकल्येन. **-or,** *s.* संग्राहकः, संचेतृ *m.* 2 करग्राहकः.

College, *s.* विद्यालयः-यं, पाठशाला. 2 मठः, विहारः. 3 गणः, समाजः, जनसमूहः. **-Collegian,** *s.* विद्यार्थिन् *m.*, छात्रः; विद्यालयप्रविष्टः.

Collet, *See* **Collar.**

Collide, *v. i.* सं-समा-हन् 2 U, संघट्ट् 1 A or c.; संसृज् 9 P. **-Collision,** *s.* संघट्टः, समाघातः, प्रतिवातः, संमर्दः, संघर्षणं.

Colligation, *s.* संबंधः.

Collimation, *s.* संधानं.

Collinear, *a.* समरेखास्थित.

Collocate, *v. t.* सं-प्रति-स्था c. (स्थापयति), निधा 3 U, न्यस् 4 P, निविश् c. 2 नियुज् 7 A, 10. **-ion,** *s.* स्थापनं, निवेशनं.

Collocution, *s.* संभाषणं, कथाप्रसंगः, कथायोगः, संवादः, संकथा.

Collogue, *See* **Flatter.**

Colonnade, *s* समानांतरस्तंभपंक्ति *f.*

Collop, *s.* मांसखंडः-लवः.

Colloquy, *s.* संलापः, संकथा, संभाषणं, संवादः. **-al,** *a.* आलापाविषय, भाषणप्रयुक्त; 'c. style' संलापोचिता भाषासरणिः.

Collude, *v. i.* पक्षपातं-कूटं कृ 8 U; वच् 10-कूट-योगं कृ. **-Collusion,** *s.* पक्षपातः, कूटसंविद् *f.*; प्रतारणा, शाठ्यं, कपटं.

Colly, *s.* अंगारमलं-किट्टं. **-***v. t.* अंगारेण कृष्णीकृ 8 U. **-ed,** *a.* अंगारमलिन, मलीमस, कृष्ण. **-er,** *s.* अंगारखनकः-विक्रेतृ *m.* **-y,** *s.* अंगारोत्पत्तिस्थानं.

Collyrium, *s.* अंजनं, कज्जलं, नेत्ररंजनं.

Colon, *s.* द्विबिंदुः. 2 महदंत्रं.

Colonel, *s.* गुल्मपतिः, सैन्यदलाध्यक्षः, वाहिनीपतिः.

Colony, *s.* अधिनिवेशः; वासितः प्रदेशः. 2 गणः, संघः; *See* **Collection. -ist,** *s.* अधिवासिन् *m.*, अधिनिवेशिन् *m.* **-ize,** *v. t.* अधिवस् 1 P, अधिनिविश् 6 P, अध्यास् 2 A, (with acc.).

Colossus, *s.* बृहत्प्रतिमा, भीमविग्रहा मूर्तिः. **-Colossal,** *a.* बृहत्काय, अतिमानुषाकार, भीमविग्रह.

Colour, *s.* वर्णः, रागः, रंगः. 2 वर्णकः-का, लेपः; 'change c.' विवर्णीभू; 'ruddy c. ed face' लोहिताननं; 'without c.' पांडु, विवर्ण. 3 अप-व्यप-देशः, छद्मन् *n.*, छलं, व्याजः. 4 पताका, ध्वजः, केतुः. 'C. blind,' *a.* वर्णविवेकाक्षम, 'to come off with flying c. s.' विजयिन् *a.* भू 1 P, पतांकां उद्धून्वत् *a.* आगम् 1 P; कार्यसिद्धिं प्रकट् 10, 'to come out in one's true c. s.' स्वभावं प्रकट् 10; 'fast c.' स्थायिन् *a.* वर्णः; to fight under false c. s,' स्वहेतुगोपनाय व्याजं पुरस्कृ 8U; 'to give c.' उच्चिनत्वं आरुह् c.; 'high c.' ताम्रवर्णः; 'to lose c.' विवर्ण *a.* भू 1 P, नष्टसौंदर्य *a.* भू 1 P.; 'off c.' नष्टप्रकर्षः; 'to paint in bright c. s.' भूष् 10, अतिशयोक्त्या वद् 1 P; 'to show one's c. s,' स्वरूप-स्वभावं-आस्था 1 P; 'to stick to one's c.'

s. स्वपक्ष-स्वमत-दृढं अवलंब् 1 A; 'under c. of' (in comp.) ex. by 'व्याजेन or छद्मना; 'without c.' निर्व्याजं. -*v. t.* रेञ् c., वर्ण् 10, चित्र् 10. **2** व्यप-अप-दिश् 6 P, आच्छद् 10, शम् c. (शमयति). **3** सत्यवदाभास् c., सत्याभास *a.* कृ 8 U, सत्यसन्निभ *a.* कृ. -*v. i.* रेञ् pass. **2** लज्जाया अरुणवदन *a.* भू, व्रीडित *a.* भू, लज्ज् 6 A. **-ing,** *s.* रेजनं; 'art of c.' चित्रकर्मन् *n.*, आलेख्यकरणं, आलेख्यविद्या. **2** वर्णनं; अलंकारः. **-ist,** *s.* वर्णिन् *m.*, रंजकः. **-less,** *a.* अवर्ण, विवर्ण, वर्णहीन. **-Colorate,** *a.* सराग, रागयुक्त. **-Colorific,** *a.* वर्णद.

Colt, *s.* अश्वशावः, किशोरः. **2** चपलः, प्रमत्तः. **-ish,** *a.* चपल, तरल, चंचल, लोल.

Colter, *s.* हलदंतः, फालदंतः.

Columbarium, Columbary, *s.* कपोतागारं, विटंकः. **-Columbine,** *a.* कपोतसदृश, कपोतीय.

Column, *s.* स्तंभः, यूपः, स्थाणुः, स्थूणा. **2** सूचिव्यूहः; सैन्यभागः. **3** पत्रभागः; धारा; 'c. of smoke' धूमराशिः, धूमोत्पीडः.

Coma, *s.* अतिनिद्रा. **-tose,** *a.* अतिनिद्रातुर.

Comate, *s.* सहायः, सहवासिन् *m.*

Comb, *s.* प्रसाधनी, कंकतः-तिका, केशमार्जनी. **2** कुक्कुटचूडा-शिखा. **3** दरी. -*v. t.* प्रसाध् c., मृज् 2 P, विजटीकृ 8 U. **-maker,** *s.* कंकतकृत् *m.*

Combat, *s* युद्धं, संग्रामः, समरं; *See* **Battle;** 'single c.' द्वंद्वयुद्धं; 'hand-to-hand-c.' बाहुबाहवि, बाहुयुद्धं; 'mingled c.' (melee) तुमुलं, रणसंकुलं. -*v. t.* युध् 4 A, विग्रह् 9 P, विवद् 1 A. -*v. i.* प्रतियुध्, प्रतिरुध् 7 U, प्रविग्रह् 9 P. **2** खंड् 10, निरस् 4 P, निराकृ 8 U; 'c. one's passions' संयम् 1 P, निग्रह् 9 P. **-ant,** *s.* योधः, योद्धृ *m.*, भटः; वीरः. **-ive,** *a.* कलहप्रिय.

Combine, *v. t.* संयुज् 7 U, 10, संश्लिष् c., संधा 3 U, संमिश्र् 10, एकीकृ 8 U. -*v. i.* मिल् 6 P, संभू 1 P, संगम् 1 A; संहत-समवेत *a.* भू, एकीभू; संयुज्-संधा-संहन्-संसृज् pass.; 'all things c. ed to ruin him' सर्वमेव तस्य नाशायाकल्पत; 'having c. ed' संभूय, मिलित्वा. **-ation,** *s.* संहतिः *f.*, संयोगः, संसर्गः, संधिः, संघातः, संगः, सहायता, संश्लेषः, व्यतिकरः, समवायः; (of letters) संधिः; 'working by c.' संभूय समुत्थानं; 'in c. with his brothers' भ्रातृसंघातवान् (राजा).

Combustible, *a.* दाह्य, दाहग्राहक; ज्वलनार्ह, दहनशील. **2** (fig.) शीघ्रकोपिन्, क्रोधिल. -*s.* दाह्यः पदार्थः.

Combustion, *s.* दाहः, दहनं, ज्वलनं, क्षोषः.

Come, *v. i.* आगम् 1 P, आया 2 P, आ-इ 2 P; उपस्था 1 U, आव्रज् 1 P, आ-अभि-पद् 4 A: 'c. what may' यद्भावि तद्भवतु; 'c. harm, c. good' यद्भावि तद्भवतु शुभमशुभं वा. **-about,** संवृत् 1 A, संभू, आपत् 1 P; 'c. across,' *See* **Meet. -back,** निवृत्, प्रत्यागम्. **-at,** or by, *See* **Get. -down,** अवतृ 1 P, अवरुह् 1 P, अवपत् 1 P. **-down upon,** (सहसा-रभसा) अवस्कंद् 1 P, आपत् 1 P, अभिद्रु 1 P, आक्रम् 1 U, 4 P. 'c. down with' देयं दा 3 U. **-forth,** निर्गम्, निःसृ 1 P, 'c. in' वशी भू 1 P; वशं गम् 1 P. **-into,** प्रविश् 6 P; 'c. into trouble' विपदाभिभू, आपद्ग्रस्त *a.* भू. **-near,** *See* **Approach. -of,** *See* **Arise. -off, out,** निष्क्रम्; निर्गम्, उदि ? P; 'came out successful' जयी बभूव. **2** प्रवृत्, संपद्, निवृत्, अवसो pass. 'c. out' प्रसिद्धिं गम्. **-over,** आश्रि 1 U. 'c. round,' प्रकृतिं आपद्. **-short,** न्यूनीभू. **-to,** सकाशं आगम्-या-इ, प्राप् 5 P, प्रकृतिमापद् 4 A, *See* **Amount;** 'c. to a head' पाकं व्रज् 1 P; सपूय *a.* भू; 'c. to blows' अन्योन्यं प्रहर्तुं आरभ् 1 A. 'c. to life' उज्जीव् 1 P; 'came to nothing' तस्य कोऽपि परिणामो नासीत्, निष्फलं-निर्गुणं-बभूव; 'c. to pass,' आपत्, समापद्, संवृत्; 'c. to oneself' प्रकृतिमापद् 4 A, संज्ञां-चेतनां-लभ् 1 A or प्रतिपद्, प्रकृतौ स्था; 'c. to terms,' संधिं कृ 8 U. 'c. under' समाविश् 6 P. **-up to,** समुपागम्, समाया, समुपस्-सृप्. **-up with,** आसद् c., प्राप्. **-upon,** आ-समा-पत्, उपस्था, आक्रम्. **-ing,** *s.* आगमनं. -*a.* (to come) आगामिन्; 'on the c. Monday' आगामिनि सोमवासरे; भाविन्. उत्तर; 'time to c.' उत्तरकालः; 'c. generations' *s.* पुत्रपौत्राः; उत्तरकालीना जनाः.

Comedy, *s.* भाणः, प्रहसनं, हर्षप्रधानं नाटकं. **-ian,** *s.* नटः, कुशीलवः, नर्तकः, नैहासिकः. **2** प्रहसनकृत् *m.*

Comely, *a.* चारु, सुंदर (री *f.*), सुरूप; *See* **Beautiful. -ness,** *s.* सौंदर्यं; *See* **Beauty.**

Comestible, *s. See* **'Eatable'.**

Comet, *s.* धूमकेतुः, केतुः, उत्पातः, उल्का.

Comfit, Comfiture, *s.* मिष्टान्नं, मोदकः.

Comfort, *v. t.* समा-आ-श्वस् c., सांत्व् 10. **2** संतुष् c., आनंद् c., हृष् c., सुखं दा 3 U, सुखिन्-*a.* कृ 8 U; 'c. yourself' समाश्वासिहि. -*s.* आश्वासनं, सान्त्वनं; संतोषणं. **2** सुखं, सुस्थता, सौख्यं, स्वास्थ्यं, निर्वृति *f.* **-able,** *a.* सुखकर (री *f.*), सुखद; सुखशयितं प्रष्टुं (S. 4) 'to ask whether she had a c. sleep.' **2** आश्वासक, शांतिद, क्लेशापह, क्लमविनोदक. **-ably,** *adv.*

सुखं, यथासुखं; निष्कामं; I can't sleep c. even at night ' रात्रावपि निष्कामं शयितव्यं नास्ति (S. 2). **-er,** *s.* आश्वासकः, संतोषदः, शोकापहर्तृ *m.*, सांत्ववादः. **2** ऑर्णे कंठावगुंठनं. **-less,** *a.* निरानंद, सुखरहित, संतोषहीन.

Comic, Comical, *a.* हासजनक, हासकर (री *f.*), हास्योत्पादक. **2** अपरूप, अद्भुत, **-ity, -alness,** *s.* हास्यता, कौतुकं; अपरूपता.

Comity, *s. See* **Civility.**

Comma, *s.* स्वल्पविरामः.

Command, *v. t.* आज्ञा c. (आज्ञापयति) आदिश् 6 P, व्या-सं-समा-°, विधा 3 U, शास् 2 P, नियुज् 7 A, 10. **2** अधिष्ठा 1 P, अध्यास् 2 A; ईश् 2 A, प्रभू, (with gen.); ' Rákshasas c. ed by 2 chieftains ' नायकाभ्यामधिष्ठिता राक्षसाः. **3** नियम् 1 P, निग्रह् 9 P; *See* **Control. 4** अ-स्ववशं नी 1 P, स्वायत्तीकृ 8 U. **5** अवलोकृ 10; ' sitting at a window c. ing (the view of) a well ' दीर्घिकावलोकनावाक्षगता (M. 1); ' good forms c. respect ' आकृतिविशेषेऽप्यादरः पदं करोति (M. 1); पदं हि सर्वत्र गुणैर्निधीयते (R. III. 62) ' c. notice or attention. ' **-s.** आदेशः, निदेशः, शासनं, नियोगः. **2** अधिकारः, प्रभुत्वं, आधिपत्यं, अधिष्ठातृत्वं; ' has Rákshasas under his c. ' तस्यादेशमनुवर्तमाना राक्षसाः or स राक्षसानामधिपतिः-नायकः-अधिष्ठाता; ' at c. ' वशेस्थित, *a.*; ' under one's c. ' वशीकृत, स्वाधीन; ' to the c. of the army ' सैनापत्ये; ' bring under one's c. ' आत्मवशं नी, स्वाधीनं *a.* कृ; ' though I have no c. over language ' तथाप्यविभवेपि सन् (R. I. 9); ' who has perfect c. over language ' यं वाग्विदग्धेष्वनुवर्तते (U. 1). **-ant, -er,** *s.* आज्ञापकः, आदेष्टृ *m.* **2** पतिः, अध्यक्षः, नायकः, नीः in comp.; c. of an army ' चमूपतिः, सेनानीः, सेनाध्यक्षः. **er-in-chief,** सेनापतिः, सेनाध्यक्षः. **-ment,** *s.* आज्ञा, विधिः, सूत्रं. **2** चोदना, शास्त्र-धर्म. आज्ञा.

Commemorate, *v. t.* स्मरणार्थं उत्सवं कृ 8 U. or आचर् 1 P; संकृत् 10, संस्तु c., वर्ण् 10. **-ion,** *s.* उत्सवकरणं, स्मरणोत्सवः; ' in c. of ' स्मरणार्थं, समुद्दिश्य. **-ive,** *a.* स्मारक, स्मरणकृत्.

Commence, *v.* आ-प्रा-रभ् 1 A, प्र-उप-क्रम् 1 A, प्रवृत् 1 A, व्यवसो 4 P. **2** अनुष्ठा 1 P, प्रस्तु 2 U. **-ment,** *s.* आरंभः, उपक्रमः, प्रस्तावः, सुखं, आदि *m.* **2** आमुखं, प्रस्तावना (in dramas). **3** अनुष्ठानं, प्रवृत्ति *f.*, प्रवर्तनं; ' from the c. ' आमूलात्, आदितः.

Commend, *v. t.* प्रशंस् 1 P, स्तु 2 U, श्लाघ् 1 A, कत् 10, वर्ण् 10. **2** सम्-अ c. (अर्पयति), हस्ते निक्षिप् 6 P, अधीन *a.* कृ 8 U; ' thy speech does not c. itself to me ' स्वद्वचो नाभिनंदामि (S. 2). **-able,** *a.* प्रशस्य, श्लाघ्य, स्तुत्य. **-ation,** *s.* श्लाघा, प्रशंसा, स्तुति *f.* **-atory,** *a.* श्लाघासूचक, प्रशंसाकर (री *f.*), स्तुतिद्योतक. **-er,** *s.* प्रशंसकः, स्तावकः.

Commensurate, *v. t.* अनुरूप-अनुगुण-*a.* कृ 8 U. **2** अपवृत् c. -*a.*, **-Commensurable,** *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), सम, तुल्य. **2** सापवर्त.

Comment, *v. i.* व्याकृ 8 U, व्याचक्ष् 2 A, विवृ 5 U, भाष्यं लिख् 6 P. **2** निरूप् 10, चर्चीकृ, परीक्ष् 1 A, अनुसंधा 3 U. **-ary,** *a.* टीका, व्याख्या, वृत्ति *f.*, भाष्यं. **2** निरूपणं, परीक्षणं, चर्चा. **-ator, -or,** *s.* भाष्यकृत्-कारः, व्याख्यातृ *m.*, टीकाकारः-कृत्.

Commentitious, *a.* कृत्रिम, कल्पित.

Commerce, *s.* वाणिज्यं, क्रयविक्रयः, निगमः. **2** व्यवहारः, संगतिः-ति *f.*, संसर्गः. -*v. i.* वाणिज्यं कृ 8 U, पण् 1 A, व्यवह् 1 P. **-ial,** *a.* वाणिज्य-विषयक-संबंधिन्; ' c. people ' वाणिज्यपरायणा नराः.

Commination, *s. See* **Curse, Threat.**

Commingle, *v. t.* संयुज् 7 U, 10, संमिश्र् 10, एकीकृ 8 U, संकृ 6 P; *See* **Unite.**

Comminute, *v. t.* चूर्ण् 10, विधू 7 P, क्षुद् 7 U. **-ion,** *s.* चूर्णनं, पेषणं, क्षोदः.

Commiserate, *v. t.* दय् 1 A, (with gen.), अनुकंप् 1 A. **-ion,** *s.* दया, अनुकंपा, करुणा. **-ive, Commiserable,** *a.* करुणात्मक, अनुकंपाशील, सदय, दयार्द्र.

Commissary, *s.* सैन्यानां भोजनादि परिकल्पकः **2** *See* **Deputy. -Commisariat,** *s.* सैन्यानां भोजनाद्यधिकारः. **2** सैन्यानां भोजनाद्यधिकृतः.

Commit, *v. t.* कृ 8 U, आचर् 1 P, अनुष्ठा 1 P, वि-धा 3 U **2** (Entrust) ऋ c. (अर्पयति), न्यस् 4 P, निक्षिप् 6 P. **3** नियुज् 7 A, 10, समादिश् 6 P, प्रतिपद् c.; ' c. to memory ' कंठस्थं *a.* कृ; अभ्यस् 4 U; ' c. to prison, ' कारागारे प्रविश् c., आसिच् 1 P; ' c. to writing ' अभिलिख् 6 P, लेख्ये-पत्रे आरुह् c. (पत्रारोप्य दीयतां प्रत्ययेक्षितं कार्यं S. 6), पत्रे निविश् c. (पत्रे निवेशितमुदाहरणं क्रियायाः V. 2), पत्रे ऋ c. **-tal,** *s.* आचरणं, करणं, अनुष्ठानं. **-tee,** *s.* कार्यचर्यादिका सभा, नियुक्तजनाः. **-ment,** *s.* आसेधः, निरोधः, कारावेशनं. **-Commission,** *s.* आचरणं, करणं. **2** समर्पणं, निक्षेपः, न्यासः. **3** नियोगः, व्यापारः, अधिकारः. **4** आज्ञा-शासन-पत्रं, आदेशः. **5** परार्थ-विक्रयः. **6** नियुक्तजनाः; ' c. in the

army ' सेनायां पदं. -*v. t.* नियुज् 7 A, 10, आदिश् 6 P, अधिकृ 8 U. **-er,** *s.* नियोगिन् *m.*, आधिकारिन् *m.*

Commix,-ture, *See* **Mix,-ture.**

Commode, *s.* स्त्रीमस्तकाभरणं.

Commodious, *a.* उचित, उपयुक्त, योग्य. **2** सोपकरण, यथायुक्त-योग्य. **-ly,** *adv.* युक्तं, योग्यं. **-ness,** *s.* योग्यता, औचित्यं, &c.

Commodity, *s.* पण्यं, द्रव्यं, क्रयवस्तु *n.*, भांडं.

Common, *a.* साधारण (णी *f.*), सामान्य, सर्वीय, सार्वलौकिक (की *f.*). **2** प्राकृत, ग्राम्य ; ' c. man ' प्राकृतः, पृथग्जनः, वृषलः. **3** प्रसिद्ध, व्यावहारिक (की *f.*), बहुशः कृतदृष्ट. **4** बहुस्वामिक. **5** सुलभ ; ' c. report ' जनप्रवादः ; ' c. food ' गणान्नं, सहभोजनं ; ' c. road ' प्रचारः ; ' in c. ' सामान्येन ; ' who have made c. cause with us ' अस्माभिः सहैककार्याणां (Mu. 2). **-s.** प्रचारः, सर्वसाधारणं क्षेत्रं. **-alty,** *s.* प्रजा, लोकाः, अवरवर्णाः. **-aw,** *s.* देशाचारः, देशव्यवहारः-विधिः. **-ly,** *adv.* सामान्यतः, प्रायः, साधारण्येन, बहुशः. **-place,** *a.* प्रसिद्ध, प्राकृत. **-wealth,** *s.* प्रजाधीनं राज्यतंत्रं, प्रजाप्रभुत्वं ; ' c. (of ants) ' समूहः, स्वतंत्रो गणः.

Commorancy, *s.* वासः, वसति *f.*

Commotion, *s.* क्षोभः, विप्लवः ; प्रकोपः, कलहः.

Commune, *v. i.* संभाष् 1 A, संमंत्र् 10 A, संवद् 1 P ; व्यवह 1 P ; व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरंति (S. B. 313) ' c. directly with Gods.' **-s.,** **-ion,** *s.* संभाषणं, संवादः. **2** व्यवहारः. **3** संसर्गः, संगः, संगमः. **-ity,** *s.* समाजः, जनसमूहः, प्रजाजनः, जनता, गणः. **2** सामान्यं, साधारण्यं, ऐक्यं, साम्यं.

Communicate, *v. t.* कथ् 10, निविद् c., आख्या 2 P, आचक्ष् 2 A. (with dat. of person), विद् 5 U, प्रकाश् c., वद् 1 P, विज्ञा c (ज्ञापयति), संदिश् 6 P. **2** वितृ 1 P (with loc.), दा 3 U, प्रतिपद् c. (with dat.). -*v. i.* संगम् 1 A, समागम्, संयुज् pass; ' c. ing with Sindhu ' सिंधुनदेन संगत-संगच्छमान. **2** संलप् 1 P. संवद् 1 P, संभाष् 1 A; व्यवह 1 P. **3** संचर् 1 P. **-ion,** *s.* कथनं, निवेदनं, विज्ञापनं, सूचना, लेखः, लेख्यं. **2** दानं, वितरणं. **3** संसर्गः, संव्यवहारः. **4** संकथा, संलापः, संवादः. **5** सामान्यपथः. **6** संचारः. **-ive,** *a.* संप्रदान-संवादि-शील ; ' not c. ' मितवाक्, वाग्यत.

Commute, *v. i.* परिवृत् c., विनिमे 1 A, विपर्यस् 4 P, or c., प्रतिदा 3 U. **-ation,** *s.* परिवर्तनं, विनिमयः. **2** विक्रिया, विपरिणामः, विपर्ययः ; ' c. of a curse ' उच्छापः.

Compact, *a.* सुसंहत, निबिड, घन, सांद्र, दृढ, अनंतर, अविरल. -*s.* नियमः, समयः, संविद् *f.*, अभ्युपगमः, प्रतिश्रवः ; ' a written c. ' नियमपत्रं ; ' make a c. ' संविदमभ्युपगम् 1 P. प्रतिश्रु 5 P. -*v. t.* संहन् 2 P, संधा 3 U, संश्लिष् c., घनीकृ 8U. **-ly,** *adv.* दृढं, निबिडं, घनं. **-ness,** *s.* संहति *f.* निबिडता, &c.

Companion, *s.* सखि *m.*, सहचरः, मित्रं, वयस्यः, सहायः ; सजुस् *m.* ; ' with Madhu for a c. ' मधुसहायः, मधुद्वितीयः ; ' c. of the king ' (in love matters) रहस्सुहृद्-सचिवः ; ' c. of youth ' बालसहचरः ; 'c. at school' सहाध्यायिन् *m.*, 'c. in arms' सहयोद्धृ *m.* ' c. in joy and sorrow ' समदुःखसुखः ; **-ship,** *s.* साहचर्यं, साहाय्यं, संसर्गः, संगतिं *f.*

Company, *s* साहचर्यं, संगतिं *f.*, समागमः, संसर्गः, संवासः, सहवसतिं *f.* **2** जनसमूहः, परिषद् *f.*, समाजः ; दलं, वृंदं, गणः, पंक्तिं *f.*, वर्गः ; ' c. of soldiers ; सैन्यदलं-गुल्मः ' c. of traders ' श्रेणी, नैगमाः ; ' not admissible into c.' अपांक्तेयः ; ' keep or bear c. with ' सह वस्-चर्-1 P, संगमनुव्रज् 1 P, *See* **Associate.**

Compare, *v. t.* तुल् 10 (तुलयति), उपमा 3 A; 'c. ed with the moon' शशांकेन तुलितं ; समीकृ 8 U, सदृशीकृ. **2** एकत्र परीक्ष् 1 A, संप्रधृ 10. **-Comparative,** *a.* आनुपांगिक (की *f.*), तुलनया निर्णीत, उपमाजन्य ; oft. by अपेक्षया in comp. **-ly,** *adv.* ' as c. ed with' तुलनया, औपम्येन, उपमानेन, अपेक्षया ; ' I like mango as c. ed with a Jambu fruit ' जंबुफलाद्-जंबुफलापेक्षया आम्रं मेऽधिकतरं रोचते ; ' the merits of Rāma c. ' अन्यापेक्षया रामस्य गुणाः. **-Comparison,** *s.* तुला, तुलना, उपमा-मानं, सादृश्यं, औपम्यं ; ' without c. ' अतुल, अनुपम ; ' standard of c. ' उपमानं ; ' subject of c. ' उपमेयं.

Compartment, *s.* शाला, कोष्टः, कक्षः-क्षा. **2** छेदः, भागः, अंशः.

Compass, *s.* विषयः, गोचरः ; ' within the c. of the eye ' नयनगोचरस्थ. **2** मंडलं, परिधिः, परिणाहः, विस्तारः, परिमाणं, पर्यंतः. **3** परिमितता, अनतिक्रमः. **4** दिङ्निर्णययंत्रं. -*v. t.* परिगम् 1 P, परि-इ 2 P, परिवेष्ट् 1 A, or c., परिवृ 5 U. **2** अधिगम् 1 P, लभ् 1 A, *See* **Get.** **3** घट् c. (घटयति), साध् 5 P or c., संपद् c., निष्पद् c.

Compassion, *s.* दया, अनुकंपा, कृपा, घृणा, करुणा, अनुक्रोशः ; ' feel or have c. for ' अनुकंप् 1 A, अभ्युपपद् 4 A, दयां कृ

or दृश् c. (loc.), दय् 1 A, (gen.). **-ate,** *a.* सदय, करुणार्द्र, सानुकंप, सानुक्रोश, कृपालु, दयालु, सकरुण, दयाशील. **-ately,** *adv.* सदयं, सानुकंपं, कृपया.

Compaternity, *s.* धर्मपितृत्वं.

Compatible, *a.* अनुगुण, अनुरूप, अविरुद्ध, उपयुक्त; *See* **Consistent. -Compatibility,** *s.* अविरोधः, योग्यता, अनुरूपता, अविसंवादः.

Compatriot, *s.* स्वदेशजः, एकदेशनिवासिन् *m.*

Compeer, *s.* वयस्यः, समानपदस्थः.

Compel, *v. t.* Ex. by causal, of verbs with बलाद्, बलेन, or एव; 'I shall c. you to go' त्वां गमयिष्याम्येव or बलाद् गमयिष्यामि; 'c. s payment' बलाद् दापयति &c.; 'c.s me to ask' बलादनिच्छंतमपि मां प्रश्नकर्मणि नियोजयति (Ka. 134); sometimes ex. by अवश्यं, with pot. pass. part; 'you will be c. ed to stay here' त्वयात्रावश्यं स्थातव्यं; or by प्रेर् c., प्रवृत् c. **-Compulsory,** *a.* अवश्य-क, 'it is not c. on you to go' गमनं न तेऽवश्यकं. **2** बलवत्, बलिन्. **-ly,** *adv.* बलात्, अवश्यं, बलेन, अनिच्छत् *a.* (ती-न्ती *f.*) **-Compulsion,** *s.* बलात्कारः, प्रसभं, साहसं, बलं; 'by c.' बलात्, बलेन, प्रसभं, प्रसह्य, हठात्.

Compend, Compendium, *s.* संक्षेपः, संग्रहः, संहारः, सारः. **-Compendious,** *a.* संक्षिप्त, संगृहीत, अविस्तीर्ण, परिमित, सारभूत. **-ly,** *adv.* संक्षेपेण, संक्षेपतः, समासतः, अविस्तरेण. **-ness,** *s.* संक्षेपः, अविस्तरः.

Compensate, *v. t.* परितुष् c., निष्कृतिं दा 3 U, प्रत्युपकृ 8 U, (of persons); अपाकृ, शुध् c., निस्तृ c, **-ion,** *s.* प्रतिफलं, निष्कृति *f.*, निस्तारः, पारितोषिकं. **-ive,** *a.* क्षतिहानि-पूरक.

Compete, *v. i.* स्पर्ध् 1 A, संयुध् 1 P, विजि desid. (जिगीषते); oft. ex. by अहमहमिका, अहमहमिकया प्रणामलालस्य (Ka. 81) 'c.-ing with one an[illegible] to salute first.' **-ence, -ency,** *s.* योग्यता, सामर्थ्यं, शक्ति *f.*, औचित्यं, कार्यक्षमता. **2** वृत्त्युचितं द्रव्यं; 'bare c.' ग्रासाच्छादनमात्रं. **-ent,** *a.* योग्य, उचित, समर्थ, शक्त, क्षम, पर्याप्त, कार्यक्षम, कार्यनिर्वाहक्षम. **2** परिमित, अनधिक. **-ition,** *s.* स्पर्धा, अहमहमिका, संघर्षः, विजिगीषा. **-itor,** *s.* प्रतिस्पर्धिन् *m.*, प्रत्यर्थिन् *m.*, प्रतिपक्षः, प्रतियोगिन् *m.*

Compile, *v. t.* संकल् 1 P, 10 (कलयति), सं-समा-हृ 1 P, आलोड् 10, संग्रह् 6 P. उद्धृत्य समाहृ. **-ation,** *s.* संकलनं, संग्रहः, सारः. **-er,** *s.* समाहर्तृ *m.*, संग्रहीतृ *m.*, व्यासः, संकलयितृ *m.*

Complacence, -cy, *s.* प्रसादः, संतोषः, प्रीति *f.* **2** सौजन्यं, अनुवृत्ति *f.*, दाक्षिण्यं. **-Complacent,** *a.* प्रसन्न, सुसंतुष्ट, सुप्रीत. **2** सुशील, दक्षिण. **-ly,** *adv.* प्रसादेन, प्रीत्या, सानंदं.

Complain, *v. i.* Ex. by verbs of 'telling' gen. with सशोकं, सविलापं; आ-अधि-क्षिप् 6 P; 'c. ed of her brother's rudeness to her father' भ्रातुरविनयमधिकृत्य पित्रे कथयत्, or भ्रातुरविनयाचरणं पित्रे न्यवेदयत्; 'c. ed to me of partiality' पक्षपातमधिकृत्य मां सविलापं विज्ञापयामासः; 'how can I do what you c. of' यत्त्वं मय्यारोपयसि तत्कथमहं कुर्यां. **2** विलप् 1 P, शुच् 1 P, परिदेव् 1 A, आक्रंद् 1 P, आक्रुश् 1 P. **3** अभियुज् 7 A; 10, राजकुले निविद् c. (in law). **4** पीड् pass., अनुभू 1 P; 'has been c. ing of ill-health' आमयपीडितः. **-ant,** *s.* अभियोक्तृ *m.*, अर्थिन् *m.*, अभियोगिन् *m.*, वादिन् *m.*, पिशुनः. **-er,** *s.* परिदेवकः, विलापिन् *m.* **-Complaint,** *s.* अभियोगः. **2** विज्ञापना (सविलापा); दुःखनिवेदनं, विलपनं, परिदेवनं; 'breathed out this doleful c.' इमानि परिदेविताक्षराणि सकरुणमुदीरयामास. **3** व्याधिः, पीडा, रोगः, आमयः. **4** विलपनविषयः.

Complaisance, *s.* दाक्षिण्यं, अनुवृत्ति *f.*, अनुनयः, प्रश्रयः, अनुरोधः. **-Complaisant,** *a.* दक्षिण, अनुनयिन्, अनुरोधिन्, अनुकूल, सप्रश्रय. **-ly,** *adv.* सानुनयं, सानुरोधं.

Complement, *s.* पूरणं, परिपूरकं. **2** कोटि *f.* **3** पूर्णता, सामग्र्यं.

Complete, *v. i.* समाप् c., संपद् c, साध् c.; अवसो c. (साधयति), निर्वह् c., संपॄ c. (पूरयति) or संपूर् 10, निवृत्. c. **-a.** संपूर्ण, समाप्त, अवसित, सिद्ध, संपन्न, निर्वृत्त. **2** संपूर्ण, निखिल, अखिल, समस्त, समग्र, अशेष, अन्यून. **3** पक्व, परिणत; 'c. army' सांगबलं. **-ion,** *s.* समापनं, निर्वर्तनं, संपादनं. **2** सिद्धि *f.*, समाप्ति *f.*, निर्वृत्ति *f.* **3** परिणामः, परिपाकः. **4** पूरणं, परिपूरकं. **-ly,** *adv.* संपूर्णं; निःशेषं, पर्याप्तं, निरवशेषं, अशेषतः, सर्वथा. **2** आमूलं, कार्त्स्न्येन. **-ness,** *s.* संपूर्णता, निःशेषता.

Complex, *a.* संकीर्ण, मिश्रित, विषम, संमिश्र, मिश्र, संकुल. **2** नानार्थक, असरल, बह्वर्थ. **-ity,** *s.* संकरः, मिश्रता, संकुलता.

Complexion, *s.* वर्णः, मुखरागः; 'of a pale c.' विवर्ण *a.*, पांडुवदन *a.* **2** आकारः, स्वरूपं. **3** प्रकृति *f.*, शरीरभावः. **-al,** *a.* प्रकृतिसंबंधिन्.

Complicate, *v. t.* संमिश्र् 10, संकीर्ण-संकुल **-a.** कृ 8 U, प्र-सं-कॄ 6 P, संकरी-संकुली-

कु. **-ion,** *s.* संकुलीकरणं, संकीर्णता, संमिश्रता.

Complice, *s.* पापसहायः. **-ity,** *s.* पापसहायता, सहकारिता.

Compliment, *s.* अभिनंद्यवचस् *n.*, नमस्कारः; 'presents c. s' अभिनंद्य ब्रवीति; 'give my c. s to Chyavana' च्यवनाय मां प्रणिपातय (V. 5), मदीयो नमस्कारो वाच्यः; श्वश्रूजनं सर्वं विज्ञापय प्रापितमत्प्रणामः (R. xiv 60). **2** प्रश्रयवाच् *f.*, चाटूक्ति *f.*, प्रशंसा, श्लाघा, प्रशंसोक्ति *f.*; 'high c.' उच्चैर्वादः; स्तुति *f.* *-v. t.* *See* **Praise 2** मधुरगिरा-चाटूक्त्या सांत्व् 10. **-ary,** *a.* उपचार in comp., 'c. saying' उपचारपदं; प्रियवादिन्, स्तुतिमय (यी *f.*); 'c. present' उपायनं. **-er,** *s.* प्रियवादिन् *m.*, चाटुकारः.

Complot, *v. i.* गूढं मंत्र् 10 A, कूटसंविदं कृ 8 U. *-s.* गूढ-कु-मंत्रणा, कूटसाहित्यं. **-ter,** *s.* कूटसहाय.

Comply, *v. i.* अनुविधा 3 U, अनुरुध् 4 A, अनुवृत् 1 A. **2** अनु-सं-मन् 4 A, अनुज्ञा 9 U, स्वीकृ 8 U, प्रति-परि-ग्रह् 9 P, प्रतीष् 6 P, अभ्युपगम् 1 P; क्रियतामस्याः प्रणयपरिग्रहः (Ka. 145) 'c. with her request.' **-ance,** *s.* अनुवृत्ति *f.*, अनुविधायित्वं, अनुरोधः, अनुसारः. **2** स्वीकारः, संमति *f.*, अभ्युपगमः, परिग्रहः; 'in c. with your orders' त्वच्छासनानुरोधात्-नुसारेण. **-ant,** *a.* अनुविधायिन्, अनुवृत्ति-कुशल-शील, अनुरोधिन्, वचने स्थित. **-er,** *s.* अनुरोधिन् *m.*, परिग्रहिन् *m.*

Component, *a.* or *s.* घटक, साधक, रचक; 'c. part' घटकावयवः, अंगं, भागः, साधनं.

Comport, *v. i.* **Behave,** q. v. **2** युज्-उपपद्-pass. **-able,** *a.* योग्य, उचित. **-ment,** *s.* आचारः, व्यवहारः, चेष्टितं.

Compose, *v. t.* (of books &c.) ग्रथी 1 P, विरच् 10, बंध् 9 P, निबंध्, संग्रंथ् 9 P. **2** विन्यस् 4 P, संधा 3 U, संकल्प् c., संविधा, निर्मा 3 A. **3** घट् c. (घटयति), निर्मा, कल्प् c.; or gen. ex. by आत्मक, रूप, मय (यी *f.*) in comp.; 'the body c. ed of 5 elements' पंचभिर्निर्मितो देहः, पंचभूतात्मको देहः. **4** (Calm) स्थिरीकृ 8 U, शम् c. (शमयति), प्रसद् c., संस्तंभ् c., पर्यवस्था c. (स्थापयति); 'does not yet c. (collect) himself' नाद्यापि पर्यवस्थापयत्यात्मानं (U. 3). **5** (a dispute &c.) संधा 3 U, प्रशम् c. (प्रशमयसि विवादं S. 5). **-ed,** *a.* शांत, प्रसन्न, अव्याकुल, अनुद्विग्न, स्थिरीकृत, समाहित. **2** विरचित, निर्मित, निबद्ध; 'c. in verse, or music' श्लोक-स्वर-बद्ध; 'c. of' घटित, आत्मक-(त्मिका *f.*), रूप in comp. **-edly,** *adv.* असंभ्रमं, प्रशांतचेतसा, निरुद्वेगं. **-er,** *s.* रचकः, प्रणेतृ *m.*, निबंधृ *m.* **-ition,** *s.* रचना, प्रणयनं, निर्माणं, निबंधनं. **2** विन्यासः, संधानं, प्रशमनं. **3** समसनं, मिश्रणं, संयोगः, संधिः, संघातः. **4** ग्रंथः, प्रबंधः. **-ure,** *s.* स्थैर्यं, शमः, प्रसादः, असंभ्रमः, अक्षोभः. **2** संधानं, संयोगः, मिश्रणं, निर्माणं.

Compotation, *s.* सहपानं, संपीतिः *f.*

Compound, *v. t.* संयुज् 10, संमिश्र् 10, संधा 3 U, समस् 4 P, संश्लिष् c. **2** (a dispute) संधा, समाधा c., प्रशम् c. (शमयति). *-v. i.* ऋणशोधनेन आनृण्यं गम् 1 P; 'was glad to c. for his escape with the loss of it' तत्त्याजेनापि सुस्थिरभवदिति हृष्टो बभूव. **-ed,** *a.* संयुक्त, यौगिक (की *f.*), संसृष्ट, संमिश्र, सामासिक, साधित; 'c. word' समासः. *-s.* मिश्रणं, संकरः; मिश्रितद्रव्यं, योगः. **2** परिसरभूमि *f.*, प्रांगणं (नं). **-er,** *s.* मिश्रणकृत्-समाधातृ *m.*; 'c. of medicines' औषधयोगविद् *m.*

Comprehend, *v. t.* बुध् 1 P, विद् 2 P, ज्ञा 9 U, ग्रह् 9 P, परिग्रह्, उपलभ् 1 A, अवगम् 1 P, ऊह् 1 A; विभू c., अवधृ 10. **2** व्याप् 5 P, अंतर्गण् 10, अंतर्भू c., परिग्रह् 9 P, आकल् 10, समाविश् c. **-Comprehensible,** *a.* ग्राह्य, वेद्य, अवधारणीय, विभाव्य, धीगम्य; 'easily c.' सुबोध; 'not c.' दुर्बोध, दुर्ग्रह, दुर्गम, दुर्ज्ञेय. **-Comprehension,** *s.* ग्रहणं, बोधः. **2** धी *f.*, मति *f.*, बुद्धि *f.*, अवधारणा, मेधा; 'power of c.' ग्रहणसामर्थ्यं, आकलनशक्ति *f.* **3** प्रतिसंहारः, व्याप्ति *f.*, समावेशः, अंतर्भाव. **-Comprehensive,** *a.* व्यापक, बहुविस्तीर्ण, व्यापिन्, बहुग्रह. **2** साक्षेपिक (की *f.*). **-ly,** *adv.* समासतः, संक्षेपेण. **2** व्यापकत्वेन. **-ness,** *s.* व्यापकत्वं. **2** संक्षेपः, समस्तता.

Compress, *v. t.* संवृ 5 U, संकुच् 1 P, संहन् 2 P, संपीड् 10, संदृ 1 P. **-ible,** *a.* संकोचनीय. **-ibility,** *s.* संकोचक्षमता, संहरणीयता. **-ion,** *s.* संकोचः-चनं, संहति *f.*, संपीडनं; संवरणं.

Comprise, *v. t.* व्याप् 5 P, अंतर्गण् 10, परिग्रह् 9 P, समाविश् c., अंतर्भू c.; 'to be c. ed in' अंतर्गम् 1 P, अंतर्भू 1 P, or by आत्मक, गर्भ, in comp.

Comprobation, *s.* प्रमाणं, साक्ष्यं, संमति *f.*

Compromise, *v. t.* आपुष् 10. **2** संशये पत् c., संशयस्थ *a.* कृ 8 U. *-s.* आपोषः-षणं. **2** मध्यस्थावलंबननियमः.

Comprovincial, *a.* एकदेशीय, एकदेशज.

Comptrol, *v. t.* अधिष्ठा 1 P, पर्यव-ईक्ष् 1 A. **-ler,** *s.* कार्याधिकृतः, पर्यवेक्षकः, कार्यद्रष्टृ *m.*

Compulsion, -sory, *See* under **Compel.**

Compunction, *s.* अनुशयः, अनुतापः, पश्चात्तापः. **-Compunctious,** *a.* अनुशयार्त, अनुतापिन्.

Compute, *v. t.* गण् 10, सं-परिसं-ख्या 2 P, संकल् 10. **-ation,** *s.* गणनं-ना, संख्यानं. **-er,** *s.* गणकः.

Comrade, *See* **Companion.**

Con, *v. t.* अधी 2 A, अभ्यस् 4 U.

Concatenate, *v. t.* (अविच्छेदं) संयुज् 10, संश्लिष् c., अनुबंध् 9 P, संधा 3 U. **-ion,** *s.* अविच्छेदसंयोगः, निरंतरः संश्लेषः, अनुबंधः. **3** माला, परंपरा, श्रेणी, पंक्ति *f.*

Concave, *a.* पुटाकार, उत्तान, उदराकार. **-ity,** *s.* उत्तानता, पुटः, गर्भः.

Conceal, *v. t.* गुह् 1 U, प्रच्छद् 10, अपह्नु 5 U or c., अंतर्धा 3 U; पिधा 3 U, संवृ, नि-अप-ह्नु 2 A (feelings &c.); गुप् 1 P or 10; 'c. onesolf' 'to be c. ed' अंतर्इ 2 P; 'c. ing the body (oneself) behind a bush' विटपांतरितविग्रहः (Ka. 152); ली 4 A (मातुर्निलीयते कृष्णः S. K.). **-ed,** *a.* गूढ, प्रच्छन्न, निभृत, गुप्त, निलीन. **-ment,** *s.* गूहनं, प्रच्छादनं, नि-अप-ह्नवः, गोपनं, संवरणं; 'in c.' निभृतं, रहः, गुप्तं, छन्नं.

Concede, *v. t.* अनुमन् 4 A, प्रदा 3 U, अनुज्ञा 9 U, वितृ 1 P; 'c. ed the point to him' तस्याभिप्रेतमन्वमन्यत. **2** अंगीकृ 8 U, अभ्युपगम् 1 P, प्रतिपद् 4 A. **-Concession,** *s.* प्रदानं, वितरणं; त्यागः. **2** क्षमा. **3** अंगीकारः, प्रतिपत्ति *f.*, अभ्युपगमः.

Conceive, *v. i.* गर्भं धृ 1 P, 10 or आधा 3 U, गर्भवती-आपन्नसत्त्वा-ससत्त्वा-अंतर्वत्नी भू 1 P. *-v. t.* विभू c., बुध् 1 P, अवधृ 10, अवगम् 1 P, ग्रहु 9 P, आलोच् 10, ज्ञा 9 U. **2** मन् 4 A, चित् 10, ध्यै 1 A. **3** संभू c., कल्प् c. (नरपतेर् भूषणविकयं को नाम संभावयेत् Mu. 5). **4** धृ, वहु 1 P; *See* **Bear**; 'I c. no hatred against you' त्वयि मे द्वेषबुद्धिर्नास्ति, न तुभ्यमसूयामि. **-Conception,** *s.* गर्भाधानं, गर्भधारणं. **2** विभावना, बोधः, ग्रहणं, अवधारणं. **3** विचारः, कल्पना, भावना, बुद्धि *f.*, मति *f.*, संकल्पः. **-Conceit,** *s.* अभिमानः, अवलेपः, दर्पः, अहंकारः, गर्वः; 'self-c.' स्वाभिमानः. **2** कल्पना, भावना, चिंता, विचारः. **3** मति *f.*, बुद्धि *f.*, गतं. **-ed,** *a.* हृत, अवलिप्त, अभिमानिन्, उद्धत, आत्ममानिन्, सगर्व; 'c. of learning' पंडितंमन्यः. **-edly,** *adv.* साभिमानं, सगर्वं. **-edness,** *s.* मानिता, अहंकारः, सगर्वता.

Concent .-. एकीकृ 8 U, *See* below; 'c. ed all in self' आत्मपरायणः, आत्मन्येव निविष्टचेतोवृत्तिः.

Concentrate, *v. t.* समाधा 1 P, समुपचि 5 U, एकीकृ 8 U. **2** समाधा 3 U (as mind); अनन्यमनस्क-एकाग्र-*a.* भू; 'my affections are c. ed in her' सा मे स्नेहस्यैकायनीभूता (M. 2). **-ed,** *a.* एकतान, अनन्यवृत्ति, एकाग्र, एकायन, एकसर्ग, एकाग्रच्च, एकायनगत. **-ion,** *s.* एकीकरणं, एकत्रसमाहरणं. **2** एकाग्रता, समाधिः, अनन्यमनस्कता.

Concentric,-cal, *a.* एक-समान-केंद्र.

Concern,-ment, *s.* अर्थः, व्यापारः, विषयः, कार्यं, संबंधः. **2** चिंता, उद्वेगः, औत्सुक्यं. **3** गौरवं, गुरुता, माहात्म्यं. **4** अवेक्षा, प्रणयः, अनुरागः, मनोयोगः, मनोभिनिवेशः. **5** चर्चा, व्यापारः, विचारः. *-v. t.* संबंध् 9 P, उद्दिश् 6 P, अभि 1 U; 'this does not c. you' नायं तव व्यापारः. **2** अवेक्ष् 1 A. **3** Afflict, q. v. **4** (Oneself about) व्यापृ 6 A, आत्मानं व्यापृ c., व्यापृत *a.* भू, चर्चां कृ; 'I am not c. ed in the least in this business' अनेन कर्मणा न मे कोपि संबंधः. **-ing,** *prep.* संबंधिन्-विषय in comp.; उद्दिश्य, अधिकृत्य, आश्रित्य.

Concert, *s.* एकतानः-लः, संगीतं; 'c. hall' संगीतशाला. **2** संमंत्रणा, समंत्रणं, कार्यविमर्शः, संवादः. **3** सहकारिता, संभूयकारित्वं, चित्तैक्यं, एकभावः. *-v. t.* संमंत्र् 10 A, संप्रधू 10, कार्याणि चिंत् 10 or विमृश् 6 P, संवद् 1 P. **2** संभूय-एकत्र-कृ 8 U. **3** घट् c. (घटयति), कल्प् c., चिंत् 10; 'well c. ed plan' सुघटितः-सुचिंतितः-प्रयोगः.

Conch, *s.* शंखः, कंबुः, दरः.

Conciliate, *v. t.* अनुरंज् c., आराध् 10, प्रसद् c., तुष् c., लल् 10, सांत्व् 10. **2** संधा 3 U, अनुनी 1 P. **-ion,** *s.* अनुरंजनं, सांत्वनं, प्रसादनं. **2** सामन् *n.*, संधानं. **-or,** *s.* अनुरंजकः. **2** संधानकर्तृ *m.*, मध्यस्थः. **-ory,** *a.* आराधक, सामन् in comp.; 'c. means' सामोपचाराः.

Concise, *a.* संक्षिप्त, संहृत, सामासिक (की *f.*). **-ly,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, समासतः; 'a c. worded message' लघुसंदेशपदा सरस्वती (R. VIII. 77). **-ness,** *s.* संक्षिप्तता, संहारः, अविस्तरः. **-Concision,** *s.* कर्तनं, छेदनं, उच्छेदः.

Concitation, *s.* उत्तेजनं, प्रोत्साहनं, उत्थापनं.

Conclave, *s.* समाजः, सभा, परिषद् *f.* **2** गूढसभा-समाजः. **3** कक्षांतरं.

Conclude, *v. t.* समाप् c., निर्वृत् c., अवसो 4 P, निःपद् c., संपद् c., साध् c., संपूर्-10. **2** अनुमा 3 A, विभू c., ऊह् 1 A, तर्क् 10. **3** निर्णी 1 P, निश्चि 5 U, अवधृ 10, व्यवसो 4 P; 'c. a treaty' संधिं कृ 8 U or विधा 3 U. *-v. i.* विरम् 1 P, निवृत् 1 A; प्र-उपशम् 4 P; 'when he had c. ed' वचस्यवसिते तस्य. **-Conclusion,** *s.* समाप्ति *f.*, निष्पादनं, सिद्धि *f.*, निष्पत्ति *f.*, निवृत्ति *f.* **2** अवसानं, अंतः, परिणामः, उपसंहारः. **3** अनुमानं, ऊहनं, अनुमिति *f.* **4** निर्णयः, अवधारणं, फलं, उत्तरं. **5** सिद्धांतः, राद्धांतः, उत्तर-

पक्षः, निगमनं (in logic). **-Conclusive,** *a.* अखंडय, अनिरस्य, निरुत्तर, समर्थ. **2** निर्णायक, संशयच्छेदिन्, निश्चायक. **-ly,** *adv.* सनिश्चयं, निश्चितं, संशयच्छेदितया.

Concoct, *v. t.* पच् क्वथ् 1 P, तप् c. **2** चिंत् 10, घट् c. (घटयति), प्रक्लृप् c., निरूप् 10. **-ion,** *s.* क्वाथः. **2** पाकः, पाचनं. **-ive,** *a.* पाचक.

Concomitant, *a.* आनुषंगिक (की *f.*), समवायिन्, समेत, समन्वित; सहवर्तिन्, सहकारिन्. **-s.** सहचारिन् *m.*, सहवर्तिन् *m.*, संगिन् *m.* **-ly,** *adv.* समवेतं, सहितं, सह, संभूय. **-Concomitance,** *s.* संयोगः, समन्वयः, अनुषंगः, समवायः.

Concord, *s.* ऐक्यं, एकता; चित्तैक्यं, अविसंवादः, अविप्रतिपत्ति *f.*, अविरोधः; 'c. of hearts' ऐक्यं हृदययोः, एकचित्तता. **2** प्रीति *f.*, प्रणयः, संधिः [illegible] नियमः. **4** अनुषंगः [illegible] **5** तालैक्यं, स्वरैकता. **-ance,** *s.* एकता, सादृश्यं, ऐक्यं. **-ant,** *a.* अनुरूप, अनुगुण, सदृश (शी *f.*), अविरुद्ध, संवादिन्.

Concourse, *s.* संधिः, संगमः. **2** (of people) (जन-) समूहः, संघातः, निवहः, ओघः, गणः.

Concrement, *s.* पिंडः, राशिः, घनता, संहति *f.*, संघातः.

Concrete, *v. t.* राशीकृ 8 U, पिंडीकृ, एकीकृ, घनीकृ, संहन् 2 P. **-v. i.** राशीभू 1 P, पिंडीभू, घनीभू, संहन् pass. **-s.** पिंडः, ओघः, घनचयः. **2** घनद्रव्यं, श्यानद्रव्यं. **-a.** घन, राशीभूत, संहत, श्यान, पिंडीभूत. **2** अविविक्त, अकेवल, समवेत, अन्वित. **-ion,** *s.* घनीकरणं; संहति *f.*, संघातः, **2** पिंडः, लोष्ठः, संहतद्रव्यं.

Concubine, *s.* उपपत्नी, उपस्त्री, गणिका, वारस्त्री, वेश्या; 'c. shut up' अवरोधस्त्री. **-age,** *s.* उपस्त्रीगमनं, वेश्यासेवा.

Concupiscence, *s.* कामः, अभिलाषः, रताभिरुचि *f.* **-Concupiscient,** *a.* कामुक, कामिन्, रतार्थिन्.

Concur, *v. i.* एकत्र मिल् 6 P, संगम् 1 A, संभू 1 P, संपत् 1 P, समागम् 1 P. **2** संभूय-एकीभूय-कृ 8 U, **3** संमन् 4 A, तथा मन्; अभ्युपगम्, एकचित्तीभू; *See* **Agree.** **-rence,** *s.* सं-अनु-मति *f.*, संमतं, इच्छा. **2** मतैक्यं, एकचित्तता. **-rent,** *a.* एकचित्त, संप्रतिपन्न, संवादिन्. **2** अनुषंगिन्, संभूय-सह-कारिन्. **-rently,** *adv.* संमतिपूर्वं, अनुमत्या. **2** सममेव, युगपत्.

Concussion, *s.* संघट्टः, विकंपः, निधुवनं, संक्षोभः.

Condemn, *v. t.* **Censure,** q. v. **2** दंड् 10, दंडं आदिश् 6 P or कृ 8 U; 'c. to death' वधदंडमादिश्; 'he was c. ed to be hanged' शूलमारोप्यतामसाविति दंड आदिष्टः. **3** अपराधिन् *a.* स्था c. (स्थापयति), अपराधं निर्णी 1 P; 'c. to pay' दा c. (दापयति). **-ation,** *s.* दंडनं, दंडाज्ञा. **2** अपराधनिर्णयः. **3** निंदा, गर्हा, दूषणं. **-atory,** *a.* निंदक, अपवादक. **-er,** *s.* दंडप्रणेतृ *m.* निंदकः.

Condense, *v. t.* संहन् 2 P, घनीकृ 8 U, सांद्रीकृ, श्यै c. **2** संक्षिप् 6 P. **-v. i.** सांद्री-घनी-भू, संहन् pass., श्यै 1 A. **-a.** **-ed,** *a.* घन, सांद्र, निबिड, श्यान; संक्षिप्त. **2** स्थूल, अविरल. **-ation,** *s.* घनीकरणं. **-ity,** *s.* घनता, निबिडता, &c.

Condescend, *v. i.* प्रसद् 1 P, अर्ह् 1 P, (followed by inf.); *See* **Please**; 'the king c. -ed to speak with his servant' प्रसन्नो भूत्वा, दक्षिणतया, गौरवं-अभिमानं-अपास्य, भृत्येन सहाभाषत; 'c. to look at me' मयि दृष्टिप्रसादं कुरु. **2** अनुवृत् 1 A, अनुमन् 4 A, अनुज्ञा 9 U. **-ing,** *a.* प्रसादाभिमुख (खी *f.*), प्रसन्न, अस्तगर्व, त्यक्तगौरव. **-ingly,** *adv.* अगर्वं, प्रसन्नतया, नम्रतया. **-Condescension,** *s.* प्रसादः, दाक्षिण्यं, दर्पत्यागः, गौरवत्यागः, नम्रता.

Condign, *a.* यथार्ह, अनुरूप, समुचित, योग्य **-ly,** *adv.* यथार्हं, यथोचितं. **-ness,** *s.* योग्यता, औचित्यं.

Condiment, *s.* व्यंजनं, उपस्करः.

Condisciple, *s.* सतीर्थः (-र्थ्यः), एकगुरुः.

Condition, *s.* दशा, अवस्था, भावः, स्थिति *f.*, वृत्ति *f.*, गति *f.*; 'in this c.' एवंविध *a.*, एवंभूत *a.*; oft. ex. by त्व & ता affixed; दरिद्रता, दुर्गतत्वं, &c. **2** समयः, नियमः, प्रतिज्ञा, अभिसंधिः; संकेतः; 'on this c.' अनेन समयेन. **3** अर्थः, आस्पदं, पदं; अधिकारः, भावः. **4** गुणः, उपाधिः, विशेषणं, प्रकृति *f.* **-al,** *a.* समययुक्त, सोपाधिक (की *f.*), सनियम, नियत; संकेतार्थ. **-ally,** *adv.* समयपूर्वकं, सप्रतिज्ञं, समयपुरःसरं. **-ed,** *a.* स्थित, वर्तिन्, स्थ in comp.; 'well c.' सुस्थित, सुस्थ.

Condole, *v. i.* समदुःख *a.* भू 1 P, (अन्यं) अनुशुच् 1 P, शोकार्तं समदुःखेन सांत्व् 10. **-ence,** *s.* समदुःखता, अनुशोचनं; शोकः, संपरिदेवनं. **-er,** *s* समदुःखभागिन् *m.*

Condone, *v. t.* क्षम् 1 A, प्रशुष् c., प्रमृज् 2 P. **-ation,** *s.* क्षमा, अपराधक्षमा, प्रमार्जनं.

Conduce, *v. i.* (to) आवह् 1 P; (महदपि राज्यं न मे सौख्यमावहति P. I. 1), भू with dat., क्लृप् 1 A, संपद् 4 A, (dat.). **2** वृध् c., संपद् c., उत्पद् c., प्रवृत् c. **-ive,** *a.* आवह, कर (री *f.*), जनक, in comp.; 'c. to happiness' सुखावह, हितकर, &c.

Conduct, *v. t.* नी 1 P, प्राप् c. (ननु मां प्रापय पत्युरंतिकं K. IV. 32), गम् c. (गमयति), वह् 1 P. **2** विधा 3 U, निर्वह् c., प्रवृत् c., प्रणी. **3** (oneself) वृत् 1 A.

व्यवह् 1 P, आचर् 1 P, *See* **Act**; 'c. oneself properly' सदाचरेण वृत्, सदाचारं प्रतिपद् 4 A; 'well c. ed' साधुवृत्त, सदाचार. 4 परि-अनु-चर् 1 P, अनुया 2 P, मार्गं दृश् c. or आदिश् 6 P. **-s.** निर्वाहणं, निर्वाहः, प्रणयनं. **2** वृत्ति *f.*, वृत्तं, आचारः, व्यवहारः, कर्मन् *n.*, चरितं, चेष्टितं, आचरणं. **3** परिचरः, मार्गदर्शकः. **-or,** *s.* नायकः, अग्रगः, नेतृ *m.*, अग्रणीः, (of heat &c.) प्रवाहकः. **2** निर्वाहकः, प्रणेतृ *m.*

Conduit, *s.* प्रणाली, जलनिगमः. **2** कुल्या.

Cone, *s.* सूचि-ची *f.*, शिखा. **2** शंकुः. **-Conic, -Conical,** *a.* सूच्याकार, शंकाकृति.

Confabulate, *See* **Converse.**

Confect, *v. t.* उपस्कृ 8 U, स्वादु *a.* कृ. **-ion,** *s.* उपस्करः, भिष्टान्नं, मोदकः. **-ionery,** *s.* मोदकविक्रयस्थानं, मोदककियास्थानं **-ioner,** *s.* आपूपिकः, भक्ष्यकारः,

Confederate, *v. t.* संधा 3 U, संयुज् 7 U, 10, एकत्र कृ 8 U. **-***v. i.* संघह् 1 A, संयुज् pass., संधिं कृ. **-***a.* संधिबद्ध, सुश्लिष्ट, कृतसंधि. संयुक्त, संघातवत्. **-***s.* सहायः, सहकारिन् *m.*, सहयोगिन् *m.* **-ion,** *s.* संधानं; संयोजनं. **-Confederacy,** *s.* संधिः, साहित्यं, संघातः, संयोगः.

Confer, *v. t.* (upon) विधू 1 P (with loc.), प्रतिपद् c., दा 3 U, 1 P (with dat.); 'I shall c. upon you 100 grants of land' त्वां शासनशतेन योजयिष्यामि (P. I. 1). **2** आवह् 1 P, दा, उत्पद् c. **3** Compare, q. v.; 'c. a favour' प्रसादं कृ 8 U, अनुग्रहं 9 P; 'c.-ing pleasure, सुखद, सुखावह. **-***v. i.* संभाष् 1 A, संलप् 1 P, संवद् 1 P. **2** संमंत्र् 10 A, संचिंत् 10, विचर् c. **-ence,** *s.* संवादः; संकथा, संभाषणं. **2** मंत्रणं. **3** उपमानं. **4** मेलकः, समाजः. **-rer,** *s.* दातृ *m.*, द or प्रद in comp.

Confess, *v. t.* स्वीकृ 8 U, अंगीकृ, प्रतिपद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P. **2** विधू 5 U, सूच् 10, प्रकाशं c., ख्या c. (ख्यापयति). **3** (आचार्याय-गुरवे) पापानि निविद् c. or कथ् 10. **-edly,** *adv.* असंशयं, व्यक्तं, प्रतिपत्तिपूर्वकं. **-ion,** *s.* अंगीकारः, संप्रतिपत्ति *f.*, अभ्युपगमः, ग्रहणं. **2** ख्यापनं, प्रकाशनं. **3** पापनिवेदनं. **-or,** *s.* स्वीकर्तृ *m.*; ख्यापकः.

Confide, *v. i.* विश्वस् 2 P, प्रति-इ 2 P, श्रद्धा 3 U; 'she was made to c. in a false man' असत्यसंधे जने पदं कारिता (S. 4). **-***v. t.* निक्षिप् 6 P, न्यस् 4 P (with loc.), सम्-ऋ c. (अर्पयति); 'have you kept the secret c. ed to you' अपि रक्ष्यते रहस्यनिक्षेपः (V. 2). **-ant,** *s.* विश्वास-विश्रंभ-भूमि *f.*, सखि *m.*, वयस्यः. **2** (of a woman) सखी, वयस्या, आलि-ली *f.* **-ence,** *s.* विश्वासः, विश्रंभः, प्रत्ययः; श्रद्धा. **2** निश्चयः, दृढप्रत्ययः, दृढज्ञानं, असंशयः; 'enter into c.' विश्वासं गम् 1 P or व्रज् 1 P; 'raising of c.' विश्वासोपगमः; 'inspire with c.' विश्वासं नी 1 P; विश्वस् c.; 'take into c.' विश्रंभस्थाने मन् 4 A; 'self-c.' प्रगल्भता, प्रागल्भ्यं, धृष्टता, 'an object of c.' विश्वासभूमिः, विश्रंभस्थानं, -भाजनं. **-ent,** *a.* विश्वासिन्, विश्वासप्रतिपन्न, विश्वस्त, जातप्रत्यय, विश्रब्ध. **2** निश्चित, असंदेह, छिन्नसंशय; 'he is c. of success' जयं निश्चितं (ध्रुवं) मन्यते. **3** प्रगल्भ, धृष्ट, निर्विशंक, साहसिन्. **-ential,** *a.* विश्वस्त, विश्रब्ध; आप्त (आप्तजनः); 'c. talk' विश्रंभालापः; 'c. matter' विश्वासकार्यं. **2** गुप्त, अप्रकाश्य, संवरणीय. **-entially,** *adv.* विश्रब्धं; गुप्तं. **-ing,** *a.* विश्वासापन्न, विश्वासभाज्, विश्वस्त, जातप्रत्यय, विश्रब्ध, अविशंकमान, निःशंक. **-ingly,** *adv.* विश्रब्धं, सप्रत्ययं, निर्विशंकं, निःसंदेहं.

Configuration, *s.* आकारः, रूपं, मूर्ति *f.*, विग्रहः, आकृति *f.*

Confine, *s.* सीमा, पर्यंतः, प्रांतः, समंतः, परिसरभूमि *f.* **-***v. t.* पर्यंते-निकटे-स्था 1 P or वृत् 1 A. **-***v. t.* नि-अव-रुध् 7 U, आसिच् 1 P, नि-सं-यम् 1 P, निग्रहं 9 P, बंध् 9 P, निर्बंध्. **2** (oneself to) न व्यथति-ङ् 2 P or उल्लंघ् 1 A, 10, नातिचर् 1 P. **3** संहृ 1 P, संकुच् 1 P. **-ed,** *a.* संयत, निरुद्ध, निबद्ध. **2** संकट, संकुचित; 'c. in the bowels' बद्धकोष्ठः; 'c. to bed' शयनग्रस्त; (of a woman) प्राप्तप्रसवकाला. **-ment,** *s.* संयमः, निरोधः, निग्रहः, बंधनं, कारागृहं; 'c. of bowels' विड्ग्रहः, आनाहः, मलावरोधः; 'c. of a woman' प्रसवकालः, प्रसवावस्था.

Confirm, *v. t.* दृढीकृ 8 U, दृढयति (D.), संस्तंभ् c. **2** स्थिरीकृ, दृढप्रमाणं दा 3 U, प्रमाणीकृ, सुस्थिर-दृढ- *a.* कृ. **-ation,** *s.* दृढीकरणं, संस्तंभनं, सत्यापनं, प्रमाणीकरणं. **-ed,** *a.* दृढीकृत, प्रमाणीकृत, स्थिरीकृत. **2** दृढ, स्थिर, रूढ, प्ररूढ; 'a c. fool' प्रतिनिविष्टमूर्खः, 'c. friendship' प्ररूढः संसर्गः, रूढसौहृदं.

Confiscate, *v. t.* सर्वस्वं अपहृ 1 P or आच्छिद् 7 P or दंड् 10, निःस्व *a.* कृ 8 U; 'let his property be c. ed' अस्य सर्वस्वहरणमादिश्यतां. **-ed;** *a.* राजापहृत, हृतसर्वस्व, निःस्वीकृत. **-ion,** *s.* सर्वस्वहरणं, सर्वस्वदंडः, सर्वस्वापहारः.

Conflagration, *s.* दाहः, ज्वलनं, दीपनं; 'forest c.' दावानलः, दवः, दावः, अरण्यवह्नि *m.*

Conflict, *s.* विरोधः, (स्मृत्योर्विरोधः); द्वंद्वं, कलहः, वैरं; विप्रतिपत्ति *f.*, विसंवादः. **2** युद्धं, संग्रामः, विग्रहः. **3** संघट्टः, समाघातः, अभिसंपातः. **-***v. i.* युध् 4 A, विवद् 1 A, विग्रहं 9 P; 'mutually c. ing S'âstras

परस्परं विवदमानानां शान्तिः णं (II. 1): विप्रतिपद् 4 A, परस्परं विरुद्ध pass., विसंवद् 1 P. **-ing,** *a.* विप्रतिपन्न, विरुद्ध, परस्परविरोधिन्, विसंवादिन्.

Confluence, Conflux, *s.* संगमः, संभेदः, तोयव्यतिकरः, वेणि *f.* **2** संयोगः, समागमः, संमिलनं. **3 Concourse,** q.v. **-Confluent,** *a.* संमेलक, संप्रवाहक.

Conform, *v. i.* (to) अनुवृत् 1 A, अनुसृ 1 P, अनुरुध् 4 A, प्रमाणीकृ 8 U, (इति सुजनचरितं प्रमाणीकुरु M. 3), अनुविधा 3 U. **2** युज् pass., सदृश-तुल्य *a.* भू, उपपद् 4 A, संवद् 1 P. *-v. t.* अनुरूप-सदृश *a.* (शी *f.*) कृ, समीकृ. **-able,** *a.* अनुरूप, सदृश, तुल्य, अनुगुण, समान, संवादिन्. **2** अनुविधायिन्, अनुरोधिन्, अनुकूल. **3** योग्य, उपपन्न. **-ably,** *adv.* अनुसारेण·सारतः, अनुरोधात्, अनुरूपं, यथा in comp. **-ity,** *s.* अनुरोधः, अनुवृत्ति *f.* **2** अनुरूपता, आनुगुण्यं, सादृश्यं, अनुसारः; 'in c. with' अनुसारेण, अनुरूपं, &c. **3** योग्यता, युक्तता. **-ist,** *s.* धर्मानुसारिन् *m.*, प्रवृत्तधर्मानुवर्तिन् *m.*

Confound, *v. t.* भ्रांत्या मन् 4 A; 'c. s falsehood with truth' सत्यमनृतमिति भ्रांत्या मन्यते; oft. by संदिह् 2 U; धूपैर्जालाविनिःसृतैर्वडभयः संदिग्धपारावताः (V. 3) 'the pigeons c. ed with volumes of incense' &c.; *See* **Mistake.** **2** आकुलीकृ 8 U, मुह् c., वि-सं-क्षुभ् c., संभ्रम् c. (भ्रमयति). **3** संकृ 6 P, विक्षिप् 6 P, संमिश्र् 10, संकुलीकृ. **4** विलुप् c., विनशू c.; 'c. by argument' निरुत्तरीकृ. **-ed,** *a.* मोहित, आकुल, संभ्रांत, विहस्त, व्यग्र, विक्षिप्त. **2** संकीर्ण, संमिश्रित, संकुल. **3** दैवोपहत; लुप्तज्ञान. **-er,** *s.* मोहकः, मोहनः. **-ing,** *a.* भ्रांतिजनक, संदेहोत्पादक, मोहिन्.

Confraternity, *s.* सौभ्रात्रं; भ्रातृत्वं, साहित्यं. **Confrere,** *s.* *See* **Colleague.**

Confront, *v. t.* अभिमुखी-संमुखीकृ 8 U, अभिमुखयति (D.), समक्षं उपानी 1 P. **2** संमुखीभू 1 P, सं-अभि-मुखं स्था 1 P or गम् 1 P or वृत् 1 A. **3 Compare,** q. v. **-ation,** *s.* संमुखस्थापनं; संमुखागमनं.

Confuse, *v. t.* वि-सं-भ्रम् c., आकुलीकृ 8 U, मुह् c. *See* **Confound;** 'to be c. ed' मुह् 4 P, आकुलीभू. **-ed,** *a.* मोहित, संभ्रांत, आकुल. **2** अस्पष्ट, अव्यक्त, क्रमहीन. **-edly,** *adv.* संकुलं, अक्रमेण, ससंभ्रमं. संकीर्णतया, अस्तव्यस्तं. **2** अस्पष्टं, संदिग्धतया. **-Confusion,** *s.* संभ्रमः, वैक्लव्यं, व्याकुलत्व, व्यग्रता. विप्लवः, मोहः. **2** वैलक्ष्यं, व्रीडा, लज्जा. **3** संकरः, संक्षोभः, व्यतिकरः, संकुलं. **4** अक्रमः, अस्पष्टता, क्रमभंगः, अस्तव्यस्तता. **5** विनाशः, निग्रहः, लोपः.

Confute, *v. t.* खंड् 10, प्रत्याक्षिप् 6 P, निरस् 4 U, प्रत्याख्या 2 P, निरा-अपा-कृ 8 U; निरुत्तरीकृ (of persons). **-ation,** *s.* खंडनं, निराकरणं, निरसनं, प्रत्याख्यानं.

Conge, *s.* प्रणामः, नमस्कारः. **2** आमंत्रणं, अनुज्ञाग्रहणं, आप्रच्छनं.

Congeal, *v. t.* घनीकृ 8 U, संहन् 2 P, श्यै c., पिंडीकृ; संचि 5 U. *-v. i.* घनीभू 1 P, श्यै 1 A, पिंडीभू, संहन् pass., शीतीभू. **-Congelation,** *s.* शीतिभावः, संहतिः *f.*, घनीभावः, घनीकरणं.

Congener, *s.* सजातिः *m.*, सजातीयः.

Congenial, *a.* एकजातीय, सजाति. **2** समानशील, एकस्वभाव, सधर्मन्. **3** सुखावह, हितकर (री *f.*), अनुरूप, अनुगुण, अनुकूल, सदृश (शी *f.*); 'c. to health' आरोग्यावह, स्वास्थ्यकर. **-ity,** *s.* समानशीलता, सधर्मता, सजातित्वं. **2** आनुरूप्यं, आनुगुण्यं.

Congenital, *a.* सहज, सहजात.

Congenite, *a.* सहज, एककालोत्पन्न.

Conger, *s.* जलव्यालः.

Congeries, *s.* राशिः, संचयः, ओघः, पुंजः, स्तोमः.

Congest, *v. t.* राशीकृ 8 U, संचि 5 U, पिंडीकृ, घनीकृ. **-ion,** *s.* (of blood) रक्तावष्टंभः, असृक्चयः, रक्तसंचयः. **2** अतिबाहुल्यं. उपचयः.

Conglobate, *a.* एकपिंडीभूत. *-v. t.* गोलीकृ 8 U, एकपिंडीकृ.

Conglomerate, *v. t.* राशीकृ 8 U, संचि 5 U, संभृ 3 U, एकपिंडीकृ, समाक्षिप् 6 P. **-ion,** *s.* समुपचयनं, एकीकरणं. **2** एकराशिः, एकपिंडः.

Conglutinate, *v. t.* संयुज् 10, संश्लिष् c., संधा 3 U; संरुह् c. (रोपयति) (of wounds). *-v. i.* pass. of roots above. **-ion,** *s.* संयोगः, संधिः, संधानं. **2** संरोपणं.

Congratulate, *v. t.* अभिनंद् 1 P or c., (तापसीभिरभिनंद्यमाना S. 4); gen. ex. by दिष्ट्या with वृध् 1 A or c., (चित्ररथहंसौ दिष्ट्या वर्धयितुं Ka. 365); दिष्ट्या सुतसुखदर्शनेन आयुष्मान्वर्धते (S. 7) 'you are to be c. ed upon seeing your son's face', or 'I c. you upon seeing' &c. **-ion,** *s.* धन्यवादः, अभिनंदनं, दिष्ट्या वर्धनं **-ory,** *a.* अभिनंदक, धन्यवादसूचक.

Congregate, *v. t.* समाचि 5 U, समाह् 1 P; *See* **Collect.** *-v. i.* संगिल् 6 P, सं-इ 2 P; *See* **Assemble.** **-ion,** *s.* सभा, परिषद् *f.*, संसद् *f.*, समाजः. **2** समवायः, निवहः, गणः, समाहारः, समुदायः. **-ional,** *a.* सामाजिक (की *f.*), सभ्य.

Congress, *s.* सभा, परिषद् *f.*, संसद् *f.*, मेलकः, समाजः, सदस् *f.* *n.* **2** संघट्टः, समाघातः.

Congruous, *a.* योग्य, उचित, संगत, अविरुद्ध, अनुगुण, अनुरूप, सदृश (शी *f.*), संबद्ध. **-ly**, *adv.* युक्तं, अनुरूपं, संगतं. **-Congruity, Congruence**, *s.* संगतता, अनुरूपता, युक्तता, सादृश्यं; oft. ex. by क्त-क्त; 'what c. is there between this (youthful) age and this restraint of passions' केदृंवयः केयमिंद्रियाणामुपशांतिः (Ka. 135).

Conjecture, *v. t.* तर्क् 10, अनुमा 3 A, 2 P, ऊह् 1 A, उत्प्रेक्ष् 1 A, (किमुत्प्रेक्षसे कुतस्त्योयमिति U. 4). **-s.** तर्कः, वितर्कः, ऊहः-हनं, अनुमानं; 'your c. is clear (you have rightly c. ed)' प्रसन्नः-उपपन्नः-ते तर्कः. **-al**, *a.* आनुमानिक (की *f.*); **-ally**, *adv.* अनुमानेन, सवितर्कं, अनुमानपूर्वकं.

Conjoin, *v. i.* संयुज् 7 U, 10, संश्लिष् c., संधा 3 U; 'c. ed in bonds of friendship' मित्रभावेन वर्तमानाः, परस्परानुरक्ताः. **-v. i.** संयुज्-संश्लिष्-संधा- pass. **-ed, Conjoint**, *a.* संहत, संयुक्त, संश्लिष्ट, संपद्ध. **-ly**, *adv.* समं, सहितं, संहत *a.*, संभूय.

Conjugal, *a.* वैवाहिक (की *f.*); oft. ex. by दंपती; 'c. love' दंपत्योः प्रेम; 'c. fidelity' अन्यभिचारः; सतीत्वं, पातिव्रत्यं.

Conjugate, *v. t.* रूपाणि आख्या 2 P. **-a.** संयुक्त. **-ion**, *s.* गणः; '1st c.' स्वादिगणः. **2** संयोगः.

Conjunct, *a.* संयुक्त, संश्लिष्ट; 'a c. consonant' संयोगः, योगः. **-ion**, *s.* संयोगः, योगः, संश्लेषः, संसर्गः, समागमः, संगमः; संगः **2** समुच्चयः; 'c. of planets' संगमः; 'lunar c.' अमावास्या, अमा. **-ive**, *a.* संयुक्त, संश्लिष्ट, यौगिक (की *f.*). **-ure**, *s.* योगः, संयोगः, संधिः. **2** अवसरः, समयः, प्रस्तावः.

Coujure, *v. i.* मुह् c., मंत्रैर्वशं नी 1 P; मायां कृ 8 U, अभिचर् 1 P. **2** सशपथं आदिश् 6 P, शप् c.; 'I c. thee by my life (soul)' शापितासि मम जीवितेन (Mal. 8); अभ्यर्थ् 10 A, सशपथं संबुध् c. **3** (in mind) अनु-सं-स्मृ 1 P; चिंत् 10. **-v. t.** सशपथं ऐकमत्यं-कूटं-कृ 8 U, संशप् 1 U. **-ation**, *s.* माया, ऐंद्रजालं, कुहकः, मंत्रः. **2** शापनं. **3** सशपथः संकल्पः, संशपनं. **-er**, *s.* ऐंद्र-ऐंद्र-जालिकः, मायिन् *m.*, आ.हैतुंडिकः, कुहककृत् *m.*, कुहकाजीवः.

Connate, *a.* सहज, एककालोत्पन्न, सहजात.

Connatural, *a.* सहज; एकस्वभाव.

Cram, *v. t.* प्रक्षेप् 6 P, बलाद् निविश् c. **2** अतिभोजनेन तृप् c. or संतृप् c. **3** अतिभृ पॄ c. or पूर् 10; स्वस्तिवायनमोदकैः कुक्षिं पूरयित्वा (M. 4) ' having c. ed the belly ' &c.; ' c. ed with food ' अतितृप्तः. **4** आकॄ 6 P, निरुध् 7 U, संबाध् 1 A; ' c. ed with people ' जनाकीर्ण, जनसंकुल-संबाध. **5** (fig.) अर्थहीनं पठ् 1 P.

Cramp, *v. t.* संकुच् 1 P, स्तंभ् 9 P or c, नि-प्रति-रुध् 7 U, संबाध् 1 A. **2** (अंगं) आकुच् 1 P, उद्वेष्ट् c., उपहन् 2 P. **3** कीलॄ 10 ; ' we are much c. ed in this place ' अतीव दुःस्थिता वयमत्र. -*s.* स्तंभः, संकोचः-चनं, निरोधः, संक्षेपः. **2** उद्वेष्टनं, व्यासः, आक्षेपः, गात्रोपघातः ; ' a c. in the calf of the leg ' पिंडिकोद्वेष्टनं. **3** कीलः, लोहग्रहणी, बंधनकीलः (c. iron).

Crane, *s.* बकः, कहः, सारसः ; बलाका, बिसकंठिका (female c.). **2** भारोत्तोलनयंत्रं.

Cranium, *See* **Skull.**

Crank *s.* वक्रमार्गः. **2** वक्रोक्तिः *f.*. वक्रभाषितं.

Cranny, *s.* छिद्रं, रंध्रं, संधिः.

Crash, *s.* महाशब्दः, महानिनादः, कोलाहलः, महारवः. -*v. t.* भंज् 7 P, भिद् 7 P, मृद् 9 P, पिष् 7 P. -*v. i.* (परुषस्वरेण) ध्वन्-स्वन् 1 P, परुषं रु 2 P.

Crass, *a.* स्थूल, घन, असूक्ष्म.

Cratch, *s.* गवादनी, द्रोणि-णी *f.*.

Crater, *s.* आग्नेयगिरिमुखं.

Craunch, *v. t.* चर्व् 1 P, संदंश् 1 P.

Cravat, *s.* ग्रैवेयकं, ग्रीवावेष्टनं.

Crave, *v. t.* (सविनयं) याच् 1 A. प्र-अभि-अर्थ् 10 A; ' c. favour ' प्रसद् c., अनुनी. **2** वांछ् 1 P, इष् 6 P, अभिलष् 1, 4 P, लभ् desid. (लिप्सते); *See* **Wish.** **-ing,** *s.* लालसा, स्पृहा, अभिलाषः, अतिकांक्षा, औत्सुक्यं, उत्कंठा, तृष्णा; ' c. for food ' बुभुक्षा; ' c. for drink ' पिपासा, तृष्णा.

Craven, *s.* (c. hearted) कापुरुषः, भीरुः; *See* **Coward.**

Craw, *s.* पक्षिजठरः, पक्वाशयः.

Crawl, *v. i.* सृप् 1 P, वि-प्र-सं. उरसा गम् 1 P, संदृगत्या चल् 1 P. -*s.* गतिः *f.*; पोतोदरं.

Crayon, *s.* वर्तिका, तूलिका.

Craze, *v. t.* भंज् 7 P, खंड् 10; *See* **Break.** **2** चूर्ण् 10, निष्पिष् 7 P. **3** ज्ञानं हन् 2 P,

वातुलीकृ 8 U, मुह् c., संभ्रम c. (भ्रमयति). **-ed, -Crazy,** *a.* वातुल, बुद्धिविकल, हतज्ञान, उन्मत्त, भ्रांतचित्त. **2** जीर्ण, जर्जर, जर्जरीभूत. **-edness,** *s.* बुद्धिवैकल्यं, वातुलता, उन्मादः, चित्तभ्रमः. **2** जीर्णता.

Creak, *v. i.* कर्कशशब्दं कृ 8 U, परुषं विरु 2 P or स्वन् 1 P. **-s.** कर्कशशब्दः-ध्वनिः.

Cream, *s.* शरः, क्षीरजं, शार्करः-रकः, क्षीरमंडं. **2** उत्तमांशः, सारः-रं, सारांशः. **-v. i.** शरं बंध् 9 P, फेनायते (D.). **-v. t.** शरं अपनी 1 P. **-y,** *a.* शरमय (यी *f.*), शरोपम.

Crease, *s.* वलि *f.*, वस्त्रभंगः पुटचिह्नं.

Create, *v. t.* सृज् 6 P, निर्मा 3 A, जन् c., (जनयति), उत्पद् c., कृ 8 U, विधा 3 U, प्र-सं-क्लृप् c. **2** पदे-अधिकारे-नियुज् 7 A, 10 or अभिषिच् 6 P; 'a thing c.ed' भूतं. **-ion,** *s.* सर्गः, जननं, सृष्टि *f.*, निर्माणं, विधानं, प्रकल्पनं, भावना; 'a c. of the mind' मानसी सृष्टिः, मनःकल्पितं. **2** उत्पन्नं. भूतं. **3** विश्वं, निखिलजगत् *n.*, सृष्टि *f.*, सर्वभूतानि. **-ive,** *a.* जनक, कल्पक, उत्पादक, निर्माण-रचना in comp.; 'c. genius' निर्माणशक्तिः. **-or,** *s.* स्रष्टृ *m.*, निर्मातृ *m.*, उत्पादकः, जनकः. **2** ब्रह्मन् *m.*, आत्मभूः. परमेष्ठिन् *m.*, पितामहः, विधातृ *m.*, विश्वसृज्, *m*, धातृ *m.*, प्रजापतिं *m.*, जगत्कर्तृ *m.*, स्रष्टृ *m.*, विधि *m.*, वेधस् *m.*, स्वयंभूः, चतुराननः, विरिंचि *m.*, कमलयोनि *m.*, अब्जभूः. **-ure,** *s.* भूतं, जंतुः, जीविन्-प्राणिन् *m.*, देहिन् *m.* **2** प्रियः, वत्सः, जातः. **3** आश्रितः, उपजीविन् *m.*, लब्धोदयः; 'he is your c.' स त्वत्तो लब्धोदयः, त्वदुपजीवी.

Credence, *s.* विश्वासः, प्रत्ययः, प्रमाणं; 'worthy of c.' विश्वास्य, प्रमाणं; 'to give c.' विश्वस्-प्रती 2 P.

Credentials, *s.* विश्वासपत्रं, प्रत्ययपत्रं.

Credible, *a.* विश्वसनीय, श्रद्धेय, विश्वास्य, प्रामाणिक (की *f.*). **-Credibility,** *s.* विश्वास्यता. विश्वासपात्रता, प्रामाण्यं. **-Credibly,** *adv.* सप्रमाणं, श्रद्धेयतया, विश्वसनीयतया.

Credit, *s.* विश्वासः, प्रत्ययः, विश्रंभः; 'worthy of c.' विश्रंभभाजनं, विश्वासपात्रं. **2** प्रशंसा, श्लाघा, कीर्ति-ख्याति *f.*, प्रतिष्ठा, यशस् *n.*, स्तुति *f.* स्तवः. **3** (in commerce) विश्वासः; कालिका; 'buying on c.' उद्धारः. **4** प्रामाण्यं. विश्वास्यता. **-v. t** विश्वस्-प्रती 2 P, सत्य *a.* मन् 4 A. **2** प्रमाणीकृ 8 U. **-able,** *a.* श्लाघ्य, प्रशस्य, कीर्ति-गौरवकर (री *f.*), स्तुत्य. **-ably,** *adv.* श्लाघ्यप्रकारेण, स्तुत्यर्हैः सगौरवं. **-or,** *s.* उत्तमर्णः, ऋणदातृ *m.*. धनिकः.

Credulous, *a.* श्रद्धालु, विश्वासशील, विश्वासिन्, विश्रंभप्रवण, अशंकिन्. **-ness, -Credulity,** *s.* विश्वासंशीलता; अशंका, श्रद्धालुता.

Creed, *s.* धर्मः. **2** स्वीकृतमतं-पक्षः.

Creek, *s.* वंकः, वक्रं, खातं. **-y,** *a.* वंकवत्, वक्र.

Creep, *v. i.* सृप् 1 P, वि-सं प्र°, मंदगत्या चल्-मंदं प्रसृ 1 P. **2** अलक्षितं प्रविश् 6 P. **3** शनैः प्रवृत् 1 A. **-er,** *s.* लता, वल्ली, वल्लरी, व्रततिः ती *f.*; 'a branching c.' वीरुध् *f.*, गुल्मिनी, उलपः, प्रतानिनी. **2** सर्पिन्-उरोगामिन् *m.* **-ing,** *s.* विसर्पः-र्पणं, विसरः. **-ingly,** *adv.* सर्पवत्, मंदगत्या; शनैःशनैः.

Cremate, *v. t.* *See* **Burn.** **-tion,** *s.* दाहः, दहनं.

Crepitate, *See* **Crack.**

Crepuscle, -scular, *See* **Evening.**

Crescent, *s.* अर्धचंद्रः, अर्धेंदुः, चंद्रार्धं. **-a.** 'c.-shaped' अर्धचंद्राकार. **2** वर्धमान, वर्धिन.

Cresset, *s.* आकाशदीपः.

Crest, *s.* चूडा, शिखा, शेखरः, मौलिः; मुकुटं, किरीटः. **2** (Of a cock) चूडा, शिखा. **3** शिखरः-रं, मूर्धन् *m.* (of mountains); 'c. fallen' भग्न, भग्नदर्प, आत्तमान, विषण्ण; 'c. jewel' चूडामणिः, शिरोरत्नं-मणिः, शिखामणिः. **-ed,** *a.* शिखिन, चूडावत्. **2** अवर्तंसिन, किरीटिन.

Cretaceous, *a.* कठिनीसंसृष्ट, कठिनीधर्मन्.

Crevice, *s.* रंध्रं, छिद्रं, विवरं, बिलं, संधिः, गर्तः-र्तां.

Crew, *s.* नाविकाः, पोतवाहाः (pl.), नाविकगणः. **2** गणः, संघः, जनसमूहः.

Crib, *s.* गवादनी, द्रोणि-णी *f.* **2** गोष्ठं, व्रजः. **3** शिशुद्रोला. **-v. t. Confine,** q. v.

Cribble, *s.* चालनी, शोधनी, तितउ *m.*

Crick, *s.* कर्कशशब्दः. **2** मन्यास्तंभः.

Cricket, *s.* झिल्लिका, भृंगारी, झीरुका, चीरी. **2** गुलिकाक्रीडा.

Crime, *s.* अपराधः, पापं, दोषः, पातकं, पापकर्मन् *n.*, दुरितं; 'a heinous c.' घोर-महापातकं. **-Criminal,** *a.* or *s.* अपराधिन्. पापिन्, सपाप, पातकिन्, कृतापराध, पापकर्मन्, *n.* सदोष, दुष्कृतिन्; दंड्य, दोषग्रस्त; 'c. act' पापक्रिया; 'c. law' दंडविधिः-शासनं. **-ly,** *adv.* सापराधं, सदोषं. **2** दंडविधिन्यायेन, दंडविधिवत्. **-ity,** *s.* सपापता, अपराधिता, सदोषत्वं. **-Criminate,** *v. t.* दोषीकृ 8 U, सापराध-सदोष *a.* कृ, दोषेण लिप् 6 P. **2** अभिशंस् 1 P, अभियुज् 7 A, 10. **-ion,** *s.* अभियोगः, दोषीकरणं, दोषारोपणं, अभिशंसनं. **-ory,** *a.* अभिशंसक; सदोष.

Crimp, *a.* भंगुर, भिदुर. **2** असंगत, विरुद्ध, अयुक्त. **-v. t. -Crimple,** संकुच् 1 P, पुटीकृ 8 U, चूर्ण् 10.

Crimson, *a.* शोण, रक्त, अरुण, लोहित. **–s.** शोणः, रक्तिमन् *m.*, रक्तवर्णः, अरुणिमन् *m.*, लोहितः; 'covered with c.' अरुणित, पाटलित. **–v. t.** अरुणीकृ 8 U, अरुणयति-शोणयति-लोहितयति (D.).

Crincum, *s.* वलि *f.*, पुटः; संकोचः.

Cringe, *v. i.* अंजलिं बंध् 9P; साष्टांगपातं प्रणम् 1 P or अनुनी 1 P; 'c. at the feet' अधश्चरणावपातं कृ 8 U (Bh. i. 31). **–s., –ing,** *s.* अंजलिकर्मन् *n.*, अष्टांगपातः; श्ववृत्ति *f.* **–v. t.** *See* **Contract.**

Crinigerous, *a.* रोमवत्, रोमोपम.

Crinkle, *s.* वलि *f.*, पुटः, भंगः. **–v. i.** पुटीभू 1 P, व्यावृत् 1 A. **–v. t.** पुटीकृ 8 U, व्यावृत् c.

Cripple, *a.* or *s.* पंगु (गू *f.*), विकल, विकलांग (गी *f.*); पादविकलः; गतिहीनः; श्रोण. **–v. t.** विकलयति (D.), विकलीकृ 8 U, व्यंगीकृ. **2** (fig.) दुर्बलीकृ. **–ness,** *s.* पंगुता, अंगवैकल्यं.

Crisis, *s.* संकटं, संकटवेला, संदेहसमयः; शुभाशुभलग्नं. **2** व्याधिसीमा. **–Critical,** *a.* संदिग्ध, 'c. time' कार्यसंकटं, संकटसमयः, कार्यनिर्वहणकालः; 'at c. times' उपस्थितेषु दुर्गेषु.

Crisp, *a.* आकुंचित, बंधुर, भंगवत्. **2** भंगुर, भिदुर, भिदेलिम. **–v. t.** (केशान्) रच् 10, भंगुरीकृ 8 U, आकुंच् c.; 'c. ing-iron, -pin' केशयमनकीलः; 'c. ed tresses' चूर्णकुंतलाः, वलीभूतः अलकाः. **–ation, –ature,** *s.* आकुंचनं (केशानां).

Criterion, *s.* लक्षणं, चिह्नं, लिंगं, संज्ञा. **2** निकषः.

Critic, *s.* गुणदोषविचारकः-निरूपकः, गुणागुणज्ञः; विज्ञः, गुणग्राहिन् *m.*, गुणदोषविवेचकः. **2** (cavilling c.) दोषैकदृश्-छिद्रान्वेषिन् *m.* **–al,** *a.* गुणदोषविचारयुक्त, गुणागुणज्ञ; गुणदोषग्राहिन्, गुणदोषविवेचक. **2** दोषदर्शिन्, छिद्रान्वेषिन्. **–ally,** *adv.* सूक्ष्मं, सूक्ष्मतया, निपुणं. **2** गुणदोषपरीक्षया. **3** संकटसमये. **–ise,** *v. t.* गुणदोषविचारं-विवेचनं-कृ 8 U, गुणदोषान् निरूप् 10 or परीक्ष् 1 A or वि-विच् 3, 7 U. **2** छिद्राणि अन्विष् 4 P, or दृश् 1 P. **–ism, Critique,** *s.* गुणागुणपरीक्षा, गुणदोषविवेचनं-परीक्षणं-निरूपणं. **2** छिद्रान्वेषणं.

Croak, *v. i.* आरद् 1 P, विरु 2 P. **2** (As a crow) कै 1 P, ध्वांक्ष् 1 P. **–s.** आरटनं; भेकरवः; काकरवः.

Croceous, *a.* कुंकुमाक्त, गौर (री *f.*).

Crock, *s.* किट्टं, कज्जलं. **2** भांडं. **3** जरन्मेषी. **4** जरदश्वः. **–v. t.** कृष्णीकृ 8 U, कज्जलेन लिप् 6 P. **–ery,** *s.* मृद्भांडानि (pl.); कौलालकं; मार्तिकं.

Crocodile, *s.* नक्रः, कुंभीरः, मकरः, ग्राहः, अवहारः (a kind of c.).

Croft, *s.* वाटिका; वाटः, वृत्ति *f.*

Crone, *s.* स्थविरा, जरती, वृद्धा, जरठा.

Crony, *s.* चिरमित्रं, प्रियमित्रं-सुहृद् *m.*

Crook, *s.* दंडः; कुंचिताग्रयष्टि *f.*; आकर्षणी; 'by hook or c.' येन केन प्रकारेण; यथाकथंचित्; 'c. back' कुब्जः, न्युब्जः, गडुलः-रः. **–v. t.** आकुंच् c., वक्रीकृ 8 U, कुटिलीकृ, नम् c. **–ed,** *a.* वक्र, कुटिल, जिह्म, अराल, नामित, आकुंचित, भुग्न, न्युब्ज; 'c. bodied' विकृताकारः; 'c. armed' कुंपः, कु(कू)णिः, विकरः; 'c. nature' वक्रभावः, कौटिल्यं; 'c. minded' कुटिलमति, जिह्मचेतस्, प्रतीप, अनृजुप्रकृति; 'c. with age' जरानतकाय, जरापरिणत. **–edly,** *adv.* वक्रं, कुटिलं, कुटिलगत्या, जिह्मं, साचि, तिर्यक्; 'going c.' जिह्मगः, कुटिलगतिः. **–edness,** *s.* वक्रता, कुटिलता, जिह्मता. **2** विरूपता, विकृति *f.*

Crop, *s.* शस्यं, शस्यसंग्रहः, कृषिफलं; 'c.s' शस्यक्षेत्राणि. **2** अग्रं, शिखा. **–v. t.** (शस्यं) चइ् 1 P, अद् 2 P, भक्ष् 10, चर्व् 1 P. **2** छिद् 7 P, लू 9 U, शस्यं लू or संग्रह् 9 P. **–v. i.** (up) आविर्भू 1 P, प्रादुर्भू, सहसा उद्गम् 1 P; 'c. eared' छिन्नकर्णाग्र, लूनकर्ण; 'c. ful' परिपूर्णोदर, अतितृप्त.

Crore, *s.* कोटि-टी *f.*

Cross, *v. t.* तॄ 1 P, (lit. and fig.), संउत्°, लंघ्, उत्° 1 A, 10, अति-इ 2 P, अतिक्रम् 1 U, 4 P, आक्रम्; 'these thoughts c.ed my mind' एते संकल्पा मम प्रादुरासन् or आसीत्-सम भूत्-मे मनसि (Ka.); 'he c.ed my sight' मम दर्शनपथमागतः (S. 3), नयनविषयमवतीर्णः. **2** वि-प्रति-रुध् 7 U, व्याहन् 2 U, प्रतिबंध् 9 P. **3** व्यति-अस् 4 U; 'with the arms c.ed' व्यत्यस्तभुजः; स्तनाविनिहितहस्तस्वस्तिकाभिर्वधूभिः (Mal. 4); 'c.legged' व्यत्यस्तपादः; 'to c. the legs' व्यत्यस्तपादाभ्यां आस् 2 A. **4** (in love) खंड् 10; खंडिता नारी 'c. ed or defeated in love'. **–s.** कूशः. **2** शूलः-लं. **3** प्रतिरोधः, विघ्नः, प्रत्यूहः, व्याघातः, प्रतिबंधः. **4** व्यस्तरेखाद्वयं, स्वस्तिकचिह्नं, स्वस्तिकं. **–a.** व्यत्यस्त, तिरश्चीन, साचिस्थित. **2** वि-प्रतिलोम, विरुद्ध, वाम, प्रतीप, प्रतिकूल. **3** दुःशील, पिशुन, दुरात्मन्, वक्रस्वभाव, जिह्मप्रकृति, वामशील; 'c. road' उपपथः, उपमार्गः; चतुष्पथं, शृंगाटकं; 'c.-examine' विविधं परीक्ष् 1 A or अनुयुज् 7 A; 'c. grained' प्रतीप, विलोम, विरुद्ध; 'to be c.' प्रतीपं गम् 1 P, प्रतीपायते (D.); 'c. multiplication' वज्राभ्यासः; 'c. threads' पूरणं. **–ly,** *adv.* तिर्यक्, व्यत्यस्तं, साचि. **2** प्रतीपं,

प्रतिकूलं, विरुद्धं. 3 पिशुनतया. **-ness,** *s.* वक्रता, अनृजुता, जिह्मस्वभावः, पैशुन्यं.

Crotch, *s.* अंकुशः, आकर्षणी, वडिशः.

Crotchet, *s.* कामचारः, लहरी, मनोलौल्यं, स्वैरिता.

Crouch, *v. i.* पत् 1 P (पादयोः); पादयोर्ली 4 A, नम्रीभू 1 P, कायं नम् c. 2 चाटूक्त्या अनुनी 1 P or प्रसद् c.; *See* **Cringe.**

Crow, *s.* काकः, वायसः, ध्वांक्षः, नीकुलिः; 'carrion c.' कुणपभुज, दृग्धकाकः; 'c. bar,' लोहदंडः. **-v.** *i.* विरु 2 P, नद् 1 P. 2 विकत्थ् 1 A; *See* **Boast.**

Crowd, *s.* समूहः, संघः, वृंदं, गणः; *See* **Collection;** 'c. of people' जनसंमर्दः, संकुलं, जनौघः, लोकसंघः, बहुजनमेलकः. **-***v. i.* 'to be c. ed' सं-आ-कृ pass., परिपू pass., संकुल-समाकुल-*a.* भू 1 P, 'house c. ed with people' जनाकीर्ण-जनसंकुलं गृहं; 'the place was very much c. ed' तास्मिन् स्थाने महाञ् जनसंमर्द आसीत्. **-***v. t.* आ-सं-कृ 6 P, परिपू c. or पूर् 10, व्याप् 5 P, संकुलीकृ 8 U. 2 संमृद् 9 P, संबाध् 1 A, संकुलीकृ.

Crown, *s.* मुकुटं, किरीटः-टं. 2 राज्यं, राजपदं, राजत्वं; 'placed the c. on' राजपदमारोपितः, राज्येभिषिक्तः. 3 राजन् *m.*, शासितृ *m.* 4 (Of the head) चूडा, शिखा, मौलिः. 5 अग्रं, शिखा, शिखरं, शीर्षकं, शिरस् *n.*, शृंगं, अग्रभागः. 6 स्रज् *f.*, माला. 7 रूप्यमुद्रा **-***v. t.* राज्ये अभिषिच् 6 P, मुकुटं परिधा c. (धापयति). 2 संपद् c., समाप् c., निष्पद् c.; 'c.- ed kings' मूर्धावसिक्ताः-मूर्धाभिषिक्ताः-राजानः; 'to c. all' इदं च तत्र विशिष्टतमं जातं; 'to be c. ed' फल् 1 P, सफलीभू; 'his efforts were c. ed with success' सर्वेऽस्य प्रयत्नाः सफलतां ययुः-फलिताः.

Crucial, *a.* सूक्ष्म, निपुण.

Crucible, *s.* मु(मू)षा-षी, तैजसावर्तनी.

Crude, *a.* अपक्व, अपरिणत, असिद्ध, असंस्कृत, आम. 2 अजीर्ण. 3 असंपूर्ण, असमाप्तः अपूर्णकाल, आकालिक (की *f.*); 'c. form' प्रातिपदिकं, असिद्धं, रूपं. **-ly,** *adv.* अपूर्णकाले. **-ness,** *s.* अपक्वता, आमता, अपाकः, अपरिणामः.

Cruel, *a.* नृशंस, क्रूर, निष्ठुर, निष्करुण, निर्दय, निर्घृण, काठिनहृदय, क्रूरकर्मन्. **-ly,** *adv.* निष्करुणं, निर्दयं. निष्ठुरं, &c. **-ty, -ness,** *s.* नृशंसता, निष्ठुरता, निर्दयत्वं, क्रूरता, निर्घृणता; 'c. to animals' प्राणिहिंसा.

Cruise, *s.* समुद्रे परिभ्रमणं, पर्यटनं. **-***v. i.* परिभ्रम् 1, 4 P, इतस्ततो भ्रम्.

Crum, Crumb, *s.* खंडः, लवः, शकलः-लं. 2 उच्छिष्टं, अन्नशेषः, पिष्टकशकलं. **-Crummy,** *a.* कोमल, मृदु.

Crumble, *v. i.* चूर्णीभू 1 P, विशृ pass., शकलीभू; पत् desid. (पिपतिषति). 2 विनश् 4 P, क्षि pass., अवसद् 1 P. **-***v. t.* चूर्ण् 10, क्षुद् 7 U, निष्पिष् 7 P, मृद् 9 P, शकलीकृ 8 U; खंडशो विद् 10. 2 विनश् c., अवसद् c. **-ing,** *a.* जीर्ण, अवसन्न, विशीर्ण.

Crump, *a.* कुब्ज, न्युब्ज, वक्र.

Crumple, *v. t.* संकुच् 1 P, संपुट् 10; *See* **Contract.** 2 चूर्ण् 10, संमृद् 9 P.

Crunch, *v. t.* दंतैर्निष्पिष् 7 P

Crupper, *s.* पुच्छबंधः.

Cruse, *s.* मृद्भांडं.

Cruset, *s.* *See* **Crucible.**

Crush, *v. t.* संमृद् 9 P or c., संपीड् 10, निष्पिष् 7 P, क्षुद् 7 U, मंथ् 9 P, निर्दल् 1 P, 10 चूर्ण् 10; 'c. under the foot' पादतलेन-पादाघातेन-मृद्, पादभरेण आक्रम् 1 U, 4 P. 2 विध्वंस् c., विनश् c. उच्छिद् 7 P. **-***s.* मर्दनं, निष्पेषः. 2 जनसंमर्दः, संकुलं. **-ing,** *a.* प्रमाथिन्; 'c. defeat' सर्वनाशकरः पराजयः.

Crust, *s.* त्वच् *f.*, बाह्यपटलं, वल्कं, बाह्यवेष्टनं. 2 घनभागः, बाह्यभागः. **-***v. t.* घनपटलेन वेष्ट् c. or आवृ 5 U or आच्छद् 10, बाह्यतः घनीकृ 8 U. **-***v. i.* घनपटलं वेष् 9 P, घनीभू; संहतीभू. **-aceous,** *a.* कवचिन्, वल्कवत्, पटलवत्. **-y,** *a.* घनपटलयुक्त, सपटल. 2 प्रतीप, परुष, निष्ठुर, पिशुन.

Crutch, *s.* अवलंबनार्थं दंडः; आधारदंडः.

Cry, *v. i.* क्रुच् 1 P, विलप् 1 P, रुद् 2 P, परि-देव् 1 A. 10, बाष्पं मुच्-विसृज् 6 P, or पत् c. 2 (of crows &c.) वाश् 4 A, विरु 2 P; नद् 1 P, रस् 1 P. 3 वि-उद्-घुष् 10, प्रकाश् c., प्रख्या c. (ख्यापयति); 'c. ing in the wilderness' अरण्यरुदितं. 4 तारस्वरेण-उच्चैः वद् 1 P, or भाष् 1 A, आ-वि-क्रुश् 1 P, आ-, क्रंद् 1 P. **-***s.* क्रंदनं, रुदितं, रोदनं, आक्रोशः, विलापः, परिदेवनं. 2 ध्वनिः, स्वनः, स्वरः, शब्दः, नादः; 'c. of distress' आर्तनादः, करुणस्वनः; रुतं, विरावः; (gen. of animals). 3 उत्क्रोशः, घोषणं, उच्चैर्घोषः, कोलाहलः. **-down,** अपवद् 1 P, अवगण् 10, अवमन् 4 A, अपलप्. **-out,** उत्क्रुश्, उच्चैः-तारस्वरेण-घुष्. **-up,** प्रशंस् 1 P, कृत् 10. **-er,** *s.* घोषकः, प्रकाशकः, घोषणाकृत् *m.*

Crypt, *s.* गुहागृहं.

Crystal, *s.* स्फटिकः, सितोपलः. सितमणिः, स्फटिकाश्मन् *m.* **-***a.* 'c. like' स्फटिकाभ, विमल, स्वच्छ. **-lize,** *v. t.* स्फटिकरूपेण घनीकृ 8 U or घनीभू.

Cub, *s.* शावः-वकः, पोतः, कलभः, वत्सः, शिशुः, किशोरः-रकः.

Cube, *s.* घनः; 'c. root' घनमूलं, घनपदं. **-Cubical,** *a.* घनाकार; 'c. contents' घनफलं

Cubit, *s.* हस्तः, किष्कुः; अरत्नि *m.*, *f.* (with the last finger stretched).

Cuckold, *s.* बंधकीभार्यः; जारिणीपतिः and sim. comp.; 'c. maker' *See* **Adulterer.**

Cuckoo, *s.* कोकिलः, पिकः, परभृतः, पुंस्कोकिलः (male c.); 'female c.' अन्य-परपुष्टा or भृता, कोकिला.

Cucumber, *s.* चर्मटिका, चर्मटः, कर्कटी, उर्वारु *f.*, इ(ई)र्वारु-लु *f.*

Cud, *s.* चर्व्यः, आहारः.

Cuddle, *v. i.* अंके-निकटे स्वप् 2 P or शी 2 A.

Cudgel, *s.* लगुडः, यष्टि *f.*, दंडः, काष्ठं, गदा; 'c.-play' गदायुद्धं, दंडादंडि. **-v.** *t.* लगुडेन प्रहृ 1 P or आहन् 2 U or तड् 10; 'giving a sound c. ing' लगुडप्रहारैः जर्जरीकृत्य; 'c. your memory' स्मृतिं प्रबोधय तावत्.

Cue, *s.* संज्ञा, इंगितं, सूचना; सूत्रं. 2 अंचलः. 3 छंदः, भावः.

Cuff, *s.* मुष्टिप्रहारः, मुष्ट्याघातः. 2 पिप्पलांचलः. **-v.** *t.* मुष्टिना-पाणिना-तड् 10 or प्रहृ 1 P or आहन् 2 U; मुष्टीमुष्टि युध् 4 A.

Cuirass, *s.* कवचः-चं, उरस्त्राणं. 2 कूर्पासः; निचोलकः.

Cuish, *s.* ऊरुत्राणं, ऊरुवर्मन् *n.*

Cuisine, *s.* पाकशाला, पाकपद्धति *f.*

Culinary, *a.* पाक in comp.; 'c. skill' पाकसिद्धिज्ञानं.

Cull, *v. t.* उद्हृ 1 P, वृ 5 U; समा-हृ; एकत्र कृ 8 U; 'c. passages' चूर्णिकां कृ.

Cullion, *s.* जाल्मः, धूर्तः, शठः.

Cully, *s.* वैश्याजितः; सुखप्रतार्यः.

Culm, *s.* नालं, कांडं.

Culminate, *v. i.* उच्चस्थानं प्राप् 5 P; 'the sun is c. ing' नभसो मध्यमध्यास्ते रविः; (fig.) परां कोटिं-काष्ठां-गम् 1 P, अतिभूमिं गम्; पाताभिमुखीभू, क्षयिष्णु *a.* भू. **-ion,** *s.* परा कोटिः, परा काष्ठा.

Culpable, *a.* सदोष, सापराध, निंदार्ह, दोषिन्, अपराद्ध, वाच्य, निंद्य, दूषणीय. **-ness, Culpability,** *s.* सदोषता, अपराधिता, वाच्यता.

Culprit, *s. See* **Criminal.**

Cult, *s. See* **Creed.**

Cultivate, *v. t.* कृष् 1 P, (land &c.) 2 वृध् c., उप-प्र-चि 5 U, परि-अनु-शील् 10, अभ्यस् 4 P, आसेव् 1 A, अनुष्ठा 1 P, भज् 1 U; 'c. friendship with the good' सतां मैत्रीं प्रचिनु-अभ्यस्य. **-ion, Culture,** *s.* कृषि *f.*, कर्षणं, कृषिकर्मन् *n.* 2 अनुशीलनं, अभिवृद्धि *f.*, संवर्धनं, प्रबोधनं. 3 उन्नति *f.*, उत्कर्षः; 'c. of the mind' प्रबोधः, प्रबुद्धता; 'men of c.' प्रबुद्धमनसः-संस्कारवंतः-जनाः, व्युत्पन्नाः, 'c. of learning' विद्याभिवृद्धिः, ज्ञानोन्नतिः, &c. **-or,** *s.* कृषीवलः, कर्षकः, क्षेत्रिन् *m.* 2 अनुष्ठायिन् *m.*, परिशीलयितृ *m.*, संवर्धकः.

Culver, *See* **Dove.**

Culvert, *s.* प्रच्छन्नः जल-प्रवाहः-निर्गमः.

Cumber, *v. t.* बाध् 1 A, क्लिश् 9 P; कष्टं-दुःखं-आवह् 1 P, अतिभारो भू 1 P. **-s.** क्लेशः, कंटकः, शल्यं, अतिभारः. **-some, Cumbrous,** *s.* कष्ट-दुःख-कर (री *f.*), क्लेशप्रद, अतिभारभूत. **-Cumbrance,** *s.* अतिभारः, शल्यभूतः, भारभूतः. 2 उपरोधः, प्रतिबंधः, प्रत्यूहः.

Cumin, *s.* जीरकः, जरणः, कणा, अजाजी; 'black c.' सुषवी, कारवी, पृथ्वी; पृथुः, काला, उपकुंचिका.

Cumulate, *See* **Accumulate.**

Cunning, *a.* विदग्ध, धूर्त, चतुर. 2 मायिन्, वंचनशील, विप्रलंभक, कपटिन्. **-s.** विदग्धता, धूर्तता, चातुर्यं, नैपुण्यं, पटुता. 2 कपटं, माया, वंचनं, शाठ्यं, व्याजः, कैतवं, छलं. **-ly,** *adv.* चातुर्येण, विदग्धतया, धूर्ततया, सव्याजं.

Cup, *s.* पात्रं, चषकः-कं, भाजनं, काचपात्रं. 2 पुटः, कोशः-षः; 'fond of the c.' पानासक्तः; 'taste the c. of misery, दुःखभाग् भू. **-v.** *i.* आचूषण-यंत्रेण रक्तं मुच् c. or मोक्ष् 10 'c.-board' लघुकोष्ठः; 'c.-ing glass' रक्तचूषणयंत्रं, 'dry c.-ing' घटिकया or अलब्वा आचूषणं.

Cupid, *s.* मदनः, स्मरः, कामः, अनंगः, कंदर्पः, मन्मथः, मनसिजः, कुसुमबाणः, पंचशरः, मारः, प्रद्युम्नः, मीनकेतनः, कुसुमेषुः, मकरध्वजः, पुष्पधन्वा, आत्मभूः, अनन्यजः, चित्तजन्मन् and sim. comp. **-ity,** *s.* लोभः, गृध्नुता, अतिलोभः-स्पृहा, लालसा, अतितृष्णा, लाभलिप्सा. 2 कामुकता.

Cupola, *s.* तोरणशृंगं, प्रासादशीर्षं.

Cur, *s.* शुनकः; *See* **Dog. -rish,** *a.* श्वशील, दुष्ट.

Curate, *s.* उपयाजकः, पुरोहितप्रतिनिधिः.

Curator, *s.* अवेक्षकः, अधिकारिन् *m.*, अध्यक्षः; 'c. of a depot' ग्रंथशालाधिकारी.

Curb, *v. t.* आवृ 5 U, सं-नि-यम् 1 P, नियंत्र् 10, प्र-नि-ग्रह् 9 P, अव-नि-रुध् 7 U, संहृ 1 P; 'c. the horses' प्रगृह्यंतां वाजिनः (S. 1); *See* **Control** also. **-s.** मुखयंत्रणं, मुखशृंखला-लः. 2 यंत्रणं, संयमः, निरोधः, &c.

Curd, *v. i.* दधिरूपेण घनीभू, श्यै 1 A. **-v.** *t.* घनीकृ 8 U, श्यै c., संहन् 2 P. **-s.** दधि *n.*, पयस्यं, द्रप्सः-सं. **-y,** *a.* दधिमय (यी *f.*) 2 घनीभूत, श्यान, संहत.

Curdle, *v. i. See* **Curd, -ed,** *See* **Curdy.**

Cure, *v. t.* (disease) कित् desid. (चिकित्सति-ते); प्र-उप-शम् c. (शमयति), साध् c., प्रतिकृ 8 U, समाधा 3 U. (persons) सुस्थ-प्रकृतिस्थ-नीरोग *a.* कृ ; gen. ex. by. निर्गत-वीत in comp.; ' Rama was c. ed of his fever ' रामो ज्वरोपशमनान्नीरोगः कृतः, प्रकृतिस्थः संजातः; ' c. ed of wounds ' निर्व्रणः कृतः; निर्विषः; &c. *-s.* चिकित्सा, उपशमः, प्रति(ती) कारः, रोगोपशमः. **2** सुस्थता, स्वास्थ्यं. **3** भेषजं औषधं. **-able,** *a.* साध्य; ' inc. by physicians ' भिषजामसाध्यं (R. VIII. 93); शमनीय, प्रतिकार्य. **-ative,** *a.* रोगहर, रोगघ्न (घ्नी *f.*), व्याधिशमक, शांतिद. **-er,** *s.* चिकित्सकः, **-less,** *a.* असाध्य, दुरुपचार.

Curiosity, *s.* कुतूहलं, कौतूहलं, जिज्ञासा, कौतुकं, कुतुकं; oft. ex. by desid. nouns; ' c. to see ' दिदृक्षा. **2** (Object of c.) अपूर्ववस्तु *n.* दुर्लभद्रव्यं, उत्कृष्टद्रव्यं. **-Curious,** *a.* कुतूहलिन्, जिज्ञासु, कौतुकाक्रांतचित्त, कुतुकाविष्ट, सकौतुक; ' my heart is c. to know ' जिज्ञासाक्रांतहृदयोस्मि, oft. by desid. ; ' c. to ascertain ' उपलिप्सुः. **2** अपूर्व, अदृष्टपूर्व, अद्भुत, चित्र, दुष्प्राप, दुर्लभ; दर्शनीय. **3** सूक्ष्म, विज्ञ; निपुण, विचक्षण सूक्ष्मदर्शिन. **-ly,** *adv.* कुतूहलेन; सूक्ष्मं, अद्भुतं, चित्रं.

Curl, *s.* चूर्णकुंतलः, अलकः, कुरलः; ' hair thick with c s. ' कुंतलाकीर्णाः शिरोरुहाः. **2** तरंगः, ऊर्मि *f.* *-v. t.* (केशान्) आकुंच् c. व्यावृत् c., रच् 10. **2** तरंगयति (D) *-v. i.* जिम्हीभू, वक्रीभू, आकुंच् pass., व्यावृत् 1A. **2** तरंगायते (D). **-ed, -ing,** *a.* कुटिल, अराल. कुंचित; ' c. mass of smoke ' धूमस्योत्पीडः (U. 3).

Curmudgeon, *See* **Miser.**

Currant, *s.* शुष्कद्राक्षं.

Current, *a.* प्रचलित, प्रचल, सर्वसंमत; ' languages c. in India ' भरतखंडे प्रचलिता भाषाः. **2** वर्तमान, विद्यमान; ' c. year ' वर्तमानसंवत्सरः; ' c. report ' जनप्रवादः; ' c. moment ' आपातः. आपातस्था विषयाः (KI. XI. 12). **3** सर्वसाधारण लोकप्रसिद्ध-विश्रुत, *-s.* स्रोतस् *n.*, प्रवाहः, रयः, वेगः, धारा, ओघः; ' c. of opinion ' साधारण-मतौघः. **-ly,** *adv.* साधारणतः, सामान्यतः, लौकिकतया; ' c. known ' लोकप्रसिद्ध. **-Currency,** *s.* प्रचलनं, प्रचारः, प्रसरणं; ' to gain c. ' प्रचलित *a.* भू, प्रसृ 1 P. व्यवह् ' c. pass., ' सर्वसंमत *a.* भू; ' a report gained c. ' इति जनप्रवादः श्रुतः **2** प्रवाहः, प्रसरः, **3** सुखोच्चार्यता. **4** प्रचलित मुद्रा.

Curriculum, *s.* अध्ययनक्रमः-मार्गः.

Currier, *s.* चर्मकारः, पादुकृत् *m.*

Curry, *v. t.* (favour) अतिचाटूक्त्या प्रसादं संपद् c. or आराध् 10. **2** (a horse) अश्व-देहं मृज् 2 P. **3** (leather) परिष्कृ 8 U, शुध् c. **4 Beat,** q. v.; ' c. comb ' अश्व-देहमार्जनी.

Curse, *v. t.* शप् 1 U, अभिशंस् 1 P, शापं दा 3 U (with dat.), आक्रुश् 1 P ; गर्ह् 1, 10 A. *-s.* शापः, अभिशापः, आक्रोशः. **2** कंटकः, आधिः ; ' a c. to the family ' कुलस्याधिः, कुलांगारः, कुलपांसुलः ; ' a c. on thy folly ' धिक् त्वां मूढ. **-ed,** *a.* शप्त, आक्रुष्ट; *See* **Accursed.**

Cursory, *a.* क्षिप्र, असूक्ष्म, त्वरित, अनिपुण, अनवहित, स्थूल ; ' even at a c. glance ' स्थूलदृष्ट्यापि. **-ly,** *adv.* शीघ्रं, स्थूलदृष्ट्या, अनिपुणं.

Curt, *a.* ह्रस्व, संक्षिप्त. **-ly,** *adv.* संक्षेपेण. **-ness,** *s.* संक्षेपः, संहारः, संक्षिप्तता.

Curtail, *v. t.* ह्रस्व् c., संक्षिप् 6 P; संदृ. 1 P; अवच्छिद् 7 P, अल्पीकृ 8 U.

Curtain, *s.* ज(य)वनिका, तिरस्करिणी, व्यवधानं, आवरणपटः; ' behind the c. ' नेपथ्ये; ' c. lecture ' शय्यानुशासनं; ' bed c. ' मशहरी, मशकहरी. *-v. t.* आवरणेन प्रच्छद् 10, व्यवधा 3 U.

Curtsy } *See* **Courtesy** under
Curtsey } **Court.**

Curve, *v. t.* नम् c., अव-आ-नम् c., आकुंच् c., वक्रीकृ 8 U, कुटिलीकृ, आवृज् 10. *-s.* नति *f.*, आवर्जनं, वक्रता, आकुंचनं, अंचनं. **2** वक्ररेखा. *-a.* आनत, वक्र, कुटिल, आभुग्न, जिह्म; *See* **Crooked. -ated,** *a.* आभुग्न, वक्र &c. **-ation,** *s.* आकुंचनं, आवर्जनं, वक्रीकरणं. **-ature,** *s.* वक्रता, वक्रिमन् *m.*, कुटिलता, आनति *f.* वक्रीभावः.

Curvet, *v. i.* प्लु 1 A, वल्गृ 1 P. *-s.* प्लुतं, वल्गनं.

Cushion, *s.* उपधानं, उपबर्हः, पीठोपधानं.

Cusp, *s.* अर्धेंदुशिखा, अर्धचंद्राग्रं. **-ated,** *a.* सूच्यग्र, निशितात्र.

Custody, *s.* रक्षा, अवेक्षणं, रक्षणं, पालनं, गुप्ति *f.*; *See* **Charge. 2** निरोधः, बंधनं, कारानिरोधः, आसेधः.

Custom, *s.* आचारः, संव[illegible] व्यवहारः, रीति *f.*, अनुसारः, क्रमः [illegible]करः, शुल्कं, राजस्व; ' c. house ' शुल्कस्थानं; ' the officer of c. s ' शौल्किकः. **-ary,** *a.* आचारिक-व्यावहारिक (की *f.*), प्रचलित, लोकसिद्ध, लौकिक (की *f.*), gen. by आचार in comp., ' to take flowers as is c. ' आचारपुष्पग्रहणार्थं (M. 4); आचार-लाजाः; &c. **-arily,** *adv.* यथाव्यवहारं,

संप्रदायानुसारेण, प्रायशः, यथाचारं. **-er,** *s.* ग्राहकः, क्रेतृ *m.*, नित्यक्रायिन् *m.*

Cut, *v. t.* लू 9 U, छिद् 7 P, कृत् 6 P, दो 4 P, व्रश्च् 6 P, छो 4 P, **2** भिद् 7 U; खंड् 10; 'c. ing to the quick' मर्मच्छिद्-भिद् मर्माणि कृंतत्; 'c. a hole through,' व्यध् 4 P, निभिद्, समुत्कृ 6 P; 'c. a figure' प्रतिष्ठां-कीर्तिं-लभ् 1 A; 'c. short' संक्षिप् 6 P; न्यूनीकृ 8 U; 'to c. the matter short' किंबहुना; 'c. ing short my speech' मद्वचनमाक्षिप्य; 'c. to, or in, pieces' खंडशः-लवशः-छिद्. **-***v. i.* उद्भिद् pass., उत्पद् 4 A, स्फुट् 6 P. **-***s.* छेदः, प्रहारः, आघातः. **2** कुल्या, खातं. **3** खंडः-डं, भागः, दलं, लवः, लेशः. **4** सरलमार्गः, अविमार्गः. **5** रीति *f.*, रूपं, मार्गः, पद्धति *f.* 'c.-purse' ग्रंथिभेदकः चोरः; 'c.-throat' कंठच्छेदकः; प्राणघातकः; घातकः; (*a.*) मारात्मक, वधोद्यत. **-down,** अवच्छिद्, कर्तित्वा निपत् c. **-off,** निकृत्, व्यवच्छिद्. **2** उच्छिद्, उन्मूल् 10. विनश् c. **3** विलुप् c., अपनी 1 P, **4** विच्छिद्, अव-नि-रुध् 7 U, खंड् 10, निवार् 10. **-out,** उत्कृत् c. **2** परि-सं-कल्प् c. (मनसा); निरूप् 10, चिंत् 10, युज् 10. **3** अतिक्रम् 1 U, 4 P, अतिशी 2 A; *See* **Excel.** **-ter,** *s.* छेदकः, छेत्तृ *m.*, छिद् in comp.; 'wood-c.' काष्ठच्छिद्. **-ting,** *s.* छेदनं, कर्तनं, &c. **2** खंडः-डं, शकलः-लं, दलं. **-***a.* तीव्र, तीक्ष्ण, मर्मभेदिन्, मर्मस्पृश्-छिद्, अरुंतुद.

Cutaneous, *a.* त्वाच (ची *f.*), त्वक्संबंधिन्, त्वच् in comp.; 'c. disease' त्वग्रोगः.

Cuticle, *s.* बाह्यत्वच् *f.*, बाह्यचर्मन् *n.*

Cutlass, *s.* खड्गः; कृपाणी.

Cutler, *s.* छुरिकाकारः, शस्त्रकारः.

Cycle, *s.* चक्रं, आ-परि-वृत्ति *f.*, पर्यायः; कालचक्रं.

Cyclone, *s.* चक्रवातः, वातावर्तः.

Cyclopɔ**(œ)dia,** *s.* *See* **Encyclopedia.**

Cygnet, *s.* हंसशावकः, बालहंसः.

Cylinder, *s.* गोलः, वर्तुलं. **-Cylindrical,** *a.* वर्तुल, गोलाकार.

Cymbal, *s.* झल्लकं, झल्लरी.

Cynic, *s.* मनुष्यद्वेषिन् *m.* **-al,** *a.* सदावक्र, कुटिलशील, दुरात्मन्, वक्रभाव, निंदाशील.

Cynosure, *s.* ध्रुवः; ज्योतीरथः.

D.

Dab, *v. t.* सिक्तद्रव्येण लघु तड् 10. **-***s.* लघ्वाघातः, निषेकः. **2** लघुपिंडः. **3** क्षिप्तपंकः.

Dabble, *v. t.* सिच् 6 P, प्रोक्ष् 1 P, लिप् 6 P. **-***v. i.* जले-पंके-क्रीड् 1 P; 'd. ing in books' पल्लवाग्राहि पांडित्यं (H. 1), शास्त्रचुंचनं. **-er,** *s.* जलक्रीडः; शास्त्रचुंचकः.

Dacoit, *s.* दस्यु *m.* **-y,** *s.* दस्युकर्मन् *n.*

Dagger, *s.* कृपाणः, छुरिका, कर्तरी, असिपुत्रिका; 'at d.-s drawn' सदावद्धवैर *a.*

Daggle, *v. t.* मलेन दुष् c. (दूषयति), पंकेन लिप् 6 P.

Daily, *See* under **Day.**

Dainty, *a.* स्वादु, रुचिर, सुरस, मिष्ट. **2** ललित, कोमल, मृदु, सूक्ष्म. **3** अतिविनीत, अतिसभ्य. **-***s.* मिष्ट-विशिष्ट-भोजनं, स्वाद्वन्नं, भोजनविशेषः. **-ly,** *adv.* स्वादुतया, ललितं, कोमलं. **-ness,** *s.* स्वादुता; कोमलता, लालित्यं, विलासः, विभ्रमः.

Dairy, *s.* दुग्धशाला, दधिमंथनगृहं; 'd. maid' गोपकन्या, आभीरी, गोदोहिनी.

Dais, *s.* सवितानं उच्चासनं.

Dale, *s.* दरी, कंदरः; उपत्यका.

Dally, *v. i.* विलस् 1 P, विभ्रम् 1, 4 P, क्रीड् 1 P, रम् 1 A. विह 1 P. **2 Delay,** q. v. **-ance,** *s.* विलासः, विभ्रमः, क्रीडा, विहारः, कामचेष्टा.

Dam, *s.* सेतुः, जलावरणं, धरणः. **2** (पशूनां) मातृ *f.*, जननी अंबा, प्रसूः. **-***v. t.* (up) (सेतुना) जलं निरुध् 7 U or संस्तंभ् 9 P.

Damage, *s.* हानि *f.*, अपकारः, अपायः, नाशः, ध्वंसः. **2** (of things in use) क्षयः, क्षति *f.*, उपक्षयः, अपचयः. **3** निष्कृति *f.*, प्रतिफलं, क्षतिपूरणं. **-***v. t.* नि-अप-कृ 8 U, क्षि c., नश् c., दुष् c. (दूषयति). **2** हिंस् 7 P, क्षण् 8 P.

Damask, *s.* चित्रदुकूलं. **-***v. t.* **Variegate,** q. v.

Dame, *s.* आर्या, भवती (in addressing). **2** स्त्री, गृहिणी, 'old d.' वृद्धा स्त्री, पुरंध्री.

Damn, *v. t.* दंड् 10; *See* **Condemn.** **2** नरकदंडं आदिश् 6 P, नरक निपत् c. **3** गर्ह् 1, 10 A; *See* **Censure.** **-able,** *a.* गर्ह्य, निंद्य. **2** नरकदंडार्ह. **-ation,** *s.* निरय-नरक-वासः; नरकदंडः, नरकयातना, विनिपातः, अनंतदंडः-यातना.

Damp, *s.* क्लिन्न, स्तिमित, आर्द्र, जलसिक्त, उन्न; 'to be d.' क्लिद्, 4 P. **2** विषण्ण, म्लान, अवसन्न, भग्नोत्साह. **-***s.* क्लेदः, जलावसेकः, स्तेमः. **2** बाष्पः, धूमः. **3** विषादः, म्लानता, उत्साहभंगः. **-***v. t.* क्लिद् c., उंद् 7 P. आर्द्रीकृ 8 U. **2** भंज् 7 P, खंड् 10, ध्वंस् c., भग्नाश *a.* कृ, भंगं-ध्वंसं-कृ; 'do

not d. his energy' तस्योत्साहभंगं मा कृथाः; 'd. ed by defeat' पराजयेन भग्नोत्साहः. **-ish**, *a.* आक्लिन्न, ईषदार्द्र. **-ness**, *s.* आर्द्रता, क्लिन्नता.

Damsel, *s.* कन्या, बाला, कुमारी, बालिका, युवति (ती) *f.* 'd.'s child' कानीनः (नी *f.*); 'celestial d.' अप्सरस् *f.*, स्वर्गस्त्री-योषित् *f.*

Dance, *v. i.* नृत् 4 P, नट् 1 P; 'who always d. s attendance' यः अहर्निशमुपरचिताञ्जलिः (अधिदेवतमिव) स्तौति (Ka. 109); or merely सांजलि उपस्था 1 A or उपास् 2 A. —*v. t.* नृत् c., संचल् c. —*s.* नृत्यं, लास्यं, ताण्डवं, नाट्यं, पादन्यासः. **-er**, *s.* नटः, नर्तकः, कुशीलवः, शैलूषः; 'male d. in a female dress' भ्रः (भ्रू or भ्रू) कुंसः (इः). **-ing**, *s.* नाट्यं, नृत्यं; 'd. girl' नर्तकी, 'd. house-school' नृत्यशाला; 'd. master' नाट्याचार्यः.

Dandle, *v. t.* अंके निधाय लल् 10.

Dandri(u)ff, *s.* मज्जा; दारुणं.

Dandy, *s.* सुवसनः, सुभगंमन्यः; दांभिकः

Danger, *s.* भयं, भीतिः *f.*, शंका, संदेहः, संशयः. **2** आपद्-विपद् *f.*, अपायः, अनर्थः, व्यसनं, संकटं, दुर्गं, कृच्छ्रं, कष्टः-ष्टं; 'd. to life' जीवितसंशयः; 'the hour of d.' आपत्समयः; 'money is in d. of being lost' द्रव्यापहरणस्य भयं वर्तते; 'without any d.' अकुतोभय *a.*; 'brought into d.' संशयित; 'attended with d.' संदिग्ध, संशयदोलारूढ. —*v. t.* संशये पत् c., संशयस्थ *a.* कृ 8 U. **-ous**, *a.* संकट, संबाध, विषम. **2** भयावह, भयंकर, भीतिप्रद. भयहेतुक; oft by (*s.*) in comp. **3** संदिग्ध, शंकाकांत, संशयापन्न, विपज्जनक; 'a d. man' अविश्वास्यः, घातुकः. **-ously**, *adv.* भयपूर्वकं; 'my brother is d. ill' मम भ्राता जीवितसंशये वर्तते.

Dangle, *v. i.* लुल् 1 P, लुट् 6 P, चंच् 1 P, लंब् 1 A; 'd-ing at the feet' पादलग्न, चरणलोल.

Dank, *a.* See **Damp**.

Dapple, *v. t.* चित्र् 10, कर्बुरीकृ, 8 U. कल्माषयति (D.). **-ed**, *a.* चित्र, कर्बुर. कल्माषित, शबल.

Dare, *v. i.* धृष् 5 P, उत्सह् 1 A; साहसं कृ 8 U, शक् 5 P. —*v. t.* आह्वे 1 A, धृष् c. —*s.* आह्वानं, योधसंरावः. **-ing**, *s.* साहसं, धार्ष्ट्यं, धैर्यं, प्रगल्भता, निर्भीकता. —*a.* साहसिक (की *f.*), निर्विशंक, धृष्ट, शूर, प्रगल्भ, निर्भय. **-ingly**, *adv.* धृष्टं, साहसेन; प्रगल्भं, निर्भयं. **-ingness**, *s.* साहसं, धृष्टता, &c.

Dark, *a.* अंधकारमय (यी *f.*); तिमिरावृत, तमोवृत, तामस [illegible]), तमस्विन्, निष्प्रभ. **2** कृष्ण, श्याम, नील. **3** अस्पष्ट, गूढ, दुर्बोध. **4** पाप, दुष्ट, खल, गर्ह्य, निंद्य; 'd. in soul तमोवृत्ति, पापात्मन्; 'd. thoughts' पापसंकल्पाः. *s.*, **-ness**, *s.* अंधकारः, तमस् *n.*, तमिस्रा-स्रं, ध्वांतं, तिमिरं; 'quality of (tendency to) d.' तमोगुणः; 'slight d.' अवतमसं; 'pitchy (blinding) d.' अंधतमः, सूचिभेद्यं तमः; 'in the d.' रजनीतिमिरे; 'all-pervading d.' संतमसं. **2** गूढं, रहस्यं; 'I am still in the d. about the matter' तस्यार्थस्याहमद्याप्यनभिज्ञः, न किमपि वेद्मि. **-en**, *v. t.* अंधकारयति (D.), तिमिरेण आवृ 5 U, तिमिरेण आच्छद् 10. **2** (fig.) कलुषयति-कलंकयति (D.), दूष् c. (दूषयति); 'face d. ed with fury' कोपकलुषिताननं. —*v. i.* अंधीभू 1 P. **-ish**, *a.* ईषत्कृष्ण, आनील. **-ly**, *adv.* सांधकारं, अस्पष्टं, अव्यक्तं, गूढं. **-some**, *a.* निष्प्रभ, तमोवृत.

Darling, *a.* प्रिय, प्रियतम, दयित; ex. by जात, तात. —*s.* स्नेहपात्रं, वत्सः, जातः, दयितः,

Darn, *s.* वस्त्रसंधिः. —*v. t.* जीर्णवस्त्राणि सिव् 4 P, or सीव्य 5 U.

Dart, *s.* अस्त्रं, शल्यं, शंकुः. **2** बाणः; *See* **Arrow**. —*v. t.* सुच्-क्षिप् 6 P, अस् 4 P, पत् c., विसृज् 6 P, (with loc.). —*v. i.* जवेन-सहसा-सवेगं-उत्था 1 P, or पलाय् 1 A. **2** सहसा उदि 2 P or आविर्भू 1 P. **3** स्फुर् 6 P, विलस् 1 P; 'd. on' रभसा-जवेन प्रचल् 1 P or आपत् 1 P or अभिद्रु 1 P.

Dash, *v. t.* रभसा प्रक्षिप् 6 P or पत् c., आ-प्रत्या-हन् 2 U; 'd. ed her head against a rock' प्रस्तरे तस्याः शिरः आजघ्ने. **2** सूद् 9 P, प्रभंज् 7 P, खंडशः कृ 8 U, चूर्ण् 10, विद् 10; 'the ship was d. ed to pieces' पोतः खंडशो भग्नः, सहस्रधा विदीर्णः, (प्रतिघातेन) शकलीकृतः. **3** अवकृ 6 P; उक्ष् 1 P, सिच् 6 P. **4** संमिश्र् 10. **5** विनश् c., व्यासुज् 2 P or c., विलुप् c. —*v. i.* (against) आपत् 1 P, आ-समा-हन्. **2** शकलीभू 1 P, विद्-प्रभंज् pass.; 'd. off' जवेन पलाय् 1 A or अपसृ 1 P. —*s.* संघट्टः, समाघातः, अभिघातः, निष्पेषः, संमर्दः. **2** प्रहारः, आघातः. आक्रमः. **3** प्रागल्भ्यं, धीरता, उत्साहः.

Dastard, **-ly**, *See* **Coward**, **-ly**.

Data, *s.* स्वीकृतानि तत्त्वानि; उपन्यासः.

Date, *s.* खर्जूरः-री. **2** कालः, तिथि *m. f.*; कालावधिः, लेखनदिवसः-तिथिः-दिनं; 'out of d.' व्यवहारातिक्रांत. —*v. t.* दिनं-तिथिं-लिख् 6 P. —*v. i.* (from) आरभ् 1 A (with abl.); विशिष्टकालादारभ्य प्रवृत् 1 A.

Daub, *v. t.* लिप् 6 P, अं 7 P, दिह् 2 U. **-s.** लेपः, विलेपनं. **2** कुचित्रं, कदालेख्यं. **-er,** *s.* लेपकः. **2** अकुशलचित्रकरः. **-y,** *a.* श्यान, सांद्र

Daughter, *s.* कन्या, दुहितृ *f.*, तनया, पुत्रिका, आत्मजा, सुता, पुत्री, नंदिनी; oft ex. by Patronymics; 'd. of Parvata' पार्वती; 'd. of Janaka' जानकी; 'd.-in-law' स्नुषा, वधूः.

Daunt, *v. t.* त्रस् c., भी c., उत्साहं-धैर्यं-भंज् 7 P; भग्नाश *a.* कृ 8 U, धैर्यं स्खल् c. **-less,** (und.-ed), *a.* निर्भीक, निर्भय, अजातशंक, अभीत, अस्खलितधैर्य. **-lessness,** *s.* अभयं, विशंकता.

Daw, *s.* द्रोणकाकः.

Dawdle, *v.* विलंब् 1 A; कालं हृ 1 P or क्षिप् 6 P.

Dawn, *s.* उषस् *f.*, *n.*, प्रत्यूषः, प्रभातं, विभातं, दिनमुखं, अरुणोदयः; 'it is d.' प्रभाता रजनी. **2** उदयः; 'd. of liberty' स्वातंत्र्योदयः; 'belonging to the d.' उषस्य, प्रभातीय, (*s.*) in comp. **-v.** *i.* आविर्भू 1 P, उद्भिद् pass., उद्गम् 1 P, प्रभा 2 P; 'before the day d. ed' अप्रभातायां शर्वर्यां; 'the day d. ed' प्रभाता रजनी.

Day, *s.* दिनं, दिवसः, वासरः, अहन् *n.*, वारः 'a lunar d.' तिथि *m. f.*, 'd. by d.' दिने दिने, अनुदिवसं, प्रत्यहं; 'by d.' दिवा; 'the next d.' परेद्युः, 'the d. before' पूर्वेद्युः; 'another d.' अन्येद्युः; 'the other d.' अचिरं; 'd. and night' अहर्निशं, अहोरात्रः; दिवारात्रं, नक्तंदिवं; 'all d. long' अहर्निशं, रात्रिंदिवं, दिवा-निशं-रात्रं; 'till this d.' अद्य यावत्; 'the d. after to-morrow' परश्वः; 'he gained the d.' तस्मिन् दिने स वियजी बभूव; 'd. break' *See* **Dawn;** 'd. labour' व्रातं, दैनिकं कर्म; 'd. labourer' व्रातीनः; 'd. light' सूर्यप्रकाशः, दिनज्योतिस् *n.*; 'd. star' प्रभातनक्षत्रं; 'd. time' दिनकालः, दिनसमयः; 'being in the d.' दिवातन (नी *f.*); 'during d.' दिवा. **-Daily,** *a.* दैनिक-प्रत्यहिक-आह्निक (की *f.*), दैनंदिन (नी *f.*) 'd. business' आह्निकं; नित्यकर्मन *n.* **-***adv.* प्रति in comp. with 'day'; प्रत्यहं, प्रतिदिनं; दिने दिने, अहरहः. &c.

Daze, *v. t.* *See* **Stun.**

Dazzle, *v. t.* (the eye) चक्षुषः तेजः प्रतिहन् 2 P (Ka. 43); नेत्रं प्रतिहन्. **-ing,** *a.* दुष्प्रेक्ष्य, दुर्निरीक्ष्य; 'of d. splendour' प्रभाविशेषादयदुर्निरीक्ष्यः (R. vi. 5); नेत्रप्रतिघातिन्, (विजित्य नेत्रप्रतिघातिनीं प्रभां K. v. 20).

Dead, *See* under **Die.**

Deaf, *s.* बधिर, श्रोत्रविकल, अकर्ण, एड; 'd. and dumb' एडमूकः. **-en,** *v. t.* बधिरयति (D.), कर्णं उपहन् 2 P, बधिरीकृ 8 U; 'd. ing all directions with cries of alas' हाहानिनादेनदिशो बधिरयंतः. **-ly,** *adv.* बधिरवत्; अश्रुतिपूर्वं. **-ness,** *s.* बधिरता, एडता, श्रवणाक्षमता.

Deal, *s.* बाहुल्यं, प्राचुर्यं; 'a good d. of' बहु, प्रचुर, भूरि, विपुल; 'a good d. of corn' बहुधान्यं; 'a good d.' (*adv.*) अत्यंतं, बहु, भृशं, गाढं, अति or सु pr.; सुतप्त, अतिकृश, &c. **2** देवदारु *n.* **-***v. t.* विभज् 1 U, परिकल्पय् c., पृथक् पृथग् विन्यस् 4 U. **2** विक्रे 6 U, व्यस् 4 P; 'd. blows' मुष्टिना प्रहृ 1 P, आघातं-प्रहारं-कृ 8 U. **-***v. i.* (in) पण् 1 A, व्यापृ 6 A: क्रयविक्रयं कृ, व्यवहृ 1 P; 'he does not d. in missiles' नास्य व्यवहारोऽस्त्रेषु (U. 5). **-with,** आचर् 1 P, वृत् 1 A, व्यवहृ. **2** प्रतिकृ 8 U; निरुध् 7 U; स्पर्ध् 1 A; *See* **Contend.** **3** विधा 3 U, वशीकृ, विनी 1 P; 'easy to d.' विधेयः, वश्यः. **-er,** *s.* वणिज् *m.*, आपणिकः, विपणिन् *m.*, क्रयविक्रयिन् *m.* **2** व्यवहारिन्-व्यापारिन्-व्यवसायिन् *m.*; 'd. in wood' काष्ठव्यवहारकः. **-ing,** *s.* वाणिज्यं, निगमः, विपणः, क्रयविक्रयः. **2** व्यवहारः, व्यवसायः, आचरणं, व्यापारः, चेष्टितं, क्रिया, कर्मन् *n.*, वृत्ति *f.*, वर्तनं. **3** सव्यवहारः, संसर्गः, संगमः.

Dear, *a.* बहुमूल्य, महार्घ-र्ह, महामूल्य. **2** प्रिय, दयित, वल्लभ, अभिमत, इष्ट, कांत, अभीप्सित; 'd. friend' हृदयंगमः सखा; 'as d. as one's life' प्राणप्रियसम. **3** (As a term of endearment) दयित, कांत, जात, वत्स, प्रिय; 'd. Jânaki' प्रिये जानकि; वत्स राम, &c. **-***adv.*, **-ly,** बहुमूल्येन, महार्घेण. **2** अत्यंतं; सुप्रियं, सुप्रीत्या, अति-सुपr. **3** अहो. बत, हा, हंत, अहह. **-ness,** *s.* प्रियता. अभीष्टता, प्रीति *f.* **2** बहुमूल्यं, महार्घता, महार्घः.

Dearth, *s.* दुर्भिक्षं, दुष्कालः; 'd. felt' नीवाकः, प्रयामः. **2** अभावः, अप्राप्ति *f.*, विरहः, दुर्लभता.

Death, *See* under **Die.**

Debar, *v. t.* नि-प्रति-वि-षिध् 1 P. निवार् 10, निरुध् 7 U. **2** निराकृ 8 U, निरस् 4 U.

Debark, *v. i.* उत्तृ 1 P, नौकाया अवतृ. **-***v. t.* अवतृ c.

Debase, *v. t.* Ex. by कृ 8 U, with **Base,** q. v.; अपकृष् 1 P, स्वपदात् पत् c. or भ्रंश् c. or च्यु c.; लघूकृ, अवज्ञा 9 P. **-ment,** *s.* अपकर्षः, अभिभवः, पदच्यावनं, लघूकरणं. अवमानना, अवज्ञा. **2** अप-नि-कृष्टता, अधोगति *f.*, नीचस्थिति *f.*

Debate, *s.* वि-, वादः, वादप्रतिवादः. वादयुद्धं, विचारः, वितर्कः, हेतुवादः. **-***v. t.* विचर् c.,

वितर्कू 10; *See* **Argue.** **-v. i.** विवद् 1 A, विप्रलप् 1 P, वाक्कलहं-वादयुद्धं-कृ 8 U. **-er,** *s.* वादिन् *m.*, वितर्किन्-विवादकृत्-हेतुवादिन् *m.* **-ful,** *a.* वादप्रिय, विवादशील, वादार्थिन्.

Debauch, *v. t.* दुष् c. (दूषयति), नश् c., सत्पथात् च्यु c. or भ्रंशू c.; 'd. a girl.' (कन्यां) दुष् c., धृष् c., सतीत्वाद् भ्रंशू c., क्षतयोनिं कृ. **-s.** कामावेशः; विषयोपभोगः, विषयनिरतिं *f.* **-er,** *s.* विषयिन् *m.*, विषयासक्तः, कामासक्तः, विषयोपभोगरतः. **2** दुराचारः, दुष्टचरितः, खंडितवृत्तः. **-ery,** *s.* दूषकः, नाशकः. **-ery,** *s.* विषयासक्ति *f.*, कामासक्तता, विषयोपभोगः, व्यसनं, विषयित्वं.

Debenture, *s.* प्रतिज्ञापत्रं, नियमलेखः.

Debilitate, *v. t.* तेजो हृ 1 P or नश् c.; क्षै c. (क्षपयति), दुर्बलीकृ 8 U, क्षीणीकृ. **-ed,** *a.* दुर्बल, क्षीण, कृश, अशक्त, क्षाम. **-Debility,** *s.* दौर्बल्यं, शक्तिहीनता, क्षामता, कार्श्यं, तेजोहानिं *f.*, शक्तिक्षयः, शक्तिपातः, अशक्तता.

Debit, *v. t.* देयधनभागे लिख् 6 P.

Debonair, *a.* सभ्य, शिष्ट, सुशील, सुविनीत, आर्य. **-ly,** *adv.* सभ्यवत्, सुविनीतं.

Debt, *s.* ऋणं; 'pay off or discharge a d.' ऋणं दा 3 U or शुध् c., अनृणतां-आनृण्यं गम् 1 P; 'he paid off the d. of his master by his life' स्वासुभिर्भर्तुरानृण्यं गतः (M. 5); 'discharge of d.' ऋणशोधनं-निस्तारः, ऋणमोक्षः; 'involved in d.' ऋणग्रस्त, ऋणिन्; 'run into or incur d.' ऋणं कृ, ऋणं ग्रह् 9 P; 'free from d.' अनृण. **-or,** *s.* ऋणिन् *m.*, अधमर्णः.

Decade, *s.* दशकं; 'd. of year' दशवर्षं.

Decadence, Decadency, *s.* क्षयः, अवपातः, अवसादः.

Decagon, *s.* दशास्रं, दशभुजः.

Decamp, *v. i.* कटकं-शिविरं-स्थानं 1 P, कटकनिवेशाद् अपसृ 1 P or अपक्रम् 1 U, 4 P, सहसा पलायू 1 A or अपक्रम्. **-ment,** *s.* कटकत्यागः, अपसरणं, पलायनं; अपगमनं.

Decant, *v. t.* काचपात्रे स्रु c. or निक्षिप् 6 P, **-er,** काचपात्रं, कूपी.

Decapitate, *See* **Behead.**

Decay, *v. i.* क्षि pass., क्षयं-लयं-या-इ 2 P, ज 4 P, शृ pass., ह्रस् 1 P, अवसद् 1 P; गल् 1 P, नश् 4 P, म्रक्ष् 4 A, क्षै-क्ले-ग्लै 1 P, ध्वंस् 1 A; 'with d.-ed leaves' प्रपर्णः-शीर्णपर्णः- (वृक्षः). **-v. t.** Causal of roots above. **-s.** क्षयः, अवसादः, जीर्णता, ह्रासः, प्रलयः; नाशः, अपचयः; क्षामता, ग्लानिं *f.* **-ing,** *a.* क्षयिन्, क्षीयमाण, विशीर्यमाण.

Decease, *v. i.* मृ 6 A, उपरम् 1 P; *See* **Die.** **-s.** मरणं, मृत्युः, निधनं, तनुत्यागः, उपरमः, संस्थानं. **-ed,** *a.* **Dead,** q. v

Deceive, *v. t.* वंच् 10, प्रतृ c., प्रलुभ् c., भ्रम् c. (भ्रमयति), मुह् c.; *See* **Cheat;** 'you are much d. ed (in thinking so)' महाभ्रमोयं तव. **-er,** *s.* वंचकः, प्रतारकः, कितवः, मायिन् *m.*, धूर्तः, शठः. **-Deceit, -Deception,** *s.* प्रतारणा, कपटं, छद्मन् *n.*, छलं, वंचनं-ना, कैतवं, माया, विप्रलंभः, कूटं, अतिसंधानं, उपधिः. **2** मोहः, भ्रमः. **-ful, -Deceptive,** *a.* कपटपर, वंचक, धूर्त, वंचनशील, कपटिन्, मायिन्, छाद्मिक, शठ, कितव. **2** भ्रमकारिन्, मोहिन्, भ्रांतिजनक, मोहोत्पादक. **-fully,** *adv.* सव्याजं, छद्मना, मायया, सकपटं, छलेन.

December, *s.* सहस्यः, मार्गशीर्षपौषौ.

Decennial, *a.* दशवार्षिक (कीं *f.*), दशवर्षीय-ण, दशवर्षस्थायिन्.

Decent, *a.* विनीत, सविनय, समर्याद, शिष्ट, सभ्य. **2** युक्त, उचित, योग्य, उपपन्न, शिष्टाचारानुरूप, साधुसंमत. **-ly,** *adv.* सविनयं, सभ्यतया; युक्तं, यथातथं, यथोचितं. **-Decence, -cy,** *s.* विनयः, सभ्यता, मर्यादा, लज्जा, शालीनता. **2** औचित्यं, युक्तता, उपपत्तिं *f.*, यथार्थता.

Decharm, *v. t.* मंत्रं प्रतिकृ 8 U.

Decide, *v.* निर्णी 1 P, व्यवसो 4 P, निश्चि 5 U, परिच्छिद् 7 P, अव-संप्र-धृ 10; 'd. a case' कार्यं निर्णी, व्यवहारं दृश् 1 P or अवेक्ष् 1 A; 'perplexed so as not being able to d.' अपरिच्छेदाकुलं (S. 5). **2** निष्पद् c., साध् c. **-ed,** *a.* निश्चित, ध्रुव, दृढ, स्थिर; स्थिरो निश्चयः; 'd. or firm resolution'; असंदिग्ध, नियत, व्यवस्थापित. **-edly,** *adv.* असंशयं, नूनं, नियतं; *See* **Certainly.** **-er,** *s.* निर्णेतृ *m.*, निश्चायकः; प्रमाणपुरुषः, **-Decision,** *s.* निर्णयः, निश्चयः, व्यवसायः, संप्रधारणं, परिच्छेदः. **2** (Final result) निर्णयः; निष्पत्तिं *f.* **-Decisive,** *a.* संशयच्छिद्, निर्णायक, असंदिग्ध, निश्चयकारिन्, निश्चायक; 'said in a d. ly stern tone' परिच्छेदनिष्ठुरमाह स्म (Ka. 277). **-ly,** *adv.* सनिश्चयं, असंदिग्धं, सनिर्णयं; दृढं, स्थिरतया.

Deciduous, *a.* पातुक, पतनशील, क्षयिन्, अस्थायिन्. **-ness,** *s.* अवपातः, विध्वंसः, पतनशीलता. **2** अस्थायित्वं.

Decimal, *a.* दशक, दशगुणित. **-s.** दशांशः. **-Decimate,** *v. t.* दशमांशं ग्रह् 9 P, दशमं पुरुषं उद्ग्रह् 1 P.

Decipher, *v. t.* (a letter &c.) निर्-अनुवच् c., (गूढाक्षराणि) व्याख्या 2 P, स्पष्टीकृ 8 U, व्या-कृ, विशदीकृ. **-er,** *s.* व्याख्यातृ *m.*, विवरणकृत् *m.* **-ing,** *s.* व्याख्यानं, स्पष्टीकरणं.

Deck, *v. t.* अलं-कृ 8 U, भूष् 10, मंड् 10; *See* **Adorn. 2** आच्छद् 10, आस्तृ 9 U. **-s.** नौतलं, नौकापृष्ठं.

Declaim, *v. i.* (against) अपभाष् 1 A, निंद् 1 P, आक्षिप् 6 P; *See* **Abuse. 2** सालंकारं ब्रू 2 U, वाक्तांडवं कृ 8 U. **-er, Declamator,** *s.* वाक्पटुः, वागीशः. **2** निर्भर्त्सकः, निंदकः. **-Declamation,** *s.* सालंकारं वचनं, शब्दपांडित्यं; वाक्चातुर्यं, वाक्तांडवं.

Declare, *v. t.* वद् 1 P, कथ् 10, ख्या 2 P, आ-प्र-ख्या c. (ख्यापयति), प्र-काशृ c., प्रकटीकृ 8 U, उद्-घुष् 10, नि-आ-विद् c., अभिधा 3 U. **2** उदीर् c., उच्चर् c., कृत् 10, स्मृ 1 P, (in scriptures). **-v. i.** स्वमतं-अभिप्रायं-निविद् c. or ज्ञा c.; 'd. for ' अवलंब् 1 A, आश्रि 1 U; ' the army d. ed against its king ' स्वराजानं परित्यज्य प्रतिपक्षं समालंबत सैन्यं. **-ation,** *s.* प्रख्यापनं, प्रकाशनं, आख्यानं, ज्ञापनं, कीर्तनं. निवेदनं. **2** उक्ति *f.*, वचनं, भाषणं, प्रतिज्ञा, उपन्यासः. **-atory,** *a.* ख्यापक, ज्ञापक, निवेदक, वाचक, सूचक, अभिधायक. **-edly,** *adv.* स्पष्टं, व्यक्तं, प्रतिज्ञापूर्वकं.

Decline, *v. i.* क्षयं, ह्रासं-या-इ 2 P, or गम् 1 P, अवसद् 1 P, क्षि pass.; ध्वंस् 1 A, ध्वंस् 1 A, अपचि-विशृ pass. **2** त्यज् 1 P, विचल् 1 P, निहृत् 1 A, भ्रंशृ 1 A, 4 P. **3** परिणम् 1 P, आ-अव-नम्, अस्तं गम् 1 P, अस्तमवलंब् 1 A, अनेन समयेन परिणतो दिवसः (Ka. 47) ' the sun had d. ed' &c. **-v. t.** प्रत्याख्या 2 P, प्रत्याचक्ष् 2 A, प्रत्यादिशृ 6 P, अपाकृ 8 U, परिव्रज् 10. **2** आ-अव-नम् c. (नमयति), अपकृष् 1 P, आवृज्. **3** शब्दरूपाणि आख्या or कथ् 10. **-s.** ह्रासः, क्षयः. परिणति *f.*, पातः, अवसादः, ध्वंसः. अपचयः, अस्तः; 'in the d. of life' in d.-ing years ' पश्चिमे वयसि, परिणतवयसि. **2** देहक्षयः, क्षयरोगः. **-ation,** *s.* भ्रंशः क्षयः, च्युति *f.*, &c. **2** वक्रता, अवनमनं, आवजनं. **3** क्रांति *f.* अपगमः. **-Declension,** *s.* विभक्तिरूपाणि, शब्दविकारः. **2** क्षयः.

Declivity, *s.* अवसर्पिणी भूमिः, उत्संगः. **-ous, Declivous,** *a.* प्रवण, अवसर्पिन्.

Decoct, *v. t.* क्वथ् 1 P, पच् 1 P. **-ion,** *s.* क्वाथः, कषायः-यं, निर्यासः.

Decollation, *s.* शीर्षच्छेदः.

Decompose, *v. t.* पृथक् कृ 8 U; व्या-कृ, वि-ली c., विद्रु c. **-ition,** *s.* पृथक्करणं, व्याकरणं, विश्लेषः, विलयः.

Decompound, *v. t.* पुनर्मिश्र् 10. **2 Decompose,** q. v.

Decorate, *v. t.* भूष् 10, प्रसाध् c., अलंकृ 8 U, मंड् 10. **-ion,** *s.* प्रसाधनं, मंडनं, भूषणं, अलंकारः. परिष्कारः, आभरणं, **2** आकल्पः, वेषः, नेपथ्यं, मति (परि)कर्मन् *n.* **-or,** *s.* प्रसाधकः, विभूषकः.

Decorous, *a.* विनीत, सविनय, युक्त, उचित; *See* **Decent. -Decorum,** *s.* विनयः, मर्यादा, सभ्यता, शिष्टाचारः, सुरीति *f.*, सौजन्यं. **2** युक्तता, औचित्यं.

Decorticate, *v. t.* त्वचं निष्कृष् 1 P, निस्त्वचीकृ 8 U, निर्वल्कयति (D.)

Decoy, *v. t.* कपटेन आकृष् 1 P, वि-, मुह् c., प्रलुभ् c., प्रतॄ c.; *See* **Cheat. 2** पाशे बंध्-ग्रह् 9 P.

Decrease, *v. i.* परिक्षि Pass., ह्रासं गम् 1 P, or या-इ 2 P, अवसद् 1 P, ह्रस् 1 P, अल्पीभू 1 P, न्यूनीभू, अपचि pass. **-v. t.** ह्रस् c., अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.), ऊन् 10, अपचि 5 U. **-s.,-Decrement,** *s.* ह्रासः, क्षयः, अपचयः, अवसादः, न्यूनता-त्वं, अल्पत्वं.

Decree, *v. t.* आदिशृ 6 P, आज्ञा c. (ज्ञापयति), शास् 2 P. **2** दा c. (दापयति), प्रकॢप् c., विधा 3 U, दातुं निर्णी 1 P. **-v. i.** व्यवस्थाद्वारेण निर्णी, शासनं कृ, व्यवस्थां-विधिं-कृ; विचर् c., तीर् 10. **-s.** व्यवस्था, शासनपत्रं, व्यवस्थापत्रं, विधिः, राजाज्ञा; आनि-देशः; आज्ञा, शासनं.

Decrepit, *a.* जराक्रांत, जरातुर, जीर्ण, जरापरिणत. **-ude, (d. age,),** *s.* जरा, वार्धक्यं, जीर्णावस्था, जरावस्था.

Decrescent, *a.* क्षयिन्, क्षीयमाण, क्षयिष्णु.

Decretal, *s.* विधिसंहिता. **-***a* शासनपत्रनिर्दिष्ट.

Decry, *v. t.* अप-परि-वद् 1 U, निंद् 1 P, आक्षिप् 6 P, अपलप् 1 P. **-al,** *s.* परिवादः, आक्षेपः, अपलपनं.

Decumbent, *a.* शयान, संविष्ट, निषण्ण, उपविष्ट.

Decumbence, *s.* शयनं, शय्योपवेशनं.

Decuple, *a.* दशगुण.

Dedicate, *v. t.* उत्सृज् 6 P, निक्षिप् 6 P, प्र-वि-नि-युज् 7 A, 10, **2** प्रतिष्ठा c. (-ठापयति), संस्कृ 8 U, उपकॢप् c.; (books) सम्-ऋ c. (अर्पयति) निविद् c., **-ion,** *s.* उत्सर्गः, विनियोगः, प्रतिष्ठा, संस्कारः; समर्पणं, निवेदनं.

Deduce, *v. t.* अनुमा 2 P, 3 A, ऊह् 1 A, अपवह् 1 P, निर्णी 1 P, उपलक्ष् 10. **-ible,** *a.* आनुमानिक (की *f.*), ऊहनीय. **-ment, -Deduction,** *s.* अनुमानं, अनुमिति *f.*, ऊहनं, ऊहा, अपवाहः, **-Deductive,** *a.* आनुमानिक (की *f.*). **-ly,** *adv.* अनुमानेन.

Deduct, *v. t.* वियुज् 10, अवच्छिद् 7 P, उद्वह् 1 P, व्यवकल् 10, ऊन् 10. **-ion,** *s.* वियोजनं, उद्धारः, व्यवकलनं, उद्धृतांशः.

Deed, *s.* कर्मन् *n.*, कार्यं, क्रिया, कृत्यं, चेष्टितं. **2** लेखप्रमाणं, लिखितं; ' sale-d. ' विक्रय-

पत्रं; 'title d.' आगमः. 3 तत्वं, अर्थः, वस्तु *n.*

Deem, *v. t.* मन् 4 A, गण् 10, अवगम् 1 P, संभू c.

Deep, *a.* गभीर, गंभीर, अगाध, गहन, गाढ. 2 (of sound) मंद्र, धीर, गंभीर, मांसल, घन. 3 (of colours) घन; 'd. red' घनारुण, सुरक्त. 4 निम्न, नीच. 5 गहन, दुर्बोध, निगूढार्थ, अगम्य. 6 गभीरबुद्धि, दूरदृष्टि, विदग्ध; 'd. darkness' अंधं-घोरं-तमः, मंतमसं; 'she is d. in love,' दूरगतमन्मथा सा (S. 3); 'd. sigh' दीर्घनिश्वासः; 'd. love' दृढबद्धं प्रेम, गाढानुरागः; 'water knee-d.' जानुदघ्नं-मात्रं-ह्रयमं जलं. -*s.* **Sea,** q. v.; 'd. of night' निशीथः; घोररात्रि *f.* **-en,** *v. t.* गंभीरीकृ 8 U, घनीकृ, वृध् c. **-ly,** *adv.* गाढं, घनं, दीर्घं; अत्यंतं, अतीव, नितरां, निर्भरं, भृशं; 'sighing d.' दीर्घं निश्वस्य; 'd. sorry' शोकमग्न, अतिदुःखित; 'd. rooted' बद्धमूल. **-ness, -Depth,** *s.* गांभीर्यं, गाढता, घनता, अगाधता; 'd. of meaning' अर्थगौरवं (Mal. 1) अर्थगौरवं. 2 उदरं, गभीरस्थानं; 'the d. of lower regions' पातालोदरं. 3 वेधः, वेधनं. 4 मध्यं.

Deer, *s.* मृगः, हरिणः, कुरंगः, कुरंगमः, वातायुः, अजिनयोनिः; पृषत् *m.*, कृष्णसारः, रुरुः, शंबरः, रोहिषः, वानप्रमीः (varieties of d.)

Deface, *v. t.* विनश् c., उच्छिद् 7 P, विलुप् 6 P, or c., व्या-अप-मृज् 2 P. 2 विकृ 8 U, विरूप् 10, दुष् c. (दूषयति). **-er,** *s.* दूषकः, विनाशकः **-ment,** *s.* लोपः, उच्छेदः, दूषणं नाशनं.

De facto, *adv.* वस्तुतः, परमार्थतः.

Defalcate, *v. t.* न्यूनीकृ 8 U, ह्रस् c., अवच्छिद् 7 P, ऊन् 10. **-ion,** *s.* ह्रासः, अवच्छेदः, न्यूनता, अपचयः.

Defame, *v. t.* परि-अप-वद् 1 U, अपभाष् 1 A, आक्षिप् 6 P, गुणान्-अपलप् 1 P, अभिशंस् 1 P. **-ation,** *s.* परि-अप-वादः, आक्षेपः, अपभाषणं, निंदा, अभिशंसनं. **-atory,** *a.* परिवादक, गुणापवादक, अकीर्तिकर (री *f.*), आक्षेपगर्भ. **-er,** *s.* परिवादिन् *m.*, गुणापवादकः, आक्षेपकः, निंदकः.

Default, *s.* अपराधः, दोषः; व्यतिक्रमः, अननुष्ठानं, लोपः. 2 अभावः, असंभवः, अप्राप्तिः *f.*; 'in d. of fine' अदत्ते दंडे, दंडदानाभावे. **-er,** *s.* अपराधिन् *m.*, नियम-लंघिन्-व्यतिक्रामिन् *m.*

Defeasance, *s.* लोपः, व्यतिक्रमः, नियमभंगः-लोपः.

Defeasible, *a.* लोपनीय.

Defeat, *v. t.* परा-जि 1 A, परा-परि-भू 1 U, जि 1 P, भंज् 7 P; वि-दृ c., पराहन् 2 P, (d. completely) 2 मोघीकृ 8 U, व्याहन् 2 P, विहन्; *See* **Baffle.** -*s.* पराजयः, परिभवः, पराभवः. अभिभवः, भंगः. 2 व्याघातः, भंगः, प्रध्वंसः.

Defecate, *v. t.* मलं हृ 1 P, शुध् c., निर्मलीकृ 8 U. -*a.* निर्मल, शोधित, हृतमल. **-ion,** *s.* शोधनं, मलहरणं.

Defect, *s.* विकारः, दोषः, छिद्रं, वकल्यं, न्यूनता; 'bodily d.' अंगविकारः, व्यंगता. 2 अभावः, विरहः. **-ive,** *a.* विकारवत्, दोषयुक्त, सदोष, विकलः अंगहीन 2 असंपूर्ण, असमग्र, अपर्याप्त, न्यून.

Defection, *s.* त्यागः, उत्सर्गः, भ्रंशः, च्युति *f.*

Defend, *v. t.* रक्ष् 1 P, पा 2 P, त्रै 1 A, परित्रै, पा c. (पालयति) (with abl.); *See* **Protect.** 2 (In law) उत्तरं दा 3 U, पक्षे समर्थ् 10. **-ant,** *s.* प्रत्यर्थिन् *m.*, प्रतिवादिन् *m.*, अभियुक्तः. **-er,** *s.* रक्षकः, गोप्तृ *m.*, त्रातृ-रक्षितृ *m.*, पालकः, पः in comp. **-Defensive,** *a.* रक्षक, पालक, निवारक, आत्मरक्षक. -*s.* आत्मरक्षा, स्वपरित्राणं, शत्रुनिवारणं. **-Defence,** *s.* रक्षा, गुप्ति *f.*, रक्षणं, त्राणं, पालनं. 2 उत्तरं, प्रत्युत्तरं; व्यपदेशः. **-less,** *a.* अशरण, अरक्षित, अनाश्रय, अनाथ. 2 निरायुध, शस्त्रहीन.

Defer, *v. t.* विलंबू c., व्याक्षिप् 6 P. 2 (अन्यस्मिन्) निक्षिप् 6 P, न्यस् 4 P, सम्-ऋ c. (अर्पयति). -*v. i.* विलंबू 1 A, कालं क्षिप् or हृ 1 P, चिर(रा)यति (D.). 2 (to) अनुवृत् 1 A, अनुपा c. (पालयति), आद् 6 A, सादरं आश्रि 1 U, अनुरुध् 4 A. **-ence,** *s.* अनुरोधः, अनुवर्तनं, बहुमानः, आदरः, प्रश्रयः. 2 नम्रता, विनयः, वशता. **-ring,** *s.* कालयापनं, कालहरणं, विलंबः. व्यापेक्षः.

Deficient, *a.* न्यून, ऊन, असंपूर्ण, विकल; often ex. by अल्प-हीन-रहित in comp.; 'd. in water' अल्पजल; 'd. in intellect' अल्पधी, बुद्धिहीन; 'd. in any organ' हीनांग, विकलेंद्रिय, विकलांग, अपांगंड, पो(पौ)गंड. **-Deficience, -cy,** *s.* न्यूनता, हीनता, अल्पता, अभावः. विरहः, वैकल्यं, अपूर्णता. 2 दोषः, छिद्रं.

Defile, *v. t.* दुष् c. (दूषयति), मलिनीकृ 8 U, मलिनयति-कलुषयति-आविलयति (D.); 'd. a virgin' कुमारीं दुष् c., आधृष् c.; 'a d. ed virgin' क्षतयोनिः. -*v. i.* दंडव्यूहेन त्रया 2 P or अपस् 1 P. -*s.* संबाधपथः, संकटमार्गः, दुर्मार्गः, संचारः. **-er,** *s.* दूषकः. **-ment,** *s.* दूषणं. 2 मालिन्यं, कलंकः.

Define, *v. t.* लक्षणं व्याख्या 2 P; उप लक्ष् 10, परिच्छिद् 7 P, निरूप् 10, निश्चि 2 P. 2 निर्दिश् 6 P, निर्णी 1 P. निश्चि 5 U. निर्धृ 10. 3 चिह्न् 10, परिमा 3 A. **-er,** *s.* लक्षणव्याख्यातृ *m.*, निर्वक्तृ *m.* **-ite,** *a.*

नियत, निर्णीत, निश्चित, निर्दिष्ट; 'without any d. subject' अनिर्दिष्टकारणं. 2 परिमित, समयाद्, सावधिक. -itely, *adv.* नियतं, व्यक्तं, मर्यादया, परिच्छेदं. -itive, *s.* व्याख्या, परिच्छेदः, लक्षणं, निर्वचनं, निर्देशः; 'my anguish transcends d.' मम विकारः परिच्छेदातीतः (Mal. 1). -itive, *a.* नियत, निर्णायक, स्थिर; अवश्यक.

Deflagration, *s.* दाहः, दाहनं, ज्वलनं.

Deflect, *v. i.* भ्रंश् 1 A, 4 P, च्यु 1 A. विचल् 1 P, अप-व्या-वृत् 1 A. -*v. t.* व्यावृत् c. -ion, *s.* भ्रंशः, च्युतिः *f.*, विचलनं, विमार्गगमनं. 2 उत्क्रमः, भ्रेषः.

Deflour, Defower, *v. t.* चारित्र्यं नश् c. or ह्र् 1 P, धृष् c., क्षतयोनिं कृ 8 U, दूष् c. (दूषयति); 'a virgin d.' क्षता, क्षतयोनिः. 2 शोभां ह or नश् c. -er, *s.* कुमारीदूषकः, सतीत्वनाशकः.

Defluxion, *s.* नित्यंद्रः, क्षरणं, स्रवणं.

Defoliation, *s.* पत्रापगतः, पर्णमोक्षः. 2 पत्रच्युतिसमयः.

Deform, *v. t.* विरूप् 10 विकृ 8 U, व्यंगीकृ, विरूपीकृ. -ed, *a.* विरूप, विकृत, पोगंड, कुरूप-रूप, विकृताङ्ग-व्यंग (गी *f.*); 'd. features' विकृताकारः. -ity, *s.* वैरूप्यं, विरूपता, कुरूपता, व्यंगता, विकृति *f.*

Defraud, *v. t.* वंच् 10, प्रलु c.; *See* **Cheat.** 2 छलेन-कपटेन-अपह्नु 1 P. -ation, *s.* कपटापहरणं. -er, *s.* वञ्चकः, प्रतारकः.

Defray, *v. t.* (Expenses) दा 3 U, अपाकृ 8 U, शुध् c.; धनव्ययं-व्ययशोधनं-स्वीकृ 8 U; 'to be d.-ed' शुध् 4 P; एकस्य मूल्येन व्ययः शुध्यति, सर्वा व्ययशुद्धिः संपद्यते (P. v. 8). -er, *s.* व्ययशोधकः. -ing, -ment, *s.* व्ययशोधनं-शुद्धि *f.*

Deft, *a.* विनीत, दक्ष, चतुर, विदग्ध.

Defunct, *a.* मृत, विगत; *See* **Dead.** 2 (fig.) त्यक्तव्यापार, निश्चेष्ट. -ion, *s.* मरणं, मृत्युः, देहत्यागः.

Defy, *v. t.* तृणीकृ 8 U, अवज्ञा 9 U, अवमन् 4 A, अनादृ 6, लघूकृ, तृणाय मन्, परिभू 1 P, अवगण् 10; 'I d. a king' राजेति कियती-का मम मात्रा; 'I d. you to find a mistake in my writing' मम लेखे स्खलितं कथं त्वं दर्शयसीति प्रेक्षे तावत्; 'a disease which d.ed medical skill' वैद्ययत्नपरिभाविनं गदं (R. XIX. 53). 2 युद्धार्थं आह्वे 1 A, अभियुज् 7 A, धृष् 5 P. -ance, *s.* समाह्वानं, युद्धाह्वानं, योधसंरावः. 2 अवज्ञा, अवगणना; 'in d. of' अवमत्य, तृणीकृत्य, अनादृत्य; ex. by gen. or loc. abs. -ant, *a.* उद्धत, सदर्प, सावज्ञ; अवमानिन्; 'in a d. tone' उद्धतं, सदर्पं, सावज्ञं. -er, *s.* समाह्वातृ *m.*, अभियोक्तृ *m.*

Degenerate, *v. i.* (कुलाचारात्) च्यु 1 A, भ्रंश् 1 A, 4 P, दुष् 4 P. -*a.* क्षीणपुण्य, -नष्टधर्मन्, परिभ्रष्ट, अपकृष्ट, कुलाचारभ्रष्ट. -ness, -Degeneracy, *s.* क्षीणपुण्यत्वं, कुलाचारभ्रंशः, कुलमर्यादातिक्रमः. 2 अपकर्षः, नीचावस्था, अपकृष्टदशा.

Deglutition, *s.* निगरणं, ग्रसनं.

Degrade, *v. t.* (पदात् or अधिकारात्) अपकृष् 1 P, भ्रंश् c., च्यु c., अवरुह् c. (रोपयति). नीचादं गम् c. 2 अवमन् c., लघूकृ 8 U, मूल्यं लघयति (P.) or ह्रस् c., 'd.-ed from office' अधिकारभ्रष्ट, पदभ्रष्ट, भ्रष्टाधिकार, पदावरोपित. -ation, *s.* पद-अधिकारभ्रंशः, अपकरः, पदच्युति *f.*, पदलोपः. 2 अवमानना, लघूकरणं, मानभङ्गः. 3 अपकृष्टता, अधोगति *f.* नीचावस्था, अपकृष्टस्थिति *f.* -ing, *a.* लाघवकारिन्, अवशस्कर (री *f.*).

Degree, *s.* पदं, स्थानं, पदवी-वि *f.*, आस्पदं. 2 दशा, स्थिति *f.*, अवस्था. 3 उपाधिः, उपपदं. 4 कुलं, वंशः, अन्वयः. 5 प्रमाणं, परिमाणं. 6 गणः, वर्गः. 7 भागः, अंशः. 8 कोटि *f.*, काष्ठा; 'the highest d.' परमकोटिः-काष्ठा, अतिभूमिः. 9 क्रमः, अनुक्रमः, आवृत् *f.*, परिपाटि-टी *f.*, आनुपूर्व्यं-र्वी, पर्यायः, तारतम्यभावः; 'in the highest d.' निरतिशयं, एकांततः; 'in some d.' किंचित्, कियत्यंशेन, ईषत्; 'not in any d.' न केनाप्यंशेन; 'by d.s' क्रमेण, क्रमशः, शनैःशनैः, प्रतिपदं.

Deify, *v. t.* देवत्वमारुह् c. (आरोपयति), देवं कृ 8 U. 'to be deified' देवीभू 1 P, देवत्वं इ 2 P, देवत्वमापद् 4 A. -Deiform, *a.* देवाकार, देवरूप. -Deification, *s.* ईश्वरसायुज्यं, ब्रह्मणि लयः, देवत्वप्राप्ति *f.* 2 देवत्वं, देवकरणं.

Deign, *v.* अनुह् 1 P, प्रसद् 1 P, with inf., 'd. to look at me' मयि दृष्टिप्रसादं कुरु; *See* **Please.** 2 प्रसादपूर्वं दा 3 U, अनुग्रहं 9 P. 3 अनुज्ञा 9 U, अनुमन् 4 A.

Deism, *s.* ईश्वरवादः, आस्तिक्यं. -Deist, *s.* आस्तिकः, ईश्वरवादिन् *m.*

Deity, *s.* देवता, दैवतं, देवः; *See* **God.**

Deject, *v. t.* विषद् c., निर्विद् c., विषादं उत्पद् c., म्लानीकृ, धैर्यं त्यज् c. -ed, *a.* विषण्ण, निर्विण्ण, विषादापन्न, अवसन्न, दीन, म्लान, खिन्न; 'd. in mind' दीनमनस्, दुर्मनायमान, उद्विग्न, विमनस्, धैर्यच्युत; 'to be b.d' विषद् 1 P, विषादं गम् 1 P, दुर्मनायते (D), धैर्यं त्यज् 1 P. -edly, *adv.* सविषादं, सोद्वेगं, विषण्णं. -edness, -ion, *s.* विषादः, वैमनस्यं, निर्वेदः, अवसादः, उद्वेगः, विषण्णता, दीनता, म्लानि *f.*, ग्लानि *f.*, खेदः, दौर्मनस्यं.

Dejecture, *s.* अवस्करः, पुरीषं.

Delate, *v. t.* वह् 1 P, आनी 1 P. **2 Accuse,** q. v.

Delay, *v. t.* विलंब् c., व्याक्षिप् 6 P, अतिपत् c. **2** निरुध् 7 U, धृ 1 P, विघ्नय् 9 P. —*v. i.* विलंब् 1 A, चिर(रा)यति (D.), कालं यो c. (यापयति) or क्षिप् 6 P or हृ 1 P; 'why d. then' ततः किं विलंब्यते (U. 1). **2** विकल्पू c., विचह् c. —*s.* विलंबः, व्याक्षेपः, कालातिपातः, कालयापनं, कालहरणं, कालक्षेपः. **2** आघातः, अंतरायः, विलंबं, हेतुः. **3** दीर्घसूत्रता; 'without d.' अविलंबितं, अविलंबं, अविलंबेन, अचिरं-रात्-रेण; 'd. is dangerous' दीर्घसूत्री विनश्यति. **-er,** *s.* कालक्षेपकः.

Delectable, *a.* रम्य, कमनीय, मनोज्ञ, आह्लादक, मनोरम-हर, रुचिर. **-Delectation,** *s.* आनंदः, आह्लादः, प्रमोदः, हर्षः.

Delegate, *v. t.* नियुज् 7 A, 10, व्यादिश् 6 P, प्रेष् c., (with acc. of person); न्यस् 4 P, निक्षिप् 6 P, ऋ c. (अर्पयति), प्रतिपद् c. —*s.* प्रतिनिधिः, नियोगिन् *m.*, नियोज्यः, प्रतिपुरुषः, अधिकृतः पुरुषः. **-ion,** *s.* नियोजनं, प्रेरणं, निक्षेपः, &c.

Delete, *v. t.* अप-व्या-मृज् 2 P, विलुप् c, विनश् c., उच्छिद् 7 P. **-ion,** *s.* व्यामर्षः, लोपः, उच्छेदः. **-Deleterious,** *a.* विनाशक, घातिन्, हिंस्र, घातुक.

Delf, *s.* मृद्भांडं, मृण्मयद्रव्यं, कौलालकं.

Deliberate, *v. i.* विचर् c., चिंत् 10, विमृश् 6 P, संमंत्र् 10 A, विकल्पू c.; *See* **Consider.** —*a.* कामतः-विचारपूर्वकं-कृत, विमृश्यकृत. **2** विमृश्यकारिन्, स्ववहित, असाहसिक, अप्रमत्त. **-ion,** *s.* विचारः-रणं-रणा, चिंता, मंत्रणं-णा, विमर्शः, समीक्षा, वितर्कः, विवेचनं, चर्चा. **-ive,** *a.* विचारशील, विचारिन्, विमर्शिन्. **-ly,** *adv.* जानत् with अपि or एव, बुद्धिपुरःसर, कामतः, विचारपूर्वकं. **2** विमृश्य, समीक्ष्य, अवधानेन, असहसा, अप्रमत्तं. **-ness,** *s.* समीक्ष्य-विमृश्य-कारित्वं, अप्रमादः, सावधानता, अवेक्षा.

Delicate, *a.* मधुर, स्वादु, मिष्ट. **2** ललित, चारु, शोभन. **3** (Soft) मृदु, कोमल, सुकुमार, तनु, श्लक्ष्ण, लघु, प्रतनु, विरल, परि,-पेलव; 'd. of person' कोमलांग (गी *f.*), मृदुशरीर; 'a d. woman' तन्वी, तन्वंगी, पेलवांगी. **4** विशिष्ट, उत्कृष्ट, उत्तम. **5** सभ्य, विनीत, शिष्ट, 'of a d. constitution' प्रकृतिकोमल, जन्मरोगिन्. **-ly,** *adv.* ललितं, सुकुमारं; मृदुतया. **-Delicacy,** *s.* माधुर्यं, स्वादुता, सौरस्यं. **2** लालित्यं, लावण्यं. **3** सौकुमार्य, मार्दवं, पेलवता, तनुता. **4** आदरः, विनयः, शिष्टाचारः, सुशीलता, सौजन्यं. **5** प्रकृतिदुर्बलता. **6** स्वाद्वन्नं, भोजनविशेषः, विशिष्टान्नं

Delicious, *s.* स्वादु, मिष्ट, रुचिकर (री *f.*), मधुर, सुरस, आस्वादवत्. **2** (of beauty &c.) मनोरम-हर, मधुर, कमनीय, रमणीय, हारिन्, चित्ताकर्षिन्. **-ly,** *adv.* स्वादु, मधुरं, मनोरमं. **-ness,** *s.* स्वादुता, माधुर्यं, रम्यता, &c.

Delight, *s.* आह्लादः, आ-प्र-मोदः, सुखं, हर्षः, प्रीति *f.*, प्र-सं-मदः, उल्लासः, शर्मन्, आनंदः, संतोषः, तृप्ति *f.*, मुद्-दा *f.*; 'takes no d. in sports' नाभिनंदति केलिकलाः (Mal. 3); 'thrill of d.' पुलकः, रोमांचः; 'thrilling with d.' आनंदपुलकिततनुः. **2** आनंदनं, आनंददः, हर्षकरः, आनंदहेतुः. —*v. i.* 'to be d.ed' मुद् 1 A, हृष् 4 P, आनंद् 1 P, ह्लाद् 1 A, रम् 1 A, प्री 4 A, सं-परितुष् 4 P, उल्लस् 1 P. —*v. t.* सुखयति (D.); causal of roots above. **-ed,** *a.* सानंद, प्रीत, सहर्ष, मुदान्वित, हृष्ट, आह्लस्त, आनंदित, प्रमुदित, सोल्लास, आह्लादित, उल्लसित, साह्लाद. **-ful,** *a.* प्रमोदिन्, प्रामोदिक (की *f.*), आनंदप्रद, हर्षजनन (नी *f.*), आह्लादक, आनंदक, सुखद; रुचिर, कांत, रम्य, रमणीय, मनोहर-रम. **-fully,** *adv.* सानंदं, सहर्षं, साह्लादं; रम्यं, कांतं.

Delimit, *v. t.* मर्यादीकृ 8 U.

Delineate, *v. t.* वर्ण् 10; *See* **Describe. 2** आलिख् 6 P, चित्र् 10, चित्रे निविश् c. **-ed,** *a.* चित्रालिखित, चित्रगत, आलिखित, वर्णित. **-ion,** *s.* आलेखनं, वर्णनं. **2** आलेख्यं, चित्रं, चित्रारंभः.

Delinquency, *s.* दोषः-अपराधः, पापं, दुष्कर्मन् *n.*, पापचरितं, अपक्रिया, दुष्कृति *f.* **-Delinquent,** *s.* पापिन्-पापकृत्-अपराधिन् *m.*, सदोषः, कृतापराधः.

Deliquesce, *v. i.* द्रवीभू 1 P, विली 9 P.

Deliquium, *s.* विलयनं, द्रवः.

Delirium, *s.* चित्तभ्रमः, चैतन्यनाशः, ज्ञानभ्रांति *f.* **-Delirious,** *a.* भ्रांतचित्त, नष्टचेतन, चैतन्यरहित.

Deliver, *v. t.* मुच् c., वि-प्र-मोक्ष् 10, उद्-हृ 1 P, निस्तृ c., रक्ष् 1 P, परि-त्रै 1 A. **2** समर्प् c (अर्पयति), न्यस् 4 P, प्रतिपद् c., प्र-दा 3 U, 1 P, संक्रम् c., आरुह् c. (रोपयति), हस्ते निक्षिप् 6 P, हस्तं प्राप् c., हस्तगत-गामिन् *a.* कृ 8 U, (तस्य वसुधामपि हस्तगामिनीमकरोत् R. VIII 1); 'shall d. it into his hand (to him)' इमं अस्य हस्तं, प्रापयिष्यामि (S. 3); 'd. of charge of office' स्वाधिकारं अन्यहस्ते न्यक्षिपत्. **3** उद्-ईर् c., उच्चर् c., उदाहृ 1 P, व्याहृ, वद् 1 P. **4** (Of a message) निविद् c., कथ् 10, आख्या 2 P, आचक्ष् 2 A, शंस् 1 P. **5** (Give back) उत्सृज् 6 P, प्रतिदा, निर्यत् c., (हस्तन्यासं निर्यातय V. 5);

'd. a woman' प्रसवं कृ c., सू c.; 'to be d.ed of' प्रसू 2 Ā, जन् c. (जनयति), उत्पद् c.; 'was d.ed of a son' सा पुत्रं प्रासूत. **-ance**, *s.* मोचनं, मोक्षः, मुक्ति *f.*, उद्धारः, परित्राणं, रक्षणं, निस्तारणं, मोक्षणं, विमुक्तिः-मोचनं. **-er**, *s.* मोचकः, रक्षकः, त्रातृ *m.*, मुक्तिदातृ *m.*, तारकः, उद्धर्तृ *m.* 2 निवेदकः, आख्यायकः. **-y**, *s.* मुक्ति *f.*; *See* **Deliverance**, above. 2 अर्पणं, निक्षेपणं, प्रतिपादनं, संक्रामणं, न्यसनं, प्रदानं. 3 उच्चारणं, उदीरणं, व्याहारः-हरणं; 'a fluent d.' अस्खलितभाषणं, अप्रतिहतभाषणौघः-वाक्सरणिः. 4 निवेदनं, विज्ञापनं, विज्ञप्तिः *f.*, कथनं. 5 उत्सर्गः, निर्यातनं, वितरणं. 6 प्रसवः, प्रसूतिः *f.*, गर्भमोचनं; 'd. bed' अरिष्टशय्या, 'a woman near her d.' आसन्न-प्राप्त-प्रसवा; 'place of d.' अरिष्टं, सूतिकागृहं.

Dell, *s.* दरी, गुहा, कंदरः.

Delude, *v. t.* मुह् c., वंच् 10, प्रलुभ् c., आकृष् 1 P, वि-सं-भ्रम् c. (भ्रमयति); *See* **Cheat** also. **-er**, *s.* मोहकः, वंचकः, प्रतारकः, मायिन् *m.* **-Delusion**, *s.* मोहः, भ्रमः, आभासः, माया, मतिभ्रमः, इंद्रजालं, विवर्तः; 'the world is all a d.' विश्वमिदं मायामयं, असारं, विवर्त एव. 2 वंचनं, प्रतारणा, प्रलोभनं, कपटं. **-Delusive, -Delusory**, *a.* मायामय (यी *f.*), असार, मायिन्, मोहक, ऐंद्रजालिक (की *f.*), मोहिन्, मोह-भ्रांति-जनक.

Deluge, *s.* आप्लावः, संप्लवः, जलप्रलयः, भूत-संप्लवः, तोयविप्लवः; 'universal d.' प्रलयः, महासंप्लवः, संवर्तः, क्षयः, कल्पांतः. 2 धारा-संपातः, वारिपूरः, अविरलधारासारः, अति-वृष्टिः *f.* 3 उत्पातः, आकस्मिकी आपद्. *-v. t.* प्लु c., आ-सं°, निमज्ज् c. (मज्जयति).

Delve, *v. t.* खन् 1 P, नि-अव°; उर्वीं भिद् 7 P. *-s.* खातं, विवरं, बिलं, गर्ता-र्तः. **-er**, *s.* खनकः, खनितृ *m.*

Demagogue, *s.* प्राकृतजननायकः, प्रजा-नायकः.

Demain, Demesne, *s.* स्वाधीना भूमिः.

Demand, *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A, ज्ञा deside. (जिज्ञासते); 'd. ed his name' किं तव नामेति पप्रच्छ; 'd. a boon' वरं वृ-नु-5, 9 U. 2 **Claim**, q. v. 3 अर्ह् 1 P; oft. by pot. pass. part.; 'Oh Goddess, Godâvari the matter d. s thy care (attention)' भगवति गोदावरि तत्र त्वया सावधानया भवितव्यं (U. 3); अयमर्थोवेक्षामर्हति 'd. s consideration'; 'this offence d. s an atonement of serious expense' भूरिद्रव्यव्ययेनायं दोषः प्रमार्ष्टुं शक्यः, भूरिधनव्ययसाध्यप्रायश्चित्तः दोषः. *-s.* प्रश्नः, अनुयोगः, पृच्छा, जिज्ञासा. 2 अभियोगः, प्रार्थना, याचना; 'on d.' दातुं पृष्टः सन्. **-ant, -er**, *s.* प्रार्थयितृ *m.*, याचितृ *m.*, अभियाक्त *m.*, अर्थिन् *m.*

Demarkation, *s.* सीमा-मर्यादा-परिच्छेदः.

Demean (oneself), *v. i.* वृत्तिं अनुष्ठा 1 P, चेष्ट् 1 A, वृत् 1 A, व्यवह् 1 P; *See* **Act.** **-our**, *s.* वृत्ति *f.*, आचरणं, आचारः, चेष्टितं, व्यवहारः.

Dementate, *v. t.* उन्मद् c., संज्ञां अपह् 1 P. *-a.* उन्मत्त, नष्टसंज्ञ, मूढचित्त.

Demerit, *s.* अगुणः, दोषः, न्यूनता.

Demi, अर्ध, सामि *ind.* in comp.

Demi-god, *s.* नरदेवः, विद्याधरः, यक्षः, गंधर्वः, उपदेवता, देवयोनिः.

Demi-man, *s.* अर्धपुरुषः-नरः, किन्नरः.

Demise, *s.* मृत्युः, मरणं, उपरतिः *f.* 2 समर्पणं, विधिवत् प्रदानं. *-v. t.* मृत्युपत्रेण प्रदा 3 U.

Demission, *s.* अवपातः, अवसादनं, अपकर्षणं.

Demobilize, *v. t.* *See* **'Disband.'**

Democracy, *s.* प्रजाप्रभुत्वं, प्रजासत्तात्मकं राज्यं, प्रजातंत्रं. **-Democrat**, *s.* प्रजातंत्रवादिन् *m.*, प्रजापक्षानुकूलः, प्रजाप्रभुत्वानुग्राहकः, प्रजापक्षावलंबिन् *m.* **-tical**, *a.* सार्वलौकिक (की *f.*), प्रजातंत्रीय.

Demolish, *v. t.* विनश् c., उच्छिद् 7 P, अवसद् c., ध्वंस् c., प्र-वि-°; उन्मूल् 10, उत्पद् 10. **-er**, *s.* विनाशकः, उच्छेदकः. **-Demolition**, *s.* विनाशः, उच्छेदः, प्र-वि-ध्वंसः, उन्मूलनं, उत्पाटनं, अवसादनं.

Demon, *s.* दानवः, असुरः, रक्षस् *n.*, राक्षसः, दैत्यः, दनुजः, दैतेयः, सुरद्विड्, भूतः, पिशाचः, रात्रि(त्रिं)चरः, निशाचरः, यातुधानः. **-iac**, *s.* भूताविष्टः, वेतालोपहतः. *-a.*, **-iacal**, *a.* राक्षस (सी *f.*), पैशाच (ची *f.*), आसुर (री *f.*), (*s.*) in comp. **-ology**, *s.* भूत-पिशाच-विद्या.

Demonstrate, *v. t.* साधू c., सिध् c. (साधयति), प्रदृशू c., प्रतिपद् c., उपपद् c., प्रमाणयति (D.); निर्णी 1 P, निर्दिश् 6 P. **-ion**, *s.* साधनं, सिद्धि *f.*, उपपत्ति *f.*, प्रतिपादनं. 2 निर्णयः; प्रामाण्यं, सिद्धांतः; 'ocular d.' प्रत्यक्षप्रमाणं-चाक्षुषज्ञानं-प्रमाणं. **-ive**, *a.* दर्शक, निर्देशक, निर्णायक, प्रतिपादक, सिद्धांतकरण. **-ively**, *adv.* सिद्धिपूर्वं, सप्रमाणं, सुव्यक्तं, सोपपत्तिकं. **-or**, *s.* निर्देशकः, प्रतिपादकः, प्रदर्शकः.

Demoralize, *v. t.* धर्माद्-आचाराद्-भ्रंश् c. or च्यु c., आचारं दुष् c. (दूषयति), भ्रष्टीकृ 8 U, दुर्वृत्त *a.* कृ **-ation**, *s.* आचारभ्रष्टता, धर्मच्युति *f.*, धर्म-आचार-विप्लवः, अपकर्षः.

Demulcent, *a.* शामक, शांतिद. 2 स्निग्ध, चिक्कण.

Demur, *v. i.* शंक् 1 A, वि-आ°; विचिद् c., विक्लृप् c., विलंब् 1 A, मनसा दोलायते (D.); सवितर्कं व्याक्षिप् c. *-s.* आशंका-

संदेहः, वितर्कः. विचारणं, विकल्पः; 'without d.' अविचारितं, अविलंबं.

Demure, *a.* विनीत, अतिनम्र, गंभीर, धीर, शांत, सलज्ज, सव्रीड अवनत; 'with d. looks' सव्रीडवदन. **-ly**, *adv.* सलज्जं, सव्रीडं, धीरं, सविनयं. **-ness**, *s.* विनयः, नम्रता, गांभीर्यं, त्रपा, लज्जा, व्रीडा, व्रतीः.

Den, *s.* बिलं, विवरं, गुहा, गह्वरं, कंदरः, कुहरं.

Denizen, *s.* नि-वासिन् *m.*, ओकस् in comp.; 'd.s of heaven' दिवौकसः, &c. 2 पौरः, नागरः, नगरजनः, राष्ट्रतंत्रजनः.

Denominate, *v. t.* वद्-भण्-गद् आङ् 1 P, व्यपदिश् 6 P, अभिधा 3 U, वच् 2 P, ख्या 2 P; *See* Call also. **-ion**, *s.* नामन् *n.*, अभिधानं, संज्ञा, आख्या. **-ive**, *a.* अभिधायिन्, आख्यायक, (in grammar) नामधातुः. **-or**, *s.* नामकृत्-नामधातृ *m.* 2 हरः, हारः, छेदः; 'of the same d.' समच्छेदः; 'reduced to the same d.' सवर्णित.

Denote, *v. t.* निर्दिश् 6 P, सूच् 10, उपलक्ष् 10, वच् 2 P, अभिधा 3 U, द्युत् c., गम् c. (गमयति); oft. ex. by अर्थ in comp.; *See* **Mean**; 'the word क्षेत्र here d.s body' अत्र क्षेत्रशब्दः शरीरार्थं-र्थः. **-ation**, *s.* निर्देशः; सूचनं; अभिधा-धानं, उपलक्षणं-णा. **-ing**, **-ative**, *a.* सूचक, दर्शक, वाचक, अभिधायक, गमक.

Denouement, *s.* कार्यं, निर्वहणं, निष्ठा.

Denounce, *v. t.* (अमंगलं or अनिष्टं) प्रकाशय् c., ख्या c., (ख्यापयति), आ-नि-विद् c., कथ् 10. 2 प्रकाशं तर्ज् 10 A, भर्त्स् 10 A, अभिशप् 1 U, अभिशंस् 1 P, निंद् 1 P, गर्ह् 1, 10 A, आक्रुश् 1 P. **-er**, *s.* अनिष्टवेदकः. 2 अधिक्षेपकः, निंदकः. **-ment**, **Denunciation**, *s.* अनिष्टख्यापनं-प्रकाशनं. 2 निर्भर्त्सना-नं, आक्रोशः, अभिशंसन, निंदा, गर्हा.

Denovean } *adv.* पुनर्, भूयः.
Denovo }

Dense, *a.* घन, निबिड, सांद्र, अविरल, निरंतर, अनंतर, गाढ, गहन. 2 सुसंहत, दृढ, पीवर. **-ity**, *s.* घनता, सांद्रता, आनंतर्यं; पीवरता.

Dent, *s.* प्रहार-आघात-चिह्नं.

ental, *a.* दंत्य; 'a d. letter' दंत्यं.

Dented, Dentated, *a.* दंतुर, भंगुर, अनुककच.

Dentifrice, *s.* दंतशोधनं-धावनं.

Dentist, *s.* दंतवैद्यः-चिकित्सकः.

Dentition, *s.* दंतोद्भदः, दंतवृद्धिः *f.*

Denude, Denudate, *v. t.* नग्नीकृ 8 U, विवस्त्रीकृ विवस्त्रयति (D.), वस्त्रं अपहृ 1 P, शून्यीकृ; निर् in comp.; 'a tree d.ed of leaves' निष्पत्रो or निष्पत्रीकृतो वृक्षः.

Deny, *v. t.* अपलप् 1 P, अपवह् 1 P, न स्वीकृ-अंगी-कृ 8 U, निषिध् 1 P, प्रत्याख्या 2 P, नि-अप-ह्नु 2 A, प्रत्यादिश् 6 P. **-al**, *s.* अप-नि-ह्नवः, प्रत्यादेशः, निषेधः, अस्वीकारः, प्रत्याख्यानं, अपलापः; 'self-...' आत्मसंयतः, आत्मनिग्रहः. **-er**, *s.* नि-ह्नोतृ *m.*, अपलापिन् *m.*, प्रत्यादेशकः.

Deobstruct, *v. t.* निर्विघ्नीकृ 8 U, विघ्नान् हृ or अपनी 1 P.

Deodand, *s.* देवोपहारः.

Deodorize *v. t.* दुर्गंधं हृ or अपनी 1 P.

Depaint, *See* **Paint**.

Depart, *v. i.* प्रस्था 1 A, प्रया 2 P, वि-निर्-गम् 1 P, अपक्रम् 1 U, 4 P, अपया, अप-इ 2 P, अपगम् अस्तं-सृप् 1 P, 'whose life has d.ed' वि-गत-जीवितः. 2 प्र-इ, देहं उत्सृज् 6 P, विपद् 4 A, मृ 6 A, संस्था 1 A; *See* **Die**. *-v. t.* त्यज् 1 P, हा 3 P, उत्सृज्. **-ed**, *a.* अपगत, व्यपेत, 'not d. from the meaning' अर्थादनपेतं, अस्थ्यं. 2 प्रेत, मृत, दिवंगत, संस्थित, विपन्न. **-ment**, *s.* भागः, विच्छेदः, प्र-वि-भागः. 2 विषयः, प्रकरणं, अंगं. 3 अधिकारः, नियोगः, कर्मन् *n.*, व्यापारः. 4 देशः, विषयः, मंडलं. **-ure**, *s.* अपगमः, अपयानं, प्रस्थानं, प्रयाणं, अपसरणं, अपसृति *f.*, निगमः, अपक्रमः. 2 देहत्यागः, संस्थिति *f.*, मरणं, उपरति *f.*

Depend, *v. i.* अवलंब् 1 A, प्रलंब्. 2 अव-आलंब्, आश्रि 1 U, संश्रि, निबंधन, तंत्र, अधीन, आयत्त, वश, in comp.; 'every thing d.s on fate' सर्वं दैवाधीनं-यत्तं; मम प्राणास्त्वदाज्ञानिबंधनाः (M. 4); oft. by अपेक्ष् 1 A, व्यपेक्ष्; *See* below. 3 अनु-उप-जीव् 1 P. 4 (rely) विश्वस् 2 P (with loc); सम्-ऋ c. (अर्पयति.); 'I d. upon you alone' त्वय्येव मे विश्वासः; 'd. upon it, I shall starve myself to death' मया प्रायोपवेशनं कृतं विद्धि (P. IV. 1); 'd. upon it' असंशयं, नियतं, नूनं, खलु. 5 संबंध्-, प्र-अनु-संबंध् pass., समनु-इ 2 P. **-ance**, **-ence**, *s.* अवलंबनं, आश्रयः; संश्रयः, निष्ठा, तंत्रता, निबंधनं, अधीनता; 'mutual d.' परस्परानिबंधनं, अन्योन्याश्रयः. 2 पराधीनता, परवशता, परवत्ता, पारतंत्र्यं, परायत्तत्वं. 3 विश्वासः, प्रत्ययः. 4 संबंधः, अनुषंगः, समन्वयः, संपर्कः. **-ency**, *s.* आयत्तता, अधीनता, &c. 2 अधीनः प्रदेशः, अन्यतंत्रं राज्यं. **-ant**, **-ent**, *a.* प्रलंब. 2 अधीन, आयत्त, आश्रित, अवलंबिन्, वश, संबद्ध, निष्नतंत्र in comp. 3 (d. on another) पराश्रित, पराधीन, परतंत्र, परायत्त, परवश, परवत्; 'd. on a cause' निमित्तसव्यपेक्षः (Mal-

-s. उप-अनु-जीविन् m., आश्रितः, परायत्तो जनः, भृत्यः, परिचारः.

Depict, v. t. आलिख् 6 P, वर्ण् 10, निर्दिश् 6 P.

Depilation, s. लो(रो)महरणं, उद्लुंचनं. **-Depilatory,** a. केशनाशक, लोमहरिन्.

Depilous, a. अकेश, रो(लो)मरहित.

Deplete, v. t. शून्यीकृ 8 U, रिक्त c. निःशिष् c. **-ion,** s. अवक्षयः, निःशेषता, रिक्तता. शून्यता, शून्यीकरणं.

Deplore, v. t. शुच् 1 P, विलप् 1 P, परिदेव् 1 A, परिदिद्यू 10 A. *See* **Lament.** **-ably,** *adv.* शोच्यप्रकारेण, शोचनीयं. **-er,** s. परिदेवकः, अनुशोचैकः.

Deploy, v. t. विस्तृ 9 U (सैन्यव्यूहान्).

Deplume, v. t. पक्षान् उत्पट् 10 or उद्ग्रह् 1 P, निष्पक्षीकृ 8 U. **-ation,** s. पक्षोत्पाटनं.

Depone, v. i. सत्यार्थं वद् 1 P or कथ् 10, शपथपूर्वं उपदिश् 6 P or उपन्यस् 4 U. **-ent,** s. साक्षिन् m. 2 अकर्तरि क्रिया.

Depopulate, v. t. निर्जनीकृ 8 U, विजनीकृ, नरशून्यं a. कृ; उपपीड् 10, बाध् 1 A, सञ्छिद् 7 P. **-ion,** s. निर्जनीकरणं 2 उपद्रवः, उच्छेदः, उपपीडनं, बाधा. **-or,** s. उच्छेदकः, उपपीडकः, विद्रवकारिन् m.

Deport, v. t. प्रव्रज् c., निः-प्र-वि-वस् c., देशांतरं गम् c. (णमयति). -v. i. (oneself) आचर्-व्यवह् 1 P, वृत् A; *See* **Act.** **-ation,** s. प्र-वि-वासनं, प्रव्राजनं. **-ment,** s. वृत्ति f., आचरणं, चेष्टितं, व्यवहारः, वृत्तं.

Depose, v. t. (राज्यात् or अधिकारात्) अवरुह् c. (रोपयति), भ्रंश् c., पत् c., च्यु c. -v. i. साक्ष्यं दा 3 U, वद् 1 P, वच् 2 P, कथ् 10. **-ition,** s. साक्ष्यं, साक्ष्यदानं. 2 (Deposal) राज्यभ्रंशः-च्युतिf., राज्यावरोपणं, अधिकारच्युतिः-भ्रंशः.

Deposit, v. t. निक्षिप् 6 P. न्यस् 4 P, निधा 3 U, आधा, ऋ c. (अर्पयति), आधीकृ 8 U. -s. न्यासः, निक्षेपः. आधिः, उपनिधिः. 2 किट्ट, शेवः, खल, कालुष्यं, मलः-लं **-ary,** s. निक्षेप्तृकः, न्यासधारिन् m. 2 विश्वासस्थानं-राज्ञे-भूमि f. **-or,** s. निक्षेपिन् m., न्यासकृत् m **-ory,** s. आधारः, आश्रयः, निधानं, निधिः, भाजनं, आगारं, संग्रहस्थानं.

Depot, s. आगारं, शाला, स्थानं, आलयः; 'book d.' पुस्तकालयः, ग्रंथशाला; 'military d.' युद्धसामग्र्यागारं.

Deprave, v. t. दूष् c. (दूषयति) भ्रंश् c. मलिनीकृ 8 U, कलुषयति (D.). **-ed,** a. दुराचार, भ्रष्ट, दुष्ट, खंडितवृत्त, दुरात्मन्, पापचेतस्, दुश्चरित्र, भ्रष्टशील, कलुषाचार. **-edness, -ity,** s. दुष्टता, भ्रष्टता, दुष्टभावता, दौरात्म्यं, दुराचारता, दौर्जन्यं, कालुष्यं, दुश्चरितता.

Deprecate, v. t. (प्रार्थनापूर्वकं) निवारय् 10, व्यावृत् c., मा भूदिति याच् 1 A. 2 अनुशुच् 1 P. **-ion,** s. निवारणार्थं प्रार्थनास्तवः. **-ive, -atory,** a. अनिष्टनिवारक.

Depreciate, v. t. अर्घतः पत् c., अवमन् 4 A, लघूकृ 8 U, लघु मन्, मूल्यं न्यूनीकृ, अवक्षिप् 6 P. अवरुह् 1 P, अपकृष् 1 P. **-ion,** s. लघूकरणं, अवमानना, अपकर्षः, अपलापः.

Depredate, v. t. अवह् 1 P, लुंट्-ठ् 1 P, 10, उपह् 1 A, उपदस्य ग्रह् 9 P. **-ion,** s. उपप्लवः, अपहरणं, लुंठनं, लोप्त्रग्रहणं. **-or,** s. विप्लवकारिन् m., अपहारकः.

Deprehend, *See* **Apprehend.**

Depress, v. t. अवनम् c. (नमयति), पत् c., अपकृष् 1 P, अवपीड् 10, निम्नीकृ 8 U, अवसद् c., भ्रंश् c., अवगाह् 1 A. 2 विषादं नी 1 P, विषद् c., विषण्णीकृ; 'd. ed behind' पश्चादवगाढा (S. 3); 'd. ed in spirits' विषण्ण, म्लान, लुप्तावयवखिन्नचित्त; *See* **Dejected.** **-ion,** s. पातः, अवनमनं, अपकर्षः-र्षणं. 2 विषादः, खिन्नता, अवसादः, उद्वेगः, दौर्मनस्यं, म्लानि f., 'd. of spirits' सत्वभ्रंशः.

Deprive, v. t. अपनी 1 P, अपह् 1 P, (with gen. of person); भ्रंश् c., च्यु c. (with abl.); वियुज् 7 A, 10, विनाकृ 8 U, (with instr. of the object deprived). **-ation,** s. हरणं, अपचयः, क्षयः, लोपः, हानि f., नाशः. **-ed,** a. हृत, अपहृत, हीन, वियुक्त, भ्रष्ट, विरहित, विनाकृत (gen. in comp.); वीत-लुप्त निज् in comp.; 'd. of wealth' निर्धन, लुप्तवित्त; 'd. of authority' भ्रष्टाधिकार, पदभ्रष्ट; 'to be d.' हा pass.; परिहा, वियुज् pass.

Depure, Dupurate, *See* **Purify.**

Depute, v. t. नियुज् 7 A, 10, प्रेष् c., प्रहि 5 P, समादिश् 6 P (of a person); निदिश् 6 P, न्यस् 4 P, (of business). **-ation,** s. नियोजनं, प्रेषणं, प्रेषणं. 2 नियुक्ताः-तसमादिष्टाः (pl.), नियोगिगणः, नियुक्तजनाः. **-y,** s. प्रतिनिधिः, प्रतिहस्तः-स्तकः, नियोगिन् m.; नियुक्तः, प्रतिपुरुषः.

Deracinate, *See* **Eradicate.**

Derail, v. लोहवर्त्मतो निःसृ 1 P, or c.

Derange, v. t. विपर्यस् 4 U, विशृंख् 6 P, क्रम-व्यवस्था-भंज् 7 P, or उपहन् 2 P, विक्षुभ् c., संकृ 6 P, आकुलीकृ 8 U. **-ed,** a. व्यस्त, अव्यवस्थित, भग्नक्रम, अव्यवस्थित, विक्षिप्त, संकीर्ण; 'd. in mind' उन्मत्त, भ्रांतचित्त. **-ment,** s. व्युत्क्रमः, प्रक्रमभंगः, अव्यवस्था, व्यस्तता, अक्रमः. विशृंखता, वैलक्षण्यं; 'd. of mind' मतिभ्रमः चित्तविप्लवः, मतिविपर्यासः.

Derelict, *a.* त्यक्त, उत्सृष्ट, परित्यक्त **-ion,** *s.* त्यागः, उत्सर्गः, उपेक्षा.

Deride, *v. t.* वि-उप-अव-हस् 1 P, उपहासास्पदी कृ 8 U, अवज्ञा 9 U, भर्त्स् 10 A, गर्ह् 1, 10 A; 'to be d. ed' उपहास्यतां गम् 1 P, उपहासास्पदं भू 1 P; 'are d.ed by all' सर्वजनस्योपहास्यतामुपयांति (Ka. 108). **-er,** *s.* उपहासकः, अवक्षेपकः. **-ingly,** *adv.* अवहासेन, उपहासपूर्वं-सोपहासं. **-Derision,** *s.* उप-अव-हासः, अवमानना, धिक्कारः, अवज्ञा, गर्हणं, निर्भत्सनं. **-Derisive,** *a.* सोपहास, अवहासगर्भ, अवहासिन्, उपहास्य, गर्ह्य.

Derive, *v. t.* निष्कृष् 1 P, उद्-भू c., जन् c. (जनयति). उत्पद् c., 2 प्राप् 5 P, लभ् 1 A, **Get,** q. v.) 3 व्युत्पद् c. निर्वच् 2 P, 10, व्युत्पत्तिं वह् 1 P. **-ed,** *a.* उत्पन्न, उद्भूत; oft. ex. by प्र-,भव-मूल-उद्भव-ज in comp.; 'the race d. ed from the Sun' सूर्यप्रभवो वंशः; 'to be d. ed' उत्पद् 4 A, प्रभू 1 P, जन् 4 A, उद्-भू, निर्गम् 1 P. **-ation,** *s.* व्युत्पत्ति *f.*, निर्वचनं, शब्दोत्पत्ति *f.*, शब्दयोनि *f.* 2 प्रभवः, उद्भवः. योनि *f.*, मूलं, निर्गमः. **-ative,** *a.* व्युत्पन्न; यौगिक (की *f.*); 'd. suffixes' तद्धितप्रत्ययाः. **-s.** साधितः शब्दः, व्युत्पन्नः शब्दः.

Dermis, *s.* *See* **Skin.**

Derogate, *v. t.* अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.); *See* **Depreciate. -ion,** *s.* लघूकरणं, अपमानः, गौरवन्यूनता अवमानना, लाघवं. **-ory,** *a.* अननुरूप, अकीर्तिकर, लाघवकारिन्, असदृश (शी *f.*), अयशस्कर (री *f.*).

Dervise, *s.* संन्यासिन् *m.* (महंमदीयः).

Descant, *v. i.* सविस्तरं व्याख्या 2 P, वि-कृ 5 U, विस्तरेण वर्ण् 10. 2 गै 1 P, वर्ण् 10. **-s.** वचनं, वादः, प्रवादः, भाषितं. 2 गीतं.

Descend, *v. i.* अवतृ-अवरुह्-अवपत् 1 P, निपत्, च्यु 1 A, भ्रंश् 1 A, 4 P. 2 आ-अभि-गम् 1 P, प्रविश् 6 P. 3 (upon) अभिद्रु 1 P, अभिधाव् 1 P, आक्रम् 1 U, 4 P; *See* **Attack.** 4 (from) उत्पद् 4 A, प्र-उद्-भू 1 P, जन् 4A; *See* **Derive.** वंश-कुल-क्रमेण आगम् 1 P, or या 2 P, परंपरया प्राप् :pass.; 'd. into details' सविस्तरं वर्ण् 10, विस्तरशः वद् 1 P, प्रपंचयति (D.). **-v.** *t.* Causal of roots (1) above. **-ant,** *s.* वंश्यः, वंशजः, अपत्यं, संतति *f.* प्रसूति *f*, संतानः; 'd. s.' पुत्रपौत्राः, कुलसंततिः, वंशः, अन्वयः, कुलं; 'male d.' पुत्रसंतानः. **-ed,** *a.* अवतीर्ण, अधोगत; 'lineally d.' कुलक्रमागत, वंशपरंपराप्राप्त, क्रमायात, पितृप्राप्त; 'to be d.' उत्पद्, जन्, प्रभू 1 P; gen. by derivative affixes; 'd. from Puru' पौरवः. **-ent,** *a.* अवरोहिन्, अधोगामिन्. **-Descent,** *s.* अवतरणं, अवपातः, अवरोहः-हणं, अवतारः. 2 आक्रमः, अवस्कंदः, अभिद्रवणं. 3 जन्मन् *n.*, उत्पत्ति *f.*, वंशः, उद्भवः, कुलं; 'of noble d.' कुलीन, कुलोत्पन्न, महाकुलप्रसूत, अभिजात, अभिजनवत्. 4 संतति *f.*, अन्वयः, आवलि-ली *f.*, संतानः-नं. 5 वंशक्रमागमः, अन्वयागमः. 6 अवसर्पिणी भूमिः, प्रवणस्थानं.

Descension, *s.* अवपातः, अधोगमनं, अधःपतनं.

Describe, *v. t.* वर्ण् 10, निर्दिश् 6 P, वि-कृ 5 U, कृत् 10, कथ् 10, निरूप् 10, वच् 2 P, व्याख्या 2 P; 'her splendour can't be d. ed' तस्याः श्रीर्वचनानामविषया. 2 (Draw) लिख् 6 P. **-Description,** *s.* वर्णनं-ना, निर्देशः, व्याख्यानं, कथनं, निरूपणं, विवरणं. **-Descriptive,** *a.* निर्देशक, वाचक, अभिधायिन्, निर्देशिन्. 2 वर्णनपर.

Descry, *v. t.* दूराद् आलोकू 1 A, 10 or दृश् 1 P, or ईक्ष् 1 A, निवर्ण् 10, आलक्ष् 10. 2 ज्ञा 9 U, अवगम् 1 P; *See* **Know.**

Desecrate, *v. t.* दुष् c. (दूषयति), अपवित्रीकृ 8 U, पुण्यत्वं लुप् c., संस्कारहीन *a.* कृ. **-ion,** *s.* दूषणं, संस्कारदूषणं, अपवित्रीकरणं.

Desert, *s.* मरुः, मरुस्थलं-ली, वालुकाप्रदेशः, धन्वन् *m.* 2 गुणः, पुण्यं, योग्यता, पात्रत्वं, पुण्यापुण्यं, अर्हत्वं, -*a.* निर्जन, निर्मानुष (षी *f.*), वन्य, खिल, निर्जल, शून्य, आरण्यक. **-v.** *t.* त्यज् 1 P, हा 3 P, उत्-वि-सृज् 6 P, रह् 10, (रहयति), अपव्यध् 4 P, **-v.** *i.* सेनां त्यक्त्वा पलाय् 1 A. **-er,** *s.* त्यागिन्-सेनात्यागिन् *m.*, परावर्तकः. रणपराङ्मुखः, पलायिन् *m.* **-ion,** *s.* त्यागः, उत्सर्गः; सेनात्यागः, निर्गमनं, अपक्रमणं. **-less,** *a.* निर्गुण, अनर्ह, अयुक्त, अपात्र.

Deserve, *v. t.* अर्ह् 1 P, अर्ह-उचित-योग्य *a.* in comp.; oft. by pot. pass. part. **-ed,** *a.* योग्य, उचित, अर्ह. **-edly,** *adv.* उचितं, योग्यं, न्यायतः. **-er, -ing,** *a.* अर्हत्, गुणवत्, अर्ह, उचित, योग्य, पात्र; 'd. of' ex. by pot. pass. part. 'd. of pity' अनुकंप्य, &c. **-s.** गुणः, पात्रता, योग्यता, अर्हत्वं.

Deshabille, *See* **Dishabille.**

Desiccate. *v. t.* शुष् c., आचम् 1 P, **-v.** *i.* शुष् 4 P, **-ion,** *s.* शोषणं, परिशोषः. **-ive,** *a.* शोषक. **-Dessicants,** *s.* व्रणशोषकाः.

Desiderate, *See* **Desire. -ive,** *a.* इच्छार्थक, सन्नंत. **-Desideratum,** *s.* अभीष्टवस्त्वभावः.

Design, *v. t.* परि-सं-कल्प् c., अनुसंधा 3 U, व्यवसो 4 P, अभि-प्र-इ 2 P, उद्दिश् 6 P; चिंत् 10, घट् c. (घटयति), मनः-मतिं कृ.

8 U. **2** प्र-विनि-युज् 7 A, 10. **3** आलिख् 6 P, सूत्रपातं कृ. –*s.* अभिप्रायः, अर्थः, आकांक्षा, उद्देशः, संकल्पः, आशयः, हेतुः, चिकीर्षितं, प्रयोजनं, कार्यं. **2** उपायः, चिंता, कल्पना, घटना, विधानं, व्यवसायः. **3** आलिखनं, सूत्रपातः, संस्कारः. **–edly,** *adv.* कामतः, यथाकामं, इच्छातः, बुद्धिपुरःसरं. **–er,** *s.* चिंतकः, परिकल्पकः. **2** आलेखकः, सूत्रपातकः. **–ing,** *a.* उपजापिन्, मायिन्, छलिन्, वंचनशील, प्रतारक, विदग्ध, कपटपटु, धूर्त. **–less,** *a.* निरर्थक, निष्प्रयोजन.

Designate, *v. t.* उप-लक्ष् 10, अप-व्यप-दिश् 6 P, निर्दिश्, सूच् 10, द्युत् c., अभिधा, 3 U, निर्वच् 2 P, गम् c. (गमयति). **2** नियुज् 7 A, 10, परि-सं-क्लृप् c. **–ing,** *s.* लक्षणं, उपलक्षणं, चिह्नं, विशेषणं, अभिधानं, संज्ञा, आख्या, नामन् *n.*

Desire, *v. t.* इष् 6 P, वांछ् 1 P, कम् 10 A, स्पृह् 10 (with dat.), इह् 1 A, आकांक्ष् 1 U, अभिलष् 1, 4 P; oft. ex. by desid. of roots. **2** अर्ध् 10A, याच् 1A, वृ 5U. –*s.* इच्छा, अभिलाषः, कामः, ईहा, आकांक्षा, समीहितं, आशा, इष्टं, ईप्सितं, मनोरथः, स्पृहा, अभीष्टं; 'according to one's d.' यथाकामं, यथेष्टं, स्वेच्छातः, स्वच्छंदं, स्वरुच्या; 'ardent d.' लालसा, औत्सुक्यं, उत्कंठा, लोभः, तृष्णा. **–able,** *a.* स्पृहणीय, काम्य. **2** इष्ट, प्रशस्त, श्रेयस्. **–ous,** *a.* सस्पृह, वांछिन, इच्छु, ईप्सु; oft. by desid. forms; 'd. to speak.' विवक्षुः; 'd. to take' जिघृक्षुः; or by काम or मनस् in comp. with inf.; 'd. to take' आदातुकामः-मनाः.

Desist, *v. i.* विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.); *See* **Cease.** **–ance,** *s.* विरामः, निवृत्ति *f.*, विश्रामः.

Desk, *s.* लिखनफलकः. लेखनाधारः.

Desolate, *a.* निर्मानुष (फी *f.*), निर्जन, शून्य, विविक्त, वसतिहीन, विजन. **2** उच्छिन्न, जीर्ण, उद्ध्वस्त, उत्सन्न. **3** असहाय, निराश्रय, अगतिक, अनाथ. –*v. t.* उच्छिद् 7 P, अवसद् c., निर्जनीकृ 8 U; उपपीड् 10, शून्यीकृ, प्रबाध् 1 A. **–ion,** *s.* उच्छेदः, अवसादनं, वसतिनाशः, निर्जनीकरणं. **2** शून्यता, निर्जनत्वं, विविक्तता.

Despair, *v. i.* निराश *a.* भू 1 P, आशां हा 3 P, नैराश्यं गम्-व्रज् 1 P, विषद् 1 P, भ्रंश् *a.* भू; 'd. ed. of success' जयविषये निराशीभूत. –*s.* नैराश्यं, निराशता, आशाहीनता, वैक्लव्यं, विषादः; 'being in d.' त्यक्ताश, गताश. **–Desperate,** *a.* निराश, आशातीत, त्यक्ताश, आशाहीन. **2** जीवितनिरपेक्ष, आततायिन्, निर्भय, साहसिक (की *f.*) **3** निष्प्रतीकार, उग्र, संरब्ध, साहसद्योतक, अत्यंत; 'a d. act' साहसं, आततायिता. **–ly,** *adv.* जीवितनिरपेक्षं, प्रसह्य, उग्रं, उन्मत्तवत्. **2** अति-सु pr.; अत्यंतं, भृशं. **–ness,** साहसिकता, उन्मादः, संरंभः जीवितनिरपेक्षता.

Despatch, *v. t.* (सत्वरं) प्रेष् c., प्रहि 5 P. प्रस्था c. (स्थापयति), विसृज् 6 P. **2** शीघ्रं, झटिति संपद् c.; त्वर् c. (त्वरयति), आशु संविधा 3 U. **3** हन् 2 U, व्यापद् c.; *See* **Kill.** –*s.* त्वरा, शीघ्रता, शीघ्रकारित्वं, अदीर्घसूत्रता. **2** पत्रं, राजलेखः-लेख्यं, वाचिकपत्रं. **3** धावकः, प्रजाविन् *m.*, वार्ताहरः, दूतः. **–ful,** *a.* त्वराशील, शीघ्रकारिन्, अविलंबिन्, अदीर्घसूत्र.

Desperado, *s.* साहसिकः, प्रसह्यचौरः, साहसिन् *m.*, आततायिन् *m.*, वधोद्यतः.

Despise, *v. t.* अवज्ञा 9 U, तिरस्कृ 8 U, अवमन् 4 A, परिभू 1 P, अवधीर् 10; *See* **Contemn.** **–er,** *s.* अवमंतृ *m.*, अवज्ञातृ *m.*, निंदकः. **–ingly,** *adv.* सावज्ञं, सावमानं. **–Despicable,** *a.* अवमान्य, अवज्ञेय, गर्ह्य, निंद्य, नीच, निकृष्ट, अधम, तुच्छ, कुत्सित, क्षुद्र.

Despite, *s.* द्वेषः, जुगुप्सा, मात्सर्यं, ईर्ष्या, अभ्यसूया, असूया. **2** प्रतिरोधः, प्रतिकारः; 'in d. of' (prep.) अनादृत्य, अवगणय्य, or gen. abs.; 'd. the (presence of the) teacher' पश्यतोपि गुरोः; *See* 'in spite of' under **Spite.** **–ful,** *a.* द्वेषिन्, सासूय, अभ्यसूयक, मत्सरिन्, द्रोहबुद्धि. **–fully,** *adv.* सद्वेषं, सद्रोहं, ईर्ष्यया. **–fulness,** *s.* मात्सर्यं, असूया, दौर्जन्यं, द्रोहः, द्रोहबुद्धि *f.*

Despoil, *v. t.* हृ 1 P, अपहृ; *See* **Deprive;** 'd. ed of everything' हृतसर्वस्व. **–er,** *s.* अपहारकः. **–Despoilation,** *s.* अपहरणं.

Despond, *v. i.* निर्विद् 4 A, नैराश्यं-निर्वेदं-विषादं-गम् 1 P or आपद् 4 A, विषद् 1 P, आशां त्यज् 1 P, अंगानि मुच् 6 P. **–ency,** *s.* निर्वेदः, विषादः, नैराश्यं, उद्वेगः, अवसादः, विषण्णता. **–ent, –ing,** *a.* निर्विण्ण, विषण्ण, निराश, त्यक्ताश, म्लान, उद्विग्न; 'do not take a d. view' मा भवानंगानि मुंचतु (V. 2). **–ingly,** *adv.* सविषादं, सनिर्वेदं.

Despot, *s.* प्रजापीडकः, लोकोपप्लवकः, **2** अधीश्वरः, सम्राज् *m.*, सार्वभौमः, चक्रवर्तिन् *m.* **–ic, –ical,** *a.* स्वतंत्र, निष्प्रतिबंध, अनियंत्रण, अनियत, नियंत्रण. **–ically,** *adv.* स्वैरं, स्वेच्छातः, कामचारेण. **–ism,** *s.* प्रजापीडनं, निष्ठुरशासनं, प्रजोपप्लवः, स्वेच्छाचारित्वं, स्वेच्छाप्रभुत्वं; नियंत्रणाराज्यसरणिः *f.*

Despumate, *v. i.* उत्सिच् pass., फेनायते (D.)

Dessert, *v. t.* (भोजनांते) फलाहारः.

Destine, *v. t.* (**Destinate**) निरूप् 10, परि-प्र-कल्प् c., निर्दिश् 6 P, नियुज् 7 A, 10,

समुपस्था 1 U, (न जाने भोक्तारं कमिह समुपस्थास्यति विधिः S. 2); oft. ex. by pot. pass. part., with or without अवश्यं, नूनं; ' he is d. ed to be a king ' अनेनावश्यं राज्ञा भवितव्यं; 'man is d. ed to die' मनुष्या नश्वराः; ' who is able to avoid what is d. ed for him ' लिखितमपि ललाटे प्रोञ्छितुं कः समर्थः; तथा भवितव्यतया च तस्य तस्य वस्तुनः (Ka. 143) ' every thing being d. ed to occur ' &c. **-ation,** *s.* ईप्सितं स्थानं, इष्टः प्रदेशः, निरूपित-निर्दिष्ट-स्थानं. **2** उपयोगः, प्रयोजनं, उद्देशः; अर्थः, अभिप्रायः. **-y,** *s.* दैवं, भवितव्यता, नियतिः, *f.*, भाग्यं, भागधेयं; विधातृ *m.*, विधिः, दिष्टं, अदृष्टं, प्राक्तनं.

Destitute, *a.* निर्धन, अधहीन, निराश्रय, दुर्गत, अशरण, दीन, अकिंचन, दुःस्थित. **2** (of) हीन, रहित, वर्जित, शून्य, वियुक्त, हृत, विहीन, परिहीण, with instr. or in comp.; gen. by निर्-अ वि- in comp; ' d. of courage ' धैर्यहीन-शून्य, &c.; निरुत्साह ' d. of energy '; ' d. of hands and feet ' अपाणिपाद. **-ion,** *s.* दैन्यं, धनाभावः, अकिंचनत्वं, दारिद्र्यं, निराश्रयता. **2** हीनत्वं, राहित्यं, शून्यत्वं, अभावः, विरहः, वियोगः.

Destroy, *v. t.* नश् c., प्र-वि°; अव-उत्-सद् c., ध्वंस् c., प्र-वि°; विलुप् c., क्षै c. (क्षपयति), क्षि 5 P or c., संह् 1 P, उत्-निर्-दल् c, उच्छिद् 7 P, प्रतिहन् 2 P. **2** (persons &c) हन् 2 P, निर्दल् 10, व्यापद् c., मृ c.; ' to be d. ed ' वि-, नश्, 4 P, ध्वंस् 1 A, क्षयं या-इ 2 P, or गम् 1 P. प्र-वि-ली 4 A. **-er,** *s.* नाशकः, हंतृ *m.*, निर्दूनः, घातिन् *m.*, अंतकः, ध्वंसकः, हन्-अघ in comp, ' d. of Vritra ' वृत्रहा, वृत्र-निर्दूनः; ' d of every thing ' कृतांतः. **-Destructible,** *a.* नश्वर, विध्वंसिन्, भंगुर, क्षयिन्. **-Destruction,** *s.* नाशः, विनाशः, प्रणाशः; प्र-, वि-, ध्वंसः, क्षयः; उच्छेदः, संहारः; उद्दलनं, उत्पाटनं. **2** निर्दूनं, घातः, वधः; ' d. of the whole world ' प्रलयः, प्रत्यवहारः, कल्पांतः, संवर्तः. **-Destructive,** *a.* विनाशिन्, क्षयकर (री *f.*), घातिन्, अंतकर, घातुक, अघ-घ्न (घ्नी *f.*) in comp.: ' d. to life ' जीवितापहर, प्राणहर, निधनकारिन्.

Desuetude, *s.* विरतिः *f.*, निवृत्तिः *f.*, विच्छेदः, विरामः, प्रवृत्तिविच्छेदः.

Desultory, *a.* असतत, उच्छृंखल, अस्थिर, लोल, अनियत, चंचल, अनवस्थित, अव्यवस्थित.

Detach, *v. t.* विश्लिष् c., विभिद् 7 P, विच्छिद् 7 P, वियुज् 7 A, 10, पृथक् कृ 8 U; *See* **Separate. -ed,** *a.* वियुक्त, विभिन्न, विच्छिन्न; असंसक्त, असंलग्न, गतसंग, विश्लिष्ट, असंगत. **-ment,** *s.* विभागः, वियोगः, विच्छेदः, विश्लेषः, विभेदः. **2** सैन्यदलं, गुल्मः-ल्मं.

Detail, *s.* विस्तरः, विस्तारः; वाग्विस्तरः, प्रपंचः. **2** वृत्तांताख्यानं; ' in d. ' or ' d. ed' सविस्तर (*a.*), विस्तरेण, विस्तरतः-शः, सविस्तरं. **-***v. t* सविस्तरं-विस्तरेण-वर्ण् 10 or आख्या 2 P. or कथ् 10, प्रपंचयति (D.).

Detain, *v. t.* धृ 1 P, निरुध् 7 U; जामातृयज्ञेन वयं निरुद्धाः (U. 1) ' d. ed by reason of ' &c. **2** निवाद् 10, निग्रह् 9 P. **3** (In custody) आसिध् 1 P, बंध् 9 P, निरुध्. **-Detention,** *s.* धरणं. निग्रहः, संरोधः, निरोधः. **2** आसेधः; प्रति-नि-रोधः, बंधनं, बलात्कारेण धरणं.

Detect, *v. t.* निरूप् 10, ज्ञा 9 U, अनुसंधा 3 U, अधि-अव-गम् 1 P; दृश् 1 P, उपलभ् 1 A, आसद् c. **2** धृ 1 P, प्रकाशय् c, व्यंज् 7 P; ' d. ed in a crime ' दृष्टदोष; निर्णीतापराध. **-ion,** *s.* ज्ञानं, निरूपणं, अनुसंधानं, उपलंभः. अवगमनं **-ive,** *a.* (Officer) चरः, चारः. प्रणिधिः, अपसर्पः; *See* **Spy**

Deter, *v. t.* (सभयं) निवृत् c., निवाद् 10, विरम् c.(रमयति), भी c., निरुध् 7 U; *See* **Prevent. -ment,** *s.* निवर्तनं. निवारणं.

Deterge, *v. t.* शुध् c., मलं अपनी 1 P, परिमृज् 2 P. **-ent,** *a.* शोधन (नी *f.*), परिमार्जक.

Deteriorate, *v. i.* क्षि हा pass., ह्रस् 1 P, क्षयं गम् 1 P; दुष् 4 P, भ्रंश् 4 P, 1 A, अपकृष् pass. -*v. t.* अपकृष् 1 P, दुष् c. (दूषयति), विकृ 8 U, ह्रस् c. **-ion,** *s.* क्षयः, अपचयः, विकारः, विकृति *f.*, ह्रासः, भ्रष्टता. **2** अपकर्षः, दूषणं.

Determine, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संकल्पय् c., निरूप् 10, निर्णी 1 P, निर्-अव धृ 10, निर्दिश् 6 P, लक्ष् 10, परिच्छिद् 7 P. **2** निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). -*v. i.* व्यव-अव-सो 4 P, निश्चयं कृ 8 U; ' d. ed to go ' गमने कृतसंकल्प, गंतुं व्यवसित. **-ate,** *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत, नियत, सिद्ध, व्यवस्थित. **2** निश्चायक, निर्णायक. **3** (of persons) कृतनिश्चय, दृढसंकल्प, व्यवसित. **-ately,** *adv.* सनिश्चयं, सनिर्णयं, नूनं. **-ation,** *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः निरूपणं, परिच्छेदः, अवधारणा. **2** अभिनिवेशः, अध्यवसायः, निर्बंधः. **-ative,** *a.* निर्णायक, निर्धारक. **-ed,** *a.* निश्चित, निर्णीत, सिद्ध, नियत, व्यवस्थित, परिच्छिन्न, अवधारित. **2** (of persons) स्थिरनिश्चय, दृढ-कृतसंकल्प, अभिनिविष्ट, कृतनिश्चय. **-edly,**

adv. स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-er**, *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

Detest, *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, जुगुप्स् desid. (जुगुप्सते) (with abl.); *See* **Abhor.** **-able**, *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation**, *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er**, *s.* द्वेषिन् *m.*, विद्विष्ट *m.*

Dethrone, *v. t.* राज्याद् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment**, *s.* राज्यभ्रंशः-च्युति *f.*

Detonate, *v. i.* सहसा स्तन् 1 P or ध्वन् 1 P. **-ion**, *s.* स्तनितं, आकस्मिकध्वनि *m.*

Detort, *See* **Pervert.**

Detract, *v.* अपकृष्-अपनी 1 P. **2** अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.), मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate.** **-ion**, *s.* अपकर्षः, लघूकरणं, ह्रासः. **2** असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशून्यं, परदोषाविष्करणं, मात्सर्यं. **-or**, *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः **-ory**, *a.* अपवादिन्, निंदक, असूयक; पिशुन.

Detriment, *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. **-al**, *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

Detrude, *v. t.* अवपत् c., अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion**, *s.* अवपातनं.

Detruncate, *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion**, *s.* अवच्छेदः, निकर्तनं.

Deuce, *s.* द्वयं, द्विकं. **2** पिशाचः, भूतः.

Devastate, *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-प्लु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion**, *s.* उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

Develop, *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृह् c.; 'she'd either lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. 1. 25): also प्रचीयमानावयवा R. III. 7) उपचितांगी. **2** विकस् c., विस्तृ c., उद्भिद् c.; तत्य (कार्यापेक्षयय) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' *v. i.* प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृह् 1 A. **-ment**, *s.* प्रचयः, उपचयः. सवर्धनं; विस्तारः, विकासः, उद्भेदः.

Devergence, *See* **Divergence.**

Deviate, *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभ-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णादृत्तनोरेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion**, *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

Device, *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. **2** अप-व्यप-देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. **3** लक्ष्मन्, चिह्नं, अंकः. **4** निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

Devil, *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

Devious, *a.* वक्र, कुटिल, जिह्म. **2** मर्यादातिक्रामिन्, व्यभिचारिन्.

Devise, *v. t.* चिंत् 10, उप-सं-कृप् c., निरूप् 10, युज् 7 U, 10. आ-पर्या-लोच् 10, घट् c. **2** इच्छापत्रेण दा 3 U. **-s.** इच्छापत्रेण रिक्थदानं. **-er**, *s.* धनाधिकारिन्, *m.* **-er**, *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

Devold, (of), *a. See* **Destitute** (of).

Devoir, *s.* स्वकर्तव्यं कर्तव्यता, धर्मः. **2** सत्कारः, आदरः, पूजा, संमानः.

Devolve, *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-क्रं c. (अपयाति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपिताश्रियः (R. VIII. 11). **2** अपत् c., प्रसु-प्रवह् c. **-v. i.** आगम् 1 P, आपत् 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस् निक्षिप्-समृ c. pass.; 'after his death the kingdom d. ed upon his eldest son' सुते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाक्त्वभूत्. **2** अधः पत् 1 P, अवपत्. **-Devolution**, *s.* निक्षेपणं, समर्पणं, संक्रामणं.

Devote, *v. t.* प्र-विनि-युज् 7 A, 10, सम् क्रं c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-रुध् c. **2** (Oneself to) आसंज् अनुरंज् pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with l. c.); भज् 1 U, आसद् 1 A. **3** नाशाय कृप् c; *See* **Doom.** **-ed**, *a.* सक्त, आ-प-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. **2** भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजानुग, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m.* 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद् **-edly**, *adv.* चित्तैकाग्र्यतया, भक्त्या, निष्ठया, अभिनिविष्टं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness**, *s* आसक्ति *f.*, भक्ति *f.*, अभिनिवेशः, परायणता. **-ee**, *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रतिन् *m.* **2** भक्तजनः, प्रणयिजनः, उपासकः, भक्तः. **-ion**, *s.* अभियोगः, अभिनिवेशः, अनुरागः,

सेवा, उपासना, प्रसक्ति *f.*, आसक्ति *f.*, भक्तिः, निरति *f.*, परायणता. **2** नियमः, धर्मक्रिया, तपस् *n.* **3** ईश्वरभक्ति *f.* सेवा; 'self-d.' आत्मोत्सर्गः-परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिसेवा; 'to perform d. s' तपश्चर् 1 P or तप् 4 A, तपस्यति (D.). **-ional,** *a.* धर्मपर. धर्मनिष्ठ, भजनशील. **2** धर्मक्रियाविषयक, तपोमय (यी *f.*).

Devour, *v. t.* भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गृ 6 P. **2** उपयुज्ज् 10, उपयोगेन विनश् c. **-er,** *s.* भक्षकः, खादकः.

Devout, *a.* धार्मिक, धर्म-परायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयत त्मन्, पुण्यात्मन्. **-ly,** *adv.* भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. **-ness,** *s.* धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति *f.*

Dew, *s.* नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रि-ख-जलं. *-v. t.* नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and sim. comps. **-y,** *a.* तुषारमय (यी *f.*), अवश्यायावसिक्त; तुषारकणोपम.

Dexterous, *a.* कुशल, निपुण, पटु, दक्ष, लघु-हस्त, करदक्ष. **-ly,** *adv.* निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. **-Dexterity,** *s.* दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

Dextral, *a.* दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

Diabetes, *s.* मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

Diabolical, *a.* पैशाच (ची *f.*), पिशाचोपम. **2** घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

Diacoustics, *s.* ध्वनिविद्या.

Diadem, *s.* मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं, 'd. ed' किरीटिन्, किरीटधारिन्.

Diagnosis, *s.* रोगनिर्णयः-निरूपणं, रोगनिदानं, मीमांसा, चिकित्सा.

Diagnostic, *s.* रोगलक्षणं-चिह्नं.

Diagonal, *s.* कर्णः, श्रुति *f.* **-ly,** *adv.* कोणाकोणि, कर्णाकर्णि.

Diagram, *s.* चित्रं.

Dial, *s.* शंकुयंत्रं, सूर्यघटी.

Dialect, *s.* प्राकृतभाषा, भाषा (as opposed to संस्कृत). **2** भाषणं, वचनं, उक्तिः *f.*

Dialectic, -al, *s.* तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. **-al,** *a.* तार्किक (की *f.*), न्यायिन. **-ian,** *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*

Dialogue, *s.* संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. **-Dialogist,** *s.* संवादकः, उत्तरप्रत्युत्तरदायकः.

Diameter, *s.* व्यासः, विष्कंभः. **-Diametrically,** *adv.* विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

Diamond, *s.* वज्रः-ज्रं, हीरं, हीरकः; 'd. cutter' हीरकारः-मार्जकः.

Diapason, *s.* स्वराष्टकं, स्वरग्रामः.

Diaper, *s.* चित्रितं क्षौमं. *-v. i.* क्षौमं चित्र 10 or कर्बुरीकृ, &c.

Diaphanic, *a.* स्वच्छ, विशद; *See* **Clear.**

Diaphoretic, *a.* स्वेदन (नी *f.*), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

Diaphragm, *s.* शरीरमध्यदेशः.

Diarrhœa, *a.* अतिसारः, प्रवाहिका; ग्रहणी-, रुज् *f.*

Diary, *s.* दिनपत्रिका, दैनिकवृत्तपुस्तकं.

Diatribe, *s.* अधिक्षेपः, कुत्सात्मको लेखः.

Dibble, *s.* लघुखनित्रं.

Dice, *s.* plural of **Die,** *s.* q. v.

Dictate, *v. t.* आज्ञापूर्वकं कथ् 10, आदिश् 6 P, आज्ञा c. (ज्ञापयति). **2** सूच् 10, प्रोत्साहु c., प्रचुद् 10, प्रेषु c.; 'd. ed by good motives' सदाशयप्रेरित. *-s.* आज्ञा, आदेशः, शासनं. **2** चोदनं-ना, प्रेरणं-णा. **-ion,** प्रोत्साहनं. **2** आज्ञापनं, आज्ञापूर्वकं कथनं. **-or,** *s.* एकाधिपतिः, अनन्याधीनः शास्ता, अनियंत्रणः प्रभुः. **2** आदेशकः, शासितृ *m.* **-orial,** *a.* अवलिप्त; *See* **Arrogant.**

Diction, *s.* भाषा, वाणी, वाक्सरणि *f.*, वचोविन्यासः.

Dictionary, *s.* कोशः-षः, शब्दसंग्रहः; अभिधानं.

Dictum, *s.* वचनं, आदेशः, विधिः, नियमः.

Didactic, -al, *a.* उपदेशपर, प्रबोधक.

Die, *s.* अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. **-Dice,** (pl.) अक्षाः, &c. **-er,** *s.* अक्षधूर्तः, अक्षदेविन् *m.*, धूर्तः, कितवः. **-ing,** *s.* द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षाधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

Die, *v. i.* मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु-*a.* भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. **2** विनश् 4 P, प्रली 4 A, ध्वंस् 1 A क्षि pass., अवसद् 1 P. **3** म्ले 1 P, विश् pass. **-Dead,** *a.* मृत, उपरत, संस्थित, प्रेत, परेत, परासु, गतासु, विपन्न, गतप्राण, विचेतन, प्राणरहित, प्रमीत. **2** निश्चल, निश्चेष्ट, जड, निरुद्यमस्, निःसत्व, असार, निष्फल. **3** सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः. 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-सकला हानिः; 'd. letter' लुप्तार्थं वचनं, 'd. soul' निरभिमानः आत्मा. *-s.* (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. **2** मध्यं; *See* **Depth.** **-en,** *v. t.* दुर्बलीकृ. 8 U, शिथिलीकृ, तेजो हृ 1 P, नशू c.,

म्लानीकृ. -*v. i.* म्लै 1 P, शिथिलीभू. -**ly**, *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). **2** अशाम्य; 'd. enmity' आमरणांतिकं वैरं, अशाम्यं वैरं; 'd. poison' हाला(ल)हलं विषं. -*adv.* मृतवत्; प्राणांतिकं; 'd. wounded' भिन्नमर्मन्, 'd. pale' प्रेतसवर्ण. -**ness**, *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः; वैकल्यं, विरक्ति, *f.*, शिथिलता. -**Death**, *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-त्ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. **2** यमः, कालः, कृतांतः. **3** वधः, घातः, व्यापादनं; 'he was pelted to d.' सलोष्टघातं हतः; 'he was sentenced to d.' तस्य प्राणदंड आदिष्टः; 'to put to d.' हन् 2 P, व्यापद् c., वधं आदेशू 6 P; 'a violent d.' अपमृत्युः; अपघातः; 'angel of d.' यमदूतः; 'd. by fasting' प्रायः, प्रायोपवेशनं; 'd. bed' त्युशय्या. -**less**, *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

Diet, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. **2** पथ्यं, पथ्यान्नं., पथ्याशित्वं. **3** राजसभा, शिष्टसभा. -*v. i.* पुष् c., भृ 3 U. **2** पथ्यं निर्दिशू 6 P.

Differ, *v. i.* भिद् pass., प्र-वि-°; विशिष् pass., (नकारणात्स्वाद्भिद्यते कुमारः R. v. 35); gen. ex. by (*s.*); 'they two do not d.' न तयोर्भेदः, विशेषः, &c. **2** अन्यथा मन् 4 A, न संमन्, विवद् 1 A, भिन्नमत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः S. B. 702); 'I d. from you' मम मतं त्वन्मताद्भिन्नं. **3** विप्रति-रुध् pass. -**ence**, *s.* भेदः, विशेषः, अंतरं, (with gen.). **2** पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; 'that makes no d.' तेन न कोपि विशेषो जायते. **3** विरोधः, वैपरीत्यं, विपर्ययः, वैलक्षण्यं. **4** विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः, विवादः. **5** असाम्यं, असादृश्यं; 'd. in quantity' वैषम्यं. -**ent**, *a.* भिन्न, वि-प्र-भिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर् in comp.; 'she is not d. from my body (myself)' अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); 'a d. sense' अर्थांतरं. **2** असदृश (शी *f.*), असमान, विषम, असम. **3** विविध, नानाप्रकार, नाना in comp.; तत्तत् *pron. a.*, 'd. S'âstras' तानि तानि शास्त्राणि; 'in a d. way' अन्यथा, भिन्नप्रकारेण. -**ential**, *a.* भेदकर (री *f.*), विशेषक. -**ently**, *adv.* अन्यथा, इतरथा, भिन्नरूपेण; अन्यप्रकारेण, पृथक्.

Difficult, *a.* असुकर, दु र, कठिन, दुष्कर, दुःसाध्य, कष्ट. **2** गहन, विषम, दुर्बोध, असुगम, कष्टज्ञेय गूढार्थ, दुर्ज्ञेय. **3** (With inf.) ex. by दुर्, दुःख, कष्ट, in comp.; 'd. to get दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखछेद्य, &c.; 'a d. case' सशल्योथः; 'a d. road' दुर्गसंचा(च)रः, संक्रमः; 'a d. place' विषमस्थानं, दुर्गं, दुर्गमस्थलं. -**ly**, *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर्, pr. -**y**, *s.* असौकर्यं, वैषम्यं, कठिनता, दुष्करत्वं, कष्टता, दुःसाध्यता. **2** आयासः, वैकृव्यं, विरोधः. **3** कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, विरोधः, क्लेशः, बाधा, कष्टः-ष्टं. **4** विषमपदं, असुबोधं-दुर्बोधं पदं, असुगमं स्थानं; 'without d.' अनायासेन, सुखं; 'with d.' कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; 'a commentary explaining the d. es' विषमपदविमर्शिनी टीका; 'beset with d. es' सशल्य, सकंटक; 'overcoming d. es' दुर्गलंघनं.

Diffidence, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. **2** (In oneself) अप्रगल्भता, विनयः, व्रीहिः, लज्जा. -**Diffident**, *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; 'the mind feels d. of itself' आत्मन्यप्रत्ययं चेतः (S. 1). **2** अप्रगल्भ, अधृष्ट, विनीत, व्रीहिमत्, लज्जावत्. -**ly**, *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

Diffract, *v. t.* वियुज् 7 A, 10, विश्लिष् c.

Diffuse, *v. t.* प्रसृ c., वि-परि-स्तृ c., विसृप् c., प्रच्छद् c. विकृ 6 P, तन् 8 U, अभि-प्र-वृध् c. **2** प्र-स्रु c., विद्रु c., प्रक्षिप् P. **3** (Itself) व्याप् 5 P, विसृ-विसृप् 1 P, विस्तृ pass., व्यश् 5 A, सर्वत्र गम् 1 P, or प्रविश् 6 P. -*a.* वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. -**ly**, *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. -**ion**, *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, विततिं *f.*, प्रचारणं, प्रसरणं. -**ive**, *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. -**iveness**, *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. **2** वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

Dig, *v. t.* खन् 1 P; 'd. down' (भूमिं) अवदृ 10, भिद् 7 U; 'd. in' निखन्. **2** निर्भिद्, छिद् 10, व्यध् 4 P. -**ger**, *s.* खनकः, खनितृ *m.*

Digest, *v. t.* (जठरे) जृ c. (जरयति), पच् 1 P, परिपाकं नी 1 P, परिणम् c. (णमयति), दह् 1 P, **2** क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रंथ् 9 P or लिख् 6 P. **3** मनसा विचर् c. or चिंत् 10. 4 suffer, q. v. -*v. i.* जॄ 4 P, पच् pass., परिणम् 1 P. -**er**, *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं, रोचकं. -**ion**, *s.* पाकः, वि-परि-पाकः, पचनं, परिणामः. **2** जठराग्निः, जठरानलः, अग्निः; 'slowness of d.' अग्निमांद्यं; 'having a

good d. ' प्रदीप्ताग्निः. -ive, *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

Dight, *See* **Adorn.**

Digit, *s.* कला, लेखा, रेखा. 2 अंकः.

Dignity, *s.* महिमन् *m.*, माहात्म्यं, औदार्यं. 2 अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-ता. 3 प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परमपदं, उत्कर्षः, उन्नति *f.*, आभिजात्यं, प्रतिपत्ति *f.*, ओजस्विता, उच्चत्वं, कुलीनता; ' d. of style ' ओजस् *n.* 4 मानः, अभिमानः, गर्वः, दर्पः; ' d. of expression ' प्रौढत्वं वचसां. -Dignify, *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. 2 उत्कृष्टपदे नियुज् 7 A. 10, परमपदं प्रा पू c., उत्कर्षं नी 1 P. -ed, *a.* महानुभाव, अनुभाववत्, ग(गं)भीर, ओजस्विन्, प्रौढ, महाप्रताप; ' d. in mien ' गंभीराकृति. 2 मानिन्, महाशय, महेच्छ. 3 उत्कृष्टपदनियुक्त, प्रतिपत्तिमत्, परमपदारूढ. -Dignitary, *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

Digress, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृतं-कथायोगं त्यज् 1 P. ' you are d. ing ' नत्वया प्रस्तुतमनुसंधीयते. 2 उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A, 4 P; *See* **Deviate.** -ion, *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; ' enough of d. ' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. 2 उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. -ive, *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असंगत, असंबद्ध.

Dike, *s.* सेतुः, सेतुबंधः, पिंडलः, धरणः, कूलकः-क. 2 कुल्या, परिखा, खात, प्रणालः-ली.

Dilacerate, *See* **Tear.**

Dilapidate, *v. i.* जॄ 4 P, विनश् 4 P, क्षि-उच्छिद्-pass., अवसद् 1 P. -*v. t.* उच्छिद् 7 P, अवसद् c., प्रध्वंस् c. क्षि c., विनश् c.; *See* **Destroy.** -ion, *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

Dilate, *v. t.* विस्तॄ c., वितन् 8 U, प्र-वि-सृ c., दीर्घाकृ 8 U. 2 (upon) प्रपंचयति (D.), सविस्तरं विवृ 5 U, or व्याचक्ष् 2 A, अति-विवृ. -*v. i.* वितन्-विस्तॄ-विवृ pass., आयतीभू, दीर्घीभू. -ed, *a.* वितत, व्यायत; उत्फुल्ल, विकसित. -ion, *s.* विस्तारः, वितति *f.*, विस्तरणं, विवृति *f.*; विकासः-सनं. उत्फुल्लता.

Dilatory, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय, आक्षेपकारिन्. -ly, *adv.* सविलंबं, मंदंमंदं, कालक्षेपेण. -ness, *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

Dilemma, *s.* उभयसंभवः, विकल्पः.

Diligent, *a.* उद्योगिन्, व्यवसायिन्, उद्युक्त, सोद्योग, उद्यमिन्, अनलस, अभिनिविष्ट, उद्यम-व्यवसाय-पर, उद्योगतत्पर. 2 (of things), अनवरत, सतत, नित्यप्रवृत्त, प्र-आ-सक्त, अभ्यस्त, प्रसित, अविच्छिन्न. -ly, *adv.* प्रयत्नतः, सोद्योगं, सोद्यमं; अनवरतं, प्रसक्तं. -Diligence, *s.* उद्यमः, अध्यव-व्यवसायः, उद्योगः, अभियोगः, अभिनिवेशः, प्रयत्नः, अभ्यासः, प्रसक्ति *f.*, उत्साहः. 2 सातत्यं, अविच्छेदः, अविरामः, नैरंतर्यं.

Dill, *s.* सालेयः, मधुरिका.

Dilute, *v. t.* जलेन मिश्र् 10, or संसृज् 6 P, विली c., तनूकृ 8 U, क्षीणीकृ; मिश्रणेन शक्तिं तनूकृ -ion, *s.* जलसंसर्गः, जलमिश्रणं; तनूकरणं. -Diluent, *s.* विलयनं, तनूकरणं.

Dim, *a.* मंदद्युति, मंदप्रभ, मलिनकांति, मलिन, निष्प्रभ, निस्तेजस्, सतिमिर. 2 अप्रकाश, अव्यक्त, अस्पष्ट, दुरालोक, दुर्दृष्ट; ' seeing d.-ly ' हतदृष्टि, अस्पष्टदृश्; ' of d. understanding ' मंदमति, जड-स्थूल-धीबुद्धि, &c. -*v. t.* अंधीकृ 8 U, अस्पष्टीकृ, कलुषीकृ, निष्प्रभीकृ, मलिनयति (D.). -ly, *adv.* अस्पष्टं, अव्यक्तं, निष्प्रभं, मलिनं. -ness, *s.* तिमिरं, अस्पष्टता, तेजोहानि *f.*, दुरालोकता, मालिन्यं, अस्पष्टता. 2 स्थूलमतिता, बुद्धिमांद्यं.

Dimension, *s.* प्रमाणं, परिमाणं, मात्रा, मानं, विस्तारः.

Diminish, *v. t.*, *v. i.* *See* **Decrease.** -Diminution, *s.* न्यूनीकरणं, ह्रासः, क्षयः, अपचयः, अवसादः, हानि *f.* -Diminutive, *a.* अल्पकाय, क्षुद्र, अल्प, स्तोक, सूक्ष्म, लघु. 2 अल्पार्थ (प्रत्ययः); 'कन् is a d. termination' अल्पार्थे कन्.

Dimity, *s.* दृढं कार्पासवस्त्रं.

Dimple, *s.* कपोलभंगः, गंडतरंगः; कपोलोर्मि *f.* ऊर्मि *f.*, भंगुरता, दंतुरता, भंगः, तरंग,. -Dimply, *a.* भंगुर, ऊर्मिमत्, दंतुर.

Din, *s.* कलकलः, निनादः, कोलाहलः, तुमुलरवः, निः-स्वनः, उच्चघोषः, तुमुलः. -*v. t.* (श्रवणपुटं) जर्जरीकृ 8 U, कर्णौ उपहन् 2 P or जर्जरयति (D.); *See* **Stun.**

Dine, *v. i.* भुज् 7 A, आहारं-भोजनं सेव् 1 A, or निर्वृत् c., शरीरस्थितिं कृ 8 U or कॢप् c. -*v. t.* भुज् c., अश् c. -Dinner, *s.* भोजनं, आहारः, अशनं; *See* **Food.** 2 उत्सवः, जग्धि *f.*, भोजनोत्सवः.

Ding, *v. t.* शब्दायते (D.), नद्-स्वन्-क्वण् 1 P; ' ding dong ' घंटानादः-शब्दः; किंकिणीरवः-शब्दः-नादः, सततनादः.

Dingle, *See* **Dale.**

Dingy, *See* **Black.**

Dint, *s.* प्रहारः, आघातः, अभिघातः. 2 बलं, प्रभावः, सामर्थ्यं; ' by d. of ' बलेन, प्रभावेण, सामर्थ्यात्, योगेन. -*v. t.* प्रहारेण अंक् 10 or चिह्न् 10.

Diocesan, *s.* प्रधानधर्माध्यक्षः.
Diorthesis, *s.* वक्रांगचिकित्सा.
Dip, *v. i.* नि-, मस्ज् 6 P (with loc.): अव-वि-गाह् 1 A, प्र-नि-विश् 6 P, आप्लु 1 A, (acc.). 2 व्यापृ 6 A, व्यापृत *a.* भू. **-v. t.** अवगाह् c., मस्ज् c. (मज्जयति), प्रवेश् c. **2** सिच् 6 P, क्लिद् c., आर्द्रीकृ 8 U; 'd. in a business' इषद् व्यापृ or प्रवृत् 1 A: 'd. into books' चुंब् 1 P: अल्पशः अधि-इ 2 A. **-s.** निमज्जनं, अवगाहः, प्रवेशः. **2** अवपातः, नम्रता. आनति *f.*
Diphtheria, *s.* मांससंतानिका.
Diphthong, *s.* स्वरद्वयं, संयुक्तस्वरः, संध्यक्षरं.
Diploma, *s.* पदवी अधिकार-दायकं पत्रं
Diplomacy, *s.* सामन् *n.*, नीति *f.*, दौत्य-कर्मन् *n.* **2** राजदूतमंडलं-समूहः. **-Diplomatical**, *a.* दूतकार्यविषय. **-Diplomatist**, *s.* सामप्रयोगज्ञः, राजनीतिकुशलः, दौत्यकार्य-निपुणः, सामकुशलः.
Dipsomania, *s.* मद्यासक्ति *f.*
Dire,-ful, *a.* दारुण, घोर, उग्र, तीव्र. **2** भीषण, क्रूर, भयानक, रौद्र. **-ness**, *s.* दारुणत्वं, घोरता, रौद्रता.
Direct, *v. t.* संधा 3 U, लक्ष्यीकृ 8 U, उद्दिश् 6 P, प्रेर् c., अधिकृत्य क्षिप् 6 P, (a missile &c.); 'd. attention or mind' मनो नियुज् 7 A, 10, मनः समाधा or बंध् 9 P or आसंज् c. or निक्षिप्. **2** शास् 2 P, विनियम् 1 P, प्रणी 1 P, निवह् c., अधिष्ठा 1 P, अवेक्ष् 1 A. **3** आ-निर्-उप-दिश्, प्रदृश् c. **4** नियुज्, आदिश्, आज्ञा c. (ज्ञापयति), प्रचुड् 10. **5** विधा 3 U, प्र-युज्. **6** (A letter &c.) *See* **Address**. **-a.** ऋजु, अवक्र, सरल, अकुटिल, अविलोम, अजिह्म, अनुलोम; 'd. descendants' अनुलोमाः, अनुलोमवंशजाः. **2** क्रमागत, अविप्रकृष्ट. **3** व्यक्त, स्पष्ट, सस्पष्ट-व्यक्त, प्रत्यक्ष, साक्षात् *ind.* **-ion**, *s.* शासनं, नियोगः, निर्देशः, आज्ञा, आदेशः. **2** संधानं, उद्देशः, प्रेरणं. **3** प्रणयनं, प्रशासनं, विनियमनं, अधिष्ठातृत्वं, अधिष्ठानं, अवेक्षा-क्षणं. **4** दिश् *f.*, दिशा, आशा, काष्ठा, ककुभ् *f.*, हरित् *f.* **5** **Address** q. v. **-ive**, *a.* निर्देशक, सूचक. **-ly**, *adv.* सपद्येव, सद्यः, अचिरात्, तत्क्षणं-णात्, अविलंबितं, शीघ्रं, आशु. **2** स्पष्टं, प्रत्यक्षं, सुव्यक्तं, अगूढतया, भिन्नार्थं. **3** अनुलोमं, सरलतया. **-or**, *s.* शासितृ-अधिष्ठातृ *m.*, अनुशासकः, अध्यक्षः, अधिकारिन् *m.*, अवेक्षकः, निर्वाहकः. **-ory**, *s.* विधिसंहिता. **2** नाम-धामसूचकं पुस्तकं.
Direption, *s.* अपहरणं, अपहारः, लुंठनं.
Dirge, *s.* करुणगीतं, करुणरससंगीतं.
Dirigible, *a.* नियम्य.
Dirigle, *s.* *See* **Baloon**.
Dirk, *See* **Dagger**.

Dirt, *s.* मलः-लं, पंकः, कर्दमः, जंबालः-लं, कल्कं, किट्टं. **-y**, *a.* मलिन, समल, मलीमस, पंकिल, कलुष, आविल, मलदूषित, सकर्दम. **2** नीच, कुत्सित, खल, गर्ह्य. **-v. t.** मलेन-पंकेन-दुष् c. (दूषयति) or लिप् 6 P. मलिनीकृ 8 U, मलिनयति-आविलयति (D.).
Diruption, *See* **Eruption**.
Disable, *v. t.* अनुपयुक्त *a.* कृ 8 U, विहस्तीकृ, (रुजा विहस्तचरणां दर्वीं M. 4); अशक्त-असमर्थ *a.* कृ. **2** अवपद् c., विकलीकृ, उपहन् 2 P, दुर्बलीकृ. **-Disability**, *s.* अशक्ति *f.*, असामर्थ्यं, अक्षमता, अयोग्यता; अनुपयोगः.
Disabuse, *v. t.* भ्रमं निरस् 4 U or उच्छिद् 7 P or अपनी 1 P, or हृ 1 P or अपाकृ 8 U, भ्रांतर्मुच् 6 P.
Disaccustom, *v. t.* अभ्यासं लुप् c.
Disadvantage, *s.* अहितं, अलाभः, अपकारः, अनर्थः, अनिष्टं, अपायः, हानि *f.*, पीडा, बाधा; 'at a d.' विषमावस्थ *a.*, असमवस्थ *a.* **-ous**, *a.* अहितकर (री *f.*), प्रतिकूल, अहित, अनुपकारक, विरोधिन्, अपायावह, क्षतिकारक. **-ously**, *adv.* अहितं, अनिष्टं, सापकारं.
Disaffect, *v. t.* विरंज् c., अपरागं उत्पद् c., उपजप् 1 P. **-ed**, *a.* वि-अप-रक्त, विप्रिय, असंतुष्ट, अप्रीत, अननुरक्त. **-ion**, *s.* विरागः, असंतोषः, विरक्ति *f.*, अभक्ति *f.*
Disaffirmance, *s.* प्रत्याख्यानं, प्रत्यादेशः, प्रत्यावर्तनं.
Disagree, *v. i.* न संमन् 4 A, विवद् 1 A, भिद् pass., विरुध् pass., असदृशीभू; *See* **Differ**. **-able**, *a.* अनभिमत, अप्रिय, अनिष्ट, अहित, अप्रीतिकर (री *f.*), अरुचिर, अनाह्लादक. **2** विरुद्ध, प्रतिकूल. **-ment**, *s.* विसंवादः, विवादः, भेदः, विप्रतिपत्ति *f.*, विमति *f.*; *See* **Difference**
Disallow, *v. t.* न अनुज्ञा 9 U, निषिध् 1 P, निंद् 1 P **2** प्रत्याख्या 2 P, प्रत्यादिश् 6 P; *See* **Deny**, **-ance**, *s.* प्रत्याख्यानं, निषेधः; निवारणं, निरसनं.
Disanimate, *See* **Discourage**.
Disannul, *See* **Abolish**.
Disappear, *v. i.* अंतर्-तिरः-धा pass., अंतर्-इ 2 P, तिरोभू 1 P, अदृश्य *a.* भू. **2** नश् 4 P, क्षयं-नाशं-या 2 P, प्र वि-ली 4 A, प्र-वि-ध्वंस् 1 A; 'the pigeons having d. ed' चक्षुर्विषयातिक्रांतेषु-नयनपथातीतेषु-अदृष्टिगोचरेषु-कपोतेषु. **-ance**, *s.* अंतधानं, तिरोधानं, अदर्शनं; नाशः, लयः, &c.; better ex. by (*v. i.*).
Disappoint, *v. i.* आशां भंज् 7 P or प्रति-वि-हन् 2 P or विफलीकृ or मोघीकृ 8 U or खंड् 10; विप्रलभ् 1 A; 'he was d. ed in his request' तस्य याच्ञा मोघी बभूव, स

भग्नाशो बभूव; 'd. ed in love' खंडित-प्रणय, खंडित. **-ed**, *a.* भग्नाश, भिन्नाश, भग्नोद्यम, अकृतार्थ, प्रतिहत, मनोहत, प्रतिबद्ध. **-ment**, *s.* आशाभंगः, प्रणयवैफल्यं, विफलीकरणं, नैराश्यं, विप्रलंभः.

Disapprove, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, न प्रशंस् 1 P; not approve q. v. **-Disapprobation**, *s.* निंदा, असंमति *f.*, विरागः, अप्रीति *f.*, विमति *f.*, अनभिनंदनं.

Disarm, *v. t.* अस्त्राणि अपहृ 1 P or अपनी 1 P, निरायुधीकृ 8 U, निःशस्त्रीकृ. **2** (fig.) शम् c. (शमयति), सांत्व् 10. **-ed**, *a.* निरायुध, निःशस्त्र; 'd. of anger' शांतरोष, क्षीणमन्यु.

Disarrange, *v. t.* क्रमं भंज् 7 P, व्यस् 4 U, संक 6 P, संकुलीकृ 8 U. **-ment**, *s.* अक्रमः, क्रमभंगः, व्यस्तता.

Disarray, *v. t.* अपनह् 4 P, उच्छद् 10, विवस्त्रीकृ 8 U. **2** क्रमं भंज् 7 P. **-s.** व्यूहभंगः, पिंजलः, सस्तिपिंजः.

Disaster, *s.* आपद्-विपद् *f.*, व्यसनं, उपप्लवः, विपत्ति *f.*, उपद्रवः, अत्याहितं, अनर्थः. **-v. t.** पीड् 10, बाध् 1 A, उपप्लु 1 P. **-Disastrous**, *a.* विपद्युक्त, दुर्भाग्य, दुरंत, अनर्थावह, दारुण, घोर.

Disavow, **-al**, *See* **Deny, Denial.**

Disband, *v. t.* युद्धव्यापाराद् मुच् 6 P or c. सैन्यभंगं कृ 8 U. **2** मुच्, विमोक्ष् 10. **-v. i.** युद्धव्यापारान् मुच् 6 P.

Disbark, *v. t.* नौकायाः अवतृ c.

Disbelieve, *v. t.* Not believe q. v. **-er**, *s.* नास्तिकः, अविश्वासिन् *m.* **-Disbelief**, *s.* अप्रत्ययः, अविश्वासः.

Disbend, *See* **Relax.**

Disbranch, *v. t.* निःशाखीकृ 8 U, शाखां लू 9 U.

Disburden, *v. t.* भारं अवतृ c. or अपनी 1 P, निर्भार-रिक्तभार *-a.* कृ 8 U; 'd one's mind' मनोगतं अन्यस्मै आख्या 2 P; 'the afflicted should d. their grief' कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3).

Disburse, *v. t.* व्ययम् 10 P (व्यययति), उत्सृज् 6 P, वि-नियुज् 7 A, 10, व्ययीकृ 8 U. **-ment**, *s.* व्ययः, उत्सर्गः, विनियोगः, त्यागः; 'receipt and d.' आयव्ययौ.

Disc, *s.* *See* **Disk.**

Discard, *v. t.* अपास् 4 U, अवधू 5, 9 U, अपक्षिप् 6 P, निराकृ 8 U, अवसृज् 6 P, अपहा 3 P; निःसृ c., अपछद् 6 P.

Discern, *v. t.* वि-विच् 3, 7 P, विचार् c., परिच्छिद् 7 P, निर्णी 1 P, परीक्ष् 1 A. **2** निर्वर्ण् 10, दृश् 1 P, ईक्ष् 1 A, आलोकृ 1 A, 10, आलक्ष् 10, विभू c. **-er**, *s.* विवेचकः, ईक्षितृ *m.* **-ible**, *a.* दृश्य, दृष्टिगोचर, विभाव्य, प्रत्यक्ष. **-ing**, *a.* सूक्ष्मदर्शिन्, दीर्घ-दूर-दृष्टि, विवेकिन्, परिणामदर्शिन्, विचारशील. **-ingly**, *adv.* सविवेकं, सविचारं, सपरिच्छेदं. **-ment**, *s.* विवेकः, विवेचनं, परिच्छेदः, विचारः-रणा, परीक्षा, दूरदृष्टि *f.*, अवबोधः, विज्ञानं.

Discerption, *s.* व्यवच्छेदः, विभेदनं, विदारणं.

Discharge, *v. t.* (A load &c.) भारं अवतृ c. or अपनी 1 P. **2** उद्-गृ 6 P, उदीर् c., प्रमुच् 6 P, उच्चर् 10, उत्सृज् 6 P, प्रक्षु c., उद्वम् 1 P. **3** (Arrow &c.) मुच्, असृ 4 P, विसृज्, क्षिप् 6 P, प्रेष् c. निपत् c.; 'd. a gun' लोहनाडीस्थं आग्नेयं चूर्णं ज्वल् c. 4 (अधिकारात् or पदात्) निःसृ c., अपकृष् 1 P, अवरुह् c. (रोपयति), निष्कास् c., निराकृ 8 U, अपास् 4 U, च्यु c., भ्रंश् c. **5** (Duty) कृ, अनुष्ठा 1 P, विधा 3 U, निष्पद-संपद् c., निर्वह् c., आचर् 1 P. **6** (Debt) (ऋणं) शुध् c., निर्यत् 10, निराकृ, निस्तृ c., विनी, आनृण्यं गम् 1 P. **7** मुच्, मोक्ष् 10, विसृज्. **8** (As a river) अवतृ 1 P, द्रु 1 P; सागरं वर्जयित्वा कुत्र वा महानद्यवतरति (S. 3) 'will d. itself &c.' **-v. i.** मुच् pass.; स्रु 1 P. **-s.** भारावतरणं. **2** उद्गारः, प्रस्रावः, विसर्गः, उद्वमनं, उच्चारणं, उदीरणं. **3** क्षेपणं, मोक्षः. **4** अवरोपणं, अधिकारभ्रंशनं, पदच्युति *f.*-भ्रंशः. **5** अनुष्ठानं, निर्वाहः, विधानं, संपादनं. **6** आनृण्यं, ऋणशोधनं-निस्तारः. **7** मोक्षः, मुक्ति *f.*, मोचनं.

Disciple, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, विद्यार्थिन् *m.*

Discipline, *v. t.* विनी 1 P, शिक्ष् c., शास् 2 P, अधि-इ c. (अध्यापयति). **2** नियम् 1 P, विनियम्, शास्, दंड् 10, दम् c. (दमयति). **3** व्यायम्; अभ्यस् 4 U. **-s.** विनयः, अनुशासनं, शिक्षा-क्षणं, अध्यापनं, अभ्यासः. **2** नियमः, व्यवस्था, विधिः, शासनं, नीति *f.* **3** दंडः, निग्रहः, दमनं, शिष्टि *f.*, विनियमः-मनं; 'military d.' युद्धाभ्यासः, युद्ध-रण-शिक्षा; 'd. in arms' शस्त्राभ्यासः.

Disclaim, **-er**, *See* **Deny, Denier.**

Disclose, *v. t.* विवृ 5 U, प्रकाश् c., व्यंज् 7 P, प्रकटीकृ 8 U, स्पष्टीकृ, भिद् 7 P or c., निविद् c., ख्या c. (ख्यापयति); 'd. ing secrets' रहस्यभेदः. **-ure**, *s.* विवृति *f.*, प्रकाशनं, निवेदनं, भेदः.

Discolour, *v. t.* वर्णांतरं ग्रहु c., कलुषी-मलिनीकृ 8 U, विवर्ण् 10, कृष्णीकृ. **-ation**, *s.* वैवर्ण्यं, कालुष्यं, मालिन्यं.

Discomfit, *v. t.* वि-प्र-द्रवस् c., व्यूहं भंज् or भिद् 7 P (as an army); पराजि 1 A, विद्रु c.; *See* **Defeat, Baffle.** **-ure**, *s.* भंगः, व्यसनं, पराजयः, पराभवः.

Discomfort, *v. t.* पीड् 10, व्यथ् c., बाध् 1 A; *See* **Afflict.** *-s.* अस्वास्थ्यं, दुःखं, पीडा, व्यथा, क्लेशः, बाधा.

Discommend, *See* **Censure.**

Discompose, *v. t.* क्षुभ् c., व्याकुलीकृ 8 U, संभ्रम् c. (भ्रमयति), आकुलीकृ 8 U, बाध् 1 A. **-ed,** *a.* आकुलित, क्षुब्ध, व्याकुल, कातर, व्याकुलाचित्त, अनवस्थित, व्यग्र, भ्रांत, परिप्लव, विक्लवचित्त. **-ure,** *s.* क्षोभः, आकुलत्वं, व्यग्रता, वैक्लव्यं, उद्वेगः, अस्वास्थ्यं, अस्थिरता.

Disconcert, *v. t.* खंड् 10, मोघीकृ 8 U, प्रति-व्या-हन् 2 P; *See* **Baffle.** **2 Discompose,** q. v.

Disconformity, *s.* विरोधः, विरुद्धता, असादृश्यं, असंगति *f.*, विसंवादः, विपरीतापत्ति *f.*

Disconnect, *See* **Separate.** **-ion,** *s.* विश्लेषः, असंगति *f.*, वियोगः.

Disconsolate, *a.* खिन्न, विषण्ण, दीन, उद्विग्न, म्लान; *See* **Dejected.** **-ly,** *adv.* सविषादं, सखेदं, सोद्वेगं.

Discontent, *a.* असंतुष्ट, अतृप्त. *-s.* असंतोषः, अतृप्ति *f.*, अप-वि-रागः, विरक्ति *f.*, अप्रीति *f.* *-v. t.* असंतोषं उत्पद् c. or जन् c.

Discontinue, *v. t.* त्यज् 1 P, विच्छिद् 7 P, विरम् c. (रमयति), निवृत् c., उज्झ् 6 P, विलुप् c. *-v. i.* वि-उप-रम् 1 P, निवृत् 1 A, (with abl.); *See* **Cease.** **-ance, -ation,** *s.* विच्छेदः, विरामः, निवृत्ति *f.*; उपशमः, भंगः, अंतरायः.

Discord, *v. i.* विसंवद् 1 P, विभिद्-न युज्-विरुध् pass. *-s.,* **-ance,** *s.* भेदः, भिन्नता, विसंवादः, मतभेदः, विरोधः, विनति *f.*, वैमत्यं, वैपरीत्यं, वैलक्षण्यं; 'd. of sound' स्वरविरोधः, अपस्वरः. **-ant,** *a.* विषम, प्रतिकूल, विरुद्ध, विसंवादिन्, परस्परविरुद्ध, विभिन्न, असंगत, विपरीत; 'd. sound' विस्वरः, अपस्वरः, कर्कशध्वनिः.

Discount, *v. t.* भागं उद्-हृ 1 P. *-s.* उद्धारः, उद्धृतभागः.

Discountenance, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A.

Discourage, *v. t.* उत्साहभंगं कृ 8U, अव-विसद् c., विषादं जन् c., विषण्णीकृ, धैर्यं ध्वंस् c., मनः or आशाः भंज् 7 P. **2 Deter,** q.v. **-ed,** *a.* भग्नोत्साह, हताश, भग्नोद्यम, विषण्ण, अवसन्न, खिन्न. निरुत्साह, मनोहत, प्रतिबद्ध, भग्नाश, धैर्यच्युत, स्खलित धैर्य. **-ing,** *a.* विषादजनक, धैर्यध्वंसिन्. **-ment,** *s.* धैर्यध्वंसः, उत्साहभंगः, आशा-उद्यम-भंगः; विषादः, अवसादः, खिन्नता, धैर्य-च्युति *f.* स्खलनं.

Discourse, *v. i.* संवद् 1 P, संभाष् 1 A, समालप् 1 P. **2** भाष् 1 A, वद्-गद् 1 P, आधिकृत्य वच् 2 P. *-s.* संवादः, संभाषणं, संकथा, संलापः. **2** वचनं, भाषणं, उक्ति *f.*, वचस् *n.*; *See* **Converse.** **-ation.** **-er,** *s.* वादिन् *m.* वक्तृ *m.* **-ive,** *a.* तार्किक (की *f.*), ऊहिन्, तर्कविषय.

Discourteous, *a.* असभ्य, अशिष्ट, अविनीत, दुःशील, अनार्य. **-ness, -Discourtesy,** *s.* अविनयः, अनार्यता, असभ्यता, मर्यादातिक्रमः, अशिष्टाचारः.

Discover, *v. t.* विद् 5 U, दृश् c., प्रकाश् c., आविष्कृ 8 U, स्पष्टीकृ, व्यक्तीकृ, प्रकटीकृ, व्यंज् 7 P, ज्ञा c. (ज्ञापयति), आनि-विद् c. **2** निरूप् 10, ज्ञा 9 U, उपलभ् 1 A, निर्णी 1 P. **3** समा-आ-भद् c., प्राप् 5 P, विद् 6 U, दृश् 1 P, अधिगम् 1 P, इ-या 2 P. **-er,** *s.* निर्णेतृ-अधिगंतृ *m.*, निरूपकः. **-y,** *s.* प्रकाशनं, विवरणं. **2** ज्ञानं, अवगमः, दर्शनं, निर्णयः, उपलब्धि *f.*, समासादनं, निरूपणं, प्राप्ति *f.*

Discredit, *v. t.* न विश्वस् 2 P. न प्रति-इ 2 P, अविश्वास्य *a.* मन् 4 A, प्रामाण्यं लघ्-यति (D.). **2** कलंकयति (D.), अकीर्तिं आवह् 1 P, दुष् c. (दूषयति), मलिनीकृ 8 U, मलिनयति (D.). *-s.* अपयशस् *n.*, अपकीर्ति *f.*, दूषणं, कलंकः, अप्रतिष्ठा, अकीर्ति *f.*; 'bring d. on' दुष् c. मलिनयति; (यदा मेधाविनी शिष्योपदेशं मलिनयति M. 1). **-able,** *a.* अकीर्तिकर-अयशस्कर (री *f.*), गर्हित, कलंककर, दूषणीय, गर्ह्य, निंद्य.

Discreet, *a.* समीक्ष्य-विमृश्य-कारिन्, विचक्षण, स्ववहित, विचारशील, सावधान, क्षीर्घ-दूर-दृष्टि. **2** (Of acts.) साधु, श्रेयस्. **-ly,** *adv.* विमृश्य, समीक्ष्य, विचार्य. **-Discretion,** *s.* विवेकः, विमृश्यकारित्वं, समीक्षणं, विचक्षणता, विचारः, विज्ञता. **2** स्वातंत्र्यं, स्वाधीनता, 'having reached the years of d.' प्राप्तव्यवहारवृश. **3** विकल्पः, कामः, रुचि *f.*, छंदः; 'at d.' विना संशयेन; 'this matter is left to your d.' यथा भवानुचितं मन्यते तथा क्रियतां; स्वरुच्या-कामतः-वर्ततां भवान्; 'at one's own d.' स्वच्छंदं, स्वेच्छया, स्वरुच्या, कामतः. **-ally,** *adv.* स्वेच्छानुसारेण, यथाकामं. **-ary,** *a.* स्वाधीन, वैकल्पिक-यादृच्छिक (की *f.*), स्वेच्छानुवर्तिन्.

Discrepant, *a.* विभिन्न, विरुद्ध, विपरीत, अवि-संगत, विसंवादिन्, विरोधिन्, प्रतिकूल. **-Discrepance, -cy,** *s.* विभेदः, विरोधः, विप्रतिपत्ति *f.*, असंगति *f.*, विसंवादः, वैलक्षण्यं, वैपरीत्यं.

Discrete, *a.* विभिन्न, विविक्त. **2** अवधारणार्थक.

Discriminate, *v. t.* वि-विच् 3, 7 P, विशिष् 7 P or c., परिच्छिद् 7 P, विज्ञा 9 U, विज् 3 U, विचर् c. **2** लक्ष् 10, परीक्ष् 1 A, सं-अव-ईक्ष्. **-ion,** *s.*

विवेकः, परिच्छेदः, विज्ञानं, विचारणं-णा; विशेषः, अवधारणा : 'd. of proper and improper' पात्रापात्रविचारणा ; 'd. of right and wrong' सदसद्विवेकः. -ing, -ive, *a.* विशेषज्ञ, गुणदोषविद्, विवेकिन्, परिच्छेदक.

Discursive, *a.* नानाविषय, अनेकप्रसंग; अस्थिर, चंचल, अनवस्थित. 2 तार्किक (की *f.*), ऊहिन्.

Discus, *s.* चक्रं.

Discuss, *v. t.* विचर् c., पर्यालोच् 10, वितर्क् 1, निरूप् 10, परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, 'd. in detail at length, exhaustively' प्रपंचयति (ना.). प्रपंचं कृ 8 U, सविस्तरं-विस्तरेण-चण् 10. -*v. i.* विवद् 1 A, वादे व्यापृ 6 A. -ion, *s.* विचारः-णा, वितर्कः, परीक्षा, निरूपण, विमर्शः, व.द-विवादः, पर्यालोचनं ; 'to turn to the subject under d.' प्रकृत-प्रस्तुत-अनुस् 1 P or अनुवृत् 1 A or अनुसंधा; 'subject under d.' प्रस्तावः, प्रस्तुत-प्रकृत-विषयः, प्रस्तुतं, प्रकृतं; 'result of d.' मथितार्थः.

Discussive, Discutient, *a.* शोधन (ही *f.*), शोधवृत्, दुष्टधातुनाशक.

Disdain, *v. t.* अवमन् 4 A, अवज्ञा 9 U, अवगण् 10, तिरस्कृ 8 U; *See* **Contemn.** -*s.* औद्धत्यं, सावज्ञावलेपः, अवमानः ननादरः, अवहेलना; *See* **Contempt.** -ful, *a.* सावज्ञ, सावलेप, अवमानिन्; उद्धत, अवलिप्त, सावमान.

Disease, *s.* रोगः, गदः, व्याधि *m.*, आमयः, उपतापः, रुजा, रुज् *f.*, विकारः, पीडा, क्लेशः, अस्वास्थ्यं.-*v. t.* रोगेण व्यध् c. or पीड् 10 or क्लिश् 9 P. -ed, *a.* व्याधिग्रस्त. रोगोपसृष्ट, रोगार्त, सरोग, सरुज, सामय, आतुर, विकृत, अस्वस्थ.

Disembark, *v. i.* पोतात्-नौकायाः अवतृ 1 P, or अव-रुह् 1 P. -*v. t.* अवतृ-रुह् c. -ation, *s.* अवरोहणं, उत्तरणं.

Disedge, *See* **Blunt.**

Disembarrass, *See* **Clear.**

Disembitter, *v. t.* तिक्तत्वं-कटुत्वं-अपनी 1 P, मधुरीकृ 8 U, सुरस *a.* कृ.

Disembody, *v. t.* *See* **Disband.** 2 देह-बंधान्मुच् c. -ed, *a.* अशरीर, देहहीन, कायहीन, and sim. comps.

Disembogue, *v. i.* निर्गम्-निस् 1 P, समुद्रं अवतृ 1 P or प्रविश् 6 P or प्रस्रु-द्र 1 P (of a river.). -*v. t.* सलिलं सागरे निर्गम् c., &c.

Disemploy, *See* **Discharge.**

Disenable, *See* **Disable.**

Disembroil, *v. t.* उद्वेगात्-संभ्रमाद्-मुच् c. or उद्वह् 1 P.

Disenchant, *v. t.* प्रतिकृ 8 U, मंत्रवशाद् उद्वह् 1 P

Disencumber, *v. t.* प्रतिधान् अपनी 1 P or अपवह् 6 P, निर्विघ्नीकृ 8 U, निष्प्रत्यूह *a.* कृ.

Disengage, *v. t.* विसृज् 7 A, 10, विश्लिष् c. 2 मुच् 6 P or c., मोक्ष् 10 उद्-वह् 1 P; 'd. the mind' मनो निवृत् c. -*v. i.* मुच्यते, निवृत् 1 A, विश्रम् 1 P. आत्मानं निवृत् c. -ed, *a.* मुक्त, उद्धत, उत्तीर्ण. 2 लब्धक्षण, प्रस्तावकाल, प्रस्तावसर, अव्यापृत, कार्यरहित-शून्य, कार्यविरत, निर्व्यापार. -ment, *s.* मोक्षणं, &c. 2 अवसरः, क्षणः; अवकाशः.

Disentangle, *v. t.* Disengage, q. v. 2 विसृज् 7 A, 10, विश्लिष्.

Disenthral, *v. t.* दास्यात् मुच् 6 P, or c. or मोक्ष् 10.

Disentrance, *s* मूर्च्छानात्प्रबुध् c.

Disesteem, *v. t.* अवमन् 4 A, अवज्ञा 9 U; *See* **Contemn.** -*s.* अनादरः, अवमानः, अवज्ञा, उपेक्षा.

Disfavour, *v. t.* न अनुग्रह् 9 P, न उपकृ 8 U, न अनुमुद् 1 A. -*s.* अकृपा, अननुग्रहः, अप्रसादः, अनुपकारः, पराङ्मुखता, विरक्तिः *f.*, अप्रीतिः *f.*, असंतोषः.

Disfigure, *v. t.* विरूप् 10, विरूपीकृ 8 U, विकृ 8 U, व्यंगयति (D.), विकलीकृ, विप्रकृ c., (रूपं प्रसाधनैर्विप्रकारयते S. 4). -ed, *a.* वि-कु-अप-रूप, विकृताकार, विकृत, व्यंग (गी *f.*). -ment, *s.* विरूपता, वकलर्य, व्यंगता, विप्रकारः.

Disfranchise, *v. t.* पारत्वं-पौराधिकारं-ह 1 P or विलुप् c.

Disgorge, *v. t.* उद्-गृ 6 P, उद्वम् 1 P, विच्छर्द् 10 -ment, *s.* उद्गारः, उद्वमनं, वमथुः, प्रच्छर्दिका.

Disgrace, *s.* अपमानः, अव-वि-माननं, परि-अभि-भवः, निकृतिः *f.*, अ-अप-कीर्तिः *f.*, अ-अप यशस् *n.*, कलंकः, दूषणं. 2 कलंकास्पदं, अवमानहेतुः 'a d. to the family' कुलांगारः, कुलपांसुलः. -*v. t.* अप-अव-मन् c., कलंकयति (D.), अकीर्ति-अयशः-कृ; परि-अभि-भू 1 P, दुष् c. (दूषयति); गर्ह् 1, 10 A, सावज्ञं निर्भर्त्स् 10 A. 2 Degrade, q. v. -ful, *a.* अयशस्कर (री *f.*), कलंककर (री *f.*); गर्हित, अपमानहेतुक; लज्जाकर (री *f.*), अवमानजनक; निंद्य, दूषणीय. -fully, *adv.* गर्हितं; लज्जाकरं, सापमानं. -lous, *a.* अप्रसन्न, अननुकूल.

Disguise, *v. t.* कपटवेशेन-वेशांतरेण-गुह् 1 U or आच्छद् 10, 'd. ed as' वेष-रूप-धारिन् in comp.; 'd. ed as ascetics' तपस्विव्यंजनोपेताः, तापसच्छद्मना, तापसरूपधारिणः, &c. 2 (Oneself) वेषांतरं-वेषपरिवर्तनं कृ 8 U

or विधा 3 U, अन्यवेषं परिधा 3 U, वेषं परिवृत् c.; 'd. ing himself differently' वेषांतरं विधाय, परिहितान्यवेषः; 'd. ed himself with a lion's skin सिंहमर्चपरिच्छन्नः बभूव. **2** अप-नि-हु 2A, गुप् 1P,10, गुह्; *See* **Conceal.** **-s.** कपट-छद्म-वेषः, वेषांतरं, आकारगोपनं; विडंबनं, अभिनयः. **2** छद्मन् *n.*, छलं, व्याजः; अप-व्यप-देशः, लक्षं. **-ed,** *a.* कपट-छद्म-वेषिन्, कपटवेष, कपटरूप; रूपवेष, &c., in comp.; 'd. praise' व्याजस्तुति *f.*

Disgust, *v. t.* उद्वेग-निर्वेद-उत्पद् c., अरुचिमुत्पद् c., उद्विज् c.; निर्विद् c. **-s.** जुगुप्सा, उद्वेगः, घृणा, निर्वेदः; अरुचि *f.*, विरक्ति *f.*, बीभत्सं; 'in d.' सनिर्वेदं **-ing, -ful,** *a.* बीभत्स, अरुचिर, कुत्सित, गर्ह्य, उद्वेगकर (री *f.*), जुगुप्सावह; 'to be d ed with' उद्विज् 6 A (with abl.); निर्विद् pass., निर्विण्ण *a.* भू (with instr.), बध्-desid. (बीभत्सते) (with abl.).

Dish, *s.* शरावः, पात्रं, भाजनं. **2** भोजनं; आहारविशेषः.

Dishabille, *a.* विवस्त्र, कुचेल, अकृताभरण. **-s.** लघुवासस् *n.*

Dishearten, *See* **Discourage.**

Dishevel, *v. t.* प्र-वि-कॄ 6 P, स्रंस् 1 A. **-ed,** *a.* प्र-वि-कीर्ण, पर्याकुल, स्रस्त; 'having d. hair' मुक्त-स्रस्त-केश.

Dishonest, *a.* अशुचि, असरल, अऋजु, सव्याज, जिह्म, कुटिल, कापटिक (की *f.*), छाद्मिक (की *f.*), शठ, धूर्त, सव्यलीक; 'a d. woman' असती, भ्रष्टा, व्यभिचारिणी. **-ly,** *adv.* अन्यायेन, कपटेन, कुटिल, धूर्ततया, सव्याजं, छलेन. **-y,** *s.* अशुचित्वं, कापट्यं, कौटिल्यं, माया, &c.

Dishonour, *v. t.* **Disgrace,** q. v. **2** अवमन् 4 A, अवज्ञा 9 U, अवधीर् 10, अनादृ 6 A; *See* **Contemn;** 'd. a maiden' दुष् c. (दूषयति), सतीत्वाद् भ्रंश् c. **-s.** अपमानः, अनादरः, अयशस् *n.*, अकीर्ति *f.*, कलंकः, अपतिष्ठा. **-able,** *a.* अनार्य, कलंककर (री *f.*); *See* **Disgraceful.**

Dishumour, *s.* स्वभाववक्रता, वक्रशीलता, प्रकृतिकर्कशत्वं, प्रतीपता.

Disillusion, *v. t.* मोहं or भ्रमं निरस् 4 P.

Disincline, *v. t.* विरंज् c., विरागं जन् c.; or उत्पद् c. **-ation,** *s.* अस्पृहा, निरीहत्वं, विरागः, विरक्ति *f.*, द्वेषः, अनीहा, विमुखता, अनिच्छा, अरुचि *f.*, अप्रीति *f.* **-ed,** *a.* विरक्त, वि-पराङ्-मुख (खी *f.*), अनिच्छु, निरीह, निःस्पृह.

Disinfect, *v. t.* शुष् 4 P, निर्दोषं कृ 8 U. **-ant,** *a.* विषघ्न.

Disingenuous, *a.* अनुदार, अदक्षिण, असरल; *See* **Dishonest.**

Disinherit, Disherit, *v. t.* रिक्थाधिकाराद् भ्रंश् c., पैतृकं धनं लुप् c. **-ed,** *a.* अनधिकार, पैतृकधनहीन. **-ing,** *s.* पैतृकरिक्थच्छेदः-लोपः.

Disintegrate, *v. t.* वियुज् 10, संहतिं भिद् 7 P, विश्लिष् c.; *See* **Separate.** **-ion,** *s.* वियोगः, विश्लेषः, संहतिभेदः.

Disinter, *v. t.* (शव) उत्खन् 1 P.

Disinterested, *a.* निःस्पृह, उदासीन, निर्मम, निष्काम, मुक्तसंग, निःसंग, अपक्षपातिन्, निरीह, आत्महितनिरपेक्ष, निष्कारण; 'a d. friend' निष्कारणो बंधुः. **-ly,** *adv.* निर्मम, स्वार्थनिरपेक्षं, निःस्पृहं. **-ness,** *s.* निरीहता, निःसंगता.

Disjoin, Disjoint, *v.* *See* **Separate.** **2** (Disjoint) विसंधा 3 U, संधिं भंज् 7 P, or त्रुट् c. **3** व्यवच्छिद् 7 P, अवकृत् 6 P. **-ed,** *a.* असंश्लिष्ट, असंहत, असंगत, असंबद्ध, अनन्वित, असंलग्न.

Disjunct, *a.* वियुक्त, विश्लिष्ट, असंलग्न, विभिन्न. **-ion,** *s.* वियोगः; विश्लेषः, विभेदः, असंगतता, असंधानं. **-ive,** *a.* वियोगिन्.

Disk. *s.* बिंबं, मंडलं, परिवेषः, परिधिः. **2** चक्रं.

Dislike, *s.* अरुचि *f.*, विरागः, विरक्ति *f.*, विमुखता, द्वेषः; *See* **Dis'nclination.** **-v.t.** द्विष् 2 U, विरज् pass. (with loc.), न रुच् 1 A, न अभिनंद् 1 P, न हृष् 6 P. **-ed,** *a.* अप्रिय, अनिष्ट, विद्विष्ट, अनीप्सित.

Disliken, *v. t.* असमीकृ 8 U, अतुल्यीकृ.

Dislocate, *v. t.* संधेः चल् c. or च्यु c., संधिं त्रुट् c. or भंज् 7 P, विसंधा 3 U. **-ion,** *s.* संधित्रोटनं, संधिभंगः, विसंधानं, संधिच्युति *f.*

Dislodge, *v. t.* अप-निः-सृ c., निरस् 4 P, निष्कस् c.; *See* **Drive.** **2** वि-प्र-वस् c., निर्वस् c., गृहाद्बहिष्कृ 8 U. **-v. i.** अपसृ 1 P, स्थानांतरं गम् 1 P, स्थानांतरे निविश् 6 P.

Disloyal, *a.* भक्तिहीन, राजद्रोहिन, राजापथ्यकारिन्, अराजनिष्ठ, अप-वि-रक्त, असंतुष्ट. **-ly,** *adv.* भक्तिहीनतया, राजद्रोहेण, अपरागेण. **-ty,** *s.* राजद्रोहः, अभक्ति *f.*, अप-वि-रागः, राजापथ्यकारिता, असंतोषः.

Dismal, *a.* उदासीन, अप्रसन्न, सशोक, सखेद, निरानंद, निरुल्लास. **2** उग्र, दारुण, घोर, रौद्र (द्री *f.*), भैरव (वी *f.*), भयप्रद, भयानक. **-ly,** *adv.* उग्रं, भयानकं. **-ness,** *s.* दारुणता, उग्रता; औदासीन्यं.

Dismantle, *v. t.* वस्त्रं अपहृ 1 P, विवस्त्रीकृ 8 U. **2** उपकरणादिकं हृ, उपस्करादिं अपनी 1 P.

Dismask, *v. t.* कपटवेशं अवतॄ c.

Dismast, *v. t.* कूपकं भंज् 7 P.

Dismay, *s.* सं-त्रासः, साध्वसं, भयं, भीति *f.*, उद्वेगः, सविस्मयः त्रासः, आकुलत्वं, कातर्यं; 'filled with d.' पर्याकुलः, संभ्रांतचित्त,

-*v. t.* संत्रस् c., विस्मर्यं-साध्वसं उत्पद् c., भयेन उपहन् 2 P, उद्विज् c.; *See* **Daunt.**

Dismember, *v. t.* अंगानि विघट् c.(घटयति) or पृथक् कृ 8 U, अवयवशः छिद् 7 P; विभज् 1 U, विश्लिष् c., वियुज् 7 A, 10. **-ment,** *s.* अंगव्यवच्छेदः, अवयवशः विभागः, विश्लेषः; भंगः.

Dismiss, *v. t.* विसृज् 6 P or c., प्रस्था c. (स्थापयति), संप्रेष् c., गंतुं अनुज्ञा 9 U or आदिश् 6 P. **2** (From office &c.) अधिकारात्-पदात् च्यु c. or भ्रंश् c. or अवरुह् c., *See* **Discharge;** 'd. ed from office' अधिकारच्युत-भ्रष्ट, भ्रष्टाधिकार. **3** अपास् 4 P, हा 3 P, उत्सृज्, अपनी 1 P, अपनुद् 6 P, त्यज् 1 P, दूरीकृ 8 U, निरा-अपा-कृ, मुच् 6 P; 'd. all anxiety' सर्वथा वीतचिंतो भव, औत्सुक्यमपाकुरु. **4** प्रत्याख्या 2 P, प्रत्यादिश् 6 P. **-ion, -al,** *s.* प्रस्थापनं, विसर्जनं. **2** पदाद् अवरोपणं; अधिकारभ्रंशः-च्युति *f.*, पदहानि *f.* **3** निराकरणं; प्रत्यादेशः, त्यागः, &c.

Dismount, *v. i.* (अश्वात्-अश्वपृष्ठात्) अवतृ-अवरुह् 1 P.-*v. t.* Causal of roots above.

Disobey, *v. t.* (Orders) भंज् 7 P, उल्लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P; प्रतीपं गम् 1 P, न अनुष्ठा 1 P, न अनुवृत् 1 A, न अनुरुध् 4 A; (persons) आज्ञां भंज्, &c.; 'he was never d. ed' तस्याज्ञा कदापि नोल्लंघिता, &c. **-Disobedience,** *s.* आज्ञाभंगः, आज्ञालंघनं, शासनव्यतिक्रमः, अननुष्ठानं, प्रतीपाचरणं, अननुरोधः. **-Disobedient,** *a.* प्रतीपाचार, निदेशलंघिन्, अविधायिन्, अननुवर्तिन्, अवश, प्रतीप; not 'obedient' q. v.

Disoblige, *v. t.* अप्रियं आचर् 1 P, अपराध् 4, 5 P (with gen. or loc.), असंतोषं उत्पद् c., प्रतिकूलं-विप्रियं आचर् or अनुष्ठा 1 P. **-ation,** अप्रियं, अपराधः, विप्रियं. **-ing,** *a.* अननुरोधिन्, अननुकूल, असंतोषकर (री *f.*).

Disorder, *s.* आकुलत्वं, तुमुलं, विप्लवः, वैक्लव्यं, संभ्रमः, पर्याकुलता. **2** अक्रमः, क्रमभंगः, अव्यवस्था, व्यस्तता, संकरः, संक्षोभः, व्यतिक्रमः. **3** रोगः, पीडा, व्याधिः, आमयः, अस्वास्थ्यं; 'd. of the stomach' जठरामयः, अन्नविकारः; 'd. in the army' ससुत्पिंजः, पिंजलः, अत्यंतमाकुलं. -*v. t.* आकुलीकृ 8 U, व्यस् 4 U, व्यासुह् c., संभ्रम् c. (भ्रमयति). **2** पर्यस्, संक्षुभ् c., क्रमं भंज् 7 P, संकरीकृ 8 U, संकुलीकृ. **3** पीडू 10, व्यथ् c., अस्वस्थ *a.* कृ. **-ed,** *a.* विपर्यस्त, भग्नक्रम, व्यस्त, व्यत्यस्त, संकुल, संकीर्ण, अव्यवस्थित; 'd. in mind' आकुल, संभ्रांत, व्यग्रमूढ-चित्त. **2** अस्वस्थ, पीडित, आतुर, व्याधियुक्तष्ट, रुग्ण, रुजार्त. **-ly,** *a.* अव्यवस्थित, *See* above. **2** अनवस्थित, नियमविरुद्ध, अवश, अनियत, उद्दाम, उच्छृंखल, अविधेय. -*adv.* अक्रमं, क्रमभंगेन; ससंभ्रमं. **2** अविधितः, विधि-नियम-विरुद्धं.

Disorganize, *See* **Disorder.**

Disown, *v. t.* प्रत्याख्या 2 P, प्रत्याचक्ष् 2 A; *See* **Deny.**

Disparage, *v. t.* परिभू 1 P, उपेक्ष् 1 A, अपकृष् 1 P, अवज्ञा 9 U; *See* **Contemn.** **2** मूल्यं न्यूनीकृ 8 U, अवमन् 4 A, लघूकृ, अपलप् 1 P; *See* **Depreciate.** **3** अयोग्यविवाहे संबंध् 9 P. अयोग्यसंयोगेन अपकृष्. **-ment,** *s.* अवज्ञा, तिरस्कारः, अवमानना परिभवः, उपेक्षा; अभ्यसूया, परिवादः, गुणापकर्षः, गुणापलापः. **2** अयोग्यसंबंधः. **-er,** *s.* निंदकः, अवमानिन् *m.*

Disparity, *s.* असाम्यं, विषमता, वैषम्यं, भेदः, असमानता, असंगतता, असंगतिः *f.*

Dispart, *v. t.* विभज् 1 U, द्विधा भिद् 7 P, वियुज् 7 A, 10.

Dispassion, *s.* विरागः, प्रशांतिः *f.*, अक्रोधः; निरीहता, औदासीन्यं, निःसंगता. **-ate,** *a.* वीतराग, शांत, असंभ्रांत, उदासीन, अक्रोधन, निरीह, निःसंग, विरक्त, मुक्तसंग, समचित्त, अपक्षपातिन्. **-ately,** *adv.* शांतचेतसा, समबुद्ध्या, असंभ्रमं, अपक्षपातेन.

Dispatch, *See* **Despatch.**

Dispel, *v. t.* अप-परा-नुद् 6 P, निर्-अप-अस् 4 U, निराकृ 8 U, प्रति-अप-निः-सृ c., अपनी 1 P, अप-ऊह् 1 U, अपाकृ, उच्छिद् 7 P, हृ 1 P, नशू c., विभिद् 7 P, वि-प्र-ध्वंस् c., अव-उत्-सद् c., हन् 2 P, (gen. in comps).

Dispensary, *s.* औषधशाला, रोगचिकित्सास्थानं.

Dispense, *v. t.* विधा 3 U, प्रणी 1 P, निर्वह् c., प्रवृत् c.; 'd. er of laws' राजशासनानां प्रवर्तयिता. **2** विभज् 1 U, पृथक् पृथग् विन्यस् 4 U, or विधा or वितृ 1 P, परिकॢप् c. **3** (with) Ex. by न कार्यं or न प्रयोजनं; 'I d. with your services' तव सेवया न मे किमपि कार्यं-प्रयोजनं; उपेक्ष् 1 A, त्यज् 1 P, अवसृज् 6 P. **-ation,** *s.* विभजनं, विभागः, प्रणयनं, वितरणं, भागकल्पनं, परिकल्पनं. **2** व्यवस्थाभंगानुज्ञा, नियमलंघनानुमतिः *f.* **3** ईश्वरस्य नरेण संव्यवहारः. **-ator,** *s.* विभजकः, विभागकल्पकः. **-er,** *s.* प्रवर्तकः, प्रणेता, निर्वाहकः.

Dispeople, *v. t.* निर्जनीकृ 8 U.

Disperse, *v. t.* अप-वि-कृ 6 P, विक्षिप् 6 P, इतस्ततः विद् c. or गम् c.; वि-प्र-सृ c., पर्यस् 4 U, दिशि दिशि गम् c.; *See* **Dispel.** -*v. i.* अप-सृ 1 U or विद् 1 P; *See* **Break up.** **-er,** *s.* विद्रावयितृ *m.*, उच्छेदकः; अपहः, नाशकः, हरः, in comp. **-ion,**

s. विद्रावणं, विक्षेपः, विकिरणं.

Disspirit, *See* **Discourage.**

Displace, *v. t.* (स्वस्थानात्) विचल् c., अप-निः-सृ c., निरस् 4 U, भ्रंश् c., च्यु c., निराकृ 8 U, अपास्. **2 Discharge,** q. v. **-ment,** *s.* स्थाननाशः-भ्रंशः, स्वस्थानात्-चलनं-च्युति *f.*

Displant, *v. t.* उन्मूल् 10, उच्छिद् 7 P, उत्पद् 10. **2** निर्वस् c., स्थानाद् भ्रंश् c. or निरस् 4 U.

Display, *v. t.* दृश् c., प्रकाश् c., व्यंज् 7 P, विवृ 5 U, आविष्कृ 8 U, प्रकटीकृ, स्फुटीकृ. **2** वितन् 8 U, विस्तृ c., प्रसृ c., विकस् c., विलस् c.; 'd. itself उद्-वि-जृंभ् 1 A. **-s.** उद्भासः, विकासः, प्रकाशनं, दर्शनं, व्यक्ति *f.*, विवरणं, आविष्करणं, विजृंभणं, विजृंभितं, विलासः, विलसितं; 'd. of genius' मतिविलासः; 'd. of ignorance' अज्ञानविजृंभित.

Displease, *v. t.* विप्रियं-अनिष्टं-कृ 8 U, असंतोषं-क्रोपं-जन् c., प्रतिकूलं आचर् 1 P, कुप् c., रुष् c., अपराध् 4, 5 P (with gen. or loc.), वि-अप-रंज् c. **-ed,** *a.* असंतुष्ट, जातामर्ष, कृतरोष, अप्रसन्न, रुष्ट, कुपित, अप-वि-रक्त. **-ing,** *a.* अप्रिय, असंतोषजनक, कोपावह. **-ure,** *s.* असंतोषः, क्रोधः, अप्रसादः, अप-वि-रागः. *See* **Anger.**

Displode, *See* **Explode.**

Displume, *v. t.* पक्षान् उद्-हृ 1 P or उत्पद् 10.

Disport, *v. See* **Amuse, Play.** *-s.* विहारः, क्रीडा, केलि *f.*, विलासः.

Dispose, *v. t.* विन्यस् 4 U, रच् 10, संविधा 3 U, विनियुज् 7 A, 10, व्यूह् 1 U, क्रमेण स्था c. (स्थापयति). **2** विनि-प्र-युज्, निक्षिप् 6 P, दा 3 P, विधृ 1 P. **3** प्र-उप-कल्प् c. **4** प्रवृत् c., प्रयुज् 10, प्रोत्सह् c. **-of,** विनि-उप-प्र-युज्; 'how have you d. ed of my money' मम द्रव्यस्य कथं त्वया विनियोगः कृतः; 'd. of goods' विक्री 9 A; 'd. of time' क्षे c. (क्षपयति), नी 1 P, या c.; 'd of a girl' (विवाहे) दा, वितृ, प्रतिपद् c. **2** (Perform) समाप् c., अवसो 4 P. **-al,** *s.* विन्यासः, रचना, व्यवस्थापनं, परिपाटि-टी *f.* **2** विनियमः. **3** समर्पणं, वितरणं, विनियोगः, परिकल्पनं, प्रविभागः. **4** अधिकारः, वशः-र्शं, अधीनता, आयत्तता; 'I am at your d.' अहं त्वदधीनोस्मि; 'this matter is at your d.' अयमर्थस्त्वदायत्तः, अत्र भवान् प्रभवति; 'divine d.' परमेश्वरेच्छा, नियतिः. **-ed,** *a.* विन्यस्त, व्यवस्थित, रचित. **2** (Inclined) ex. by शील in comp., or काम with inf.; 'd. to quarrel' कलहशील, कलहकाम; 'd. to fall' पातुक, पतयालु; 'd. to go' गंतुकाम; 'well-d.' सुस्वभाव, स्निग्ध, सस्नेह. **-er,** *s.* प्रदातृ *m.*, विनियोक्तृ *m.* **2** विनियंतृ *m.*; अधिष्ठातृ *m.*, शासितृ *m.* **-ition,** *s.* **Disposal,** q. v. **2** भावः, स्वभावः, शीलः-लं, प्रकृति *f.*; 'good d.' सद्भावः, साधुशीलत्वं, सौजन्यं, सुशीलं. **3** प्रवृत्ति *f.*, प्रवणता, शीलता-आलुता in comp. **-ure,** *s.* अधिकारः, शक्ति *f.*, विनियोगसामर्थ्यं. **2** अवस्थानं.

Dispossess, *v. t.* अधिकारात्-स्वत्वाद्-भ्रंश् c. or निराकृ 8 U, स्वत्वं हृ 1 P; 'd. ed of one's right' हृताधिकार, अधिकारभ्रष्ट.

Dispraise, *See* **Censure.**

Dispread, *v. t.* नानादिक्षु विधृ c., बहुधा वि-क्षिप् 6 P.

Disproportion, *s.* वैषम्यं, असमता, अननुरूपता, असंगतता, अयोग्यता. **-v. t.** अयुक्तं संधा 9 P or संयुज् 7 U, 10. **-ed, -ate,** *a.* विषम, अननुरूप, असम, अयोग्य, अतुल्यगुण, अतुल्य, अनुपयुक्त, असंगत, असंवादिन्, **-ately,** *adv.* अननुरूपं, असमं, अयुक्तं. **-ateness,** *s.* वैषम्यं; *See* (*s.*)

Disprove, *v. t.* प्रत्याख्या 2 P, निराकृ 8 U, निरस् 4 U, खंड् 10, बाध् 1 A; *See* **Confute. -Disproof,** *s.* खंडनं, निरसनं, बाधः-धा, निराकरणं, प्रत्याख्यानं. **2** अनिर्णयः, अनिश्चयः, अप्रमाणं.

Dispute, *v.* विवद् 1 A, कलहायते (D.), विप्रतिपद् 4 A, विप्रलप् 1 P, वितर्क् 10; 'what are you d. ing about' किमर्थं विवदध्वे, किं वः विवादवस्तु. **2** विचर् c.; गुरोराज्ञा अविचार्या 'not to be d. ed' विकृप् c. **-s.** विवादः, कलहः, वादः; विप्रलापः, विप्रतिपत्ति *f.*, वितर्कः, वाग्युद्धं, वादयुद्धं, वितंडा; 'subject under d.' विवादवस्तु, विवादास्पदं; 'it is a d. ed point' वादग्रस्तोर्थः. **-ant, -er,** *s.* तर्किन् *m.*, विवादिन् *m.*, हेतुवादिन् *m.*, नैयायिकः; तार्किकः; 'a d. might ask' ex. by ननु (followed by अत्रोच्यते or उच्यते) or अत्र कश्चित् प्रत्यवतिष्ठेत. **-ation,** *s.* वादः, तर्कः; *See* (*s.*). **-atious,** *a.* कलहशील, वादप्रिय, विवादार्थिन्, कलहप्रिय-काम.

Disqualify, *v. t.* अक्षम-अयोग्य *a.* कृ 8 U, अपात्रीकृ. **-ication,** *s.* निर्गुणः, प्रत्यूहः, अपात्रता, अक्षमता.

Disquiet, *v t.* आकुलीकृ 8 U, बाधृ 1 A, संपीड् 10, क्षुभ् c., उद्विज् c., मुह् c. **-s. -ness, -ude,** *s.* चिंता, उद्वेगः, आकुलत्वं, व्यग्रता, संभ्रमः, बाधा, औत्सुक्यं, वैक्लव्यं, क्षोभः, व्यामोहः, अनिर्वृति *f.* **-ed,** *a.* उद्विग्न, अनिर्वृत, क्षुब्ध, आकुल, व्यग्र, मूढ, संभ्रांत.

Disquisition, *s.* विचारः, परीक्षा, विवेचनं, विमर्शः, निरूपणं.

Disregard, *v. t.* उपेक्ष् 1 A, अवधीर् 10, अवज्ञा 9 U, अवमन् 4 A, अवगण् 10, तिर-

स्कृ 8 U, धिक्कृ, न श्रु 5 P, न आदृ 6 A, न अपेक्ष् 1 A. -s. उपेक्षा, अनादरः, अवधीरणा, अवज्ञा, अनपेक्षा, अनवधानं, निरपेक्षता. -ful, a. निरपेक्ष, अनवधान, मंदादर, उपेक्षक, अवमानिन्. -fully, adv. निरपेक्षं, उपेक्षया, अनपेक्ष्य.

Disrelish, s. अरुचि f., विरागः, विरक्ति f., विमुखता, अप्रीति f., विद्वेषः. -v. t. विद्विष् 2 U, न रुच् 1 A.

Disrepute, -ation, s. अ-अप-कीर्ति f., अयशस् n., अप्रतिष्ठा, वाच्यता, अपमानः. -able, a. अकीर्तिकर (री f.), अनार्य, गर्हित, अयशस्कर, कलंककर, निंद्य, दूषणीय.

Disrespect, v. t. न आदृ 6 A, अवमन् 4 A, उपेक्ष् 1 A, अवज्ञा 9U, अवगण् 10, न मन् c.; See Contemn. -s. अवज्ञा, अनादरः, अवमानः, अवधीरणं-रणा, उपेक्षा, परिभवः, तिरस्कारः. -ful, a. सावज्ञ, उपेक्षक, परिभाविन्, अवमानिन्.

Disrobe, v. t. विवसनीकृ 8 U, वस्त्रं अपकृष् 1 P, विवस्त्रयति (D.).

Disrupt, v. t. भंज् 7 P. विदृ 10, भिद् 7 P. -ion, s. भंगः, विदारणं, भेदः.

Dissatisfy, v. t. असंतोषं-अतृप्तिं-उत्पद् c. or जन् c. (जनयति); न संतुष् c., न तृप् c.; अप-वि-रंज् c. -ed, a अतृप्त, विरक्त, वितुष्ट, असंतुष्ट, अपरक्त. -Dissatisfaction, s. अतृप्ति f., असंतोषः, विरक्ति f., अप-वि-रागः.

Dissect, v. t. (अंगानि) व्यवच्छिद् 7 P, निकृत् 6 P, पृथक् कृ 8 U. 2 सूक्ष्मं विचर् c. or परीक्ष् 1 A. -ion, s. व्यवच्छेदः, अंगच्छेदः, 2 सूक्ष्मपरीक्षणं. -or, s. व्यवच्छेदकः.

Dissemble, v. t. अप-व्यप-दिश् 6 P. नि-अपह्नु 2 A; See Conceal. -er, s. छाद्मिकः, दांभिकः, व्यपदेशकः, छद्म कपट-वेशिन् m. -ing, s. अपह्नवः, प्रतारणा, गोपनं, अपलापः, छद्मन् n., दंभः, कपटं.

Disseminate, v. t. वि-प्र-कृ 6 P, प्रसृ c., विस्तृ c., प्रचर् c., निवप् 1 P. -ion, s. प्रसारः, प्रसरणं, विस्तारः, प्रचारणं. -or, s. प्रचारकः, प्रसारकः

Dissent, v. i. विवद् 1 A, विसंवद् 1 P, न समन् 4 A, अन्यथा मन्, अन्यमत a. भू. -s. वैमत्यं f., असंमतिः f., मतिभेदः, विमतिः f., विसंवादः विरोधः, विप्रतिपत्तिः f. -er, s. भिन्नमतावलंबिन् m. 2 साधारणधर्मविरोधिन् m. -ient, a. विमत, भिन्नमत. असंवादिन्; 'without one d. voice', सर्वेषामैकमत्यन.

Dissension, s. भेदः, कलहः, कलिः, विरोधः, विप्रतिपत्तिः f., विवादः; 'seeds of d.' कलहबीजं; 'sowing d' उपजापः, भेदः; 'a sower of d.' उपजापकः, भेदकः; 'family d.s' गृहच्छिद्रं-रंध्रं, अंतर्भेदः.

Dissertation, s. विवरणं, वचनं, प्रबंधः, निबंधः.

Disserve, v. t. अपकृ 8 U, न उपकृ, हिंस् 7 P. -ice, s. अपकारः, क्षति f., अपायः, हानि f.

Dissever, v. t. वियुज् 7 A, 10, विच्छिद् 7 P, विश्लिष् c.

Dissident, a. विमत, भिन्नमत.

Dissimilar, a. भिन्न, असदृश (शी f.), विरुद्ध, अन्य, विजातीय, विषम. -ity, s. असादृश्यं, भेदः, वैषम्यं, अंतरं, विजातीयत्वं.

Dissimulation, s. छलं, कपटं, छद्मन् n., माया; See Pretext.

Dissipate, v. t. वि-प्र-कृ 6 P, विक्षिप् 6 P, अपास् 4 P; See Dispel. 2 व्ययं 10 P (व्यययति), अपचि 5 U, क्षै c (क्षपयति). -ed, a. प्रकीर्ण, निधूत, अपास्त. 2 दुराचार, व्यसनासक्त, नष्टचरित्र, भ्रष्टशील, दुर्वृत्त, खंडितवृत्त. -ion, s. विकिरणं. 2 धनव्ययः, द्रव्योत्सर्गः, अपव्ययः. 3 व्यसनिता, भ्रष्टशीलता, दुर्वृत्तता.

Dissociate, See Separate.

Dissolve, v. t. विली c., विद्रु c. 2 भिद् 7 P or c., वियुज् 7 A, 10, भंज् 7 P, विनश् c., विलुप् c., उच्छिद् 7 P; विघट् c.; 'd. a meeting' सभां विसृज् 6 P or c.; 'd. friendship' सौहृदं भिद् or द्रुह् c. or विघट् c.; 'd. a compound' समासं विग्रह् 9 P. -v. i. ली 4 A, वि-प्र°, (लवणं जले विलीयते); विद्रु 1 P, गल् 1 P, क्षर् 1 P. द्रवीभू 1 P. -able, -Dissoluble, a. विद्राव्य, क्षरणशील, विलयनशील. -ent, a. विलयन (नी f.), विद्रावक. -Dissolute, a. तरल, अनवस्थित, उद्दाम, उच्छृंखल, निर्यंत्रण. 2 दुराचार, भ्रष्टशील, भोगासक्त, व्यसनिन्, दुर्वृत्त, विषयिन्, कामुक, विषयनिरत, इंद्रियसुखनिरत-तत्पर. -ly, adv. कामुकवत्, विषयासक्तवा. -ness, s. विषयासक्तिः f., दुर्वृत्तता, भोगासक्तिः f. -Dissolution, s. विलयनं, द्रवीकरणं-भवनं. 2 प्रलयः, नाशः, क्षयः, विध्वंसः, उच्छेदः. 3 भंगः, वियोगः, निवृत्तिः f., विग्रहः, विच्छेदः. विघटनं.

Dissonance, See Discord.

Dissuade, v. t. निवार् 10, निवृत् c., व्यावृत् c., (नियमस्माद् व्यवसायाच्छक्यते व्यावर्तयितुं Ka. 172); नियम् 1 P, (सुतां शशाक मनो न नियंतुमुद्यमात् K. v. 5); नि-प्रतिषिध् 1 P, (उ मेति मात्रा तपसो निषिद्धा K. i. 26); प्रत्यादिश् 6 P. -er, s. निवारकः, निवर्तयितृ m., निषेधकः, प्रत्यादेष्टृ m. -Dissuasion, s. निवर्तनं, नियमनं, प्रत्यादेशः, निषेधः-धनं, निवारणं. -Dissuasive, a. व्यावर्तक, निषेधक, प्रत्यादेशक. -s. निवृत्तिहेतुः.

Dissyllable, s. द्व्यक्षरं, द्व्यक्षरः शब्दः.

Distaff, s. तर्कु m. f., तर्कुटी.

Distance, *s.* (Space) अध्वन् *m.*, भूमि *f.*; 'by what d. separated' कियताध्वना विच्छिन्न. **2** अंतर, अंतराल, व्यवधानं. **3** विप्रकर्षः, दूरता, असन्निधिः, दूरं; 'from a d.' दूरात्, आरात्; 'at a d.' दूरे, दूरतः; 'at the d. of a mile' अर्धक्रोशमात्रायां (Ka. 74). **4** दुरासदत्वं, अनालापः, दुर्धर्षता, संवृतशीलत्वं. **-***v. t.* दूरीकृ 8 U, अपसृ c. **2** Excel, q. v. **-Distant,** *a.* दूरस्थ, अंतरवर्तिन्, दूर, विप्रकृष्ट, असन्निकृष्ट दवीयस्; 'a d. relation' विप्रकृष्टो बांधवः. **2** दुरासद, दुर्धर्ष; अगम्य; अनालापिन्.

Distaste, *s.* अरुचि *f.*, विरक्तिः *f.*, विरागः, वितृष्णा, अप्रीतिः *f.*, अननुरागः, विद्वेषः. **-***v. t.* न रुच् 1 A (with dat.). **-ful,** *a.* अस्वादु, अरुचिकर (री *f.*), अप्रिय अनिष्ट.

Distemper, *s.* Disease, q. v. **2** व्यथा, क्लेशः, बाधा, तापः, अनिर्वृतिः *f.* **3** दुःशीलं, कुस्वभावः, असद्भावः; दुर्दशा. **-***v. t.* पीड् 10, बाध् 1 A, क्लिश् 9 P, उपहन् 2 P. **-ed,** *a.* व्याधिग्रस्त, आतुर, रुग्ण, पीडित, आर्त, आकुल.

Distend, *v. t.* वितन् 8 U, विस्तृ c., श्वि c., आध्मा 1 P, स्फाय् c. (स्फाययति); 'd. ed with wind' वातपूरित, वातोच्छून, मारुताध्मात. **-Distension,** *s.* विस्तारः, स्फीतिः *f.*, आध्मानं, पूरणं.

Distich, *s.* श्लोकः, द्विचरणं; द्विपदं.

Distil, *v. i.* क्षर् 1 P, स्रु 1 P, स्यंद् 1 A, च्युत्-श्च्युत्- 1 P. **-***v. t.* स्रु c., स्यंद् c., सृज्-सुच्- 6 P, अवपत् c. **2** (Spirit) संधा 3 U, निष्कृष् 1 P, आ-अभि-सु 5 P. **-lation,** *s.* क्षरणं, द्रवणं, निस्यंदः, द्रवः, स्रवः. **2** अभिषवः, मद्यसंधानं, मद्यनिष्कर्षः. **-er,** *s.* शौंडिकः, सुराजीविन् *m.*, सुराकारः. **-lery,** *s.* संधानी, मद्यनिष्कर्षशाला, शुंडा.

Distinguish, *v. t.* वि विच् 3, 7 P or c., परिच्छिद् 7 P, विभिद् 7 P, विशिष् 7 P or c., विभज् 1 U. विशेषं कथ् 10. **2** विभू c., लक्ष् 10, विज्ञा 9 U, अभि-ज्ञा. **3** (Oneself) उत्कर्ष-कीर्ति-प्रतिष्ठां लभ् 1 A, विख्यात *a.* भू 1 P. **-ed,** *a.* विविक्त, परिच्छिन्न; विभिन्न. **2** लक्षित, चिह्नित, विज्ञात. **3** विशिष्ट, विश्रुत, प्रसिद्ध; विशेष in comp.; अतिथिविशेषः 'a d. guest'; 'men are d. from the lower animals by knowledge' नराणां तिरश्चां च प्रतिबोध एव विशेषः. **-Distinct,** *a.* भिन्न, विविक्त, विशिष्ट, व्यतिरिक्त, पृथग्विध, अन्य-इतर- (*pron. a.*), पृथक् *ind.* **2** स्पष्ट, परिस्फुट, व्यक्त, सुप्रकाश. **-ion,** *s.* विशेषः, भेदः, प्र-वि-भेदः, अंतरं, पृथक्त्वं, भिन्नता. **2** परिच्छेदः, विवेकः, विवेचनं, विचारः-रणा. **3** प्रतिष्ठा, गौरवं, वर्णः, ख्यातिः *f.*, विशिष्टता, उत्कर्षः, प्रमुखत्वं, परमपदं. **-ive,** *a.* विशेषक, सविशेष, परिच्छेदक; 'a d. mark' विशेषचिन्हं, विशिष्टलिंगं, **-ively,** *adv.* सविशेषं, विशेषेण, पृथक्पृथक्. **-ly,** *adv.* पृथक्, विभिन्नं. **2** व्यक्तं, सुस्पष्टं, स्पष्टार्थं, भिन्नार्थं, परिस्फुटं. **-ness,** *s.* भिन्नता. **2** व्यक्तिः *f.*, स्पष्टता, भिन्नार्थत्वं.

Distort, *v. t.* आकुंच् c., साचीकृ 8 U, वक्रीकृ. **2** विरूप् 10, वि-कृ, व्यंगीकृ, कदाकारीकृ. **3** परिवृत् c., दुष् c. (दूषयति). **-ion,** *s.* साचीकरणं, वक्रता, परिवर्तनं. **2** विरूपकरणं, विकृतिः *f.*, आकुंचनं, वैरूप्यं, व्यंगता, कुरूपता.

Distract, *v. t.* आकुलीकृ 8 U, व्यामुह् c., संभ्रम् (भ्रमयति), उन्मद् c., विक्षिप् 6 P, अप-वि-कृष् 1 P, संक्षुभ् c. **2** विधु 10, खंड् 10, विभिद् 7 P, विदल् c. (दलयति). **-ed,** *a.* विक्षिप्त, मोहित, व्यग्र, विधुर, आकुल, मूढ, विह्वल, संक्षुब्ध, भ्रांत, उन्मत्त; 'of a d. mind' भ्रांतचित्त, वातुल; 'to be d.' मुह् 4 P, उन्मद् 4 P. **-edly,** *adv.* मूढचेतसा, व्यग्रं, उन्मत्तवत्, ससंभ्रमं. **-ion,** *s.* भ्रमः, आकुलत्वं, विह्वलता, व्या-,मोहः, क्षोभः, व्यग्रता, उन्मादः. **2** विभेदः, विदारणं.

Distrain, *v. t.* ऋणहेतोः बंध् 9 P or निरुध् 7 U.

Distraught, *a. See* **Distracted.**

Distress, *s.* दुःखं, शोकः, क्लेशः, कष्टं, पीडा, दुर्गतिः *f.*, वैक्लव्यं, आर्तिः *f.* **2** आपद् *f.*, विपद् *f.*, व्यसनं, वि-उप-प्लवः; 'cry of d.' आर्तरवः-क्रंदितं. **-***v. t.* पीड् 10, व्यथ् c., क्लिश् 9 P, बाध् 1 A, दुःखयति (D.), संतप् c., खिद् c. **-ed,** *a.* व्यथित, आर्त, दुःखित, पीडित, कष्टापन्न, कृच्छ्रगत, दुर्गत, विपन्न, विधुर, दीन, क्लेशभाज्. **-ful,-ing,** *a* शोकावह, कष्टप्राय, क्लेशद, पीडा-क्लेश-कर (री *f.*); दुःख-मय (यी *f.*), खेदक.

Distribute, *v. t.* विभज् 1 U, वंट् 10, विअंश् 10, विभागशः दा 3 P or परिकल्पू c., यथाभागं विसृज् 6 P or विन्यस् 4 U or निक्षिप् 6 P; 'd. food' अन्नं परिविष् 10, **-er,** *s.* विभागकल्पकः, विभक्तृ *m.*, अंशदः; 'd. of food' परिवेष्टृ *m.* **-ion,** *s.* विभागः, संप्रविभागः, विभागकल्पना, व्यंशनं, वंटनं.

District, *s.* देशविभागः, प्रांतः, मंडलं, चक्रं, प्रदेशः.

Distrust, *v. t.* आ-परि-शंक् 1 A, न विश्वस् or प्रति-इ 2 P. **-***s.* अविश्वासः, अप्रत्ययः, आशंका. **-ful,** *a.* साशंक, शंकाशील, अप्रत्ययिन्, अविश्वासिन्. **-fully,** *adv.* साशंकं, अविश्वासेन.

Disturb, *v. t.* आकुलीकृ 8 U, धू 5, 9 U. उपरुध् 7 U, क्षुभ् c., बाध् 1 A; *See* **Agitate.** **2** भंज् 7 P, प्रतिबंध् 9 P, भिद् 7 P, विहन् 2 P, विच्छिद् 7 P; 'd. sleep' निद्राभंगं कृ; 'd. studies' अध्ययनविघ्न-

माचर् 1 P; 'able to d. penance' तपो भेदायालं. **3** (Mind) व्याम्रुह c, आकुलीकृ, आकुलयति (D.), संभ्रम् c., वि-कृ. **-ance**, *s.* क्षोभः, सं-वि-क्षोभः, विप्लवः, विमर्दः, पीडा. **2** प्रतिबंधः, प्रत्यूहः, अंतरायः, विघ्नः, विच्छेदः, भंगः, बाधा, भेदः; 'd. of concentration' समाधिभेदः; 'popular d.' प्रकृतिक्षोभः-कोपः; 'cause of d. विकार-हेतुः. **3** मोहः, आकुलता, व्यग्रता, वैक्लव्यं, संभ्रमः. **-er**, *s.* क्षोभकृत् *m.*, विघ्नकरः.

Disunite, *v. t.* वियुज् 7 A, 10 विश्लिष् c.; *See* **Separate**. *-v. t.* वियुज्-विश्लिष्-विभिद् pass. **-Disunion**, *s.* वियोगः, विश्लेषः, विभेदः, विच्छेदः.

Disuse, Disusage, *s.* अव्यवहारः. विलोपः, विरामः; व्यवहारनिवृत्ति *f.*, अपचारः, आचारलोपः; 'fallen into d.' विलुप्त, लुप्त-व्यवहार. *-v. t.* व्यवहाराद् विरम् c. or निवृत् c.

Ditch, *s.* परिखा, खातं, गर्तः-र्तः, उपकुल्या, प्रणालः-ली, प्रतिकूपः. *-v. t.* परिखन् 1 P, गर्तां कृ 8 U. **-er**, *s.* खातकारः, आखनिकः.

Ditto, *adv.* तथा; 'says d.' तथैव ममाभिप्राय इति वदति. *-a.* पूर्वोक्त, प्राग् लिखित, प्रागुक्त.

Ditty, *s.* गीतं, गीति *f.*, गीतिका, गानं, गानखंडः.

Diuretic, *a.* मूत्रवर्धक.

Diurnal, *a.* आह्निक दैनिक (की *f.*), दैनंदिन (नी *f.*); *See* **Daily**.

Diuturnal, *a.* चिरकालिक (की *f.*) चिरस्थायिन.

Divagation, *s.* *See* **Digression**, उत्पथ-विमार्ग-गमनं.

Divan, *s.* शिष्टसभा. **2** इंद्रकं, मंचयुक्तः प्रकोष्ठः, आस्थानं-नी. **3** मंचः.

Divaricate, *v. i.* द्विधा भू 1 P, द्विखंडीभू. द्विधा विभिद् pass. *-v. t.* द्विधा कृ 8 U, द्विधा भिद् 7 P.

Dive, *v. i.* वि-अव-गाह् 1 A, निमस्ज् 6 P, विश् 6 P, प्लु 1 A; 'd. ing into books' ग्रंथपरायण, ग्रंथमग्न-निविष्ट. **-er**, *s.* विगाहकः, निमंक्तृ *m.*; 'river d.' नदीप्लवः, जलेवाहः.

Diverge, *v. i.* (एककेंद्राद्) विचल् 1 P, च्यु 1 A, व्युत्क्रम् 1 U, 4 P, भ्रंश् 1 A, 4 P; *See* **Deviate**, also. **2 Differ**, q. v. **-ence**, *s.* विचलनं, च्युति *f.*, केंद्रापसरणं, भ्रेषः, भ्रंशः. **2** भेदः, विरोधः. **-ent**, *a.* केंद्रविचल. **2** विभिन्न, विरुद्ध.

Diverse, (Divers), *a.* अनेक, विविध, नानारूप-प्रकार-विध, नाना *ind.* **2** भिन्न, इतर-अन्य- (*pron. a.*), असम, विपरीत, पृथक् *ind.*; 'd. coloured' नानावर्ण, चित्र, कर्बुर, कल्माषित. **-ity**, *s.* पृथक्त्वं, नानाविधत्वं, भिन्नता, नानात्वं, विभेदः, असादृश्यं, असाम्यं, वैषम्यं. **2** वैचित्र्यं, विचित्रता. **-ly**, *adv.* अनेकधा, नानाविधं, नानारूपेण, नाना. **-Diversify**, *v. t.* चित्र् 10, नानारूप *a.* कृ 8 U, शबलीकृ; *See* **Variegate**. **-ed**, *a.* कर्बुरित, नानाप्रकार, शबल, कल्माषित, चित्र, चित्रित. **-ication**, *s.* विचित्रता, विविधत्वं, विभेदः.

Divert, *v. t.* विनुद् c., रंज् c., नंद् c., रम् c. (रमयति); 'd. oneself' वि-हृ 1 P, क्रीड् 1 P. **2** व्या-वृत् c., आ-वि-कृष् 1 P, भ्रंश् c., संचर् c., संक्रम् c., आक्षिप् 6 P, प्र-वि-चल् c., च्यु c.; 'I shall d. his thoughts' एवं तावदाक्षिपामि (Mal. 9), अन्यतः संचारयामि (U. 1.). **-ing**, *a.* विनोदक, हासजनक, नर्मप्राय, क्रीडापर. **-Diversion**, *s.* विनोदः-दनं, विहारः, क्रीडा, विलासः, केलि *f.*, खेला, विभ्रमः. **2** मनोरंजनं, मनोविनोदनं. **3** विकर्षणं, भ्रंशनं, च्यावनं, आक्षेपणं.

Divest, *v. t.* हृ 1 P, अपनी 1 P; *See* **Deprive**. **2** विवस्त्रीकृ 8 U, उच्छद् 10, वस्त्रं अपनी or उत्कृष् 1 P. **-ure**, *s.* अपहरणं; विवस्त्रीकरणं.

Divide, *v. t.* विभिद् 7 P, विच्छिद् 7 P; वि-युज् 7 A, 10, विश्लिष् c., पृथक् कृ 8 U, शकलीकृ. **2** प्र-,सं-,विभज् 1 U, पारिक्षिप् c.; 'd. ed in half अर्धे विच्छिन्नं (S. 1); 'd. into 2, 3, parts' &c. द्विधा-,त्रिधा-कृ; द्रव्याणामवयवशो विभज्यमानानां (S. B. 533) 'when d. ed into parts' &c. **3** (In Matb.) भज्, विभज्, हृ 1 P; 'd. ing by the remainder' शेषेण हृत्वा-विभज्य. *-v. i.* विश्लिष् 4 P, विभिद्-विच्छिद् pass., द्विधा भू 1 P. **2** दल् 1 P, स्फुद् 6 P; 'they were d. ed in opinion' ते भिन्नता आसन्, द्वैधीभूताः; 'a house d. ed against itself' अंतर्भेदाकुलं गृहं. **-er**, *s.* विभेदकः, विच्छेदकः, विभागकल्पकः. **-Dividend**, *s.* भागः, अंशः, उद्धारः, लाभः. **2** भाज्यः. **-Divisor**, *s.* हरः, हारः, भाजकः, हृ(हा)रकः. **-Division**, *s.* विच्छेदः, विभेदः, खंडनं, पृथक्करणं, वियोगः, विश्लेषः, दलनं. **2** भिन्नता, विभक्तता. **3** विभागः, अंशनं, विभाग-परिकल्पनं, उद्धारः. **4** भागः, खंडः, एकदेशः, विभागः. **5** भागहरः, हरणं, भाजनं; 'd. of an army' गुल्मं, दलं. **-Divisible**, *a.* विभाज्य, विच्छेद्य, विभेद्य.

Divine, *a.* दिव्य, दैव (वी *f.*), देव (वी *f.*), ऐश्वर (री *f.*), अमानुष (षी *f.*), अपार्थिव (वी *f.*), **2** ईश्वरतुल्य. *-s.* पुरोहितः, धर्मोपदेशकः, श्रोत्रियः. *-v. t.* लक्षणानि or शकुनानि परीक्ष् 1 A, शुभाशुभं आलोच् 10 or कथ् 10 or प्रदृश् c. **2** (Guess) ऊह्

1 A, अनुमा 3 A, 2 P, अवगम् 1 P, तर्क् 10. **-ation,** *s.* शकुनपरीक्षणं, लक्षणपरीक्षणं, भविष्यसूचनं. **2** अनुमानं, तर्कः. **-er,** *s.* दैवज्ञः, शकुनपरीक्षकः, निमित्तज्ञः. **2** अनुमातृ *m.* **-ity,** *s.* दैवत्वं, दिव्यता, देवतानुभावः. **2** देवता; *See* God. **3** परमार्थविद्या, श्रुतिविद्या ईश्वरविषयं शास्त्रं. **-ly,** *adv.* देववत्, दिव्यरूपेण.

Divorce, *v. t.* त्यज् 1 P, निराकृ 8 U, निरस् 4 U; विवाहं लुप् c. or भिद् 7 P. **-s.,** **-ment,** *s.* त्यागः, निराकरणं, विवाहलोपः, प्रत्यादेशः; विवाहोच्छेदः.

Divulge, *v. t.* प्रकाश् c., प्र-ख्या c. (ख्यापयति), वि-वृ 5 U, भिद् 7 P or c. **-er,** *s.* प्रकाशकः, भेदकः. **-ing,** *s.* प्रकाशनं, विवरणं, भेदः.

Divulsion, *s.* विवरणं, उत्पाटनं.

Dizzy, *a.* भ्रमिन्, घूर्णमान. **2** भ्रमकारक, भ्रमकर (री *f.*), भ्रमोत्पादक. **3** चपल, प्रमत्त, अनवहित. **-ness,** *s.* घूर्णनं, घूर्णि *f.*, भ्र(भ्रा)मरं, भ्रमः, भ्रमि *f.*.

Impute, *v. t.* आरुह् c., (रोपयति), संबंध् 9 P, क्लृप् c., प्रसंज् c., निक्षिप् 6 P; *See* **Ascribe.** 2 अप-परि-वद् 1 U, आ-अधि-क्षिप्, निंद् 1 P; *See* **Censure.** **-ation,** *s.* (Act) आरोपः-पणं, कल्पना, संबंधः, प्रसंगः; ' i. of a crime ' दोषकल्पना, दोषारोपः. 2 अभियोगः, अभिशंसनं. 3 आरोपः, आ-अधिक्षेपः, दूषणं. अपवादः, कलंकः, परि(री)वादः; *See* **Calumny.**

In, *prep.* Gen. ex. by loc.; अंतरे, मध्ये, in comp.; with verbs by नि pr. 2 (Denoting instrument, manner, time, direction) ex. by instr.; ' i. great intimacy ' महता स्नेहेन; ' i. six days ' षड्भिः अहोभिः, षड्भिः अहोभिः, षड्भिः अहोभिः,

Inapplication, *s.* आलस्यं, अनुद्योगः, कार्यनिवृत्ति *f.*, अप्रवृत्ति *f.*, अमनोयोगः, अनभिनिवेशः.

Inapposite, Inappropriate, *a.* अयोग्य, असंगतं, अप्रस्तुत, विरुद्ध.

Inappreciable, *a.* अत्यल्प, क्षुद्र.

Inapprehensive, *a.* निःशंक, अकुतोभय, वीतभय.

Inapt, *a.* अपात्र, अयोग्य. **-itude,** *s.* अपात्रता, अयोग्यता. **-ly,** *adv.* अस्थाने, असंगतं.

Inarticulate, *a.* अव्यक्त, अस्पष्ट, अस्फुट, अव्यक्तपद-वर्ण-अक्षर. **-ly,** *adv.* अस्पष्टं, अव्यक्तं; गद्गदवाचा.

Inartificial, *a.* अकृत्रिम, सहज.

Inasmuch as, *adv.* यस्मात्, येन, यतः.

Inattentive, *a.* अनवधान, निरपे(वे)क्ष, अनासक्त, उपेक्षक, मंदाक्षर, प्रमत्त, प्रमादिन्, अनवहित, अनिविष्टचित्त, शून्यहृदय. **-ly,** *adv.* सप्रमादं, अनवधानेन, प्रमादतः, असमीक्ष्य, अविमृश्य, निरपेक्षं. **-Inattention,** *s.* अनवधानं, अनपे(वे)क्षा, उपेक्षा, अनादरः, अननुरागः, अमनोयोगः, प्रमादः, शून्यहृदयत्वं.

Inaudible, *a.* अश्राव्य, कर्णागोचर; 'i. weeping' निःशब्दरोदनं.

Inaugurate, *v. t.* अभिषिच 6 P, अधिकारे निविशू c. 2 प्रति-ष्ठा c. (प्रतिष्ठापयति), संस्कृ 8 U, उपक्रम् c., आरभ् c. (रंभयति). **-ion,** *s.* अभिषेकः, प्रतिष्ठापनं, संस्कारः; उपक्रमः.

Inaurate, *See* **Gild,-ed.**

Inauspicious, *a.* अशुभ, अमंगल, अभद्र, अकल्याण (णी *f.*). **-ly,** *adv.* अशुभं, अशुभलग्ने.

Inborn, Inbred, *a.* सहज, नैसर्गिक-स्वाभाविक (की *f.*), स्वभावज, अंतर्भव.

Incalculable, *a.* अगण्य, संख्यातीत. 2 अमित.

Incandesce, *v. t.* प्र-, ज्वल् 10, उत्-तप् c. **-ence,** *s.* अत्युष्णता, उज्ज्वलता. **-ent,** *a.* प्रज्वलन, उत्तप्त, अत्युष्ण.

Incantation, *s.* मंत्रः, अभिचारः, योगः, मंत्रप्रयोगः, माया; 'to use i.s' मंत्रैः वशीकृ 8 U or मुह् c.. अभिमंत्र् 10 A. अभिचर् c.

Incapable, *a.* अक्षम, असमर्थ, अशक्त, अपर्याप्त, अनुचित, अयोग्य.

Incapacious, *a.* अपृथु, अविपुल, अविशाल, संकट, संबाध.

Incapacitate, *v. t.* शक्ति हृ 1 P, अक्षमं-अक्षमी-कृ 8 U, अपात्री-अयोग्यं कृ.

Incapacity, *s.* असामर्थ्यं, अशक्ति, *f.*, अनर्हता, अयोग्यता, अपात्रता. 2 मेधाभावः, बुद्धिहीनता.

Incarcerate,-ion, *See* **Imprison,-ment.**

Incarnadine, *v. t.* अरुणीकृ 8 U. **-***a.* रक्त, रुधिरताम्र, आताम्र.

Incarnate, *a.* मूर्त, मूर्तिमत्, देहवत्, शरीरिन्, शरीरबद्ध, देहिन्, सशरीर. 2 अवतारिन्, मनुष्यरूपधारिन्, गृहीतदेह, मनुष्यरूपेण अवतीर्ण. **-ion,** *s.* अवतारः; शरीरधारणं, देहग्रहणं, मूर्तिमत्ता, सशरीरता; better by (*a.*); *See* **Embody** also.

Incase, *v. t.* भांडे नि-धा 3 U or निविशू c. 2 पि-धा, आवृ 5 U, आ-परि-वेष्ट c., परि-आ-च्छद् 10.

Incautious, *a.* असमीक्ष्य-अविमृश्य-कारिन्, साहसिन्. 2 अनवधान, प्रमादिन्, प्रमत्त. **-Incaution,** *s.* प्रमादः, असमीक्षा; *See* **Inattention.**

Incendiary, *s.* गृह-अगार-दाहिन् *m.* **-Incendiarism,** *s.* गृहदाहः.

Incense, *s.* धूपः, तुरुष्कः, पिंडकः, सिह्लः, यावनः (olibanum); यक्षधूपः, सर्जरसः, रालः, सर्वरसः; 'artificial i.' वृकधूपः, कृत्रिमधूपकः. **-***v. t.* धूप् 1 P, 10, धूपेन वास् 10. 2 उत्तिज् c., उद्दीप् c., संधुक्ष् धुक्ष् 10, क्षुभ् c., क्रुध् c., प्रकुप् c.. *See* **Enrage. -Incensory,** *s.* धूपपात्र-भाजनं.

Incentive, *s.* प्रलोभनं, प्रचोदनं, प्रवर्तनं, उत्तेजनं, प्रोत्साहनं; प्रेरणं, प्रणोदनं, उद्बोधकं. 2 कारणं, निमित्तं, प्रयोजनं, हेतुः. **-***a.* प्रवर्तक, प्रचोदक, &c.

Inception, *s.* प्रारंभः, उपक्रमः.

Incertitude, *s.* विकल्पः, शंका, अनिर्णयः.

Incessant, *a.* सतत, अविरत, अनवरत, अविच्छिन्न, अविश्रांत, प्रसक्त. **-ly,** *adv.* अनवरतं, सततं, अजस्रं, अविच्छेदं, अश्रांतं, सर्वदा, प्रसक्तं, निरंतरं, अभीक्ष्णं.

Incest, *s.* व्यभिचारः, अगम्यगमनं; oft. by गमनं; 'i. with a mother, sister &c.' मातृगमनं; स्वसृगमनं, &c. **-uous,** *a.* अगम्यगामिन्, व्यभिचारिन्; 'i.son' मातृगामिन् *m.*

Inch, *s.* अंगुलः; 'not even an i.' न रेखामात्रमपि, नाल्पमपि; 'by i.es' अल्पाल्पं, अल्पशः.

Inchastity, *s.* व्यभिचारः; असतीत्वं, पांसुलता (of women).

Inchoate, *a.* उपक्रांत, अचिरप्रारब्ध. 2 असंपूर्ण. **-ion,** *s.* उपक्रमः, प्रारंभः.

Incident, *s.* वृत्तं, वृत्तांतः, व्यतिकरः, प्रसंगः, संगति *f.*, घटना. 2 उपाख्यानं, प्रासंगिककथा. **-al,** *a.* प्रासंगिक-आनुषंगिक-आगंतुक-आकस्मिक-आपतिक-नैमित्तिक- (की *f.*), आहार्य, आगंतु, अप्रस्तुत, अप्रकृत; 'i. cause' आगंतुकारणं, कार्यनिमित्तं. **-ally,** *adv.* प्रसंगतः, प्रसंगवशात्, यदृच्छया, कथाप्रसंगेन, कार्यकारणतः, दैवात्, आगंतुकतया.

Incinerate, *v. t.* भस्मसात्कृ 8 U, भस्मीकृ.

Incipient, *a.* आरब्ध, उपक्रांत; प्रथम, अग्र, पुरोगामिन्.

Incise, *v. t.* छिद् 7 P, कृत् 6 P, तक्ष् 1, 5 P; *See* **Cut.** **-ion,** *s.* छेदः, कर्तनं, क्षतं, भेदः.

Incite, *v. t.* प्रवृत् c., प्रोत्सह् c., प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., उद्युज् 10; (anger &c.) उद्दीप् c., उत्तिज् c., संधुक्ष् 10. **2** आ-समा-श्वस् c. **-ation,-ment,** *s.* प्रोत्साहनं, प्रचोदनं प्रवर्तनं, प्रेरणं, उत्तेजनं. **2** **Incentive,** q. v.

Inclement, *a.* निष्ठुर, कर्कश, निर्घृण, निर्दय. **2** (Of weather) उग्र, कठोर, रूक्ष, असौम्य, तीक्ष्ण, तिग्म, प्रचंड. **3** वातवृष्टिमत्. **Inclemency,** *s.* अदया, अकारुण्यं, रूक्षता, कटुता.

Incline, *v. i.* नम् 1 P, अव-आ°-,नम्रीभू 1 P. **2** प्रवण-*a.* भू; 'favourably i. ed towards her by (her) penance' तपसा तत्प्रवणीकृतः (K. IV. 42); gen. ex. by शील in comp.; 'i. ed to favour' अनुग्रहशील; or by इष् 6 P, वांछ् 1 P; by मनस् or काम with inf. form, or by desid. forms. **-*v. t.*** आ-अव-नम् c. (नमयति), आवृज् 10, नम्रीकृ. **2** प्रवणीकृ, प्रवृत् c., नि-उद्-युज् 10, प्रोत्सह् c., प्रेर् c.; *See* **Incite.** **-*s.*** उत्सर्पिणी or अवसर्पिणी भूमिः, प्रवणा भूमिः. **-ation,** *s.* प्रवृत्ति *f.*, प्रवाहः, प्रावण्यं; gen. ex. by शीलता-त्वं or आलुता-त्वं in comp. or by desid. forms; 'i. to fall' पतनशीलता, पतयालुता, पिपतिषा **2** भावः, अभिलाषः, इच्छा, कामः, छंदः, छंदस् *n.*, रुचि *f.*, चित्तप्रवृत्तिः; 'following one's own i.' कामचारिन्, स्वच्छंद, स्वैरवृत्त, कामचार, स्वैर, स्वैरिन्. **3** आ-,नति *f.*; 'i. of a planet's orbit to the ecliptic' परमापमः. **-ed,** *a.* नत, आवर्जित. **2** प्रवर्तित, प्रवण, in comp., शील or आलु in comp. or by desid. forms.

Inclose, *v. t.* *See* **Enclose.**

Include, *v. t.* परिग्रह् 9 P, अंतर्गण् 10, समाविश् c., अंतः कल् 10, परिसमाप्-अभिव्याप् 5 P, प्रतिसं-ह 1 P; gen. ex. by अंतर् with भू-गम्-पत् 1 P or वृत् 1 A (with nom. of what is included). **2** आ-धा 3 U, धृ 10, आ-दा 3 A, गर्भ in comp. **-ed,** *a.* अंतर्भावित, अंतर्गणित; परिगृहीत, अंतर्भूत, अंतर्गत, अंतर्वर्तिन्, समाविष्ट, सहित, अवांतर, गर्भित, अभिव्याप्त; गर्भ in comp.; 'i. space' अंतरालः-लं, अभ्यंतरं; 'those persons i.' तान्सरान् समाकलय्य, तैर्नरैः सह. **-ing, -Inclusive,** *a.* परिग्राहिन्, अभिव्यापक; oft. by सह, or सहित *a.*; 'both days i' उभाभ्यामपि दिनाभ्यां सह, उभयदिनसहितं; 'then enter a hermit with two others (three i. himself)' ततः प्रविशत्यात्मनातृतीयो वैखानसः (S. 1). **-Inclusively,** *adv.* साकल्येन, अशेषेण, सहितं. **-Inclusion,** *s.* अंतर्भावः, अंतर्गणना-नं, समावेशः-शनं, परिग्रहः, अभि-,व्याप्ति *f.*, प्रतिसंहारः.

Incognito, *a.*, प्रच्छन्न, अलक्षित, प्रच्छन्नगुप्त-रूप. **-*adv.*** प्रच्छन्नं, गुप्त-अलक्ष्य-रूपेण, निभृताकारेण.

Incognizance, *s.* अनभिज्ञानं, अप्रतिपत्ति *f.* **-Incognizant,** *a.* अनभिज्ञ, अज्ञ.

Incoherent, *a.* असंगत, असंबद्ध, अनन्वित. **-ly,** *adv.* असंगतं, अनन्वयं. **-Incoherence,** *s.* असंबंधः, असंगति *f.*, अनन्वयः, असंदर्भः.

Incombustible, *a.* अदाह्य, दुर्दाह्य.

Income, *s.* आयः, उदयः, आगमः, धनागमः, अर्थप्राप्ति *f.*, धनोदयः.

Incommensurable, *a.* असमपरिमाण, असमान, असदृश. **2** अपर्याप्त.

Incommensurate, *a.* अतुल्य, असमान, अननुरूप; अपर्याप्त, न अलं, असदृश.

Incommode, *v. t.* पीड् 10, क्लिश् 9 P, आयस् c.; 'don't i. yourself' अलमायासेन.

Incommodious, *a.* अनुपयुक्त, अयोग्य. **2** क्लेश-पीडा-कर (री *f.*,), असुखद, उपरोधिन्.

Incommunicative, *a.* वाग्यत, मितवाच्, मितकथ, भाषणविरक्त, संलापविमुख (खी *f.*).

Incomparable, *a.* अतुल, अनुपम, अद्वितीय, निरुपम, अप्रतिम, अप्रतिरूप, अनुपमेय.

Incompassionate, *a.* निर्घृण, क्रूर, दृशंस, निर्दय; *See* **Cruel.**

Incompatible, *a.* *See* **Inconsistent.**

Incompetent, *a.* अशक्त, असमर्थ, अयोग्य, अकर्मक्षम, अनलंकर्मीण. **-ly,** *adv.* अयोग्यं, अक्षमवत्. **-Incompetence,-cy,** *s.* अक्षमता, असामर्थ्यं, कार्याक्षमता, अपर्याप्ति *f.*

Incomplete, *a.* अपूर्ण, असमाप्त, अनिष्पन्न. सावशेष. **2** विकल, न्यून, लुप्त, हीनांग, न्यूनावयव, लुप्तावयव, असमग्र. **-ly,** *adv.* अपूर्णं, सावशेषं, अपर्याप्तं; वैकल्येन, असमस्तं. **-ness,** *s.* अपूर्णता, असमाप्ति *f.* **2** वैकल्यं, न्यूनता.

Incomplex, Incomposite, *a.* अमिश्रित, असंकीर्ण, शुद्ध.

Incomprehensible, Inconceivable, *a.* अज्ञेय, अगम्य, दुर्बोध, अचिंत्य, अविभाव्य, अग्राह्य, अबोधगम्य, अतर्क्य, अधीगम्य, बोधातीत, इंद्रियातीत, अतींद्रिय, इंद्रियागोचर.

Inconclusive, *a.* अनिर्णायक, अप्रमाण, अनिश्चायक. **-ly,** *adv.* अप्रमाणं, प्रमाणं विना, अनिर्णायकत्वेन.

Incongruous, *a.* असंगत, विरुद्ध, असंबद्ध, अनुपपन्न. **-ness, -Incongruity,** *s.*

विरोधः, असंगति *f.*, अनुपपत्ति *f.*; oft. by क-क्; *See* **Congruous.**

Inconsequent, *a* अप्रयुक्त, अप्रयोगिन्, अयौक्तिक, न्यायविरुद्ध, अयुक्तिसिद्ध.

Inconsiderable, *a* अल्प, क्षुद्र, तुच्छ. **2** अल्पार्घ.

Inconsiderate, *a* असमीक्ष्य-अविमृश्य-कारिन्, अविवेकिन्, अविमर्शिन्, साहसिन्, प्रमत्त, असावधान; ' an i. deed ' साहसं. **-ly,** *adv.* अविमृश्य, असमीक्ष्य, अविचार्य, सहसा, निर्विवेकं, सरभसं, अनालोचितं, निरवधानं, प्रमादतः, साहसेन. **-ness,** *s.* अविमर्शः, अविवेकः, असमीक्ष्यकारित्वं, अविचारणा, असमीक्षा.

Inconsistent, *a.* असंगत, विरुद्ध, विरोधिन्, असंबद्ध, अनन्वित, विसंवादिन्, विगीत, विपरीत; परस्पर विरोधिन्-विरुद्ध, परस्परपराहत, संकुल, पूर्वापरविरुद्ध, क्लिष्ट; oft. ex. by विसंवद् 1 U, विरुध् pass., विप्रवद्; *See* **Consistent** also. **-ly,** *adv.* विरोधेन, विरुद्धं, विसंवादेन, परस्परविरुद्धं.

Inconsistence,-cy, *s.* असंगति *f.*, असंबंधः, अनन्वयः, विरोधः, वैपरीत्यं, विभेदः, असादृश्यं, विसंवादः, विप्रतिपत्ति *f.*, परस्पर-विरोधः, विरोधोक्ति *f.*

Inconsolable, *a.* अशरण, निर्विनोद, शोकाकुल.

Inconsonant, *a.* *See* **Inconsistent.**

Inconspicuous, *a.* अप्रकाश, अस्पष्ट. **2** अप्रधान.

Inconstant, *a.* अस्थिर, अदृढ; चल, चंचल; तरल, लोलमति, चलचित्त. **-Inconstancy,** *s.* अस्थैर्य, तरलता, चंचलत्वं; *See* **Fickle. -ness.**

Incontaminate, *a.* अकलंक, अदूषित, पवित्र.

Incontestable, *a.* निर्विवाद, अविचार्य, अप्रत्याख्येय, निःसंदेह, सुनिश्चित.

Incontinent, *a.* असंयत, अवशिन्, अजितेंद्रिय, व्यभिचारिन्. **-Incontinence,** *s.* असंयमः, अदमः, अयमः, अजितेंद्रियत्वं, व्यभिचारः, लांपट्यं, इंद्रियादमः.

Incontrovertible, *a.* अप्रत्याख्येय. निर्विवाद, अबाध्य, असंदिग्ध.

Inconvenient *a.* अनुपयुक्त, अनुचित, अपर्याप्त, अयोग्य; अहित, असुखकर, क्लेशकर (री *f.*); क्लेशद, दुःखावह, उपरोधक, दुःखद. **-Inconvenience,** *s.* अयोग्यता, अनौचित्यं, अनुपयोगः, अपर्याप्ति *f.* **2** क्लेशः, असुखं, उपरोधः, पीडा, आयासः, आयास or क्लेश-हेतुः or कारणं. **-***v. t.* उप-रुध् 7 U, बाध् 1 A, पीड् 10; *See* **Convenience.**

Inconversant, *a.* अनभिज्ञ, अविज्ञ; अनन्यंतर.

Incorporate, *v. t.* संमिश्र् 10, संहन् 2 P, संयुज् 7 U, 10, संसृज् 6 P, संश्लिष् c., एकीकृ 8 U. **-***v. i.* एकीभू, संसृज्-संयुज् pass. **-ion,** *s.* संयोगः, संश्लेषः, संमिश्रणं, संसर्गः.

Incorporeal, *a.* अशरीरिन्, विदेह, निरवयव.

Incorrect, *a.* अशुद्ध, अशुचि, सदोष, दोषवत्. **2** असत्य, अयथार्थ, वितथ; 'i. in conduct' दुर्वृत्त, दुराचार. **-ly,** *adv.* मिथ्या, अन्यथा, अतथ्यं, अयथार्थं; अशुद्धं. **-ness,** *s.* अशौचं, अशुद्धता, असत्यता, &c.

Incorrigible, *a.* अशोध्य, असमाधेय, शिक्षातीत, असाध्य, अप्रतिसमाधेय.

Incorrodible, *a.* अक्षयणीय.

Incorrosive, *a.* अविलयन, अनाशक.

Incorrupt, *a.* अदुष्ट, शुचि, पवित्र, शुद्ध. **-ness,** *s* शुचिता, शुद्धता.

Incorruptible, *a.* अनाश्य, अदूष्य, अक्षय.

Increase, *v. i.* वृध् 1 A, वि-सं-प्र-परि°, एध् 1 A, सं-ऋध् 4,5 P, स्फाय् 1 A, आ-चै 1 A, वृद्धिं या-इ 2 P or गम् 1 P or प्राप् 5 P, प्र-उप-चि pass., मुर्छ् 1 P, (सुमूर्छ सहजं तेजो हविषेव हविर्भुजां R. x. 79), प्ररुह् 1 P. **2** विस्तृ-वितन्- pass., वि-प्र-सृ 1 P. **-***v. t.* वृध् c., एध् c., ऋध् c., आप्यै c., स्फाय् c. (स्फावयति), आगम् c., बृंह् c. वृद्धिं नी 1 P, प्ररुह् c., प्र-उप-चि 5 U. **2** विस्तृ c., वितन् 8 U, प्रसृ c., **-***s.* वृद्धि-स्फीति-समृद्धि *f.*, उप-प्र-चयः, वर्धनं, आप्यायनं, बृंहणं, उन्नति *f.*, विस्तारः, आधिक्यं. **-ing,** *a.* वर्धिष्णु, प्रचीयमान. प्ररोहिन्. *See* **Grow.**

Incredible, *a.* अश्रद्धेय, अविश्वास्य, प्रत्ययातीत, विश्वासानर्ह. अतिप्रत्यय-विश्वास. अप्रमाणभूत.

Incredulous, *a.* अश्रद्धालु, अप्रत्ययिन्, शंकाशील, अविश्वासशील. **-ly,** *adv.* साशंकं, अप्रत्ययेन. **-Incredulity,** *s.* अप्रत्ययः, अश्रद्धा, अविश्वासः.

Incremate, *v. t.* दह् 1 P.

Increment, *See* **Increase** (*s.*).

Incriminate, *v. t.* अभियुज् 7 A, 10; *See* **Accuse.**

Incrust, *v. See* **Encrust.**

Incubate, *v. i.* अव-स्था 1 A, अंडानामुपरि संविश् 6 P, अंडानि पुष् 1, 9 P. **-ion,** *s.* अंडपोषणं.

Incubus, *s.* कुस्वमः, दुःस्वमः.

Inculcate, *v. t.* अनु-शास् 2 P, उपदिश् 6 P, (चित्ते) निविश् c., शिक्ष् c.; *See* **Impress.**

Inculpate, *v. t. See* **Censure.**

Incumbent, *a* अवलंबिन्; आश्रित, उपरिस्थ. **2** आवश्यक; oft. ex. by pot. pass. part or अर्ह् 1 P. **-***s.* आश्रितः, नियोज्यः, वृत्तिभुज् *m.*, वृत्ति भोगिन्-जीविन् *m.*

Incur, *v. t.* भज् 1 U, आप्ति 1 U, आप् 5 P, लभ् 1 A; आवह् 1 P, उत्पद् c.; gen. ex. by इ-या- 2 P. गम् 1 P &c. with object, by pot. pass. part., अर्ह् 1 P or अर्ह, योग्य,

भाजनं, पात्रं, in comp.; 'be i. s blame' वाच्यतां याति, दोषभाजनं-दोषभाक्-दोषपात्रं भवति; 'i. s debt' ऋणं करोति, 'you will only i. sin' पापमेवाश्नयेथाः; 'i. s a penalty' दंड्यो भवति, दंडमर्हति.

Incurable, *a.* असाध्य, अशमनीय, दुरुपचार, अप्रतिकार्य, अपरिहार्य, असमाधेय, निरुपाय.

Incurious, *a.* अनुत्सुक, अजिज्ञासु, अकुतूहलिन्.

Incursion, *s.* अवस्कंदः-दनं, अभिद्रवः, उपप्लवः, आक्रमः, अभिप्रयाणं, अभिग्रहः; 'to make i. s' अवस्कंद् 1 P, अभिद्रु 1 P; *See* **Attack.** **-Incursive,** *a.* उपप्लविन्, उपद्रविन्.

Incurvate, *v. t.* नम् c., आवृज् 10, भुज् 6 P, आकुंच् c. **-ion,** *s.* आ-,नति *f.*,आकुंचनं.

Indebted, *a.* ऋणिन्, ऋणग्रस्त-बद्ध. 2 उपकृत, अनुगृहीत, कृतोपकार; 'I am i. to fortune' दैवेनानुगृहीतोस्मि.

Indecent, *a.* ग्राम्य, अश्लील, अवाच्य, अश्राव्य. 2 अविनीत, विनयशून्य-रहित, निर्मर्याद,अतिक्रांतमर्याद-विनय; अशिष्ट,असभ्य, शिष्टाचारविरुद्ध. 3 अयुक्त, अन्याय्य, लज्जाकर (री *f.*), निंद्य, निर्लज्ज. **-ly,** *adv.* गर्हितं, अश्लीलतया, अविनयेन, अमर्यादं, अयुक्तं. **-Indecency,** *s.* अश्लीलता, ग्राम्यता. 2 अविनयः, अमर्यादा, अशिष्टता, मर्यादातिक्रमः.3 अयुक्त , अनुपपत्ति *f.*, निंद्यता, गर्ह्यता, अन्यायः, कुरीति *f.*, अनीति *f.*, अनयः, कुशीलं, अपचारः.

Indecision, *s.* संदेहः, अनिर्णयः, अनिर्धारणं, विकल्पः, संशयः, अनिश्चयः, वितर्कः,आशंका, द्वापरः. 2 विकल्प-वितर्क-शीलता, संदिग्ध अस्थिर-मतित्वं, चलचित्तता, लौल्यं, चंचलता.

Indecisive, *a.* संदिग्ध, अनिर्णीत, अनिश्चित, सविकल्प, अनिर्णायक. 2 विकल्प-वितर्क-संदेह-शील, अस्थिर-संदिग्ध-लोल-मति,-धी,--बुद्धि,-चित्त,अनवस्थित, चलचित्त, दोलायमानचित्त; *See* **Fickle.** **-ly,** *adv.* अनिश्चितं, ससंदेहं.

Indeclinable, *a.* अव्यय, अविकार्य, अविभक्तिक; 'an i. word' अव्ययः-यं, निपातः.

Indecorous, Indecorum, *See* **Indecent, Indecency.**

Indeed, *adv.* नूनं, खलु, किल, नाम, वस्तुतः, परमार्थतः, सत्यं, तत्त्वतः, अर्थतः, ध्रुवं, तावत्, हि, एव.

Indefatigable, *a.* अक्लांत, अश्रांत, अविषण्ण, महोत्साह, बहुश्रमक्षम, अनिर्विण्ण; *See* **Assiduous.**

Indefeasible, *a.* अलोपनीय, अविनाश्य.

Indefensible, *a.* अरक्षणीय, अप्रतिपादनीय. अनुत्तर.

Indefinable, *a.* अनिर्वाच्य, अनिर्वचनीय, अवर्णनीय, परिच्छेदातीत. Gen. ex. by किम् *pron.* with अपि; (विकारः कोप्यंतर्जडयति Mal. I).

Indefinite, *a.* अनियत, अनिश्चित, अनिर्दिष्ट, अलक्षित.

Indelible, *a.* अक्षर, शाश्वत(ती *f.*), अनाश्य, अलोप्य, अक्षय्य, अमार्ष्टव्य.

Indelicate, *a.* ग्राम्य, अश्लील. 2 अविनीत, आशिष्ट, असभ्य, अयुक्त; *See* **Indecent.**

Indemnify, *v. t.* (क्षतिं) पूर् 10, निष्कृ 8 U, निस्तृ c., अपाकृ, प्रतिकृ, शुध् c., प्रमृज् 2 P or c.,क्षेमं प्रतिवि-धा 3 U. **-Indemnity,** *s.* क्षति-हानि-पूरणं, क्षतिनिष्कृति *f.* -निस्तारः, अपकारशुद्धि *f.*, प्रतिफलं, क्षेमप्रतिविधानं, योगक्षेमः; 'a paper granting i.' अभयपत्रं, दंडाभयपत्रं.

Indent, *v. t.* दंतुरीकृ 8 U, भंगुरीकृ; अनुक्रकचं छिद् 7 P or अंकु 10. **-ation,** *s.* भंगः, छेदः, भंगुरीकरणं. **-ed,** *a.* दंतुर, दंतुरित, भंगुर, सभंग, अनुक्रकच. **-ure** *s.* प्रतिज्ञानियम-पत्रं.

Independent, *a.* स्वाधीन, अनायत्त,स्वायत्त, स्वतंत्र, आत्मायत्त, आत्मतंत्र, अनाश्रित, अपरायत्त, अ-वि-वश, अपरतंत्र. 2 स्वैरिन्, स्वच्छंद, स्वैरवृत्ति, स्वैर, स्वैर-काम-चारिन्, यादृच्छिक (की *f.*), निर्यंत्रण, अनियंत्रण, स्वेच्छाचारिन्; *See* **Free;** 'i. of' विमुच्य, विहाय, विना; *See* **Except;** निरपेक्ष, अनपेक्ष, in comp., बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवति (S. B. 508) 'i. of external causes' &c. **-ly,** *adv.* स्वातंत्र्येण, स्वैरं, स्वच्छया, स्वच्छंदं, अनापत्तं, यदृच्छया, यथेष्टं, यथाकामं, स्वतंत्रं, अन्यनिरपेक्षं. **-Independence,** *s.* स्वातंत्र्यं, आत्माधीनता, अपरवशता, अपारतंत्र्यं, स्वाच्छंद्यं, स्वैरता, यदृच्छा.

Indescribable, *a.* अकथ्य, अतिकथ, वाग्विभवातिवृत्त, वर्णनातीत, वर्णनाविषय, अवर्णनीय, अनिर्वाच्य; oft. by का-का-किं- with अपि; काप्यभिख्या तयोरासीत् (R. I. 4 6) 'an i. splendour' &c., 'the splendour of that pair is simply i.' किं कथ्यते श्रीरुभयस्य तस्य (K. vii. 78).

Indestructible, *a.* अक्षय्य, अनश्वर, अनाश्य, अविनाशिन्, अजर, अक्षयिन्.

Indeterminable, *a.* अलक्ष्य, अपरिमेय, संदिग्ध.

Indeterminate, *a.* अनियत, अनिर्दिष्ट, अनिर्णीत, संदिग्ध, सविकल्प, अलक्षित; अपरिमित. **-ion,** *s.* **Indicision,** q. v.

Index, *s.* सूचि(ची)पत्रं, सूचि-ची *f.*, निघंटुः, अनुक्रमणिका. 2 प्रदेशि(श)नी, दृशकः. 3 (Indicative of) ex. by ज्ञापक-सूचक-गमक. **-a.,** तद्वेदगमकं पांडित्यवैदग्ध्ययोः (Mal. 1) 'that only is the i. of wisdom and skill'; *See* **Indicate.**

India, *s.* भारत, भ(भा)रतवर्ष, जंबुद्वीपः. **-Indian,** *a.* भारतीय, भारतदेशीय.

Indicate, *v. t.* सूच् 10, द्युत् c., वि-अंज् 7 P or c. गम् c., (गमयति), प्र-निर्-दिश् 6 P, प्र-दृश् c., बुध् c., प्रकटीकृ 8 U, आविष्कृ, निरूप् 10, प्रकाश् c., ज्ञा c., (ज्ञापयति), नि-आ-विद् c., लक्ष् 10, निर्वच् 2 P, or c., अभि-धा 3 U, अवगम् c., प्रति-इ c. (प्रत्याययति), पिशुनयति (D.). **-ion,** *s.* लक्षणं, चिह्नं, लिंगं, व्यंजनं, सूचना, रूपं, अभिज्ञानं; आकूतं, आकारः, इंगित. **2** (Act) प्रकाशनं, निर्देशः, प्रदर्शनं. **-ive, -ory,** *a.* दर्शक, गमक, सूचक, व्यंजक, द्योतक, वाचक, ज्ञापक, निर्देशक, बोधक, पिशुन; 'i. of equal love' तुल्यानुरागपिशुनं (V. 2); 'i. mood' स्वार्थः.

Indict, *v. t.* अभियुज् 7 A, 10, अपवद् 1 A. **-ment,** *s.* अभियोगः, अभिशंसनं, अभियोगपत्रं.

Indifferent, *a.* सामान्य, मध्यम, विगुण. **2** समभाव, समबुद्धि, समदृष्टि, समदर्शिन्, समपक्ष, तटस्थ, अपक्षपातिन्, निःसंग, मुक्तसंग. **3** निरपेक्ष, अनपेक्ष, निरादर, अनभिलाष, निरभिलाष, निरीह, निःस्पृह, विरक्त, निरुत्सुक, अव्यग्र; 'to remain or be i.' उदास् 2 A or उपईक्ष् 1 A, किमित्युदासते भरताः (Mal. 1.); (in good sense) माध्युस्थ्यं अवलंब् 1 A, माध्यस्थ्यमिष्टेप्यवलंबतेर्थे (K. i. 52). **-ly,** *adv.* निरपेक्षं, निरुत्सुकं, निरभिलाषं. **2** मध्यमतया, सामान्यतः. **-Indifference,** *s.* औदासीन्यं, माध्यस्थ्यं, विरक्ति *f.*, वैराग्यं, अनभिलाषः, अनपेक्षा, अनीहा, अस्पृहा, निःस्पृहता, निरीहता, निःसंगता, तादस्थ्यं. **2** प्रमादः, उपेक्षा, अमनोयोगः, अनवेक्षा, अनवधानं, अनादरः. **3** समभावः, अपक्षपातः, असंगः.

Indigent, *a.* दीन, दरिद्र, अधन, दुर्गत, निःस्व, अकिंचन; *See* **Poor. -ly,** *adv.* दीनवत्, सकार्पण्यं, सदैन्यं. **-Indigence,** *s.* दैन्यं, दारिद्र्यं, निर्धनता, दुर्गति *f.*, दुःस्थिति *f.*, निःस्वता, अकिंचनत्वं.

Indigenous, *a.* स्वदेशोद्भव, स्वदेशीय, स्वदेशजात.

Indigestion, *s.* अजीर्णं, अपाकः, अग्निमांद्यं, मंदाग्निः, अन्नविकारः, अन्नापरिपाकः. **Indigestible,** *a.* दुष्पच, दुर्जर, अजर्य.

Indignant, *a.* कोपाकुल, इद्धमन्यु, समन्यु, सरोष, संरंभिन्, कुपित, अतिकुद्ध, अतिरुष्ट, जातामर्ष, संजातकोप, दीप्तकोप. **-ly,** *adv.* सरोषं, सकोपं, सामर्षं, सक्रोधं. **-Indignation,** *s.* मन्युः, संरंभः, कोपः, रोषः, क्रोधः, अमर्षः, रुष् *f.*, प्रतिघः, कुध् *f.*, गुरुकोपः.

Indignity, *s.* अप(व)मानः, परिभवः, अवज्ञा, अनादरः, उपेक्षा, अवधीरणं-णा, तिरस्कारः, धिक्कारः; *See* **Disgrace, Insult,** also.

Indigo, *s.* नीलं; (plant) नीली, काला, क्लीतकिका, ग्रामीणा, मधुपर्णिका, रंजनी, श्रीफली, तुत्था, द्रोणी, दोला, नीलिनी, मेला, तूणी.

Indirect, *a.* अवृजु, वक्र, कुटिल, जिह्म, परोक्ष; 'i. tax'; परोक्षकरः; 'i. hint' वक्रोक्ति *f.*, भंगिभाषणं, वक्रभणितं, भंग्युक्तिः, भंगि-गी *f.* **-ly,** *adv.* भंग्युक्त्या, वक्रोक्त्या. **2** वक्रं, कुटिलं, अवृजु, असरलं, तिर्यक्, तिरस्.

Indiscernible, *a.* अप्रत्यक्ष, अव्यक्त, अदृष्टिगोचर.

Indiscreet, *a.* अविमृश्य-असमीक्ष्य-कारिन्, अविचक्षण, अदूरदर्शिन्, अविवेचक, अनीतिज्ञ, अमतिमत्, विवेकहीन-शून्य, अनवहित **-ly,** *adv.* अविमृश्य, असमीक्ष्य, अविचार्य, निर्विवेकं, अविचार-असमीक्षा-पूर्वं. **-Indiscretion,** *s.* अविवेकः, अविचारः-रणा, असमीक्षा; अविज्ञता, अविमर्शः, असमीक्ष्यकारिता-त्वं; अनवधानं, प्रमादः, अनपेक्षा.

Indiscriminate, *a.* अविविक्त, निर्विशेष, अपरिच्छिन्न, अपृथक्कृत. **2** संकुल, संकीर्ण, अव्यवस्थित. **-ing, -ive,** *a.* अविवेकिन्, अविशेषज्ञ, निर्विवेक. **-ion,** *s.* अविवेकः, अविचारः-रणा, अपरिच्छेदः, अविज्ञानं. **-ly,** *adv.* अविविक्तं, निर्विशेषं. **2** संकुलं. संकीर्णं, अक्रमेण, क्रमं विना.

Indispensable, *a.* अवश्य, अपरित्याज्य, अपरिहार्य, अवश्यकार्य; 'an i. duty' नित्यकर्मन् *n.*

Indispose, *v. t.* विरंज् c., विमुखीकृ 8 U, अरुचि-विरक्ति-उत्पद् c. or जन् c., प्रतिकूलकृ; न प्रवृत् c. **2** अस्वास्थ्यं जन् c. **-ed,** *a.* विरक्त, विमुख-पराङ्मुख (खी *f.*), अनिच्छु, अननुकूल, द्वेषिन्, प्रतिकूल, अप्रवृत्त, अनभिलाषिन्. **2** अस्व(सु)स्थ, अस्व(सु)स्थशरीर; 'severely i.' बलवदस्वस्थशरीर. **-ition,** *s.* विरक्ति *f.*, विरागः, अरुचि *f.*, विमुखता, अनिच्छा, अनीहा, अप्रवृत्ति *f.*, अस्पृहा, प्रतिकूलता. **2** अस्वास्थ्यं, असुस्थता, शरीरास्वास्थ्यं.

Indisputable, *a.* *See* **Incontestable.**

Indissoluble, *a.* अभेद्य, दुर्भेद्य, अलंघ्य; सुदृढ, दृढबद्ध, सुसंहत. **2** अद्राव्य, अक्षरणीय.

Indistinct, *a.* अव्यक्त, अस्फुट, अस्पष्ट, अप्रकाश, अप्रत्यक्ष. **2** संकुल, संकीर्ण; 'an i. speech.' म्लिष्टं, अविस्पष्टं. **-ly,** *adv.* अव्यक्तं, अस्पष्टं. **-ness,** *s.* अव्यक्ति *f.*, अस्पष्टता.

Indistinguishable, *a.* अपरिच्छेद्य, अविज्ञेय, अलक्ष्य.

Indite, *v. t.* लिख् 6 P.

Individual, *s.* व्यक्ति *f.*, पुरुषः, एकजनः, अवयवः. **-*a.*** व्यक्तिगत, अध्यापक, अव्यापिन्, एक. **-ity,** *s.* व्यक्तिता, अव्यापकत्वं, व्यक्तिः. **2** पृथक्त्वं, पार्थक्यं, ममता. **-ly,** *adv.* एकैकशः, प्रत्येकशः, एकैकं, प्रत्यवयवं, अवयवशः, पृथक्, पृथक्.

Indivisible, *a.* अविभाज्य, अभेद्य, अनंश्य, निरवयव.

Indocile, *a.* अविनेय, अवश्य, अविधेय, अवशग, दुर्दम, दुर्दीत, अनधीन, अनायत्त, स्वैरिन्, स्वच्छंद.

Indoctrinate, *v. t.* *See* **Advise.**

Indolent, *a.* तंद्रिल, अलस, तंद्रालु, मंद, निरुद्यम, उद्योगविरक्त, कार्यद्वेषिन्, कार्यविमुख (स्त्री *f.*), निश्चेष्ट, निरुत्साह, जड, मंदक्रिय. **-ly,** *adv.* निरुद्यमं, अलसवत्, मंदतया. **-Indolence,** *s.* तंद्रा, आलस्यं, तंद्रि-द्री *f.*, मंदता, जाड्यं, अनुद्योगः, कार्यविमुखता, अनुत्साहः, कार्यद्वेषः.

Indomitable, *a.* दुर्दम, दुर्दीत, अदम्य, अशून्य. **2** अदीन-अकृपण-चेतस्, अत्युत्साहवत्, उरुसत्व.

Indoors, *See* under **Door.**

Indubitable, *a.* असंदिग्ध, सुनिश्चित, अनाशंक्य, निःसंशय; *See* **Certain.**

Induce, *v. t.* अनु-नी 1 P, प्रवृत् c., उद्-नि-युज् 10, प्रचुद् 10, प्रोत्सह् c., प्रेर् c.; *See* **Incite.** **2** आ-क्षिप् 1 P, प्र-वि-लुभ् c., हृ 1 P; oft. ex. by causal forms. **3** उत्पद् c., जन् c. (जनयति), सं-उद्-भू c., आवह् 1 P. **4** प्रभू c. **-ment,** *s.* प्रोत्साहनं, प्रवर्तनं, अनुनयः; प्रचोदनं. **2** कारणं, हेतुः, निमित्तं; प्रलोभनं; *See* **Incentive.** **-Induction,** *s.* अनुमानं; अपवादः. **-Inductive,** *a.* आनुमानिक (की *f.*).

Induct, *v. t.* धर्माधिकारे नियुज् 7 A, 10. **-ion,** *s.* प्रतिष्ठापनं.

Indulge, *v. i.* आ-सज् pass, आसक्त-निरत-*a.* भू 1 P (with loc.); सेव् 1 A, भज् 1 U. **-*v. t.*** उप-,लल् 10. उपच्छंद् 10; अनुग्रह् 9 U, तृप् c., तुष् c.; अनु-वृत् 1 A, अनुरुध् 4 A, अनुवि-धा 3 U, अनुप्रविश् 6 P, पूर् 10. **2** अनु-ज्ञा 9 P, अनु-मुद् 1 A, अनु-मन् 4 A, क्षम् 1 A, 4 P, उपेक्ष् 1 A, न विरुध् 7 U, न संयम् 1 P; न निग्रह् 9 U, न निषिध् 1 P. **-ence,** *s.* आसक्ति *f.*, निरति *f.*, सेवा, आसंगः; शीलता-आलुता-in comp. **2** अदमः, अनिषेधः, असंयमः, अनिग्रहः, अप्रतिरोधः. **3** तोषणं, तर्पणं, अनुवर्तनं, लालनं, उपच्छंदनं, अनुरोधः, अनुविधानं, अनुवृत्ति *f.*, अनुवृत्तं, छंदोनुवृत्तं. **4** प्रसादः; अनुग्रहः; अनुज्ञा, अनुमति *f.* **-ent,** *a.* सदय, अनुग्रहशील, अनुग्राहिन्, अनुकूल, अनुकंपक, करुणात्मक. **2** छंदोनुवर्तिन्, छंदानुरोधिन्, अनुविधायिन्. **-ently,** *adv.* सानुरोधं, छंदोनुरोधेन, सदयं, सानुग्रहं, सकारुण्यं.

Indurate, *v. t.* घनीकृ 8 U, दृढीकृ, संहन् 2 P. **-*v. i.*** घनीभू. **-ion,** *s.* घनीकरणं, काठिन्यं, घनीभावः, घनता.

Industry, *s.* उद्यमः, उद्योगः, व्यवसायः, अध्यवसायः, उत्साहः, यत्नः, अभियोगः, चेष्टा, क्रिया, कार्याभिनिवेशः, कर्मशीलता, कार्यप्रसक्ति-प्रवृत्ति *f.*, अभ्यासः, अनालस्यं, परिश्रमः, आ-प्र-यासः, सोद्योगता. **-ious,** *a.* उद्यमिन्, उद्योगिन्, व्यवसायिन्, सोद्यम, सोद्योग, सोत्साह, अनलस, कार्यासक्त, कर्मशील, कर्मनिष्ठ, कर्मासक्त, कर्मशूर, क्रियापरायण, अतंद्रित, उद्युक्त, उद्यत, कर्मप्रसित. **-iously,** *adv.* सोद्यमं, सोद्योगं, सोत्साहं, सप्रयत्नं, प्रसक्तं, अभिनिवेशेन.

Inebriate, *v. t.* मद् c., मदं उत्पद् c. **-ed,** *a.* मत्त, क्षीव, मदोन्मत्त, उन्मद. **-ion,** *s.* मदः, मादः, उन्मादः, क्षीवता.

Ineffable, *a.* *See* **Indescribable.**

Ineffaceable, *a.* अनपमृज्य, अलोपनीय.

Ineffective, Ineffectual, *a.* निष्फल, विफल, व्यर्थ, मोघ, निरर्थक, निष्प्रयोजन. **2** निर्बल, असमर्थ, अक्षम, असिद्धिकर (री *f.*), निष्प्रभाव, अवीर्यवत्, *See* **Fruitless.** **-ly,** *adv.* निष्फलं, व्यर्थं, मुधा, वृथा, निरर्थकं; निर्बलं. **-Inefficacy,** *s.* अप्रभावः, अक्षमता, अशक्ति *f.*, असामर्थ्यं, शक्तिहीनता, वैफल्यं, मोघत्वं, व्यर्थता, अनर्थकत्वं. **-Inefficacious,** *a.* अप्रभाव, अक्षम, असमर्थ, तेजोहीन, अप्रबल. **2** मोघ, व्यर्थ, अकिंचित्कर (री *f.*), विफल, निष्फल. **-Inefficient,** *a.* अनुपयुक्त, कार्यासक्षम, अनलंकर्मीण, अयोग्य, अकार्यसाधक. **2** अप्रबल.

Inelastic, *a.* स्थितिस्थापकत्वहीन.

Inelegant, *a.* अशोभन, अश्लील, अप्रशस्त, अविनीत; *See* **Indecent.** **-Inelegance,** *s.* अलावण्यं; अशोभा, &c.

Ineligible, *a.* अवरणीय, अयोग्य, अयुक्त.

Ineloquent, *a.* वागपटु; अवाग्मिन्.

Inept, *a.* अयोग्य, अनुचित, अनर्ह. **2** मूढ, मूर्ख, बालिश.

Inequality, *s.* वैषम्यं, असाम्यं, विषमता, विभेदः, असादृश्यं, भिन्नता.

Inequitable, *a.* अन्याय्य, अधर्म्य, न्यायविरुद्ध.

Ineradicable, *a.* अनुन्मूल्य, अविनाश्य.

Inert, *a.* जड, निश्चेष्ट, अचेष्ट, अचल, गतिहीन, निश्चल, अचेतन. **2** अनुद्योगिन्, मंद, तंद्रिल, जड, अलस. **-ly,** *adv.* मंदं, जडवत्. **-ness,** *s.* जाड्यं, अचेष्टा, अनुद्योगः, मंदता, आलस्यं, कार्यविमुखता. **-Inertia,** *s.* निश्चलता, जाड्यं.

Inestimable, *a.* अनर्घ-र्घ्य, अमूल्य, अत्युत्कृष्ट.

Inevitable, *a.* अपरिहार्य, अवश्यभाविन्, अहार्य, अवारणीय, अनिवार्य, नियत, भवितव्य, अवश्यक, आनुषंगिक (की *f.*). **-y,** *adv.* अवश्यं, नियतं, ध्रुवं, एकांत in comp., (एकांतविध्वंसिषु पिंडेषु R. II. 57.)

Inexcusable, *a.* अक्षम्य, असोढव्य, अमर्षणीय. **2** निरुत्तर, अनिवार्यदोष, निर्व्यपदेश.

Inexhaustible, *a.* अक्षय, अक्षयिन्, अविनाश्य, अविध्वंसिन्, अनंत, अव्यय.

Inexorable, *a.* निष्ठुर, निरनुरोध, अनाराध्य, अनम्य, अननुनेय, निरनुक्रोश, निर्दय, काठिण-पाषाण-हृदय, कठोरचित्त.

Inexpedient, *a.* अनुचित, अयोग्य, अनर्ह, अनुपपन्न.

Inexperience, *s.* अननुभवः, अपक्वबुद्धित्वं, अपरिणतमतित्वं, व्यवहारानभिज्ञता, अबहुदर्शित्वं. **-ed,** *a.* अपक्वबुद्धि, अपरिणतप्रज्ञ, अनभिज्ञ, व्यवहारानभिज्ञ, अल्पदृश्वन्, अबहुदर्शिन्.

Inexpert, *a.* अकुशल, अनिपुण, अविदग्ध, अपटु, अदक्ष.

Inexpiable, *a.* अशोध्य, प्रायश्चित्ताक्षम, अनिष्करणीय.

Inexplicable, *a.* अव्याख्येय, अगम्यार्थ, दुर्बोध, गहन, अबोध्य, दुर्गम.

Inexpressible, *a.* अनभ्युद्य, अकथ्य; *See* **Indescribable.**

Inextinguishable, *a.* अशाम्य, अनिर्वाप्य.

Inextricable, *a.* दुस्तर, अनुद्धार्य.

Infallible, *a.* अमोघ, अव्यर्थ, निश्चित. **2** अभ्रमाधीन, प्रमादाक्षम, अस्खलनशील, अस्खलित-मति-बुद्धि, भ्रमानर्ह. **-infallibility,** *s.* अभ्रांति *f.*, प्रमादाक्षमता, अप्रमादित्वं.

Infamy, *s.* अ-अप-यशस् *n.*, दुष्कीर्ति *f.*, अकीर्तिः, अप्रतिष्ठा, वाच्यता, कलंकः, अपकर्षः. **-ous,** *a.* अयशस्कर (री *f.*), निंद्य, वाच्य, कलंकावह, गर्ह्य, अतिदुष्ट, गहणाय. **4** (Of persons) दुष्कीर्तिमत्, अयशस्विन्, अपयशस्क, ख्यातगर्हण, अभिशस्त. **-ousness,** *See* (*s.*).

Infant, *s.* बालः, शिशुः, बालकः, स्तनंधयः, स्तनपेः-पाः, अर्भकः, दारकः, डिंभः, क्षीरपाः, स्तन-क्षीर-पायिन् *m.*, उत्तानशयः; (all *f.* also). *-a.*, **-ile, -ine,** *a.* बाल-योग्य, बालकीय, (*s.*) in comp. **2** व्यवहारायोग्य, अप्राप्तव्यवहारदशः. **'i. state.'** बालावस्था. **-infancy,** *s.* बाल्यं, शैशवं, शिशु-बाल-भावः, बाल्यावस्था, शिशु-बाल-कालः. **2** प्रथम-बाल-अवस्था, आरंभः, प्रारंभः. **-infanticide,** *s.* बालहत्या, शिशुवधः- हत्या. **2** बालहन् *m.*, बालघातकः.

Infantry, *s.* पत्तयः, पदातयः, पदातिकाः (*pl.*). पदातिबलं, पादातं, पत्तिसैन्यं.

Infatuate, *v. t.* मुह् c., मद् c., बुद्धि-ज्ञानं हन् 2 P or लुप् c. **-ed,** *a.* मूढ, वि-सं-परि-मूढ, विमोहित, हत or नष्ट-बुद्धि or ज्ञान, नष्टलुप्त-संज्ञ, बुद्धिभ्रष्ट, मोहोपहत, उन्मत्त; 'i. by lust,' कामांध, काममूढ. **-ing,** *a.* मोहिन, मोहकारिन्, मोहन. **-ion,** *s.* मोहः, वि-सं-मोहः, मूढता, मूर्खता, बुद्धि-ज्ञान-लोप-भ्रंशः-नाशः, विवेक-हानि *f.*-लोपः.

Infeasible, *a.* असाध्य, दुष्कर, असंभाव्य, अनिष्पादनीय.

Infect, *v. t.* (अन्यस्मिन्) संचर् c., संक्रम् c., (रोगेण) संसृज् 6 P, रोगाक्रांत-*a.* कृ 8 U. **2** दुष् c. (दूषयति), भ्रंश् c.; *See* **Corrupt. -ed,** *a.* रोगदूषित-संसृष्ट-आक्रांत, संचार-संपर्क-संसर्ग-दुष्ट or दूषित. **2** दुष्ट, दूषित, भ्रष्ट. **-ion,** *s.* संचारः, संक्रमः, संसर्ग-संचार-सपर्क-स्पर्श-दोषः, रोगसंचारः-संसर्ग-संपर्कः. **2** दोषः, दूषणं. **-ious, -ive,** *a.* संचारिन्, संसर्गिन्, स्पर्शसंचारिन्, संसर्गीय, सांसर्गिक (की *f.*).

Infecund, *a.* वंध्य, निष्फल; *See* **Fruitless.**

Infelicity, *s.* असुखं, अकुशलं, अक्षेमः; दुःखं; आपद्-विपद् *f.* **-ous,** *a.* अयोग्य, अधन्य.

Infer, *v. t.* अनु-मा 3 A, 2 P, सं-भू c., उत्ती 1 P, ऊह् 1 A, तर्क् 10, अपवह् 1 P, अवमद् 1 P; 'his dignity may be i. ed from his form' संभावनीयानुभावास्याकृतिः (S. 7); 'her very form leads (me) to i. her being superhuman' आकृतिरवानुमापयत्यमानुषतां (Ka. 132). **-able,** *a.* अनुमेय, आनुमानिक (की *f.*), तर्कसाध्य-गम्य. **-ence,** *s.* (Process) अनुमिति *f.*, युक्ति *f.*, अपोहनं, परामर्शः. **2** (Result) अनुमानं, अपोहः, अपवाहः, तर्कः, अभ्यूहः; तर्कनिर्णयः-सिद्धांतः. **-ential,** *a.* अनुमानिक-आनुषंगिक (की *f.*), अनुमान-तर्क-सिद्ध.

Inferior, *a.* ऊन, न्यून, अल्पीयस्. **2** नीच, हीन, नि-अप-कृष्ट, अवर, अधर, जघन्य, अधम, अनुत्तम; *See* **Mean.** **3** अधःस्थ, निम्न, अधर, नीचस्थ, अधस्तन (नी *f.*). **4** गौण (णी *f.*), अप्रधान, उपसर्जन, अमुख्य; oft. by कु or दुस् pr., 'of an i. caste' हीन-जाति-वर्ण, दुर्वर्ण, कुकुल; 'i. in rank' अवरपदभाक्; 'i. in age' कनीयस्, अवरज, अनुज; 'it will be clear who is i. and who is superior' अधरोत्तरव्यक्तिर्भविष्यति (M. 1); gen. ex. by परिहा pass. with abl. for 'to'; 'she is not i. to Sachi in majestic dignity' ओजस्वितया न परिहीयते शच्याः (V. 3). **-s.** अवरपदभाक् *m.*, हीनपदस्थः, अवरः. **-ity,** *s.* न्यूनता, ऊनता, हीनता, अधरता, अवरत्वं, अपकर्षः, अप्राधान्यं, गौणता.

Infernal, *a.* नारक (की *f.*), नरकीय, नरकस्थ, निरयगत. **2** आसुर (री *f.*), राक्षस (सी *f.*); 'i. regions' नरकः, निरयः; पाताले, अधोभुवनं, नागलोकः, प्रेतलोकः, बालिसद्मन् *n.* -स. नरकवासिन् *m.*, नरकस्थः.

Infertile, *a.* *See* **Fruitless.**

Infest, *v. t.* बाध् 1 A, उप-रुध् 7 U, उप-प्लु 1 A, उप-द्रु 1 P, उपपीड् 10, उपसृज् 6 P, क्लिश् 9 P. **-ed,** *a.* उपसृष्ट, बाधित. **2** (नित्यं) सेवित, जुष्ट, आश्रित; 'i. by wild animals' श्वापदजुष्ट.

Infidel, *s.* नास्तिकः, अश्रद्धालुः, धर्मनिंदकः, अनीश्वरवादिन् *m.*, पाषंडः. -*a.* अश्रद्दधान, नास्तिकवृत्ति, अनीश्वरवादिन, अविश्वासिन, मिथ्यादृष्टि. **-ity,** *s.* नास्तिकता, अनीश्वरवादः, देव-धर्म-निंदा, शास्त्राश्रद्धा. **2** अभक्ति *f.*, व्यभिचारः, विवाहसमयभंगः. **3** विश्वासघातः-भंगः.

Infinite, *a.* अनंत, अमेय, अमित, अपरिमित, अपार, निर्मर्याद, निरवधि, निःसीम, अपर्यंत; 'an i. number' परार्धं. **-itude, -y,** *s.* आनंत्यं, अनंतता, अपारता, सीमाभावः, असीमता. **-ly,** *adv.* अमितं, अनंतं अत्यंतं, अतीव, अतिमात्रं.

Infinitesimal, *a.* अतिसूक्ष्म, अत्यंतसूक्ष्म.

Infinitive, *s.* सामान्य-साधारण-रूपं, the technical name being तुमुन्.

Infirm, *a.* दुर्बल, क्षीण, अशक्त, अवसन्न, क्षीण-बल-सत्त्व-शक्ति; *See* **Feeble.** **2** अस्थिर, स्खलित, अधीर, अदृढ; 'the step being i.' नातिस्थिरचरणसंचारस्य (Ka. 35). **3** जीर्ण, जरापरिणत, जरातुर, जरठ. **-ity,** *s.* दौर्बल्यं, अशक्तिः *f.*, वीर्य-शक्ति-हानि *f.* **2** दोषः, छिद्रं, विकारः, अपराधः, वैकल्यं, अगुणः. **3** व्याधिः, रोगः, आमयः. **-Infirmary,** *s.* आतुरशाला, रुग्णालयः.

Infix, *v. t.* *See* **Fix.**

Inflame, *v. t.* दीपू c., सं-उत्-प्र, ज्वल् c., तप् c., दह् 1 P, सं-इंध् 7 A. **2** वर्धिज् c., प्रोत्सह् c., उद्दीप् c. (as feelings); will only serve to i. his grief' संदीपना एव दुःखस्य (विनोदनोपायाः) (U. 3); प्रकुप् c., रुष् c., *See* **Enrage, Excite;** 'i. ed with wrath' इद्धमन्यु, कोपज्वालित-प्रदीप्त; 'i. ed with pride' समिद्धदर्प; 'to be i.-ed' ज्वल् 1 P, दीप् 4 A, दह्-इंध् pass. **-Inflammable,** *a.* दाह्य, ज्वलनशील, आशुज्वलनीय, दाहात्मक. **-Inflammation,** *s.* तापनं, दीपनं, दाहनं. **2** तापः, दाहः, क्षोषः. **3** (In medicine) पाकः; 'i. of the eyes' नेत्रपाकः; अस्थिपाकः, &c. **-Inflammatory,** *a.* तापक, दीपक, दाहक, दीपन, दाहिन्, तापकारिन्. **2** दाहयुक्त-विशिष्ट, सदाह, सताप, दाह in comp.; 'i. fever' दाहज्वरः.

Inflate, *v. t.* ध्मा 1 P, ध्मि c., स्फाय् c. (स्फावयति), विस्तृ c., उद्-हन् 2 P; उत्सिच् 6 P or c., उन्मद् c.; 'i. with air' वातेन पूर् c. or पूर् 10, उच्छ्रनीकृ 8 U. **-ed,** *a.* ध्मात, स्फीत, शून, उत्सिक्त, उद्धत, उन्मत्त; 'i. with pride' दर्पाध्मात, मदोद्धत, गर्वोद्धत, 'i. with air' वातफुल्ल, वातपूरितपूर्ण. **-ion,** *s.* आध्मानं, वातपूरणं.

Inflect, *v. t.* नम् c., आवृज् 10, भुज् 6 P, कुंच् c. **2** विकृ c., रूपाणि आ-ख्या 2 P; 'the word is not i. ed' तच्छब्दस्य विभक्त्यादिविकारा न जायंते. **-ion,** *s.* आ-, नति *f.*, आवर्जनं. **2** विकारः, रूपं, विभक्त्यादिकार्यं, कार्यं, विभक्ति *f.*

Inflexible, *a.* अनम्य, अनावर्ज्य. **2** दृढ, कठिन, संहत; *See* **Hard.** **3** दृढ-स्थिर-संकल्प-मति-निश्चय, धीर. **4** कठोर, कठिनहृदय, निरनुरोध, निरनुक्रोश, क्रूर. **-Inflexibly,** *adv.* सुदृढं, दृढनिश्चयपूर्वं, निर्विकल्पं, कठोरं, निरनुरोधं. **-Inflexibility,** *s.* अनम्यता, काठिन्यं, संहननं, कठोरता, धैर्यं, दृढसंकल्पत्वं.

Inflict, *v. t.* प्र-णी 1 P, प्रवृत् c., प्रयुज् 7 A, 10, आचर् 1 P, विधा 3 U, कृ 8 U, पत् c., आ-नि-धा; 'to i. pain on' दुःखे पत् c. or दुःखस्य पदं नी 1 P; oft. ex. by कृ or दा 3U; 'i. punishment' दंडं कृ or दा. **-ion,** *s.* प्रणयनं, विधानं, प्रवर्तनं, दानं, करणं; 'i. of punishment' दंडप्रणयनं, दंडाधानं.

Influence, *s.* बलं, प्रभावः, शक्ति *f.*, सामर्थ्यं, वशः-शं, गुणः, प्रतापः. **2** प्रतिष्ठा, गौरवं, वर्णः, अधिकारः, उत्कर्षः, पद or स्थान-गौरवं or माहात्म्यं; 'under the i. of' वश, वश्य, विधेय, अधिष्ठित, आयत्त, अधीन, तंत्र, &c. in comp.; 'under the i. of sleep' निद्रा-वश-विधेय; 'through the i. of love' कामाधीनत्वात्; 'planetary i.' ग्रहावेशः. -*v. t.* अधि-ष्ठा 1 P; प्र-भू 1 P, ईश् 2 A (with gen.); वशीकृ 8 U. **2** प्रवृत् c., प्रेर् c., प्रोत्सह् c., प्र-नि-युज् 10, नी 1 P, आकृष् 1 P, हृ 1 P; 'a fool has his mind i. ed, by the convictions of others' मूढः परप्रत्ययनेयबुद्धिः (M. 1); 'to be i. ed by' वशं गम् 1 P, विकृ pass., आयत्त. *a.* भू; 'not i. ed by anger or passions' अनायत्तो रोषस्य, अवशो विषयाणां (Ka. 45). **-Influential,** *a.* प्रतिष्ठापन्न, सप्रताप, लब्धवर्ण, प्रतिष्ठित, सगौरव; महत्, गुरु, प्रबल, प्रभाववत्; 'an i. meeting' लब्धप्रतिष्ठजनानां समाजः. **-ly,** *adv.* सप्रतापं, सप्रभावं, सगौरवं.

Influx, *s.* आगमः, अंतः-प्रवाहः-सरणं.

Infold, *v. t.* वेष्ट् 1 A or c., आच्छद् c., पिधा 3 U, कोशे नि-धा. **2 Clasp,** q. v.

Inform, *v. t.* वि-ज्ञा c. (ज्ञापयति), नि-आ-विद् c., शंस् 1 P, कथ् 10, आ-ख्या 2 P or c., बुध् c., संदिश् 6 P, श्रु c., अवगम् c. (गमयति); *See* **Tell.** **2** (Against) आ-ह्वे 1 A, अभियुज् 7 A, 10, अभिशंस्, आधृष् c. **-ant,** *s.* विज्ञापकः, आ-नि-वेदकः; ख्यापकः. **-ation,** *s.* निवेदनं, विज्ञापनं, बोधनं, ख्यापनं. **2** वार्ता, प्रवृत्ति *f.*, उदंतः, वृत्तांतः, समाचारः. **3** वि-,ज्ञानं, बोधः, प्रबुद्धता, अवगमः. **4** अभियोगः, अभिशंसनं. **-er,** *s.* सूचकः पिशुनः, कर्ण(र्णे)जपः.

Informal, *a.* अविधि, नियम-विधि-रीति-विरुद्ध, उत्सूत्र. **-ity,** *s.* अविधिः, नियम or विधि-विरोधः or भंगः, अव्यवस्था, उत्क्रमः, अनियमः, अरीति *f.* **-ly,** *adv.* विधि-नियम-विरुद्धं, अयथाविधि.

Infraction, *s.* भंगः, अति-व्यति-क्रमः, लंघनं, उल्लंघनं.

Infrequent, *a.* असतत, अनभीक्ष्ण, विरल, अनित्य. **-ly,** *adv.* अनित्यं, अबहुशः, कदाचित्.

Infringe, *v. t.* उत्-,लंघ् 1 A, 10, भंज् 7 P. अति-व्यति-क्रम् 1 U, 4 P, अतिचर् 1 P; लुप् c., व्याहन् 2 P. **2** भंज्, खंड् 10, भिद् 7 P. **-ment,** *s.* लंघनं, उल्लंघनं, भंगः, अति-व्यति-क्रमः, लोपः, व्याघातः.

Infuriate, *v. t.* **Enrage,** q. v. **-***a.* संरब्ध, कोपाकुल, क्रोधांध; *See* **Furious.**

Infuscate, *See* **Darken.**

Infuse, *v. t.* निषिच् 6 P, संमिश्र् 10, संसृज् 6 P, समा-नि-आ-धा 3 U, प्र-नि-क्षिप् 6 P, आ-नि-प्र-विश् c. **2** क्रथ् 1 P; 'does not i. strength into their understanding' न तयोर्ज्ञाने शक्तिं करोति (U. 2); 'i. into the mind' उपदिश् 6 P, चित्ते नि-विश् c.; 'i. with perfumes' भू c., वास् 10. **-ion,** *s.* निषेकः, आधानं, प्रक्षेपः-पणं, निवेशनं, संमिश्रणं. **2** फांटः, हिमं (cold i.); निर्यासः, निर्यूहः, क्राथः. **3** वासनं, भावनं.

Ingathering, *s.* शस्यसंग्रहः, फलसंचयः.

Ingeminate, *a.* पुनःपुनः कृत. **-***v. t.* पुनःपुनः कृ 8 U, द्विगुणीकृ.

Ingenious, *a.* चतुर, विदग्ध, प्रवीण, दक्ष, पटु, विचक्षण, उपायज्ञ, विज्ञ, युक्तिमत्, कल्पक, निपुण, तीक्ष्ण-सूक्ष्म-बुद्धि. **2** सुप्रयुक्त, युक्तिकृत. **-ly,** *adv.* चतुरं, सपाटवं, युक्त्या, निपुणवत्, सुप्रयोगेण. **-ness, -Ingenuity,** *s.* युक्ति *f.*, सुप्रयोगः, कल्पना, चातुर्यं, वैदग्ध्यं, पाटवं. दाक्ष्यं, कल्पकशक्ति *f.*, मतिसूक्ष्मता.

Ingenuous, *a.* निष्कपट, निर्व्याज, अमाय, शुद्धमति, अजिह्म; *See* **Frank, Honest.** **2** उदार, अभिजात, महानुभाव. **-ly,** *adv.* निष्कपटं, अमायया. **-ness,** *s.* निष्कापट्यं, अमाया, अव्याजः, सारल्यं, आर्जवं, विमलात्मता, शुद्धभावः. **2** औदार्यं, महानुभावः, आभिजात्यं.

Ingle, *s.* अग्निः. **2** उद्धानं, उष्मानं.

Inglorious, *a.* *See* **Infamous.**

Ingot, *s.* पिंडः; 'i. mould' तू(तु)लिका, ईषि(षी)का.

Ingraft, *v. t.* प्रतिवप् 1 P, प्रति-नि-खन् 1 P; *See* **Engraft** also.

Ingrain, *v. t.* दृढी-स्थिरी-कृ 8 U. **2** दृढं निविश् c.

Ingrate, *a.* कृतघ्न (घ्नी *f.*), अकृतज्ञ, अकृतवेदिन्. **-Ingratitude,** *s.* कृतघ्नता, अकृतज्ञता, उपकारविस्मरणं-नाशनं, अकृतवेदित्वं.

Ingratiate, *v. t.* प्रसादभाजनं भू 1 P, आराध् c., प्रसद् c., अनुरंज् c., उपलल् 10, अनुग्रहं प्राप् 5 P.

Ingredient, *s.* अंगं, साधनं, भागः, अंशः, घटकः, घटकावयवः, उपकरणं.

Ingress, *s.* प्रवेशः, प्रवेशनं, प्रवेशद्वारं-मार्गः.

Ingulf, *See* **Engulf.**

Ingurgitate, *v. t.* सतृष्णं or अतिलोभेन गॄ 6 P.

Inhabit, *v. t.* वस् 1 P, नि-प्रति°, (with loc.); आ-अधि-वस्, अध्यास् 2 A, आश्रि 1 U, सेव् 1 A, जुष् 6 A, अधि-ष्ठा 1 P (all with acc.); 'thickly i. ed' जनाकीर्ण. **-able,** *a.* वासयोग्य, निवासार्ह, वासक्षम; आजीव्य. **-ant,** *s.* नि-,वासिन्-स्थायिन् *m.*, स्थः in comp.; oft. by derivatives; 'a merchant i. of Kausâmbî' कौशांबीयो वणिक्; आयोध्यिकः, अत्रत्यः, तत्रत्यः, &c.

Inhale, *v. t.* श्वस् 2 P, नि-पा 1 A, अंतः ग्रह् 9 U; वायुना पूर् 10.

Inharmonious, *a.* विस्वर, कर्कशस्वन, असंगत.

Inhere, *v. i.* निवस् 1 P, नि-ष्ठा 1 P, अंतः वृत् 1 A or जन् 4 A or भू 1 P. **-ence,** *s.* निष्ठा, संस्था, अंतर्वृत्ति *f.*, अधिष्ठानं, अनुषंगः. **-ent,** *a.* निष्ठ in comp.; अंतर्जात, अंतर्वर्तिन्, निरूढ, अनुषंगिन्, समवायिन्. **2** निज, सहज, स्वभावज, स्वाभाविक-नैसर्गिक (की *f.*), प्रकृतिस्थ. **-ently,** *adv.* प्रकृत्या, स्वभावतः.

Inherit, *v. t.* अन्वयागमेन-कुलक्रमेण-प्राप् 5 P, परंपरया प्राप्, अधिकारीभू 1 P, पैतृकाधिकारं लभ् 1 A. **-ance,** *s.* रिक्थलाभः, अंश-दाय-प्राप्ति *f.*, पैतृकरिक्थप्राप्तिः. **2** दायः, रिक्थं, पैतृकं, पैतृकं धनं or रिक्थं, औद्धारिकं, क्रमागतधनं. **3** उत्तराधिकारः, रिक्थाधिकारः. **4** दायभागः. **-ed,** *a.* क्रमागत, परंपरागत-प्राप्त, क्रमायात. पैतृक (की *f.*), पितृप्राप्त, अन्वयागत. **-or,** *s.* दायादः, रिक्थाधिकारिन् *m.*; *See* **Heir.**

Inhibit, *v. t.* *See* **Forbid.**

Inhospitable, *a.* आतिथ्यविमुख (खी *f.*), अनातिथेय (यी *f.*), असत्कारशील, सत्कार-द्वेषिन्. **-Inhospitality,** *s.* अतिथ्यनादरः-आतिथ्यविमुखता, असत्कारः.

Inhuman, *a.* अमनुष्यधर्मन्. **2** क्रूर, नृशंस, निर्दय, निर्घृण, निष्ठुर, कठोरहृदय; *See* **Cruel.** **-ity,** *s.* क्रौर्यं, निर्दयता, नैष्ठुर्यं. **-ly,** *adv.* निर्दयं, निष्ठुरं, निष्करुणं, क्रूरवत्.

Inhume, *v. t.* भूमौ निखन् 1 P or नि-धा 3 U or निविश् c. or निक्षिप् 6 P. **-ation,** *s.* निखननं, भूमौ निवेशनं.

Inimical, *a.* परिपंथिन्, वैरिन्, अहित, प्रत्यर्थिन्, विरोधिन्, विपक्ष, द्वेषिन्, प्रतिकूल; *See* under **Enemy.** **-ly,** *adv.* अहितबुद्ध्या, शत्रुभावेन, शत्रुवत्, शत्रु-द्रोह-बुद्ध्या, प्रतिकूलं, विरुद्धं, सवैरं.

Inimitable, *a* असाधारण (णी *f.*), अननुकार्य, अनुपमेय, अप्रतिम, अनुपम, अद्वितीय, अनन्य-साध्य-शक्य.

Iniquity, *s.* अन्यायः, दौर्जन्यं, दुरात्मता, दुर्वृत्तता, खलता, अधर्मः, अन्याय्यता. **2** पापं, कुकर्मन् *n.*, दुराचारः, अपचारः-कर्मन् *m.*, दुष्कर्मन् *m.* महापराधः. **-ous,** *a.* अन्याय्य, धर्म्य, दुष्ट, खल, पापिष्ठ, पाप, धर्मापेत, अन्यायिन्, अधार्मिक (की *f.*); (of persons only) दुरात्मन्, दुर्जन, दुर्वृत्त, दुराचार, कुकर्मन्. **-ously,** *adv.* अन्यायेन, अधर्मेण, खलवत्, दुष्टवत्.

Initial, *a.* प्रथम, पूर्व, अग्रिम, आदिम, आद्य, प्राथमिक (की *f.*), आदि in comp. *s.* आद्याक्षरं, आदिवर्णः, प्रथमाक्षरं.

Initiate, *v. t.* आरभ् 1 A, उपक्रम् 1 A, प्रस्तु 2 U. **2** प्रथमतस्त्वानि उपनी 1 A, अभिमंत्र् 10 A, उपदिश् 6 P, दीक्ष् 1 A, (संस्कारपूर्वं) प्रविश् c. **-ed,** *a.* दीक्षित, कृतसंस्कार, उपनीत, कृतदीक्ष, अभिमंत्रित. **2** कृतविद्योपक्रम, विद्याप्रविष्ट, कृतप्रवेश. **-ion,** *s.* आरंभः, उपक्रमः, प्रथमशिक्षा-उपदेशः, विद्यातत्त्वोपदेशः, दीक्षा, संस्कारः, अभिमंत्रणं, उपनयः, विद्याप्रवेशः. **2** दीक्षाकरणं. **-lve,** *s.* आरंभः, उपक्रमः. **-a-,** **-ory,** *a.* आद्य, आरंभक, उपक्रमकारिन्.

Inject, *v. t.* अंतः प्रविश् c. or निक्षिप् 6 P. **-ion,** *s.* अंतःक्षेपणं.

Injudicious, *a.* अविवेकिन्, अविचक्षण, विचार-विवेक-शून्य, विचारहीन, असमीक्ष्यकारिन्-कृत; *See* **Indiscreet.**

Injunction, *s.* शासनं, आज्ञा, आ-नि-देशः, नियोगः; ' sacred i. ' विधिः, कल्पः, चोदना; ' scriptural i. ' शास्त्रचोदना, धर्मसूत्रं, शास्त्राज्ञा.

Injure, *v. t.* पीड् 10, नि-अप-कृ 8 U, दुष् 5 P, हिंस् 7 P (a strong term); सं-, बाध् 1 A, अर्द् 1 P or c., क्षण् 8 P, क्षि 1, 5 P or c., दुष् c. (दूषयति), व्यथ् c. (व्यथयति), द्रुह् 4 P (with dat.), अपराध् 4, 5 P (with loc. or gen.). **-er,** *s.* अपकर्तृ *m.*, पीडकः, हिंसकः, अपकारकः, द्रोहिन् *m.* **-ious,** *a.* पीडाकर-अनिष्टकर-हानिकर-अहितकर (री *f.*), अहित, बाधक, अपकारक, हिंसक, द्रोहिन्; घातक, घातुक, हिंसात्मक, हिंस्र, हिंसालु, शरारु, नृशंस. **-iously,** *adv.* सापकारं, सापायं, हिंसाक्षति-पूर्वं. **-y,** *s.* पीडा, अपकारः, अपकृति *f.*, अपक्रिया, अपायः, हिंसा, अहितं, अनिष्टं, हानि *f.*, निकृतिः; अन्यायः, द्रोहः, अपराधः. **2** क्षति *f.*, क्षतं, बाधा. **3** नाशः, क्षयः, अपचयः.

Injustice, *s.* अन्यायः, अधर्मः, अनीति *f.*, दुर्णीतिः, न्याय-धर्म-विरोधः, अनयः.

Ink, *s.* मसि-सी (मषि-षी) *f.*, मेला, गोला; ' red i. ' अलक्तः, अलक्तरसः; ' i.-stand ' मसीपात्रं, मस्याधारः, मसिकूपी-भाजनं-धानी, मेलांधुकः, वार्दलः; ' bring i. and paper ' मसीभाजनं पत्रं चोपनय (Mu. 1). **-v.** *t.* मस्या लिप् 6 P or c. दुष् (दूषयति). **-y,** *a.* मसीलिप्त, मसीवर्ण-दूषित.

Inkling, *s.* यत्किंचिद्दबोधनं, ईषज्ज्ञानं, इंगितं, किंचिद्बोधनं.

Inland, *a.* देशीय, देशिक-आभ्यंतरिक (की *f.*) देश in comp. **2** देशमध्यवर्तिन्, देशमध्यस्थ. **-er,** *s.* देशमध्यवासिन् *m.*

Inlay, *v. t.* प्रतिबंधू 9 P, (यदि मणिस्त्रपुणि प्रतिबध्यते P. I. 1), प्रतिवप् 1 P, प्रणि-धा 3 U, अनु-व्यध् 4 P, खच् 10 (खचयति), छुद् 6 P or c.

Inlet, *s.* द्वारं, प्रवेशः, प्रवेशद्वारं-मार्गः. **2** पुटभेदः, समुद्रवंकः.

Inly, *adv.* अंतर्; अन्तरस्थ *a.*

Inmate, *s.* निवासिन् *m.*, सहवर्तिन् *m.*; gen. परिजनः, भृत्यवर्गः.

In memoriam, *adv.* स्मरणार्थं.

Inmesh, *See* **Enmesh.**

Inmost, *a.* अत्यभ्यंतर, अत्यंतर्भूत; gen. ex. by उदरं, गर्भः, अंतर् in comp.; ' i. heart ' हृदयोदरं; ' i. soul ' अंतरात्मन् *m.*

Inn, *s.* पथिकाश्रमः, मठः, उत्तरणस्थानं. **2** स्मृतिशास्त्रज्ञवासः. **3** शुंडा, पानस्थानं, मदिरागृहं-शाला; ' i.-keeper ' पथिकाश्रमपतिः. शौंडिकः.

Innate, *a.* सहज, स्वभावज, निज, स्वाभाविक-नैसिर्गिक (की *f.*), निसर्गज, प्रकृतिस्थ. **-ly,** *adv.* स्वभावतः, निसर्गतः.

Innavigable, *a.* अनौगम्य.

Inner, *a.* अंतरस्थ, अंतर्भूत, अंतर्गत, अंतर्वर्तिन्, अंतरीय, आंतर-आभ्यंतर (री *f.*); oft. by अंतर, अंतर्, गर्भ, उदर in comp.; ' i. apartments ' अंतर्गृहं, भवनोदरं, वासगृहं.

Innermost, *See* **Inmost.**

Innocent, *a.* निरपराध, अकृतापराध, अदोष, अपाप, निष्पाप, अनघ, अनागस्, निर्मल, निर्दोष, शुचि, निष्कलंक, अनवद्य. **2** मुग्ध, मुग्धस्वभाव; अहेतुक, अनिमित्त, निष्कारण; 'i. smile' अनियतस्मितं, अनिमित्तहासः. **3** निरुपद्रव, अनुपद्रविन्, अद्रोहिन्, अहिंस्र, अघातुक, अनपकारिन्. **4** शुद्धमति, निर्मलचित्त, निष्कपट, निर्व्याज, सरल, अकृत्रिम, निर्व्यलीक. **-ly,** *adv.* निरपराधं, दोषं-पापं-विना, शुचि, निष्कपटं. **-innocence,-cy,** *s.* निरपराधता, शुचिता, निर्दोषता, अनघता, दोषमुक्ति *f.*; निष्कापट्यं, सारल्यं, &c.

Innocuous, *a.* अहिंस्र, अहिंसक, अनुपद्रविन्, अनपकारिन्, अद्रोहिन्, अघातुक. **-ly,** *adv.* अनपकारं, अहिंसापूर्वं, अहिंसया. **-ness,** *s.* अहिंसा, अनपकारः, अद्रोहः, अक्षति *f.*

Innominate, *a.* नामरहित, निर्नामन्.

Innovate, *v. t.* नूतनरीतिं-व्यवहारं-संप्रदायं-स्था c. (स्थापयति) or प्रवृत् c. or कल्पय् c., देशाचारं परिवृत् c. **-ion,** *s.* नूतनमार्गप्रवर्तनं, नवाचारस्थापनं, देशाचारपरिवर्तनं. **2** नूतना रीतिः, नवरीतिः-व्यवहारः, नवाचारः, नूतनमार्गः-पद्धति-सरणि *f.*, रीत्यंतरं. **-or,** *s.* नवमार्गप्रवर्तकः, नवरीतिस्थापकः.

Innoxious, *a.* *See* **Innocuous.**

Innuendo, *s.* भंगि-गी *f.*, वक्रोक्ति *f.*, व्यंगोक्तिः, भंग्युक्तिः, छेकोक्तिः, वक्र-भंगि-भाषितं.

Innumerable, *a.* असंख्य, गणनातीत, संख्यातीत, अगण्य, असंख्येय.

Inoculate, *v. t.* (अन्यस्मिन् स्थाने) निविश् c., संक्रम् c., संचर् c. **-ion,** *s.* निवेशनं, संचारणं.

Inodorous, *a.* निर्गंध, गंधहीन.

Inoffensive, *a.* अक्लेशद्, अनुपद्रविन्, अबाधक, अद्रोहशील, निरपराध; अपीडाप्रद, आहस्र; *See* **Innocent, Innocuous. -ness,** *s.* अहिंसा, अद्रोहः, अनपकारः, हिंसाविरति *f.*, अनपकारिता, अद्रोहशीलता.

Inoperative, *a.* अकार्यसाधक, अकिंचित्कर (री *f.*).

Inopportune, *a.* अप्राप्तकाल, अनवसर, असमयोचित, अस्थान, अयोग्य, अप्रस्तावयोग्य, असमयानुरूप, अ(आ)कालिक (की *f.*). **-ly,** *adv.* अकाले, अस्थाने, अप्राप्तकालं, अनवसरं, अयथाकालं. **-ness,** *s.* अनवसरः, असमयः, अकालिकत्वं.

Inordinate, *a.* अत्यंत, उद्रिक्त, अतिरिक्त, अमित, अपरिमित, अतिमात्र, अमर्याद. **-ly,** *adv.* अत्यंतं, अतिमात्रं, नि-सु-तरां, सातिशयं, अतीव. **-ness,** *s.* उद्रेकः, अतिरेकः, अत्यंतता, अमितत्वं; *See* **Excess, Excessive,** &c.

Inorganic, *a.* निर्जीव, अप्राणिन्, जड.

Inquest, *s.* विचारः-रणा, व्यवहारदर्शनं. **2** अपमृत्युविचारणा.

Inquietude, *s.* अशांति *f.*, अस्वास्थ्यं, उद्वेगः, वैक्लव्यं, आकुलता, चित्तवेदना, मनस्तापः.

Inquire, (of, after) *v. t.* प्रच्छ् 6 P, अनुयुज् 7 A. **2** अन्विष् 4 P, मृग् 10 A, गवेष् 10, ज्ञा desid. (जिज्ञासते). **3** (into) अव-परि-ईक्ष् 1 A, विचर् c., विमृश् 6 P, चर्च् 6 P, 10 A, निरूप् 10, अनुसं-धा 3 U, परिच्छिद् 7 P, निर्णी 1 P, निश्चि 5 U; 'i. about one's health' सुखं-कुशलं-प्रच्छ्, (देवीं सुखं प्रष्टुमागता M. 4). **-er,** *s.* प्रष्टृ *m.*, पृच्छकः, अनुयोक्तृ *m.*, जिज्ञासुः, अन्वेषकः. **2** परीक्षकः, निरूपकः, विचारकः. निर्णेतृ *m.* **-y,** *s.* अनुयोगः, पृच्छा, प्रश्नः. **2** जिज्ञासा, अन्वेषणं, मार्गणं. **3** परीक्षा-क्षणं, अनुसंधानं, निरूपणं, विचारः-रणा, निर्णयः, चर्चा, विमर्शः, निश्चयः, विवेचनं; 'i. about one's well-being (health)' अनामव-कुशल-प्रश्नः.

Inquisition, *s.* परीक्षणं, विचारः; *See* above **2** धर्मविचारणसभा.

Inquisitive, *a.* जिज्ञासु, प्रश्न-पृच्छन-शील, कुतूहलिन्, कौतुकवत्, कौतुकाविष्ट, अनुसंधान-अन्वेषण-शील. **2** ज्ञानेप्सु. **-ly,** *adv.* सकौतुकं, कुतूहलात्, जिज्ञासापूर्वं, कुतूहलेन. **-ness,** *s.* कु(कौ)तूहलं, कौतुकं, जिज्ञासा, विपृच्छिषा, ज्ञानेच्छा, अन्वेषणशीलता, अनुसंधानेच्छा.

Inquisitor, *s.* परीक्षकः, विचारकः, निरूपकः. **2** धर्मविचारसभासद् *m.* **-ial,** *a.* अतिपरीक्षकनिरूपक, अतिचर्चक. **-ially,** *adv.* अतिचर्चया, अतिपरीक्षापूर्वं.

Inrail, *v. t.* शंकुपंक्त्या परिवेष्ट् c. or आ-वृ 5 U.

Inroad, *s.* अवस्कंदः-दनं, आपातः, आक्रमणं, उपप्लवः, उप-अभि-द्रवः, अभिनिर्यायणं; 'to make i.s' अवस्कंद् 1 P, अभिद्रु 1 P; *See* **Attack.**

Inrush, *s.* सरभसप्रवेशः; *See* **Inroad.**

Insalubrious, *a.* अनारोग्य, अक्षेमकर (री *f.*), अक्षेम्य, अहित.

Insalutary, *a.* अहित, अक्षेम्य, अहित-अनिष्ट-अक्षेम-असुख-कर (री *f.*).

Insane, *a.* उन्मत्त, भ्रांतचित्त, उन्मादिन्, सोन्माद, हत-नष्ट-विक्षिप्त-बुद्धि, वातुल, हतज्ञान, भ्रष्टबुद्धि. **-ly,** *adv.* सोन्मादं, उन्मत्तवत्. **-ness, Insanity,** *s.* उन्मादः, चित्तभ्रमः, बुद्धिभ्रंशः-नाशः, चित्तविप्लवः.

Insanitary, *a.* आरोग्यविघातक, रोगावह.

Insatiable, Insatiate, *a.* अतोषणीय, अतृप्त, अतर्पणीय, दुस्तोष. **2** अतिलुब्ध, अतिलोलुप *See* **Greedy.**

Inscribe, *v. t.* अभिलिख् 6 P, पत्रे-लेख्ये-निवेश् c. or क्र c. (अर्पयति) or न्यस् 4 U

or आरुह् c. 2 वर्ण: अक्ष् 10 or चिह्न् 10. 3 **Dedicate**, q. v. **-ed**, a अभिलिखित, पत्रारूढ, न्यस्ताक्षर, लेख्यारोपित; ' writing i. ed on a Bhûrja leaf भूर्जे वृगतान्यक्षराणि. **-Inscription**, s. लेखः, लेख्यं, लिखितं 2 पाषाण-शिला-लेखः.

Inscrutable, a. अतर्क्य, दुर्ग्राह्य, अचिंत्य, दुर्बोध, अलक्ष्य, बोधातीत, गहन, दुर्ज्ञेय, अज्ञेय, अग... **-y**, *adv.* परमगहनं, दुर्ज्ञेयतया.

Insculp, *v. t.* तक्ष् 1, 5 P.

Insect, s. कृमिः, कीटः, क्रिमिः, नीलं(लां)गुः. **-ivorous**, a. कीटभोजिन्, कृमिभुज्.

Insecure, a. शंकान्वित, संशय-संदेह-स्थ, सशंक, भयान्वित, संशय-शंका-आपन्न, भययुक्त, असुरक्षित, अक्षेम. **-ity**, s. भयं, शंका, अक्षेमः-मं, भयशंका-संशयः.

Insensate, a. मूढ, निर्बुद्धि, हतज्ञान, अचेतन; *See* **Foollsh** under **Fool**.

Insensible, a. अ-वि-गत-नष्ट-चेतन, सुप्त, स्पर्शानभिज्ञ, सुप्त-नष्ट-इंद्रिय, प्र-,मूढ, लुप्तसंज्ञ, निःसंज्ञ, नष्टचेष्ट-संज्ञ, संज्ञा-चेष्टा-चैतन्य-हीन or रहित, प्रलीन, मूर्च्छित. 2 अगोचर, दुर्लक्ष्य, अलक्ष्य, इंद्रियागोचार, इंद्रियातीत, अतींद्रिय. 2 अनार्द्रचित्त, कृपा-दया-हीन, राग-रस-हीन. निर्दय, निष्कृप. 4 जड, कुंठ, मूढ, मूर्ख. 5 (Unaware) अनभिज्ञ, अज्ञ ; ex. by not **Know**, q. v.; 'i. to pain' अवेदनाज्ञ, दुःखानभिज्ञ. **-ness**, **-Insensibility**, s. प्रमोहः, प्रलयः, मूर्च्छा, संज्ञा-चेतना-चैतन्य-हानि *f.* or नाशः, अचैतन्यं, अचेतना, इंद्रियसुप्ति *f.* -नाशः, स्पर्शाज्ञानं, अचेतनत्वं, नष्टचेष्टता. 2 राग-भाव-हीनता, दयाहीनता. 3 जडता, जाड्यं, जाड्यिमन् *m.* 4 अनभिज्ञता, अबोधः, अज्ञानं. **-Insensibly**, *adv.* अलक्ष्यं; क्रमण, शनैः, शनैः शनैः, क्रमशः.

Inseparable, a. अवियोज्य, अविभेद्य, समवायिन्, नित्यसहवर्तिन्; ' i. relation ' समवायसंबंधः. **Inseparably**, *adv.* नित्यसंबंधेन, समवायसंबंधेन.

Lay, *v. t.* धा 3 U, नि-आ°, न्यस् 4 U, नि-विश् c., स्था c. (स्थापयति); सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, आरुह् c. (रोपयति); दा 3 U, धृ 1 P; क्रमेण स्था c. or नि-धा; प्रकृप् c., प्रयुज् 7 A, 10 (a plot, snare, &c.). **2** आ-स्तृ-स्तृ 5, 9 U. **3** शम् c. (शमयति), प्र-उप-°; सांत्व् 10, स्थिरीकृ 8 U. **4** शी c.; निपत् c.; ' l. eggs ' अंडमोक्षं कृ; अंडानि सू 2, 4 A; ' l. siege ' रुध् 7 U, वि-टंक् 9 P; *See* **Besiege;** ' l. blame on ' दोषं समारुह् c. or निक्षिप्; ' l. waste ' उप-प्लु 1A, उपद्रु 1 P, उद्-ध्वंस् c., निर्जनीकृ; *See* **Devastate;** 'a sinful action, though done by others, is laid at his doors ' पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते (Mr. 1); 'l. aside ' अप-निह्-अस्, त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P; ' l. it aside for a while ' मुहूर्तं तत् आस्तां-तिष्ठतु तावत्; (address &c.) उद्-वि-सृज् 6 P, अवतृ c., अवरुह् c.; ' l. hands on ' परामृश् 6 P, धृष् c.; 'laid upon him his hand' तं हस्तेन पस्पर्श or परामृशत्; 'l. hold of' धृ, ग्रह् 9 U; *See* **Catch;** ' l. the dust ' धूलिं सं-सिच् 6 P or आ-हन् 2 U; ' l. open or bare ' विवृ 5 U, आविष्कृ; स्फुटीकृ, वि-अंज् 7 P or c., स्पष्टी-प्रकटी-कृ, प्रकाशृ c. **-before,** उपनि-अस्, उपक्षिप्, पुरो-नि-धा, प्रसु c., नि-आ-विद् c. **-by,** सं-,रक्ष् 1 P, संचि 5 U. **-down,** न्यस्, निक्षिप्, नि-धा, न्यासीकृ. **2** शी c., निविश् c. **3** विमुच्, परि-,त्यज्, वि-हा. **4** (Oneself) संविश् 6 P, शी 2 A. **5** प्र-पी 1 P, वि-धा (rules &c.); 'l. down arms ' युद्धाद्विरम् 1 P, शरणं व्रज् 1 P; 'l. down life' प्राणान् त्यज्. **-in,** संग्रह्, संचि, संरक्ष्. **-on,** पत् c., प्र-युज्, सम्-ऋ c. **-out,** विनि-युज् 7A, 10, प्र-युज्,

व्यय् 10 (व्यययति). **2** परि-प्र-क्षिप् c., विन्यस् 4 U, विरच् 10, प्र-युज्, चिंत् 10; *See* **Contrive. 3** प्रसृ c., विस्तृ c., दीर्घीकृ; प्रकाशू c., प्रकटीकृ 'l. oneself out'; चेष्ट् 1 A, प्रयत् 1 A, उद्यम् 1 A. **-to,** आरुह् c., निक्षिप्; *See* **Ascribe;** 'l. to a ship' नौगतिं रुध् or स्तंभ्. **-up,** नि-धा, रक्ष्, संचि; 'to be laid up,' शय्याग्रस्त-*a.* भू 1 P, उत्थातुं अक्षम-*a.* भू; 'laid up with fever' ज्वरेणोत्थातुमक्षमः. **-Lay,** *s.* गानं, गीतं, काव्यं. **2** आस्तरः-रणं, फलकः-कं. **-***a.* सामान्य, साधारण (णी *f.*), पुरोहितभिन्न. **-man,** *s.* गृहस्थः, सामान्य-साधारण-जनः, अदीक्षितः, प्राकृतः. **-Laical,** *a.* गृहस्थिन्, गार्हस्थिक (की *f.*), पुरोहितभिन्न, अदीक्षित. **-Laity,** *s.* गृहस्थ-सामान्य-जनवर्गः, प्राकृत-साधारण-जनाः, पुरोहितभिन्नवर्गः.

Layer, *s.* स्तरः; आस्तरः-रणं, फलकः-कं. **2 Twig,** q. v.

Lazar, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कोठोपहतः, त्वग्रोगोपहतः; ' l.-house ' कुष्ठिशाला, श्वित्र्यालयः.

Lazy, *a.* अलस, तंद्रिल, जड, मंद, मंथर, तंद्रालु, मंदगति. आलस्यशील, अनुद्योगिन्, उद्योगविमुख (खी *f.*), अव्यवसायशील; शीतक, अनुष्ण, तुंदपरिमृज. **-ly,** *adv.* अलसवत्, जडवत्, मंदं मंदं, जाड्येन. **-ness,** *s.* आलस्यं, मांद्यं, जाड्यं, जडता, तंद्रिका, तंद्रालुता, कार्यद्वेषः, अनुद्योगशीलता, उत्साहविमुखता, अलसशीलता.

Lea, *s.* *See* **Lawn** (1).

Lead, *s.* सीसं, सीसकं, नागं, योगेष्टं, वंगं; 'red l.' सिंदूरं, नागतंभवं, रक्तचूर्णं, नागजं, नागगर्भं. **-***s.* नायकत्वं, नेतृत्वं, अधिष्ठातृत्वं, मुख्यत्वं, अग्रगमनं-यानं, पुरःसरणं. **-***v. t.* नी 1 P, वह् 1 P, प्रापू c., गम् c. (गमयति) (all with two accusatives); आ-दा 3 A. **2** (Way) दृश् c., आ-निर्-दिश् 6 P. **3** अधि-ष्ठा 1 P, अध्यास् 2 A, प्रणी, आ-निर्-दिश्; पुरस्कृ 8 U; अग्रणीः-नायकः-अग्रेसरः-भू 1 P (with gen.); वसिष्ठाधिष्ठिता देव्यः (U. 1) 'led by Vasishtha '&c., दशरथस्य दारानधिष्ठाय (U. 4;) 'led by the demon ' दानवं पुरस्कृत्य. **4** आकृष् 1 P, प्र-वि-लुभ् c., प्रवृत् c, प्रेषू c., प्रोत्सहू c , नी; मूढः परप्रत्ययनेयबुद्धिः (M. 1) ' has his mind led by the convictions of others. ' **5** (Time) नी, गम् c., अतिवह् c., क्षे c. (क्षपयति), या c. (यापयति); ' led a dissolute life ' विषयसुखनिरतो जीवितमत्यवाहयत्; ' l. ing a life above their station ' स्वस्थानाद्युचितां-स्वस्थानातिरिक्तां-जीवयात्रां कल्पयंतः. *-v. i.* (On) अग्रे-पुरः-पुरतः-अग्रतः-भू or गम् 1 P or वृत् 1 A or स्था or चर् or सृ 1 P. **2** (To) (lit.) गम्, या 2 P; ' on the way l. ing to Chitrakúta ' चित्रकूटयायिनि वर्त्मनि (U. 1). **3** (Cause) ex. by dat. of noun with or without भू, आवह्, उत्पद् c., जन् c. (जनयति); 'advice to fools l.s to their provocation' उपदेशो हि मूर्खाणा प्रकोपाय (भवति) (H. 3). **-ed,** सीसकयुक्त. **-en,** *a.* सीसकनिर्मित, **-er,** *s.* नायकः, नेतृ *m.*, मार्गदर्शकः, मार्गोपदेशकः (lit.); मुख्यः, मुखरः, अग्रणीः, प्रमुखः, अधिपः, ईश्वरः, पतिः, अध्यक्षः, अधिपतिः, अधिष्ठातृ *m.* **2** पुरोगः-गमः, अग्रगः, अग्र-(ग्रे)सरः, पुरःसर, पुरोगामिन् *m.*; ' l. of an army ' सेनानीः, चमूपतिः, योधाध्यक्षः, सेनानायकः; ' l. of a religious sect ' गुरुः, आचार्यः. **-ership,** *s.* नायकत्वं, आधिपत्यं. **-ing,** *a.* अग्रग, पुरोगामिन्, पुरःसर, पुरोगम, प्राक्-अग्र-गामिन्. **2** अग्र, अग्रच्च, मुख्य, उत्कृष्ट, प्रमुख, परम, उत्तम, प्रधान in comp. **3** (To) आवह, कर (री *f.*) in comp.; ' l. to happiness ' कल्याणावह, कल्याणकर, कल्याणोदर्क. **-***s.* नयः, नीति *f.*, नेतृत्वं; ' l.-strings ' आलंबनसूत्राणि; ' hold or keep in l.-string ' आत्माधीन-*a.* कृ, स्ववशं नी, नियम् 1 P. **-Led,** *a.* नीत, प्रेरित, अधिष्ठित, &c.; ' l. by ' ex. by पुरःसर, पुरोगम, प्रमुख, आदि in comp.

Lead-wort, *s.* पाठिन् *m.*, चित्रकः, वह्निसंज्ञकः.

Leaf, *s.* पत्रं, पर्णं, छदः, दलः-लं, पलाशं, छदनं; (of a book) पत्रं; (of a door) कपा(वा)टः-टं-टी, अरारं-री; ' fallen l. ' प्रपर्णं; ' faded l. ' शीर्णपर्णं; ' to strip off the leaves ' निष्पत्रीकृ 8 U. **-less,** *a.* निष्पत्र, अपर्ण, निष्पर्ण, निर्दल, पत्र-पर्ण-दल-हीन. **-let,** *s.* पत्रकं, सूक्ष्म-लघु-पत्रं. **-y,** पर्णावृत, पर्णमय (यी *f.*), बहुपर्ण, बहुपत्र-दल, सपत्र, सपर्ण, पर्णिन्.

League, *s.* संधिः, साहित्यं, संघातः, ऐक्यं, संयोगः, संघट्टनं, अन्योन्योपकारप्रतिज्ञा. **2** गव्यूति *f.* **-***v. i.* संधा 3 U, पक्षीय-*a.* भू 1 P, संहन्-संयुज्-pass., संमिल् 6 P, संधिकृ 8 U, संघट्ट 1 A; ' l. ed with the enemy ' शत्रुपक्षे स्थित. **-ed,** *a.* कृतसंधि, संधित, संहत, संघातवत्, संयुक्त, कृतसंसर्ग, संसृष्ट, मिलित; ' having l. ' संभूय, मिलित्वा. **-er,** *s.* संगिन् *m.*, संसर्गिन् *m.*, सह-संभूय-कारिन् *m.*

Leak, *s.* छिद्रं, रंध्रं, संधिः. **2** धारा, स्रवः, स्यंदः, द्रवः. **-***v. i.* (अलक्षितं) स्रु 1 P; परिस्रु, रा 4 A, क्षर् 1 P, गल् 1 P, स्यंद् 1 A; आयुः परिस्रवति भिन्नघटादिवांभः (Bh. ii. 109) ' like water l. ing from a broken jar ' &c. **-ing,** *s.* स्रवः, क्षरण,

निस्यंदः, रयः. -y, a. छिद्रपूर्ण, स्रवणशील, सच्छिद्र, सरंध्र.

Lean, a. कृश, परि-, क्षाम-क्षीण, अवसन्न, तनु, क्षीणशरीर-मांस, कृशांग (गी f.); 'you are growing l.-er and l.-er day by day' अनुदिवसं परिहीयसेंऽगैः (S. 3); 'l. ness of body' शरीरसादः. -s. स्नायुः, वस्रसा. -v. i. अव-लंब् 1 A, आ-सं-श्रि 1 U; 'l. ing on a mango stick' अवलंब्य चूतयष्टिं; मद्लेखया दत्तहस्तावलंबां (Ka 206) 'l. ing on M.'s arm.' 2 पक्षं आश्रि or अवलंब्, प्रवण-a. भू 1 P. 3 आ-अव-नम् 1 P, नम्रीभू, बहिर्लंब्, तिरः-तिर्यक् लंब्. -v. t. उप-धा 3 U, निविश् c., न्यस् 4 U; वामहस्तोपहितवदना (S. 4) 'l. ing her face on her left hand'; also ex. by (v. i.). -ing, a. आलंबिन्, संश्रित, आनत; प्रवण, बहिर्लंब, प्रलंब, वक्र. -s. प्रवणता, सं-आ-श्रयः, आलंबनं. -ness, s. कृशता, काश्यं, क्षीणता, क्षामता, अव-,सादः, शोषः, शरीरशोषणं.

Leap, v. i. प्लु 1 A, उत्-प्लु, वल्ग् 1 P; वृत् 4 P; 'l. down' अवप्लु 1 P, अवप्लुं; 'l. up' उत्पत्, उत्प्लु; 'l. over' लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अति-इ 2 P. -s. प्लुति f., प्लुतं, प्लवः, वल्गितं, झंपः, प्लवनं; 'quick (deer's) l.' हरिणप्लुतं; 'going by l. s' प्लुतगति, प्लवग. -ing, s. प्लवनं, वल्गितं, प्लुतिः; 'l. over a period' मंडूकप्लुतिः.

Learn, v. t. शिक्ष् 1 A, अधि-इ 2 A, पठ् 1 P, अधिगम् 1 P, अभ्यस् 4 U; अभ्यासेन विद्यां लभ् 1 A or प्राप् 5 P. -v. i. ज्ञा 1 U, अवगम्, विद् 2 P, बुध् 1 P, उपलभ्, श्रु 5 P, गृहीतार्थ-a. भू 1 P; See Know. -ed, a. विद्वस् (दुषी f.), विपश्चित्, ज्ञानिन्, विद्या-विशिष्ट-संपन्न-वत्, कृत-उपात्त-विद्य पंडित, बुध, प्रा(प्र)ज्ञ; ज्ञानवत्, व्युत्पन्न, बहुश्रुत, सूरि, विद्यावृद्ध, साक्षर. 2 अधीतिन्, विचक्षण, विज्ञ, कुशल, निपुण, प्रवीण, चतुर; कोविद, ज्ञ, विद् in comp. 3 (Of books &c.) पांडित्यस्य सूचक, ज्ञानस्य गमक; 'a l. man' पंडितः, विपश्चित्, सूरिः, बुधः, &c.; 'l. in law' स्मृतिज्ञ, न्यायविद्. -edly, adv. पंडितवत्, प्रज्ञवत्, सज्ञानं, निपुणतया, सकौशलं. -er, s. शिष्यः, छात्रः, अध्येतृ m., विद्यार्थिन् m. -ing, s. विद्या, विद्वत्ता, विद्वत्वं, ज्ञानं, पांडित्यं, व्युत्पत्ति f., प्राज्ञता, विद्यासंपद् f. 2 (Act) अध्ययनं, शिक्षणं, अभ्यासः, विद्यार्जनं, विद्याप्राप्ति f., ज्ञानागमः. 3 शास्त्रं, विद्या; 'sacred l.' श्रुति f., निगमज्ञानं; 'he affects great l.' पंडितंमन्यः, पंडितायते (D.).

Lease, s. पट्टः, पट्टोलिका. -v. t. आविहित-कालात् निरूपितमूल्येन दा 3 U or विसृज् 6 P.

Leasing, s. See Falsehood.

Leash, s. चर्मबंधः, चर्मरज्जु f. 2 त्रयं, त्रितयं.

Least, a. अणु, अल्प, स्तोक, अत्यल्प, अल्पिष्ठ, कनिष्ठ, स्तोकतम, अल्पतम, क्षोदिष्ठ; 'the l. sorrow' अणुरपि शोकः; 'the l. particle' लवः, लेशः, अणुः कणः. -adv. स्तोकं, अल्पिष्ठं, किंचित्, कियत्; 'in the l.' मनागपि, अल्पमपि, स्तोकांशेनापि, स्तोकमपि, लेशमपि, किमपि, किंचिदपि; 'at l.' ex. by अवर-a. in comp.; 'witnesses should be at l. three' त्रयवराः साक्षिणो ज्ञेयाः (Y. II. 69); 'at l. 100 Rs.' शतावरा रूपकाः; oft. by तावत्, 'at l. once' सकृदपि तावत्.

Leather, s. परिष्कृतं चर्म; 'l.-bag' चर्मभस्त्रिका, चर्मप्रसेविका; 'l.-bottle' कुतू f., 'a small l.-bottle' कुतुपः; 'l.-dresser' चर्मकृत्, चर्मकारः; 'l.-seller' चर्मविक्रयिन्. -Leathern, a. चर्मकृत-निर्मित, चर्ममय (यी f.), चर्म in comp.

Leave, s. अनुज्ञा-ज्ञानं, अनुमति f., अनुमोदनं. 2 आमंत्रणं, आपृच्छनं; 'to take or ask l. of' आमंत्र् 10 A, आपृच्छ् 6 A; See Adieu; 'to give l.' अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A. -v. t. त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P, रह् 1 P 10, परिह् 1 P, वर्ज् 10, निर्-,मुच् 6 P. 2 निर्गम् 1 P, अपगम्, अप-इ-या 2 P, अपसृ 1 P, अपक्रम् 1 U, 4 P, (all with abl.). 3 मृत्युपत्रेण दा 3 U; 'estate left (after death)' रिक्थं. 3 विरम् 1 P, निवृत् 1 A (with abl.); मुच्, त्यज्, अपास् 4 P; oft. ex. by स्था 1 P, आस् 2 A; 'l. it now' तिष्ठतु-आस्तां तदधुना. 4 निक्षिप् 6 P, न्यस्, सम्-ऋ c. (अर्पयति); 'l. everything to him' सर्वं तदधीनं कुरु. 5 शिष् 7 P, or c., अव-परि°, उद्-वृत् c., 'nothing was left' न किमप्यवाशिष्टं; 'to be left' शिष् pass.; 'we being left behind' अस्मास्ववहीनेषु (S. 2). -v. i. निर्गम्, अप-या, विरम्, &c. -for, प्र-स्था 1 A (with acc.). -off, विरम्, निवृत्, त्यज्; See above. 'the peacock left off dancing' परित्यक्तनर्तनो मयूरः (S.4). 'when it left off raining' शांते पानीयवर्षे ((H. 3). -out, वृज्, परित्यज्. -Leavings, s. शेषः-षं, परि-अव°, शिष्टं, अव-परि°, शेषभागः-खंडः, उद्वर्तः, उच्छिष्टं. 2 मलं; 'l. of food' शेषान्नं, भक्षित-भुक्त-शेषः-षं, भुक्तावशिष्टं, उच्छिष्टं, भुक्तोज्झितं; 'one who eats l.' शेषभोजिन्, उच्छिष्टाशनः.

Leaven, *s.* किण्वं, नग्नहूः, कारोत्तरः, मंडः-डं. -*v. t.* दुष् c. (दूषयति); रंज् c.

Leacher, *s.* लंपटः, कामासक्तः, कामुकः, स्त्रीपरः-लंपटः, सुरतार्थिन् *m.* **-ous,** *a.* कामुक, कामासक्त, सुरतार्थिन्, स्त्रीपर; *See* **Lustful. -ously,** *adv.* लंपटवत्, कामुकवत्. **-ousness, -y,** *s.* **Lust,** q. v.

Lection, *s.* पाठः. 2 पाठांतरं, पाठभेदः.

Lecture, *s.* प्रपाठः, व्याख्यानं, शासनं, आध्यापनं; 'it is easy to read l. s to others' सुखमुपदिश्यते परस्य (Ka. 156) (*cf.* परोपदेशे पांडित्यं). 2 वाग्दंडः, निर्भर्त्सनवाक्यं. -*v.* पठ् c., अधि-इ c. (अध्यापयति), शास् 2 P, उपदिश् 6 P. 2 निर्भर्त्स् 10 A, निंद् 1 P, गर्ह् 1, 10 A. **-er,** *s.* पाठकः, अध्यापकः, शिक्षकः, उपदेशकः, प्रवक्तृ *m.*, वादिन् *m.*, व्याख्यातृ *m.*

Ledge, *s.* कटकः-कं, कूटं. 2 शिला, शिलाफलकं. 3 फलकः-कं, आस्तरः. 4 आलिः-ली *f.*, आवलिः-ली *f.*

Ledger, *s.* (बृहत्) गणनापुस्तकं.

Lee, *s.* निर्वातस्थानं-देशः. 2 वाताभिमुखी दिक्. **-ward,** *adv.* अनुवातं, वातानुलोमं.

Leech, *s.* रक्तपा, जलौ(लू)का, जलौकसः (*f.* pl.); जलसर्पिणी, रक्तपायिनी, जलजंतुका. 2 भिषज् *m.*, वैद्यः, चिकित्सकः.

Leek, *s.* कंदः-दं.

Leer, *s.* कटाक्षः, दृष्टिविक्षेपः, दृक्पातः, अर्धवीक्षणं, साचिविलोकितं, अपांगदर्शनं. 2 कुस्मितं. -*v. t.* कटाक्षेण ईक्ष् 1 A or दृश् 1 P, साचि-तिर्यक्-विलोक् 1 A, 10. 2 कुस्मि 1 A. **-ing,** *a.* अपांगदर्शिन्, साचि-तिर्यक्-दृष्टि. 2 कुस्मेर.

Lees, *s.* मलं, किट्टं, उच्छिष्टं.

Left, *a.* वाम, सव्य, दक्षिणेतर; 'l.-handed' वामहस्त, सव्यसाचिन्; 'to the l.' वामेन, वामतः.

Leg, *s.* जंघा, प्रसृता, पादः; 'swelling of the l.' श्लीपदं; 'having a swelled l.' कुंभपादः-पदी; 'long-l. ed' दीर्घपाद-द्, दीर्घजंघ. **-Legging,** *s.* जंघारक्षणं.

Legacy, *s.* उत्तरदानं, मृत्युलेखांपितदानं.

Legal, *a.* धर्म्य, न्याय्य, स्मार्त (र्ती *f.*), व्यवहारानुरूप, न्यायानुसारिन्, शास्त्रविहित, शास्त्रोक्त, स्मृत्युक्त, धर्म-न्याय-अनिषिद्ध; *See* **Lawful. 2** स्मृति, धर्म, व्यवहार, in comp.; 'l. proceeding' व्यवहारः; 'wrong l. opinion' अव्यवस्था; 'written l. opinion' पट्टोलिका. **-ity,** *s.* न्याय्यता, धर्म्यता, धर्म-शास्त्र-अनुसारः; 2 कर्ममार्गसेवा, कर्मनिष्ठा. **-ize,** *v. t.* व्यवस्था c. (स्थापयति), शास्त्रसंमत-*a.* कृ U, कृ with (*a.*). **-ly,** *adv.* धर्मेण, न्यायेन धर्मतः, न्यायतः; यथाधर्मं, यथान्यायं, धर्मानुसारेण.

Legate, *s.* दूतः, प्रणिधिः. **-Legation,** *s.* दूत-धर्मः-क्रिया, दौत्यं.

Legatee, *s.* सूतारक्थभागिन् *m.*, उत्तराधिकारिन् *m.* **-Legator,** *s.* उत्तरदानकारिन् *m.*

Legend, *s.* कथा, उपाख्यानं, आख्यायिका, पुरावृत्त-पुराण-कथा, पुरावृत्तं, लोक-जन-कथा, इतिहासः, पुराणं. **-ary,** *a.* पौराणिक (की *f.*), पुराणोक्त, पुराणकथित. -*s.* ऐतिहासिकः, पुराणकथकः.

Leger-de-main, *s.* हस्तलाघवं-चापल्यं माया, कुहका-कं, इंद्रजालं.

Legible, *a.* व्यक्ताक्षर, सुवाच्य, निर्वाच्य, सुव्यक्त सुस्पष्ट, स्पष्टाक्षर. **-Legibly,** *adv.* सुस्पष्टं, व्यक्ताक्षरैः, सुव्यक्तं.

Legion, *s.* चमूः, सेना, वाहिनी; *See* **Force. 2** सन्य-दलं-गुल्मः-व्यूहः-समूहः. 3 चक्रं, निवहः; 'their name is a l.' अतिसंख्याः-संख्यातीताः-ते.

Legislate, *v. i.* व्यवस्थां विधा 3 U or कृ 8 U; विधीन् रच् 10 or प्रकृप् c. or स्था c. (स्थापयति), व्यवस्था c. **-ion,** *s.* विधि-प्रकल्पनं, व्यवस्था-नियम-विधानं, विधि-नियम-व्यवस्था. **-ive,** *a.* व्यवस्थापक, विधिकारिन्. **-or,** *s.* व्यवस्थापकः, शास्तृ *m.*, शास्तृ *m.*, न्यायप्रवर्तकः, व्यवस्थाकारः. **-ure,** *s.* व्यवस्था-विधि-विधायिनी सभा.

Legitimate, *a.* न्याय्य, धर्म्य, उचित, यथायोग्य, यथान्याय; *See* **Lawful, Legal. 2** सत्य, यथार्थ. 3 धर्मज, औरस (सी *f.*), औरस्य, उरस्य, धर्मपत्नीज, स्वजात, सुजन्मन्; 'a l. wife' धर्मपत्नी; 'a l. son' उरस्यः, औरसः-स्यः. -*v. t.* औरसीकृ 8 U. **-ly,** *adv.* यथान्यायं, धर्मेण, न्यायतः, धर्मानुसारेण, यथाधर्मं, युक्तं, यथोचितं, यथार्थं. **-Legitimacy,** *s.* न्याय्यता, धर्म्यता, यथार्थता, युक्तता, औचित्यं. 2 औरसत्वं, सुजन्मन् *n.*, धर्मजत्वं, औरसजन्मन् *n.*

Legume, Legumen, *s.* शमी, शिंबा, सुद्गः, शिंबिका. 2 शमीधान्यं.

Leisure, *s.* अवसरः, अवकाशः, विश्रामः, क्षणः, कार्य-निवृत्ति *f.* -विच्छेदः, विश्रांति *f.*, 'being at l.' लब्धावकाश, प्राप्तावकाश, प्राप्तावसर, निर्व्यापार, लब्धक्षण, कार्यरहित. **-ly,** *a.* मंथर, मंद, अशीघ्र, अक्षिप्र, अत्वरित, सावकाश. -*adv.* 'at leisure,' मंदं मंदं, शनैः, अशीघ्रं, अक्षिप्रं, यथावकाशं, प्राप्तावसरं.

Lemon, *s.* जंबी(बि)रः, जभः, जंभीरः, जंभरः-लः, दंतशठः, फलपूरः, बीजपूरः; रुचकः, मातुलुंगकः; (fruit) जंबीरं, जंभफलं &c.

Lemonade, *s.* जंबीररसः.

Lemures, *s.* *See* **Devil.**

Lend, *v. t.* (आर्विहितकालात्) दा 3 U, 1 P, सम्-ऋ c. (अर्पयति) निक्षिप् 6 P, न्यस् 4 U; 'l. money' ऋणं दा 'l. money at

interest' कुसीदं कृ 8 U; 'l. one's hand to' उपकृ, अनुग्रह् 9 P; *See* **Help**; 'l. one's ear to' श्रु 5 P, सावधानो भूत्वा आकर्ण् 10. **-er**, *s.* उत्तमर्णः, ऋणदायिन् *m.*, ऋणदः. **-ing**, *s.* ऋणदानं, ऋणसमर्पणं.

Length, -en, *See* under **Long**.

Lenient, *a.* सौम्य, मृदु, अतीक्ष्ण, कोमल, अतीव्र, अपरुष; क्षमावत्, क्षमिन्, सदय, कृपालु, दयार्द्र. **2** सांत्वकारिन्, साम in comp.; 'a l. measure' सामोपायः, सामोपचारः, सामप्रयोगः. **-ly**, *adv.* अनुग्रं, अतीक्ष्णं, सौम्यं, सदयं, अपरुषं, क्षमापूर्वं. **-Lenity, -Leniency**, *s.* सौम्यता, मृदुता, अतीक्ष्णता, अतीव्रता, कोमलता, क्षमा, क्षमाशीलता, दया, दयार्द्रभावः, कृपा; सामन् *n.*, सामबुद्धि *f.* **-Lenitive**, *a.* शमक, शांतिद, शांतिकर (री *f.*). **2** स्निग्ध, चिक्कण. *-s.* प्र-उप-शमनं, क्लेशापहं, शूलघ्नं.

Lens, *s.* काचः; 'convex l.' मध्योन्नतकाचः; 'concave l.' मध्यनिम्नकाचः; 'a double convex l.' यवः; 'a crystal l.' सूर्यकांतः, अर्काश्मन् *m.*, दीप्तोपलः.

Lenticular, *a.* मसूरोपम.

Lentiform, *a.* यवाकृति, यवरूप.

Lentigo, *s.* जडु(डु)लः, कालकः, पिप्लुः. **-Lentiginous**, *a.* जडुलिन्, कालकयुक्त.

Lentil, *s.* मसु(सू)रः-रा.

Lentous, *a.* सांद्र, श्यान, घन. **-Lentor**, *s.* सांद्रता, श्यानता.

Leo, *s.* सिंहः, सिंहराशिः. **-Leonine**, *a.* सैंह (ही *f.*), सिंहशील-धर्मन्.

Leopard, *s.* चित्रकः, चित्रव्याघ्रः.

Leper, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कुष्ठरोगिन् *m.*, कुष्ठपीडितः. **-Leprosy**, *s.* कुष्ठं, श्वित्रं, कोठः, मंडलकं, कुष्ठरोगः, त्वग्रोगः, दुश्चर्मन् *n*, 'black l.' महारोगः, महाव्याधिः, रक्तकुष्ठं; 'wasting l.' गलत्कुष्ठं. **-Leprous**, *a.* कुष्ठिन्, श्वित्रिन्, कुष्ठपीडित.

Lesion, *s.* अपकारः, पीडा, क्षति *f.*

Less, *a.* न्यून, ऊन, अल्पतर, अल्पीयस्, क्षुद्रतर, स्तोकतर, सूक्ष्मतर. *-adv.* न्यूनं, अल्पं, &c.; 'no l. than' ex. by अवर-*a.*; श्यवराः साक्षिणः; 'much l.' किमुत, किं पुनः, किमु; 'a little l. than 10,000 years' किंचिदूनं शरदामयुतं (R. x. 1); (as a suffix) ex. by अ, निर्, विहीन, रहित, वर्जित, वीत, विगत, in comp. **-en**, *v. t.* न्यूनीकृ 8 U, ऊन् 10, ह्रस् c., अप-चि 5 U, लघूकृ, लघयति (D.), क्षि 1, 5 P or c. *-v. i.* ह्रस् 1 P, न्यूनीभू 1 P, अल्पीभू, क्षि-अपचि-pass. **-er**, *a.* क्षुद्रतर, &c.

Lessee, *s.* पट्टोलिकाधारिन् *m.*

Lesson, *s.* पाठः, अध्यायः. **2** शासनं, उपदेशः, बोधः-धनं, शिक्षा. **3** वाग्दंडः, भर्त्सनं; **take l. from'** उपदेशं ग्रह् 9 U. *-v. t.* उपदिश् 6 P, शास् 2 P.

Lest, *conj.* नोचेत्, अन्यथा; 'love not sleep l. thou come to want' तंद्रासक्तो मा भव नोचेत् अकिंचनो भविष्यसि; sometimes ex. by न इति or कदाचित् with pot. or मा with simple future or imperative; मा कस्यापि तपस्विनो हस्ते पतिष्यति (S. 2) 'l. she fall into the hands &c.' मास्या विकारो वर्धतां (M. 4); 'l. he should kill us' मा नो हिंसीदिति; 'beware l. you be enticed by women' नथा प्रयतेथा यथा न प्रलोभ्यसे वनिताभिः (Ka. 109.)

Let, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A, सद् 1 A; oft. ex. by the imperative of aorist forms without अ; 'l. it not so happen' एवं मा भूत्. **2** भाटकेन दा 3 U; मूल्येन दा or विसृज् 6 P, **3** रुध् 7 U, निवार् 10; स्तंभ् 9 P. **4** (Blood) स्रु c., मोक्ष् 10; *See* **Bleed**; 'l. alone' न उपद्रु 1 P, न बाध् 1 A, oft. by आस् 2 A, स्था 1 P; 'now l. it alone' आस्तां तत्रथैव; 'l. go,' 'l. loose' मुच् 6 P or c., मोक्ष्, शिथिलीकृ 8 U; शिथिलयति (D.), स्रंस् c., विसृज्, अ(श्रं)थ्-श्लथ् 1 P, 10; 'l. ing his hand go' मुक्त-स्रस्त-शिथिलित-हस्तः; 'l. slip' मुच्, विक्षिप् 6 P, सुधा या c. (यापयति). **-down**, अवतृ c., अवरुह् c. (रोपयति), अव-नि-पत् c., अवसुच्, अवसृज्, अधःनि-धा 3 U or स्था c. (स्थापयति). **-in**, प्रविश् c.; अभ्यंतरीकृ. **-off**, निर्-विमुच्; प्रास्, क्षिप्, ईर् c., विसृज्, मोक्ष्; 'l. off with a fine' दंडदानेन विमुक्त. **-out**, मुच्, मोक्ष्. **2** भंज् 7 P, भिद् 7 P, प्रकाश् c. (as secrets). **3** पण्येन दा.

Lethal, *a.* *See* **Deadly** under **Die**.

Lethargy, *s.* जाड्यं, मंदता, निद्रालुता, आलस्य, तंद्रा, तंद्रि-द्री *f*, जडबुद्धित्वं, निद्रालसता, कार्यजडता, कार्यद्वेषः, अतिमांद्यं. **2** घोर-गाढ-निद्रा, निर्भरनिद्रा. **-ic**, *a.* निद्रालु, निद्रालस, निद्राशील, जड, मंद, जडबुद्धि, सुप्तमति; कार्यजड, कार्यविमुख (खी *f.*); आलस्यशील. **-ically**, *adv.* जडवत्, मंदवत्. **-icalness**, *See* (*s.*)

Lethe, *s.* विस्मृति *f.*, विस्मरणं, स्मृतिनाशः लोपः. **2** वैतरणी.

Letter, *s.* अक्षरं, वर्णः; 'printing l.' मुद्राक्षरं **2** लेखः, पत्रं, लेखयं, संदेशपत्रं; 'by l.' पत्रद्वारेण; 'l. from an inferior to a superior' विज्ञप्ति-विज्ञापना-पत्रं; 'l.-carrier' पत्रवाहः, लेखहारः. **3** शब्दार्थः, अक्षरार्थः, वाक्यार्थः, वचनं; 'obey orders to the l.' यथावचनं आज्ञामनुरुध् 4 A. **4** (Letters) विद्या, ज्ञानं; 'a man of l. s' कृतविद्यः विद्वान्, *See* **Learned**; 'l. by l.' अक्षरं

'a dead l.' लुप्तार्थं वचनं. -*v. t.* अक्षरैः अंक् 10 or मुद्र् 10. -ed, *a.* अक्षरांकित, अक्षरमुद्रित-चिह्नित. 2 कृतविद्य, उपात्तविद्य; *See* Learned.

Lettuce, *s.* हरितकं, शिग्रुः.

Levant, *a.* पूर्वदेशज, प्राग्भव, पौरस्त्य, पूर्वदिक्स्थ. -*s.* पूर्वदेशः, प्राग्देशः.

Levee, *s.* राजदर्शनं, राजदर्शनमेला, दर्शकमेला.

Level, *a.* सम, समस्थ, सपाट, समरेख, समभूमिस्थित; 'lie l. with the ground' भूमिसात्क् pass. 2 क्षितिजसमसूत्र; 'a l. ground' समभूमि *f.*, सानु *m. n.*, प्रस्थः, समस्थलं-ली. -*s.* समं, समभूमिः स्थलं, समतलं-पृष्ठं-देशः, प्रस्थः, प्रदेशसमता, पाटः. 2 समता, तुल्यता, साम्यं, तुल्य or सम-भावः or वृत्ति *f.*; 'reduced to the l. of the poor, दरिद्रसमतां नीत-गमित; 'on a l. with' सम, तुल्य, समान; 'along the l.' अनुप्रस्थं. 3 लक्ष्यसूत्रं-देशः. 4 नियमः, सूत्रं. -*v. t.* समीकृ 8 U; समस्थलीकृ. 2 लक्ष्यीकृ, उद्दिश् 6 P, सं-धा 3 U, प्रेक्ष् c, मुच् 6 P, क्षिप् 6 P. -ler, समकारिन् *m.*, विशेषनाशकः, भेद-भावलोपकः. -ness, *s.* समता, साम्यं, समभूमिभावः.

Lever, *s.* उत्तोलनदंडः; तुलायंत्रं.

Leveret, *s.* शशशिशुः-शावकः.

Leviathan, *s.* तिमिः, तिमिंगलः.

Levigate, *v. t.* चूर्ण् 10, क्षुद् 7 U, पिष् 7 P. 2 श्लक्ष्णीकृ 8 U, परिष्कृ.

Levitate, *v. t.* लघूकृ 8 U.

Levitical, *a.* याजकीय, पुरोहितसंबंधिन्.

Levity, *s.* लघुता, लाघवं, लघिमन् *m.*, गौरवहीनता. 2 चापल्यं, चांचल्यं, तरलता, लोलता, चापलं, लौल्यं.

Levy, *v. t.* (Forces) समा-हृ 1 P, शस्त्रास्त्रं ग्रहू c., युद्धे व्या-भू c. or वृत् c. 2 (A tax) ग्रहू 9 U, आदा 3 A, दा c. (दापयति); 'l. ed taxes from them' स ताभ्यो बलिमग्रहीत् (R. i. 18). -*s.* सैन्यसमाहारः. 2 दापनं, ग्रहणं 3 सैन्यसमूहः.

Lewd, *a.* कामुक, कामवश, सुरतार्थिन्, लंपट, भोगासक्त, कामासक्त; *See* Lustful. 2 दुष्ट, दुराचार, दुर्वृत्त, दुरात्मन्, पापात्मन्. -ly, *adv.* कामुकवत्, लांपट्येन. -ness, *s.* लांपट्यं, भोगासक्ति *f.*, रताधिता, व्यवायेच्छा. 2 दुष्टता, दुराचारता, दौरात्म्यं.

Lexicon, *s.* कोशः-शः; अभिधानं, शब्दसंग्रहः-कोशः, निघंटुः. -Lexicographer, *s.* कोशकारः. -Lexicography, *s.* कोशरचना.

Liable, *a.* योग्य, अधीन, अर्ह, वश in comp.; gen. ex. by अर्ह 1 P, पात्र, आलु or शील in comp., or by pot. pass. part.; 'l. to punishment' दंडनीय, दंडयोग्य, दंडार्ह; 'l. to be blamed' निंदापात्रं; 'l. to fall' पतयालु, पतनशील; 'man is l. to err' मनुष्याः स्खलनशीलाः-प्रमादाधीनाः; *See* Apt, also. 2 अनुयोगाधीन, प्रष्टव्य, आह्वानाधीन, अभियोज्य. -ness, -Liability, *s.* अधीनता, शीलता, पात्रता, आलुता in comp.; आह्वानाधीनता, अनुयोगाधीनता. 2 (Liabilities) ऋणं, उद्धारः, पर्युदंचनं.

Liaison, *s.* संबंधः, प्रेमबंधः.

Liar, *s.* *See* under Lie.

Libation, *s.* उदक-दानं-तर्पणं-पातनं-निषेकः, (दैवतार्थं) पेयनिषेकः 2 तर्पणोदकं, निषिक्त-द्रव्यं-रसः, अभिधारः; 'to make l. s to' उदकादिदानेन तृप् c., उदकं पत् c. or निषिच् 6 P.

Libel, *s.* परि(रि)वादलेखः, अपवाद-निंदा-आक्षारण-लेखः-पत्रं, पिशुनलेखं. -*v. t.* परिवद् 1 U, अप-भाष् 1 A, अभि-शंस् 1 P, निंदापत्रेण कलंकयति (D.) or आक्षिप् 10; 'not only he who actually l.s great persons, but he also who countenances such l. is guilty' न केवलं यो महतोपभाषते शृणोति तस्मादपि यः स पापभाक् (K. v. 83). -ler, *s.* अपवादकः, अभिशंसकः, परिवादरतः, अभ्यसूचकः, पिशुनः. -lous, *a.* परिवादगर्भ, कलंकावह, अपवादक, पिशुन, कलंक-दुष्कीर्तिकर (रि *f.*).

Liberal, *a.* उदार, वदान्य, दानशील, अकृपण, बहुप्रद, स्थूललक्ष्य, त्यागिन्, त्यागशील, मुक्तहस्त, उदारहस्त, व्यय-पर-शील. 2 (L.-minded) उदार-धी-चेतस्-चरित, महात्मन्, महानुभाव, महेच्छ, महाशय. 3 कुलीन, महाकुल, अभिजात. 4 विपुल, बहुल, प्रचुर, परिपूर्ण, अतिरिक्त; 'l. education' सार्वविषयिकं ज्ञानं. -ity, *s.* औदार्यं, वदान्यता, त्यागः, दानशीलता, अकार्पण्यं, बहुप्रदत्वं, दातृत्वं, अतिदानं. 2 माहात्म्यं, उदारचित्तत्वं, चित्तौदार्यं. -ly, *adv.* उदारतया, अकार्पण्येन, मुक्तहस्तेन, अति-व्ययेन-त्यागेन; बाहुल्येन, बहु :.

Liberate, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-निर्° ; विसृज् 6 P, निस्तृ c., उद्-धृ-हृ 1 P, त्रै 1 A. -ion, *s.* वि-,मुक्ति *f.*, मोचनं, मोक्षः-क्षणं, उद्धारः, त्राणं, निस्तारः. -or, *s.* वि-,मोचकः, मोक्षकः, उद्धर्तृ *m.*, तारकः, निस्तारकः, रक्षितृ *m.*

Libertine, *a.* खंडितवृत्त, व्यसनिन्, कामविषयासक्त, विषयिन्, भोग-काम-आसक्त, दुर्वृत्त, निर्-अ-मर्याद, भ्रष्टचरित्र, मुक्तमर्याद, दुराचार, व्यभिचारिन्, कामवृत्त. -*s.* लंपटः, कामुकः, कामासक्तः, विटः, स्त्री-लंपटः-परः-सेविन् *m.* -ism, *s.* व्यसनं, व्यभिचारः, लांपट्यं, विषयासक्ति *f.*, भोग-काम-आसक्तः, दुर्वृत्तता, अमर्यादा, स्त्रीव्यसनं-व्यासंगः.

Liberty, *s.* स्वाधीनता, स्ववशता, स्वतंत्रता, स्वातंत्र्यं, अनायत्तता, अपारतंत्र्यं, अयंत्रणं, दास्याभावः, अदास्यं, स्वाच्छंद्यं, स्वेच्छाचारिता. **2** स्वेच्छा, स्वकामः, स्वरुचि *f.*, यदृच्छा. **3** अनुज्ञा, अनुमति *f.* **4** मुक्ति *f.*, मोक्षः-क्षणं, मोचनं. **5** विरहः, अभावः, शून्यता. **6** अधिकारः, क्षमता, शक्ति *f.* **7** कर्मावशता, दैवानधीनता, अदैवपरता. **8** अमर्यादा, मर्यादातिक्रमः, अविनयः, विनयातिक्रमः, विनयोल्लंघनं; 'don't take l. with your teachers' गुरुषु अविनयं मा कार्षीः; 'your ladyship is at l. to do what befits the occasion' यदत्रावसरप्राप्तं तत्र प्रभवति भवती (Ka.158); बंधे मोक्षेच अधुना सा ते प्रभवति (Ka. 354) 'she is at l. to detain or set you free'; 'to set at l.' मुच् 6 P or c. मोक्ष् 10; *See* **Liberate**; 'at l.' अयंत्रित, निरवग्रह; *See* **Free.**

Libidinous, *a. See* **Lustful.**

Libra, *s.* तुला, तुलाराशिः. **-Librate,** *v. t.* तुल् 10. **-ion,** *s.* तोलनं.

Library, *s.* पुस्तकसंग्रहः-समूहः, ग्रंथसमुदायः-संग्रहः. ? पुस्तकालयः, ग्रंथालयः, ग्रंथशाला, पुस्तकशाला-अगारं. **-Librarian,** *s.* ग्रंथशालाध्यक्षः, पुस्तकालयाधिकृतः, ग्रंथाध्यक्षः.

License, *s.* अनुज्ञा, अनुमतिः *f.*, आज्ञा; 'written l.' अनुज्ञापत्रं-लेखः. **2** अनियंत्रणं, मर्यादातिक्रमः, व्यतिक्रमः, उत्क्रमः, निर्यंत्रणं; 'poets have l. (in every way)' निरंकुशाः कवयः. *-v. t.* अनु-ज्ञा 9 U. आज्ञापत्रं-अनुमतिलेखं-दा 3 U. अनुमन् 4 A. **-Licentiate,** *s.* लब्धानुज्ञः, अधिकारयुक्तः, दत्ताधिकारः.

Licentious, *a.* अनियंत्रण, निर्मर्याद, स्वेच्छाचारिन्, कामवृत्त, स्वरिन्, उच्छृंखल, अवरुद्ध, अनर्गल. **2** कामासक्त, उद्दामचरित, अतिक्रांतमर्याद, दुराचार, अशिष्टाचार, धर्मभ्रष्ट, व्यसनिन्, व्यसनासक्त, विषयासक्त, कामुक, दुर्वृत्त, लंपट; स्त्रीव्यसनिन्; *See* **Libertine, Lustful. -ly,** *adv.* उच्छृंखलं, निर्यंत्रणं, निर्मर्यादं; कामुकवत्, लंपटवत्. **-ness,** *s.* व्यभिचारः, अत्याचारः, दुराचारः, दुर्वृत्तता, व्यसनिता, भ्रष्टचरित्रत्वं, लांपट्यं, स्त्रीसंगपरता, मर्यादातिक्रमः, व्यतिक्रमः, उत्क्रमः, निर्यंत्रणा.

Lichen, *s.* सूकरी, सूकराक्रांता, शिलावल्का.

Lick, *v. t.* लिह् 2 U, आ-अव-सं-परि°; 'l. up' ग्रस् 1 A, ग्रह् 9 P. **2** तड् 10, प्र-ह् 1 P; 'l. the dust (before one)' भूमौ निपत् 1 P or क्षी 2 A. **-ing,** *s.* लेहः-हनं. **2** आघातः, प्रहारः, ताडनं, दंडाघातः, वेत्रप्रहारः. **-Lickerish,** *a.* सुरस, स्वादु, मिष्ट. **2** लेहोत्सुक, भोगोत्सुक.

Licorice, *s.* यष्टिमधु *n.*, यष्टि(ष्टी)मधुकं, मधुयष्टिका, मधुकं, क्लीतकं.

Lid, *s.* पिधानं, आच्छादनं, आवरणं, पटलं, पुटः-टं-टी, छदः-दनं, शरावः, मुद्रः, वर्धमानकः, उदंचनं; 'eye-l. नेत्रच्छदः, अक्षिपुटः.

Lie, *s.* असत्यं, अनृतं, वितथं, अतथ्यं, अलीकं; मृषा or अनृत-वाक्यं or वचनं, मृषोक्ति *f.*, मृषोद्यं, मिथ्या-वादः-भाषणं-वचनं-उक्तिः, मृषा-असत्य-वादः, असत्यभाषणं. *-v. i.* शी 2 A, अधि-शी (with acc.), आस् 2 A, निषद् 1 P, संविश् 6 P, **2** वस् 1 P, स्था 1 P, अव-स्था 1 A; gen. by भू, वृत् 1 A, अस् 2 P, विद् 4 A; 'Lanka l. s to the south of India' लंका भारतवर्षस्य दक्षिणतोऽवस्थिता or वर्तते. **3 Consist in,** q. v. 'l. hard upon' पीड् 10, बाध् 1 A, आ-यस् c. **-down,** शी, संविश्, स्वप् 2 P, निषद्. **-in,** प्रसवावस्थायां वृत्; 'lying-in-chamber' आरिष्टं, सूतिकागृहं; 'l. in the wait' निभृते स्था, नि-ली 4 A; 'l. in the way' रुध् 7 U, अंतर्-इ 2 P, अंतरायो भू. **-on,** आ-अव-समा-लंबू 1 A, आश्रि 1 U; *See* **Depend. 2** 'Be incumbent' q. v. **-with,** संगम् 1 A, अनुगम्, मैथुनं कृ 8 U. **2** अधीन-*a.* भू; गम्; 'the fault l. s with you entirely' सर्वथा तवैवायं दोषः, त्वमेवात्र सर्वात्मना दोषभाक्; 'the fault l. with my friend' सखीगामी (अयं) दोषः (S. 4).

Lie, *v. i.* अनृतं-मिथ्या-असत्यं-वद् 1 P or वच् 2 P or भाष् 1 A, &c. (Speak, q.v.); 'thou liest in the throat' नितांतमनृतं वदसि; **-Liar,** *s.* मिथ्या-मृषा-अनृत-असत्य-वादिन् or भाषिन्, असत्यवाच्, अलीक-वाच्, अनृतिन्, all *m.* असत्यशीलः, मिथ्यावादशीलः. **-Lying,** असत्य-अनृत-मिथ्या-भाषणं, मृषा-मिथ्या वादः, मिथ्यावादित्वं, असत्यता; *See* (*s.*). *-a.* मृषावादिन्, अनृतवाच्, असत्य; *See* above.

Lief, *adv.* कामं, प्र-नि-कामं, कामतः, इच्छापूर्वं, संतोषेण, प्रीत्या.

Liege, *s.* प्रभुः, स्वामिन् *m.*, ईश्वरः, पतिः; महाराजः, देवः (in addressing). *-a.* भक्त, सेवा-भक्ति-बद्ध, प्रभु-स्वामि-भक्त, स्वाम्यनुरक्त, प्रभुवश; 'l. man' भक्तः, प्रभुसेविन्: *m.* **2** आज्ञापकः; better ex. by (*s.*).

Lien, *s.* आविहितकालं *-a.* स्वाम्यं or अधिकारः or स्वत्वं.

Lientery, *s.* अतिसारः, आमातिसारः.

Lieu, *s.* स्थानं, भूमि *f.*; 'in l. of' स्थाने, विनिमयेन; *See* **Instead** (**of**). **-Lieutenant,** *s.* प्रतिनिधिः, प्रतिपुरुषः (lit.) सेनापतिप्रतिनिधिः; 'l. governor' प्रतिशासकः; 'lord l.' राजप्रतिनिधिः.

Life, *s.* जीवनं, जीवितं, प्राणधारणं, असुधारणं. **2** जीवः, सत्त्वं, जीवितं, चैतन्यं,

चेतना, प्राणवायुः, प्राणात्मन् *m.*, जीवात्मा; ' endowed with l. ' जीविन्, प्राणिन्, सजीव, सचेतन; ' love of l. ' जीवितृष्णा, जिजीविषा; ' impatience of l. ' जीवितद्वेषः-त्रासः; 'deprived of l.' हतप्राण-जीवित, नष्टप्राण; ' support of l.' प्राणयात्रा-धारण-रक्षणं; ' reckless of l. ' जीवितव्ययिन्, जीवितनिरपेक्ष; ' means of l.' जीवनोपायः. **3** (Life-time) आयुस् *n.*, जीवितं, जीवनं, जीवितकालः, आयुर्मर्यादा, आयुःपरिमाणं; ' possessed of long l. दीर्घायुस्, आयुष्मत्, चिरायुस्; 'for l.' ' during l. ' ' all one's l. ' यावज्जीवं, आमरणात्; ' in all one's l.' आजन्म, जन्मतः प्रभृति or आरभ्य; ' my lamp of l. is nearly out ' निर्वाणभूयिष्ठो मे जीवितप्रदीपः or अवसितप्रायो मे जीविताधिः. **4** (fig.) जीवितं, प्राणाः, (त्वं जीवितं मे U. 3). **5** संसारः, भवः, संसृति *f.*, लोकयात्रा, भूलोकवासः, इहवासः. **6** वृत्ति *f.*, आचारः, व्यवहारः, रीति *f.*, चेष्टितं, प्रवृत्तिः, वृत्तं, आचरणं; 'leading a virtuous l.' साधुवृत्त, सदाचार, पुण्यमार्ग. **7** चरितं, चरित्रं, जीवनवृत्तांतः, चरित्ररचना-कथनं. **8** अवस्था, दशा, स्थिति *f.*, वृत्तिः, भावः, गति *f.* **9** उत्साहः, वीर्यं, तेजस् *n.*, सत्वं, रसः; ' bring or restore to l. ' उज्जीव् *c.*, सोच्छ्वास-*a.* कृ 8 U, असून् प्राप् *c.*, (परीक्षितं दुर्लभानसून्प्रापितवान् Ka. 175); ' come to l. ' उज्जीव् 1 P; ' active l.' प्रवृत्तिः, प्रवृत्ति-संसार-मार्गः; लोकव्यवहारः; ' retired l. ' निवृत्तिः, निवृत्तिमार्गः; 'he entered on a military l.' योधवृत्तिमाश्रयत; ' engaging in public l. ' लोकव्यवहारप्रवृत्तिः; ' in this l. ' इह, इहलोके; 'the vicissitudes of l.' संसारचक्रं-परिवर्तनं, दशांतराणि; ' l.-blood ' प्राणः, तत्त्वं, सारभूतं द्रव्यं; ' l. -giving ' प्राणद, जीव-द-दायिन्; वीर्यद, उत्साहकर (री *f.*); ' l. guard ' राजपरिच्छदः, शरीररक्षकः; ' l. -time ' जीविताधिः, जीवितकालः; ' during one's l.-time ' यावज्जीवं. **-less**, *a.* गतजीवित, गतासु, परासु, व्यसु, गत-नष्ट-प्राण, हतजीवित, प्राण or जीव-रहित or हीन, अचेष्ट. **2** अजीव, निर्जीव, वि-अ-चेतन, चैतन्य-हीन-रहित, निश्चेतन. **3** निःसत्त्व, निरुत्साह, निस्तेजस्, सत्त्व-रस-हीन.

Lift, *v. t.* उन्नम् *c.* (नमयति), उद्गम् *c.* (गमयति), उच्छ्रि 1 U, उद्यम् 1 A, उत्था *c.* (उत्थापयति), उत्क्षिप् 6 P, उद्व 1 P, उन्नी 1 P, उत्कृष् 1 P, उत्तुल् 10; oft. by उत् in comp.; 'with the neck l.-ed up' उत्कंधरः; उद्ग्रीवः, ऊर्द्धग्रीवः, उन्मुखः, &c. **2** (In rank) उत्कृष्टपदे नियुज् 7 A, 10, मानं संवृध् *c.*, प्रतिपत्ति-प्रतिष्ठा-उत्कर्ष-पद-वृद्धि-लभ् *c.* (लंभयति); ' l. with pride ' दृप् *c.*, गर्वेण उद्वन् 2 P, दर्पेण आ-ध्मा 1 P; ' to l. up the voice ' तारस्वरेण-उच्चैः-आकुश् 1 P. **-s.** उन्नमनं, उच्छ्रयः, उत्कर्षः, उत्थापनं. **2** प्रतिपत्ति *f.*, पदवृद्धि *f.*, उन्नति *f.* **3** उपकारः, साहाय्यं.

Ligament, *s.* बंधः, बंधनं, पाशः, निगडः, शृंखला-लं-लः. **2** संधिबंधः, ग्रंथि-अस्थि-बंधनं.

Ligature, Ligation, *s.* बंधनं, वेष्टनं, परि-आ-वेष्टनं, रज्जु *f.*

Light, *a.* लघु (in all senses); अगुरु, अल्पभार, अल्पप्रमाण, लघुभार, लघुप्रमाण; सुवाह्य, सुखवाह्य, सुसह्य, अदुर्वह, अदुःसह. **2** सुख, सुकर, अकष्ट, सुसाध्य, सुगम, निरायास, अविषम, अकठिन. **3** चपल, लघु, लघुशरीर-गति. **4** सोल्लास, प्रफुल्ल, निश्चिंत. **5** चपल, चंचल, लोल, तरल, अस्थिर, अनवस्थित, लघुचित्त-स्वभाव-चेतस्, गांभीर्यहीन, निर्गौरव. **6** तुच्छ, क्षुद्र, अत्यल्प, तृणप्राय, लघ्वर्थ, अल्पार्थ, अल्प-लघु-प्रभाव; ' l. armed ' लघ्वायुध, लघुशस्त्रभृत; ' l.-fingered ' लघुहस्त, चपलपाणि; 'l.-footed' लघु-शीघ्र-गति, द्रुतगति; ' l.-headed ' लघुचित्त-चेतस्, चपल-लोल-मति; भ्रांत or विक्षिप्त-बुद्धि or चित्त; बुद्धिभ्रमात् प्रलापिन्; ' l.-headedness ' चित्त or बुद्धि-भ्रमः or विप्लवः; ' l-hearted ' लघुचित्त-चेतस्, क्षुद्रमनस्; हृष्ट-प्रसन्न हृदय, उल्लासिन्, प्रफुल्लचित्त, आनंदित, सोल्लास; ' l.-minded ' लघु-चेतस्-चित्त, क्षुद्र or कृपण-बुद्धि or मति; ' l. spirited ' हृष्टहृदय-चित्त, &c. **7** पांडु, श्वेत; oft. ex. by आ, ईषत्; 'l. red ' श्वेतारुण, ईषद्रक्त; ' l. blue ' श्वेतनील, आनील; 'l. food' सुपच्यं-सुपाकं-अन्नं; 'to make l. of' लघूक् 8 U, लघु मन् 4 A, न गण् 10, तृणाय मन्. **-v.** *i.* आ-पत् 1 P; (अकस्मात्) आसद् *c.*, प्राप् 5 P, आ-उपा-गम् 1 P. **2** अवतृ 1 P, अव-रुह् 1 P, अव-नि-पत्; अध्यास् 2 A, अधि-शी 2 A (with acc.), निषद् 1 P, नि-ली 4 A. **-en,** *v. t.* लघूक्, लघयति (D.); शम् *c.* (शमयति), प्र-उप°. **-er,** *a.* लघुतर, लघीयस्. **-s.** तरालुः, वहित्रं, उडुपं. **-ly,** *adv.* लघु, लाघवेन, अल्पप्रमाणेन. **2** सुखेन, अकष्टेन, अनायासेन. **3** निष्कारणं, हेतुं विना. **4** लघुगत्या, चपलं, सत्वरं. **5** लघुचेतसा, चंचलवत्, अस्थिरतया; ' to think l. ' लघु मन् 4 A. **-ness,** *s.* (lit.) लघुता-त्वं, लाघवं, अल्पभारत्वं, भाराभावः. **2** सुखं, सौकर्यं, अनायासः, सुसाध्यता, अकष्टत्वं. **3** सुवाह्यता, सुसह्यता. **4** लाघवं, चापल्यं, द्रुतगतित्वं, शरीरलघुता. **5** चापल्यं, चांचल्यं, अस्थिरता, लोलता, चपलता, अगौरवं, लघिमन्, लाघवं, लघुता. **6** लघुता, तुच्छता, क्षुद्रता. **-some,** *a.* हृष्ट, सोल्लास, प्रफुल्ल, वीतचिंत, सानंद.

Light, *s.* प्रकाशः, आलोकः, भा, प्रभा, आभा, द्युति *f.*, कांति *f.*, दीप्ति *f.*, तेजस् *n.*, ज्योतिस् *n.*, रुचि *f.*, भास् *f.*, त्विष् *f.*; वर्चस् *n.* **2** प्र-,दीपः, दीपिका; 'l. house' दीपगृहं. **3** ज्ञानं, बोधः, अवगमः, प्रकाशः. **4** प्रसिद्धि *f.*, प्रख्याति *f.*, प्राकाश्यं, प्रकाशता, प्राकट्यं. **5** दृष्टि *f.*; 'See or come to l.' प्रसिद्धिं-प्रकाशतां-गम् 1 P, प्रकाशी भू 1 P, आविर्भू, प्रादुर्भू; 'bring to l.' प्रकाशं c., प्रकटीकृ 8 U, स्पष्टीकृ, आविष्कृ, वि-वृ 5 U, प्रख्या c. (ख्यापयति); 'to throw l. on', विशदीकृ, विवृ, प्रकाशं c.; *See* **Explain**; 'from the l. of utility' उपयोगदृष्ट्या; 'considered in this l.' अनया दृष्ट्या. **-***v. t.* दीप् c., उत्-प्र-सं°; प्र-,द्युत् c., प्रकाशं c., अव-वि-भास् c., ज्वल् c., प्र-उत्-सं-°; सं-,ईंध् 7 A; संधुक्ष् 10; तप् c., प्र-सं-उत्°; 'to be l. ed' दीप् 4 A, ज्वल् 1 P. **-en,** *v. t.* प्रकाशं c., दीप् c., ज्वल् c., द्युत् c.; *See* (*v. t.*) above. **-***v. i.* स्फुर् 6 P, द्युत् 1 A, प्रकाशं 1 A, विलस् 1 P. **-er,** *s.* प्रकाशकः, द्योतकः, दीपकः, द्युतिदः. **-less,** *a.* निष्प्रभ, अप्रभ, निरालोक, निस्तेजस्. **-some,** *a.* दीप्तिमत्, प्रकाशवत्, सुप्रभ, तेजस्विन्, सुप्रकाश, तेजोमय (यी *f.*). **-ning,** *s.* तडित्, विद्युत्, सौदामि(म)नी, अचिरप्रभा, क्षणदा, चंचला, चपला, शत-ह्रदा, -ह्रादिनी, शंपा, ऐरावती, क्षण-प्रभा-द्युति (all *f.*); 'fire of l.' वैद्युतः अग्निः; 'forked l.' तडिल्लता, विद्युल्लता; 'the falling of l.' विद्युत्पातः; 'struck by l.' विद्युता उपहत.

Ligneous, *a.* काष्ठ-दारु-मय (यी *f.*), काष्ठ-दारु-रूप.

Ligniferous, *a.* काष्ठद, दारुप्रद.

Ligniform, *a.* काष्ठरूप, काष्ठाकृति.

Like, *a.* सदृश (शी *f.*), तुल्य, सम; समान, सन्निभ, अनुकारिन् (with gen. or instr.); oft. by उपम, निभ, रूप, विध, प्रतिम, संकाश, नीकाश, प्रतीकाश, भूत, (all in comp.); also by स or अनु in comp.; 'of l. properties' सगुण, अनुगुण-धर्मन्, सम-तुल्य-गुण, समभाव; 'of l. form' सरूप, अनुरूप, तुल्याकृति, तुल्यरूप; 'l. a father' पितृभूतः, पितृस्थानीयः; 'of l. class' सजाति, सजातीय, सवर्ण, सवर्ग, तुल्यवर्ण; 'almost l. Hara' हरकल्प; 'l. this' ईदृश-शृ, एतादृश-शृ; 'l. that' तादृश्-श; 'l. what' कीदृश्-श; l. which' यादृश्-श; 'l. me, us' मादृश, अस्मादृश, &c.; 'l. thee, you' त्वादृश, युष्मादृश, &c.; 'l. your honour' भवादृश; 'to be l.' अनुकृ 8 U (with gen.), संवद् 1 P (with instr.), अनुह 1 P (with acc.); *See* **Resemble**; 'the son was l. his generating cause (father)' न कारणात् स्वाद्विभिद्दे कुमारः (R. v. 57); 'these and the l.' एवमादि; 'in l. manner' तथा, एवं, तद्वत्, तथैव, एवमेव, एवंविधं. **-***s.* समः, तुल्यः, सदृशः, तुल्यगुणः, यमकः-लः; 'his l. was and will never be seen' अनेन सदृशो न भूतो न भविष्यति. **-***adv.* Ex. by वत् in comp., इव, यथा, निर्विशेषं in comp.; 'l. an earthen pot' मृद्घटवत्; often by Karm. or Bah. comp.; 'black l. a cloud' मेघश्याम; 'having a moon-l. face' चंद्र-मुख; 'brought up l. one's own children' अपत्यनिर्विशेषं संवर्धित; 'to act l.' अनुकृ. **2 Likely,** q. v. **-***v. t.* रुच् 1 A (with dat. of person who likes); अभिनंद् 1 P, अनु-सं-अभि-मन् 4 A, अनुमुद् 1 A, प्रशंस् 1 P, प्री pass., तुष् 4 P; 'does not l. the present' उपायनं नाभिनंदति, उपायनेन न तुष्यति &c., स्निह् 4 P, अनुरंज् pass. (with loc.). **-***v. i.* इष् 6 P, अभिलष् 1, 4 P, रुच्; oft. by काम in comp.; 'just as you l.' यस्ते छंदः (V. 3), यद्भवते रोचते; 'doing as one l. s' कामचारः, स्वैरवृत्तः, स्वच्छंदः, स्वैरिन्; 'taking what form he l. s' कामरूपः; 'do what you l.' यथाभिलषितं क्रियतां. **-ed,** *a.* मत, अभि-अनु-सं-° इष्ट, प्रिय, दयित. **-en,** *v. t.* उप-मा 3 A, 2 P, सदृशीकृ; *See* **Compare**. **-ing,** *s.* रुचि *f.*, अभिरुचिः, कामः, इच्छा, तोषः, प्रीति *f.*, तुष्टि *f.*, प्रणयः, अनुरागः, अभिलाषः, छंदः, छंदस् *n.*, सं-अनु-मति *f.*; 'he was not to her l.' स न तस्या रुचये बभूव (R. VI. 44); 'of your l.' त्वदभिमत. **-ness,** *s.* सादृश्यं, साम्यं, तुल्यत्वं, आनुरूप्यं, सारूप्यं, तुला, उपमा, अनुकारः, संवादः, आनुगुण्यं, औपम्यं, &c. **2** रूपं, आकृति *f.*, आकारः, मूर्ति *f.* **3** प्रतिमा-मानं, प्रतिरूपं-कृतिः, प्रतिमूर्तिः, प्रतिच्छंदः, चित्रं, आलेख्यं, प्रतिबिंबं; 'a speaking l.' संवादिनी आकृतिः. **-wise,** *adv.* तथैव, तथा, तद्वत्. **2** अपि, अपि च, किं च, तथा, अपरं च. **-Likely,** *a.* संभाव्य, संभवनीय, उपपन्न सत्यसंकाश; अद्धेय; 'it is l. that' इति संभवति or उपपद्यते. **2** (Probable) ex. by प्रायः, प्रायज्ञः, प्रायेण, with pot. pass. part., or by अपि नाम; 'he is l. to come to-morrow' प्रायस्तेन श्व आगंतव्यं; अपि नाम तयोः अभिमतः पाणिग्रहः स्यात् (Mal. 1) 'is it l. that &c.' **-hood, -ness,** *s.* संभाव्यता संभवः; better by (*a.*); *See* above.

Lily, *s.* नलिनी, उत्पलं, कुमुदं, पद्मं; *See* **Lotus.**

Limation, *s.* मार्जनं, लोहमार्जनेन घर्षणं.

Limature, *s.* लोहचूर्णं, लोहजं.

Limb, *s.* अंगं, अवयवः, (lit. & fig.); गात्रं; 'over every l.' प्रत्यंगं, सर्वांगीण-*a.*; 'l. by l.' अवयवशः, गात्रे गात्रे. **2** प्रांतः, कोटि *f.*, सीमा. **-ed,** *a.* अंगिन्, सावयव; 'large-l.' बृहदवयव, महांग (गी *f.*); 'slender-l.' तन्वंग, कोमल-पेलव-अंग. **-less,** *a.* अनंग, निरवयव, अंगहीन

Limber, *a.* मृदु, कोमल, शिथिल, अदृढ, नम्य.

Limbo, *s.* नरकः, निरयः. **2** कारा, कारागारं, बंधनागारं.

Lime, *s.* (Tree) जंबीरः; *See* **Lemon. 2** (Quick-l) चूर्णः-र्णं, कर्करं; 'l.-water' सुधा, लेपः (for colouring); 'l.-stone' चूर्णखंडः, चूर्णोपल, कर्करं. **-y,** *a.* चूर्णमय (यी *f.*), सचूर्ण, कर्करमय. **2** श्यान, सांद्र, चूर्णोपम.

Limit, *s.* अवधिः, मर्यादा, सीमा, सीमन् *f.*, पर्यंतः, अंतः, प्रांतः, परिच्छेद; परिमाणं, इयत्ता, अवसानं; वेला (of sea); ' of narrow l. (scope)' अल्पविषय-*a.*; ' set or fix a l. to ' परिच्छिद् 7 P; ' no (definite) l. can be set to his fame ' तस्य यश इयत्तया परिच्छेत्तुं नालं (R. VI. 77). **-*v. t.*** परिच्छिद्, परि-मा 2 P, 3 A; इयत्तया परिच्छिद्, सीमां नि-रूप् 10 or निर्धृ 10; *See* **Define. 2** सं-नि-यम् 1 P or c.; सं-हृ 1 P, संकुच् 1 P or c., नियंत्र् 10, निबंध् 9 P, निग्रह् 9 P. **-ation,** *s* परिच्छेदः, सीमा-मर्यादा-निरूपणं. **2** परिमितता, सावधिकता, समर्यादत्वं, ससीमता. **-ed,** *a.* परिच्छिन्न, परिमित, मित, समर्याद, सावधिक; नियत, संहृत, अल्पविषय, संकुचित, अव्यापक, संबाध; ' not through the l. nature of (your) merits' न गुणानामियत्तया (R. x. 32); ' l. meaning ' नियतार्थः; ' l. knowledge' अल्पविषयं ज्ञानं; ' l. monarchy ' नियंत्रितं or संयतं प्रभुत्वं. **-er,** *s.* परिच्छेदकः, **-less,** *a.* अमित, अनंत, असीम, निरवधि.

Limmer, *s.* नीचजनः, अपसदः in comp.

Limn, *v. t.* लिख् 6 P or चित्र् 10. **-er,** *s.* चित्रकरः.

Limous, *a.* सकर्दम, पांकिल.

Limp, *v. i.* खंज् 1 P, लंग् 1 P, खोड्-खोड्-खोल्-1 P. **-*s.*** लंगः, लंगगति *f.* **-*a.*** मृदु, शिथिल, कोमल. **-er,** *s.* खंजः, लंग-खंजगतिः. **-ing,** *a.* खंज, खोर, खोल, खोड, लंगगति, विकलगति. **-ingly,** *adv.* खंजवत्, लंगगत्या.

Limpid, *a.* स्वच्छ, प्रसन्न, विमल, स्वच्छतोय, प्रसन्नवारि, विमलजल. **-ness,** *s.* स्वच्छता, विमलता, प्रसादः.

Lin, *s.* पल्वलं, तडागः-गं, जलाशयः.

Linch-pin, *s.* अक्षाग्रकीलः, अ(आ)णिः, उद्धथः.

Lincture, *s.* अवलेहः, लेह्यं.

Line, *s.* रे(ले)खा, रेषा. **2** पंक्तिः, पद्धतिः, सरणिः-णी, राजिः-जी, आवलिः-ली, ततिः, श्रेणिः-णी (all *f.*), माला. **3** सूत्रं, रज्जु *f.*, गुणः, तंतुः. **4** आकारः, आकृति *f.*, रूपं. **5** प्राकारः, वप्रैः, परिखा, प्राचीरं. **6** (Of troops) दंडः, व्यूहः, पंक्तिः, बलविन्यासः. **7** क्रमः, अनुक्रमः, पर्यायः. **8** परिपाटि-टी *f.*, श्रेणिः-णी, पंक्तिः, परंपरा, माला, पारंपर्यं, आवलिः-ली; आनुपूर्व्यं. **9** (Of conduct) मार्गः, पथिन् *m.*, रीति *f.*, सरणिः, व्यवहारः. **10** देशः, विषयः, अंगं. **11** दिश् *f.*, दिशा, मार्गः. **12** भूचक्रं; *See* **Equator;** ' ruled l. ' रेखा, अंकः; ' in a l. ' पंक्तिक्रमेण, पंक्तिशः; ' by l. and rule ' यथासूत्रं; ' l. of the face ' वदन-मुख-रेखा; 'printed l. ' पंक्तिः; 'l. of a stanza ' पादः, चरणः-णं; ' in a regular l.' अनुक्रमेण, क्रमशः, आनुपूर्व्येण, अनुपूर्वशः; ' l. of the family ' वंशक्रमः-परंपरा-आवलिः; ' a good l. of conduct' सुमार्गः, सुपथः; ' a bad l. of conduct ' वि-कु-पथः, विमार्गः, उन्मार्गः; ' l. of study ' अध्ययनक्रमः; ' l. of posterity ' वंशावली; ' fishing-l. ' बडिशसूत्रं; ' to draw l. s.' लिख् 6 P; ' draw l. s on the ground ' भूमिं रेखाभिः वि-उत्-लिख् or अंक् 10; 'to draw the l. ' वि-विच् 3, 7 U, भेदं दृश् c., or निरूप् 10. **-*v. t.*** अंतः आ-,छद् 10, अभ्यंतरे छद्. **2** पांक्तिक्रमेण स्था c. (स्थापयति) or निविश् c. **3** रेखाभिः अंक्; ' the streets were l. ed with guards' अनुरथ्यं पंक्तिक्रमेण रक्षिणः स्थापिताः. **-age,** *s.* अन्वयः, वंशः, कुलं, संतति *f.*, संतानः, गोत्रं, वंशावली, वंशपरंपरा; ' of royal l. ' राजवंश्य, राजकुलप्रसूत; 'of high or noble l.' अभिजात, महाकुल. **-al,** *a.* रेखारूप-मय (यी *f.*). **2** परंपरागत, परंपरायात-आगत, क्रमप्राप्त-आगत -आयात, अन्वयागत, परंपरीण, कुलक्रमागत; ' l. descent ' अन्वयागमः, क्रमागमः, कुलक्रमागमः; ' l. descendant ' संतानः, संततिः, अपत्यं. **-ally,** *adv.* परंपरया, पारंपर्येण, वंशक्रमेण, कुलक्रमागमेन, ' l. descended ' वंशक्रमायात; *See* above. **-ing,** *s.* अंतराच्छादनं, अंतःपटलं-पुटं-वेष्टनं, आस्तरः-रणं. **-Lineament,** *s.* रेखा, वदन-मुख-रेखा, वदनाकारः, वदनाकृति *f.*, लक्षणं, चिह्नं. **-Linear,** *s.* पंक्ति or रेखा-रूप or मय (यी *f.*).

Linen, *s.* क्षौमं, क्षौमपटः-वस्त्रं; शाणपटः-वस्त्रं; **-*a.*** क्षौम-औम-(मी *f.*), शाण (णी *f.*), अतसीनिर्मित; 'l.-draper' क्षौमवस्त्रविक्रयिन् *m.*, वस्त्रविक्रयोपजीविन् *m.*

Linger, *v. i.* वि-लंब् 1 A, मंदायते (D.), चिर (रा)यति (D.), कालं क्षिप् 6 P or

द 1 P, मंदं मंदं चल् (इ) 1 P. **2** विक्लृप् 1 A, विचर् c. **3** चिरं-दीर्घकालं-स्था 1 P, or वृत् 1 A; 'l. ing on a sick bed' चिररोगिन्. **-er,** *s.* विलंबकारिन्, विलंबिन्, मंदगामिन्, मंदगति, चिरक्रियः, दीर्घसूत्रिन्, all *m.* **-ing,** *a.* दीर्घ, चिरस्थायिन्, चिर-दीर्घ-कालीन, चिरकालस्थ. **2** विलंबिन्, विलंबित, मंदायमान. —*s.* विलंबः, कालक्षेपः-पणं. **-ingly,** *adv.* मंदं मंदं, विलंबेन, सविलंबं, मंदगत्या, कालक्षेपेण.

Linget, *s.* धातु-लोह-पिंडः.

Lingual, *a.* मूर्धन्य, मूर्धस्थानीय.

Linguiform, *a.* जिह्वाकृति, जिह्वारूप.

Linguist, *s.* भाषाकोविदः, शाब्दिकः, शब्द-व्युत्पन्नः, भाषाप्रवीणः, भाषाज्ञः, बहुभाषाज्ञः, अनेकभाषानिपुणः. **-ic,** *a.* (*s.*) in comp.

Liniment, *s.* प्र-आ-वि-लेपः-पनं, उपदेहः, अभ्यंजनं, मर्दनौषधं.

Link, *s.* संधिः, ग्रंथिः. **2** बंधनं, बंधपाशः, शृंखला-लः-लं. **3** संयोगः, संबंधः, अन्वयः, संदर्भः, प्रबंधः. **4** उल्का, उल्मुकं 'l.s of life' जीवितनिबंधनानि; 'l. boy' उल्काभृत्. —*v. t.* संयुज् 7 U, 10, सं-धा 3 U, संश्लिष् c., संबंध् 9 P, व्याति-पंज् 1 P, सं 9 P; *See* **Knit.** **-ed,** *a.* संयुक्त, संश्लिष्ट, संबद्ध, अन्वित, सान्वय.

Linn, *s.* जलप्रपातः, निर्झरः.

Linseed, *s.* अतसी, उमा, क्षुमा, उमा-अतसी-बीजं, &c.

Linsey-woolsey, *a.* क्षौमौर्ण. **2** असार, निःसत्व; क्षुद्र.

Linstock, *s.* ज्वलनकाष्ठं, अग्निदशलाका.

Lint, *s.* क्षौमबंधः, विकेशिका.

Lintel, *s.* द्वाराग्रकाष्ठं, द्वारोर्ध्वदारु *n.*

Lion, *s.* सिंहः, हरिः, केसरिन् *m.*, पंचास्यः पंचाननः, हर्यक्षः, कंठीरवः, मृगरिपुः, मृगाशनः पुंडरीकः, पंचनखः, चित्रकायः, मृगद्विट्; and comp. of इंद्रः, राजन्, पतिः, अधिपः, अधिपतिः with मृग or पशु; मृगपतिः, मृगराजः, मृगाधिपः, पशुपतिः, &c.; 'l.'s part' भूयिष्ठभागः. **-ess,** सिंही. **-like,-ly,** *a.* सिंहस्वभाव, सैंह (ही *f.*).

Lip, *s.* ओष्ठः (strictly upper), दशन-रदन-छदः, रद्-दंत-छदः, दशन-दंत-वासस् *n.*, अधरः (strictly lower); 'a red or cherry l.' बिंबो(बौ)ष्ठः, बिंबाधरः; 'a woman having cherry l.s' बिंबौष्ठी; 'drinking the l.' अधरपानं, अधरामृत-सेवनं; 'l.-honeyed' मुखमधुः; 'l.-loyalty' मुखभक्ति *f.*, वाग्दार्शिता भक्तिः. **2** कर्णः, पार्श्वः, कठः, मुखं, &c. **-ped,** *a.* ओष्ठ in comp.

Lipothymy, *s.* *See* **Fainting, Swoon.**

Lippitude, *s.* क्लिन्नाक्षता, चुल्लत्वं.

Liquate, *See* **Liquefy** below.

Liquefy, *v. i.* वि-,द्रु 1 P, वि-,ली 9 P, 4 A, जलसाद्भू 1 P, क्षर् 1 P; द्रवीभू. —*v. t.* वि-,द्रु c., वि-,ली c., द्रवीकृ 8 U, जलसात्कृ. **-action,** *s.* द्रवीकरणं, द्रावः, विलयः-यनं, क्षरणं, द्रवीभवनं. **2** द्रवत्वं, विलीनता.

Liquid, *s.* द्रवः, रसः, जलं, द्रव-वस्तु-द्रव्यं, पदार्थः. —*a.* द्रव, द्रुत, द्रवरूप, विलीन, प्रवाहिन्, तरलः; 'reduced to a l. state' द्रवतामापन्न, विलीन, जलीभूत, रसतामुपेत (Ka. 122). **-ity,-nes,** द्रवत्वं, रसता, द्रवभावः, प्रवाहधर्मः.

Liquidate, *v. t.* शुध् c., अपाकृ 8 U, निस्तृ c., अपनी 1 P, अपवृज् 10; मुच् 6 P or c., मोक्ष् 10; 'debt contracted to l. another debt' ऋणार्णं. **-ion,** *s.* शोधनं, शुद्धि *f.*, अपाकरणं, निस्तारः, मुक्ति *f.*, मोक्षः-क्षणं, अपनयनं.

Liquor, *s.* सुरा, मद्यं, हाला, वारुणी, वरुणात्मजा, मदिरा, आसवः, धी (सी)धु *m. n.*, हालिप्रिया, परिस्रुत् *f.*, गंधोत्तमा, प्रसन्ना, इरा, कादंबरी, परिप्लुता; कश्यं; 'l.-shop' शुंडापानं; मद्यस्थानं, शुंडा, पानं; 'round of drinking l.' मधुवारः-कमः; 'distilling of l.' संधानं, अभिषवः; 'l.-ferment' किण्वं, नग्नहूः, कारोत्तरः, मंडः; 'company of l.-drinkers' आपानं, पानगोष्ठिका; 'drinking l.' सरकः, अनुतर्षणं, मद्यपानं. **2 Liquid,** q. v. **3** पेयं.

Lisp, *v. i.* स्वरभंगेन-अस्पष्टं-वद् 1 P or वच् 2 P or उच्चर् c. or उदीर् c., अव्यक्तं वद्; अस्फुटवाचा जल्प् 1 P, स्खल् 1 P. —*s.*, **-ing,** *s.* गद्गदवाच् *f.* -वाक्यं, अस्फुटोच्चारणं, अव्यक्तवर्णं जल्पितं, स्खलितवाच्. **-er,** *s.* अस्पष्टवाच्, गद्गदवाच्, अस्फुटवादिन्, all *m.* **-ingly,** *adv.* अस्फुटवाचा, गद्गदवाचा.

Lissom, *a.* *See* **Flexible.**

List, *s.* आवलि-ली *f.*, पंक्ति *f.*, परिसंख्या, परिगणना, अनुक्रमणिका, सूचि-ची *f.*; 'a l. of names' नामावली; 'a l. of errata' शुद्धिपत्रं. **2** वस्त्रखंडः. **3** वस्त्रप्रांतः, दशाः, वस्तयः (pl.). **4** युद्ध-रण-भूमि *f.*, रंगः, रणाजिरं, मल्लभूः-भूमिः; 'enter or take the l.s' रणार्थं सज्जीभू 1 P or सन्नद्ध-*a.* भू. —*v. t.* वस्त्रखंडैः आच्छद् 10. **2** वस्त्रखंडान् संसिव् 4 P. **3** गणनापत्रे नामानि अभिलिख् 6 P or आरुह् c. (रोपयति). **4 Listen,** q. v. —*v. i.* इष् 6 P, रुच् 1 A, अभिलष् 1, 4 P; *See* **Like,** **2** आ-अव-लंब् 1 A, प्रवणीभू 1 P; *See* **Lean.** **-Listless,** *a.* अनवहित, निरपेक्ष, उदासीन, प्रमादिन्, अद्रुतक, निरुत्साह; आनिच्छु, निरीह, निरुद्योग, विरक्त, निःस्पृह. **2** जड, ग्लान; *See* **Languid.** **-ly,** *adv.* अनवधानेन, निरपेक्षं, उदासीन-

वत्, निरुत्सुक, अनपेक्षया, जडवत्, निःस्पृहं. -ness, s. अनवधानं, अनपेक्षा, औदासीन्यं, अनौत्सुक्यं, विरक्ति f., अनिच्छा, अनीहा, अस्पृहा, अनुत्साहः, अनास्था, जडता, मांद्यं.

Listen, v. i. श्रु 5 P, आकर्ण् 10, नि-शम् c., कर्णं दा 3 U, अव-धा 3 U, अवहित-सावधान-a. भू 1 P; 'l. now' अवधीयतामधुना, कर्णं देहि. 2 अनुवृत् 1 A, अनुरुध् 4 A. -er, s. श्रोतृ m.

Literal, a. मूल, मुख्य, प्रकृत, अरूपक; मूलार्थक, मुख्यार्थक, शब्द् in comp. 2 यथाशब्द्, शब्दार्थानुसारिन्, मूलपदानुसारिन्. 3 अक्षरमय (यी f.); 'l. meaning' प्रकृतार्थः; शब्दार्थः, मूलार्थः. -ity, s. मुख्यार्थः, प्रकृतार्थः, शब्दार्थः, मूलार्थः, अरूपकं. -ly, adv. मूलार्थानुसारेण, शब्दतः, शब्दशः, यथाशब्दं, अक्षरशः.

Literary, a. विद्या-साहित्य-संबंधिन्, विद्याविषयक, शास्त्र-ज्ञान- in comp.; 'l. work' शास्त्रग्रंथः; 'l. dispute' ज्ञानसंघर्षः. 2 (Literate) विद्यावत्, विद्यासंपन्न, विद्याविशिष्ट, विद्यानुरागिन्; विद्या-शास्त्र- in comp.; See Learned. -Literature, s. साहित्यं, विद्या, शास्त्रं; शास्त्रसमूहः; पुस्तकसमुदायः; 'dramatic l.' नाटचपुस्तकसमूहः. -Literati, s. विद्वत्समाजः, पंडितवर्गः-गणः, विद्वद्वृंदं.

Lithe, a. शिथिल, मृदु, भिदेलिम, सुखनाम्य.

Lithograph, v. t, शिलाया उपरि लिख् 6 P, शिलां रेखादिभिः मुद्र् 10 or अंक् 10. -s. शिला or पाषाण-लेखः or मुद्रा. -er, s. शिलालेखकः, शिलामुद्राकृत् m. -y, s. शिलालेखनविद्या, पाषाणलेखनं.

Lithontriptic, a. अश्मरीहर, अश्मरीघ्न (घ्नी f.).

Lithotomy, s. मूत्राश्मोच्छेदः.

Lithotripsy, s. अश्मरीसंघर्षः.

Litigant, a. विवदमान, विवादार्थिन्, कार्यार्थिन्, व्यावहारिक (की f.). -s. वादिन् m., कार्यार्थी, व्यवहर्तृ m., अर्थी, विवादार्थी. -Litigate, v. i. वि-वद् 1 A, व्यव-हृ 1 P. -v. t. विवादास्पदीकृ 8 U. -ed, a. वाद्, ग्रस्त, विवादास्पदीकृत-भूत, वादानुगत. -ion, s. वि-, वादः, व्यवहारः. -Litigious, a. विवादप्रिय-शील, विवादार्थिन्, विवादपर-रत-आसक्त.

Litter, s शिविका, याप्ययानं. 2 तृणशय्या, तृणसंस्तरः-शयनं. 3 शावकगणः-संघः. 4 द्रव्यसंकरः, व्यस्तता. -v. t. शावकगणं सू 2, 4 A, or उत्पद् c. 2 तृणेन आवृ 5 U or आस्तृ 5 U. 3 इतस्ततःविकृ 6 P or विक्षिप् 6 P.

Little, a. अल्प, अल्पक, क्षुद्र, लघु, अणु, सूक्ष्म, ह्रस्व; श्लक्ष्ण, दभ्र, अणुक, क्षुद्र-अल्प-लघु-परिमाण; अल्प-मात्र, अबहु; स्वल्प, स्तोक, अप्रचुर, ईषत्, in comp. 2 क्षुद्रतनु, अल्पकाय-शरीरतनु. 3 क्षुद्र-लघु-मति, कृपण-मनस्-चेतस्-बुद्धि; (as a diminutive) ex. by the suffix क; 'a l. girl' बालिका; 'a l. boy' बालकः; 'a l. cottage' कुटिका; 'very l.' अल्पिष्ठ, अत्यल्प; 'a l. wealth' द्रव्य-लेशः-लवः, स्तोकं द्रव्यं; 'a l. finger' कनिष्ठांगुलि f.; 'for a l. while' कंचित्कालं. -adv. 'a l.' ईषत्, किंचित्, स्तोकं, मनाक्, अभूरि, अबहु; oft. by आ, दर, ईषत् in comp.; 'a l. split' दरदलित; 'not a l.' भृशं, अत्यंतं; 'a l. distant' अनतिदूर, ईषद्दर; 'l. less' ईषदून, किंचिन्न्यून, कल्प-प्राय- in comp.; 'a l. less than dead' मृतप्रायकल्प; 'l.-minded' कृपणबुद्धि, क्षुद्र-लघुचेतस्. -s. अल्पं, किंचित्, स्तोकं, अल्पस्तोक-भागः, अल्पांशः, किंचन, मात्रा, लवः; कणः, लेशः; अल्पमात्रं; 'by l. and l.' अल्पाल्पं, अल्पशः, स्तोकशः. -ness, s. अल्पता, तनुता, लघुता, स्तोकता, &c. 2 (Of mind) दीनता, कार्पण्यं, क्षुद्रता, कदर्यता, दैन्यं.

Littoral, a. तटस्थ, तीरस्थ.

Liturgy, s. प्रार्थनामार्गः, भक्तिमार्गः.

Message, *s.* संदेशः, वाचिकं, संदेशवाच् *f.*, वार्ता, शासनं; 'bearing a m.' दौत्यं, दूत्यं, प्रेष्यभावः; 'sending on a m.' प्रतिशासनं. **-Messenger**, *s.* दूतः, संदेश-वार्ताहरः, वार्तायनः, आ-ख्यायकः, निसृष्टार्थः, प्रेष्यः; वैवधिकः; 'female m.' दूति-वीतिका; 'who will go as a m.' कः प्रास्यति दौत्येन.

Messuage, *s.* वासगृहं, गृहवाटिका.

Metacarpus, *s.* करभः, पीलुः.

Metachronism, *s.* न्यूनकालनिरूपणं.

Metal, *s.* धातुः, लोहः-हं, तेजसं; 'base m.' कुप्यं; 'fused m.' रसधातुः, धातुरसः; 'inferior m.' उपधातुः. **-lic, -lical**, *a.* धातुसंबंधिन्. **2** धातुमय (यी *f.*), धातुरूप, लोह (हीं *f.*), धातु-लोह- in comp. **-list**, *s.* धातुज्ञः, धातुकर्मकारः. **-Metalliferous**, *a.* धातुप्रद. **-Metalliform**, *a.* धातुसदृश (शी *f.*). **-Metallography**, *s.* धातुशास्त्रं-विद्या. **-Metallurgy**, *s.* धातुशोधनं.

Metamorphose, *v. t.* रूपं परिणम् c. or परिवृत् c., रूपांतरं दा 3 U or ग्रह् c.; *See* **Change**. **-ed**, *a.* परिणतरूप-शरीर-आकार. **-Metamorphosis**, *s.* रूपपरिणामः-परिवृत्ति *f.*-भेदः, रूपांतरं, रूप-शरीर-विकारः.

Metaphor, *s.* रूपकं, लक्षणा, आरोपः, उपचारः. **2** दृष्टांतः, निदर्शनं. **-ic, -ical**, *a.* औपचारिक-लाक्षणिक (की *f.*), सरूपक, आरोपित; 'm. use' उपचारः. **-ically**, *adv.* लक्षणया, उपचारेण, सारोपं; 'to use m.' उपचर् 1 P; *See* **Figuratively**.

Metaphysic,-al, *a.* आन्वीक्षिक-आध्यात्मिक (की *f.*), आत्मविषय, आत्मज्ञानपर. **-ally**, *adv.* आत्मविद्यानुसारेण. **-ian**, *s.* आन्वीक्षिकीज्ञः. **-Metaphysics**, *s.* आन्वीक्षिकी, आत्म-अध्यात्म-विद्या, आत्मविषयकं ज्ञानं, आत्मतत्वविद्या-शास्त्रं.

Metastasis, *s.* रोगस्थलांतरं.

Metatarsus, *s.* प्रपदं.

Metathesis, *s.* अक्षर-वर्ण-विपर्यासः-व्यत्यासः-व्यत्ययः.

Mete, *v. t.* परि-,मा 3 A, 2 P; *See* **Measure**.

Metempsychosis, *s.* पुनर्जन्मन् *n.*, अन्यजन्म, जन्मांतरं, देहांतरप्राप्ति *f.*

Meteor, *s.* उल्का, उत्पातः. **-ic**, *a.* उल्कोद्भव, उल्कोत्पन्न. **-ous**, *a.* उल्काधर्मक. **-Meteorology**, *s.* अंतरीक्षविद्या, वायुनभो-विद्या.

Meter, *s.* मापकः.

Methinks, *v. imp.* मन्ये, तर्कयामि, शंके; ध्रुवं.

Method, *s.* रीति *f.*, प्रकारः, मार्गः, विधा, विधिः; पद्धति *f.*; *See* **Manner**. **2** व्यवस्था, क्रमः, अनुक्रमः, पर्यायः, आनुपूर्वी-र्व्यं, परिपाटि-टी *f.*, आवृत् *f.*, परंपरा; व्यवस्थया रचनं-ना, व्यूहनं, विन्यासः, संविधानं, क्रमेण स्थापनं, नियमः. **-ical**, *a.* व्यवस्थित, यथाक्रम, सक्रम, अनुपूर्व, सूत्रित, यथापर्याय. **2** (Of persons) क्रमानुसारिन्, क्रमानुगत, क्रम-नियम-शील. **-ically**, *adv.* यथाक्रमं, अनुपूर्वशः, आनुपूर्व्येण, क्रमेण, क्रमशः, पर्यायेण, अनुक्रमेण, यथानियमं. **-icalness**, *s.* व्यवस्था, क्रमशीलता, &c. **-ism**, *s.* नियमनिष्ठा. **-ist**, *s.* नियम-कर्म-निष्ठः. **-ize**, *v. t.* व्यव-स्था c. (स्थापयति), क्रमेण स्था c. or वि-धा 3 U or विरच् 10 or विन्यस् 4 U.

Meticulous, *a.* साशंक. **2** अतिसावधान, अत्यवहित.

Metre, *s.* छंदस् *n.*, वृत्तं. **-Metrical**, *a.* छंदोबद्ध, वृत्तात्मक, छांदस (सी *f.*), छंदोरूप, पद्यरूप, पद्यात्मक.

Metronome, *s.* तालमापनी.

Metropolis, *s.* राजधानी. **-Metropolitan**, *a.* राजधानीय.

Mettle, *s.* तेजस् *n.*, सत्त्वं, उत्साहः, वीर्यं, ओजस् *n.*, प्रभावः, पौरुषं, ऊर्जस् *n.* **-ed, -some**, 'of great m.' 'high-m. ed' *a.* तेजस्विन्, महा-उरु-सत्त्व, परमोत्साह, ओजस्विन्, वीर्यवत्, सपौरुष.

Mew, *s.* पंजरं, वीतंसः. **2** बंधनं, निरोधः, बंधनागारं, गुप्ति *f.* **-v. t.** पंजरे निरुध् 7 U or बंध् 9 P. **-v. i.** पक्षान् पत् c. or मुच् c.

Mewl, *v. i.* (शिशुवत्) क्रंद् 1 P, रुद् 2 P, आक्रुश् 1 P.

Mews, *s.* अश्वगोष्ठं, अश्वशाला.

Miasm,-a, *s.* पूतिबाष्पः, मारात्मकः वायुः.

Mica, *s.* अभ्रकं.

Mickle, *a.* बहु, बहुल.

Microbe, *s.* सूक्ष्मजंतु *m.*

Micro-cosm, *s.* सूक्ष्मं जगत्.

Microscope, *s.* सूक्ष्मदर्शनयंत्रं.

Micturition, *s.* मूत्रोत्सर्गेच्छा.

Mid, *a.* मध्य, मध्यम; अर्ध, in comp.; 'm., course' अर्धमार्गः, अर्धपथः; 'm.-day'

मध्याह्नः; (*a.*) माध्यंदिन (नी *f.*), माध्याह्निक (की *f.*); ' m.-heaven ' खमध्यः; ' m.-land' मध्यदेशीय, देशमध्यवर्तिन्; 'm.-night ' मध्यरात्रः, अर्धरात्रः, रात्रिमध्यं, निशीथः; 'm.-summer' निदाघमध्यं; 'm.-way ' अर्धपथः-मार्गः; (*adv.*) अर्धमार्गे, मार्गमध्ये; ' m.-wife ' सूतिका; साविका, प्रसवकारिणी; ' m.-wifery ' प्रसवकार्यं-करणं, सूतिकर्मन् *n.*, गर्भमोचनविद्या; ' m.-winter ' शिशिरमध्यं. **-Middle,** *s.* मध्यं, मध्यभागः-देशः-स्थानं-स्थलं; अभ्यंतरं, गर्भः, अंतरं, in comp.; 'in the m. of the ocean' मध्येसमुद्रं; ' in the m. of the house ' गृहाभ्यंतरे, गृहगर्भे; ' going in the m. ' मध्यग. **-***a.* मध्य, मध्यम, मध्यस्थ, मध्यवर्तिन्, मध्यस्थित; 'the m. classes' मध्यमजातीयाः, मध्यमवर्णाः; ' m.-aged ' मध्यमवयस्क, गतयौवन; ' m. finger ' मध्यमा, कर्णिका; ' m.-man ' मध्यस्थः, मध्यमपुरुषः. **-ing,** *a.* मध्य, मध्यम, मध्यपरिमाण. **2** मध्यमपदस्थ, मध्यमगुण, सामान्य, साधारण (णी *f.*). **-Midst,** *s.* मध्यं; *See* **Middle;** ' in the m. ' मध्ये; ' from their m. ' तेषां मध्यात्; ' in the m. of this talk ' एवं वदन्नेव; ' in the m. of calamities ' विपद्ग्रस्त-*a.*, दुःखमग्न-*a.*

Midden, *s.* अवकरानिकरः.

Mien, *s.* आकारः, रूपं, आकृति *f.*, वदनाकारः, वदनाकृतिः, मुखचर्या; ' with a dejected m. ' खिन्न-म्लान-वदन.

Might, *s.* बलं, शक्ति *f.*, सामर्थ्यं, तेजस् *n.*, शौर्यं, वि-परा-क्रमः, प्रभावः; *See* **Strength;** ' with all one's m. ' यथाशक्ति, यावच्छक्यं. **-Mighty,** *a.* प्रबल, शक्तिमत्, बलवत्, ओजस्विन्, ऊर्जस्वल, विक्रांत, वलिन्; उरुविक्रम; *See* **Strong. 2** महत्, विशाल, प्रतापवत्, महौजस्, विभूतिमत्; ' m. lord ' महेश्वरः, अधीश्वरः. **-ily,** *adv.* बलेन, विक्रमेण, शौर्येण. **2** अतीव, अत्यंतं, बलवत्, भृशं, अतिमात्रं. **-iness,** *s.* सामर्थ्यं, प्रभावः, वीर्यं; *See* (*s.*)

Migrate, *v. i.* निर्गम् 1 P, भ्रम् 1, 4 P, देशांतरं-स्थानांतरं-गम् or अधि-वस् 1 P or अध्यास् 2 A. **-ion,** *s.* भ्रमणं, पर्यटनं, देशांतरगमनं. **-ory,** *a.* देशभ्रमण-पर्यटन-शील.

Milch-cow, *s.* क्षीरिणी, पयस्वती, दुग्धवती, पीनोधी.

Mild, *a.* मृदु, कोमल, सौम्य, अप्रखर, अचंड, अनुग्र, अपरुष, सुकुमार, शांत, अतीक्ष्ण, अतीव्र. **2** सदय, कृपालु, दयालु, दयार्द्र, क्षमाशील, अतीक्ष्ण, अतीव्र, अतीक्ष्णदंड, मृदुस्वभाव, सौम्यवृत्ति, मृदुभाव, सामोपायिन्; *See* **Innocent** also; ' m. means ' सामन् *n.*, सामोपचारः, सामोपायः; ' m. speech ' सांत्ववादः, मृदुभाषणं. **-ly,** *adv.* मृदु, कोमलं, अनुग्रं, अपरुषं, अतीव्रं, मार्दवेन, साम्ना, सामोपायेन, सामोपचारैः. **-ness,** *s.* मार्दवं, मृदुता, कोमलता, सौम्यता, अतीक्ष्णता, शांति *f.* **2** प्रकृतिमृदुता, मृदुता, मृदुकोमल-स्वभावः; कृपालुता, सदयता, सौम्यवृत्ति *f.*, दयालुता, कृपाशीलता; क्षमा, साम.

Mile, *s.* अर्धक्रोशः; ' 3 m. s ' सार्धक्रोशः; ' 4 m. s ' क्रोशद्वयं.

Militant, *a.* युद्धप्रवृत्त, रणोद्यत, युद्धोद्युक्त.

Military, *a.* सांग्रामिक-सामरिक-आयुधिक (की *f.*), क्षात्र (त्री *f.*), युद्ध in comp. **2** युद्धप्रवृत्त, योधिन्, शस्त्रोपजीविन्, शस्त्रभृत्, आयुधजीविन्; ' m. preparation ' युद्धसामग्री; ' m. profession or life ' आयुध-शस्त्र-वृत्ति *f.*, सैनिकवृत्तिः, शस्त्राजीवः; ' m. caste ' क्षत्रियजातिः; ' a man of the m. class ' क्षत्रः-त्रं, क्षत्रियः, राजन्यः, विराट्, बाहुजः, मूर्धाभिषिक्तः; ' a woman of the m. class ' क्षत्रिया-याणी; ' m. man ' योधः, वीरः, सैनिकः; ' m. duty ' क्षात्रधर्मः, क्षत्रिय-क्षत्र-धर्मः; ' m. science ' युद्धशास्त्रं, सांग्रामिकं, शस्त्रास्त्रविद्या, आयुध-रण-विद्या. **-***s.* सैन्यं, सैनिकवर्गः, क्षत्रगणः.

Militate, *v. i.* वि-प्रति-रुध् 7 U, विरुद्ध-प्रतिकूल-*a.* भू 1 P.

Militia, *s.* देशरक्षिणः, रक्षकयोधाः (pl.).

Milk, *s.* पयस् *n.*, दुग्धं, क्षीरं, स्तन्यं; गोदुग्धं, गोरसः, गव्यं (cow's m.); ' fresh m. ' पीयूषः-षं; ' made of m. ' पयस्य; 'coagulated m. ' दधि, क्षीरजं; ' giving much m. ' बहुदुग्धा; ' m. livered ' कातर, क्लीबहृदय, भीरु; 'm.-maid' गोपकन्या, आभीरी, गोदोहिनी; गोपी, गोपिका; ' m.-man ' दोग्धृ *m.*, दोहकः, गोपः, आभीरः, गोधुक्; 'm.-pail,-pan' दुग्ध or क्षीर-पात्रं-भांडं-भाजनं; दोहनी; ' m -porridge ' क्षैरेयी; ' m.-sop' कापुरुषः, भीरुः; ' m.-woman ' गोपी, आभीरी, दोहिनी. **-***v. t.* दुह् 2 U (with two acc.), दुग्धं निष्कृष् 1 P or सु c. **-er,** *s.* दोग्धृ *m.* दोहकः, दुह् *m.* **-y,** *s.* क्षीरिन्, पयस्य, पायस (सी *f.*); (*s.*) in comp.; ' m. ocean ' क्षीर-दुग्ध-सागरः. **2** क्षीरोपम, दुग्धतुल्य **3** क्षीरद, दुग्धप्रद, बहुदुग्ध; ' m. way ' वियद्गंगा; *See* **Galaxy. 4** भीरु, कातर, साम्य; *See* **Mild.**

Mill, *s.* चक्रं, पेषणी, पेषणयंत्रं-चक्रं. **-***v. t.* पिष् 7 P, चूर्ण् 10. **2** मुष्टिना तद्द् 10 or प्रह् 1 P. **-er,** *s.* पेषकः, पेषणोपजीविन् *m.*

Millennium, Millenary, *s.* सहस्रवर्षं, सहस्रसंवत्सरं. **-Millennial, -Millenarian,** *a.* सहस्रवर्षीय-ण, सहस्रवार्षिक (की *f.*).

Millesimal, *a.* सहस्रतम (मी *f.*), सहस्रांशात्मक

Millet, *s.* अणुः, प्रियंगुः.

Milliner, *s.* स्त्रीवस्त्रकृत्, स्त्रीवसनकारिणी. **-y,** *s.* स्त्रीपरिच्छदः-सज्जा, स्त्रीवस्त्रसामग्री.

Million, *s.* निखुर्तं, दशलक्षं; 'ten m.' कोटि *f.*; 'hundred m.' अर्बुदः. **-ary,** *a.* निखुर्तीय. **-th,** *a.* नियुततम (मी *f.*). **-Millionaire,** *s.* कोटीश्वरः, लक्षाधीशः.

Milt, *s. See* **Spleen.**

Mime, *s.* नटः, नर्तकः, कुशीलवः, चारणः, रंगाजीवः. **2** भंडः, विदूषकः, वैहासिकः. **-Mimic, (-al),** *a.* अनुकरण-शील-स्वभाव, अनुकारिन्, विडंबनकारिन्. **2** विडंबन-अनुकरण-रूप. **-s.** भंडः, वैहासिकः, विदूषकः. **2** अनुकारिन् *m.* **-v. t.** (उपहासपूर्वं) अनुकृ 8 U, विडंब् 10. **-ker,** *s.* अनुकारिन् *m.*, विडंबनकृत्. **-ry,** *s.* सोपहासं अनुकरणं or विडंबनं; अनुकारः, विडंबनं.

Mimosa, *s.* नमस्कारी, गंडकारी-ली, समंगा, खदिरा, लज्जालुः.

Minaret, *s.* शिखरं, शृंगं प्रासाद्-भवन-शिखरं.

Minatory, *a.* तर्जक, भर्त्सक, भीषण.

Mince, *v. t.* खंडशः-सूक्ष्मलवशः-कृत् 6 P or छिद् 7 P or खंड 10, शकलीकृ 8 U; 'do not m. matters' यथावृत्तं सर्वं साकल्येन निवेदय, सर्वं संपूर्णं प्रकाशय; 'm. ed meat' छिन्नमांसं. **-v. i.** ललितगत्या चल्-द् 1 P or गम् 1 P, भिन्नगत्या गम्. **2** भिन्नस्वरेण वद् 1 P. **-ingly,** *adv.* खंडशः, लवशः; भिन्नगत्या, भिन्नस्वरेण.

Mind, *s.* मनस् *n.*, मानसं, चित्तं, चेतस् *n.*, बुद्धि *f.*, मति *f.*, धीः; प्रज्ञा, बोधः; *See* **Intellect.** **2** हृदयं, हृद् *n.*, अंतःकरणं, चित्तं, मनः, चेतः, अंतरं. **3** मतिः, बुद्धिः, मतं; कामः; इच्छा, वांछा, रुचि *f.*, मनोरथः, वासना, भावः, ईप्सितं, अभिलाषः. **4** अभिप्रायः; उद्देशः, संकल्पः, अभिप्रेतं,मतिः, बुद्धिः, मतं. **5** स्मरणं, स्मृति *f.*, स्मरणशक्ति *f.*, अनुबोधः; 'to give the m. to' भाव-मनो-निविश् c. or बंध् 9 P or आ-नि-धा 3 U, आसक्त-निविष्ट-चित्त-*a.* भू; *See* under **Set;** 'out of one's m.' भ्रांत-अव्यवस्थित-बुद्धि (*a.*); 'fixed in the m.' चित्त-निष्ठं; 'of low m.' कृपण-नीच-बुद्धि; 'working of the m.' चित्त or मनो-व्यापारः or वृत्ति *f.*, मनश्चेष्टा, चेतोविकारः; 'according to one's m.' यथाकामं, यथेष्टं, यथेप्सितं, यथारुचि; 'have a m. to ask' प्रहुमनाः-कामः; 'to cross the m.' मनसि उद्-इ 2 P or उद्भू 1 P, बुद्धौ संजन् 4 A; *See* **Occur;** 'call to m.' स्मृ 1 P, संअनु-°, अनुचिंत् 10; 'put in m.' स्मृ c., अनु-उद्-बुध् c.; 'of one m.' एकाचित्त-*a.*; being of one m.' एकाचित्तीभूय; 'change of m.' बुद्धि-मति-भेदः; 'flashing across the m.' स्फुरणं, सह सा आविर्भावः. **-v. t.** 1 A, आलोच् 10, अव-धा 3 U, चित्ते-मनसि-कृ 8 U, अवधृ 10, मनो दा 3 U. **2** सेवृ 1 A, भज् 1 U, अनु-ष्ठा 1 P, अनुरुध् 4 A, अनुवि-धा 3 U. **3** रक्ष् 1 P, पा c. (पालयति); 'never m. the first question, answer the second' आस्तां-तिष्ठतु-तावत् प्रथमः प्रश्नः, द्वितीयस्य उत्तरं देहि; 'never m.' अगुर्वर्थमेतत्; *See* **Matter.** **-ed,** *a.* प्रवृत्त, प्रवण, शील, मनस्, मनस्क in comp.; 'worldly-m.' संसारासक्तचित्त; धीरमनस्क, &c. **-ful,** *a.* सावधान, अवहित, जागरूक, अवहितचित्त. **2** कृतादर, मन्यमान, अवेक्षक. **3** अवधारयत्, स्मरत्, चित्ते कुर्वत्; 'to be m. of' स्मृ. **-fully,** *adv.* सावधानं, सादरं, अवेक्षया. **-fulness,** *s.* अवधानं, अवेक्षा. **-less,** *a.* अनवधान, प्रमत्त, अनवेक्षक, निरपेक्ष. **2** नष्टस्मृति-बुद्धि, बुद्धिहीन.

Mine, *a.* मदीय, मामकीन,मामक (मिका *f.*), मत् in comp. **-s.** आकरः, ख(खा)नि-नी *f.*, उत्पत्तिस्थानं; 'm. for jewels' मणिभूमि *f.*, रत्नाकरः, (fig.) आकरः, निधिः, राशिः. **2** संधिः, सुरंगा, खानिर्क, कुल्या. **-v. t.** खन् 1 P, आ-नि-°, अधस्तात् खन्, ऊर्वीं भिद् 7 P or वि-दृ 9 P, सुरंगां कृ. **-er,** *s.* खनकः, खातकः, आखनिकः, खनितृ *m.* **2** सुरंगाकारः, सौरंगिकः. **-Mineral,** *s.* धातुः, खनिजं, आकरजं वस्तु. **-a.** धातुसंबंधिन्, धातु in comp. **2** खनिज, आकरज, आकरोद्भव. **3** धातुमय (यी *f.*), धातुरूप. **4** धातुसंसृष्ट, धातुगर्भित. **-ogy,** *s.* धातुविद्या, धातुपरीक्षणविद्या-शास्त्रं. **-ogist,** *s.* धातुविद्याज्ञः.

Mingle, *v. t.* मिश्र् 10, वि-सं-श्या-°, संयुज् 7 U, 10, संसृज् 6 P, संपृच् 2 A, 7 P, संकृ 6 P, संमिल् c., मिश्रीकृ 8 U, एकीकृ; उत्कंठासाधारणं परितोषमनुभवामि (S. 4) 'I experience pleasure m. ed with regret.' **-v. i.** संमिल् 6 P, मिश्री-एकी-भू 1 P, संकृ-संसृज्-pass. **-ed,** *a.* मिश्रित, संपृक्त, संसृष्ट, सं-,मिश्र, संकीर्ण **-ment,** *s.* संमिश्रणं, संसर्गः.

Miniature, *a.* सूक्ष्माकार, सूक्ष्म. **-s.** Ex. by ह्रस्व or सूक्ष्म; 'world in m.' ह्रस्व-मानेन विश्वं.

Minikin, *s.* सूचिका. **2 Minion,** q.v.

Minim, *s.* बिंदु *m.* **-um,** *s.* अल्पिष्ठा-अत्यल्पा-संख्या.

Minion, *s.* वल्लभः, प्रियः, नृप-राज-वल्लभः; *See* **Favourite.**

Minister, *s.* सचिवः, मंत्रिन् *m.*, अमात्यः, प्रकृतिपुरुषः, धुर्यः, धूर्वहः, धुरीणः, धुर्धरः, महामात्रः, राजसचिवः, राजामात्यः. **2** नियोगिन् *m.*, नियुक्तः, नियोज्यः, कर्मकरः, अधिकृतः. **3** उपाध्यायः, आचार्यः, पुरोहितः. **4** राजदूतः, राजप्रतिनिधिः; 'prime m.' प्रधान-

मुख्य-मंत्री, प्रधानसचिवः; 'm. of counsel' धीसचिवः, अमात्यः; 'm. for ordinary affairs' कर्मसचिवः. -v. सेवू 1 A, परि-उप-चर् 1 P, उपास् 2 A, उप-स्था 1 U, शु desid. (शुश्रूषते). 2 (उपकरणद्रव्याणि) परिकल्पू c., संभृ 1 P, उपपद् c., उप-स्था c. (स्थापयति). 3 (to) सं-पद् 4 A; कल्पू 1 A; *See* **Tend.** -ial, a. मंत्रिसंबंधिन्, नियोगसंबंधिन्, उपचारपर, सेवक, अनुवर्तिन्, gen. ex. by (s.) in comp.; 'm. duties' सचिवकार्याणि. -Ministration, s. मंत्राधिकारः, साचिव्यं. 2 उपचारः, उपासना, सेवा, शुश्रूषा, उपकारः. 3 उपाध्यायवृत्ति f. -Ministry, (Ministership), s. साहाय्यं, द्वारं, कर्तृत्वं, कारणत्वं. 2 साचिव्यं, मंत्रित्वं, मंत्राधिकारः, अमात्य-साचिव्य-पदवी. 3 नियोगः, अधिकारः, नियोगिपदं. 4 सचिवमंडलं, मंत्रिगणः-मंडलं-वर्गः, मंत्रिणः, अमात्याः, सचिवाः, राज्यधूर्वहाः. 5 पौरोहित्यं, उपाध्यायपदं.

Minium, s. *See* 'red lead' under **Lead.**

Minor, a. स्वल्पतर, अल्पीयस्, कनीयस्, न्यून, अवर. 2 अप्रधान, गौण (णी f.), असुख्य. 3 क्षुद्र, लघु, लघ्वर्थ, अगुरु; gen. ex. by उप pr.; 'm. portion' उपविभागः, उपांगं; उपदेवता, उपग्रहः, उपधर्मः, &c.; 'm. consideration' लघ्वर्थः-अगुरुः-क्षुद्रः-विचारः. -s. अप्राप्तव्यवहारः, अप्राप्तवयस्कः, व्यवहारायोग्यः, अप्राप्तव्यवहारदशः, बालः. -ity, s. बालदशा, बाल्यं, बालावस्था, अप्राप्तव्यवहारता; बाल-शिशु-भावः. 2 न्यून-अल्प-पक्षः-संख्या, स्तोकसंख्या; 'being in the m.' न्यूनपक्षाश्रितः.

Minotaur, s. वृषवः, नरवृषभः.

Minstrel, s. मा(म)गधः, वैतालिकः, वंदिन् m.; स्तुतिपाठकः, मधुकः, संगीतकुशलः-निपुणः; 'celestial m.' गंधर्वः, चारणः. -sy, s. संगीतं, गीतवादनं, गांधर्वं, गंधर्व-मागधवृत्ति f.

Mint, s. टंकशाला, मुद्रांकनशाला; (fig.) खनि f.; *See* **Mine;** 'm.-master' टंकाध्यक्षः, टंकपतिः, रूप्याध्यक्षः, नैष्किकः. -v. t. मुद्रादि अंक् 10. 2 Forge, Invent, q. v. -age, s. मुद्रांकनं. 2 मुद्रा, मुद्रितरूप्यं.

Minus, a. न्यून, ऊन in comp.; 'm. a cubit' हस्तन्यून. 2 ऋणं, क्षयः; oft. ex. by वियुत, वर्जित, ऊन in comp.; '10 m. 1' एकावियुता दश; '100 m. 1' एकोनशतं, एकहीन्या शतं.

Minute, s. क्षणः, पलं, निमि(मे)षः. 2 कला. 3 लेखः, लिखितं. -v. t. लिख् 6 P, स्मरणार्थं लिख् -a. सूक्ष्म, अणु, अत्यल्प, अतिसूक्ष्म, अल्पिष्ठ, क्षुद्र, प्रतनु. 2 निपुण, सावधान, सूक्ष्म. 3 सूक्ष्मदृष्टि, सूक्ष्मदर्शिन्; 'after m. inquiries' निपुणं अन्विष्य; 'm. description of a woman' तरुणीपृथगवयववर्णनं or -प्रत्यवयवर्णनं. -ly, *adv.* सूक्ष्मं, लवशः, अणुशः; स्निग्धं, निपुणं, सूक्ष्मदृष्ट्या; 'while m. looking at the ring' अंगुलीयकं स्निग्धं निध्यायंती (M. 1). -ness, s. सूक्ष्मता, अत्यल्पता, अतितनुता, &c. -Minutiæ, s. सूक्ष्मावयवाः, परमाणवः.

Minx, s. धृष्टा, अविनीता, बंधकी, भ्रष्टा, असती.

Miracle, s. अद्भुतं, अलौकिकक्रिया-कर्मन् n. अद्भुत-लोकोत्तर-कर्म, आश्चर्यं; चमत्कारः, अतिमानुषं कर्म, दैवं कर्म. -Miraculous, a. अद्भुत, लोकोत्तर, आश्चर्यभूत, आश्चर्यं, अमानुष (षी f.), अतिमर्त्य, दिव्य, अपौरुषेय (यी f.). 2 अद्भुतशक्तिसंपन्न; 'm. weapon' दिव्यास्त्रं. -ly, *adv.* अद्भुततया, दिव्यशक्त्या.

Mirage, s. मृगतृष्णा-तृष्णिका, मरीचिका, मृगजलं.

Mire, s. पंकः, कर्दमः, जंबालः-लं, मलः-लं; 'get into the m.' संकटे निक्षिप् pass. or पत् 1 P. -v. t. पंकेन दुष् c. (दूषयति) or लिप् 6 P. -y, a. पंकिल, सकर्दम, सपंक, समल, कलुष, पंकक्लिन्न, पंकदूषित.

Mirror, s. दर्पणः, आदर्शः, मुकुरः, आत्मदर्शः. 2 (Fig.) आदर्शः, प्रतिमा. -v. t. **Reflect,** q. v.

Mirth, s. हास्यं, प्र-,मोदः, उल्लासः, आनंदः, कौतुकं, परिहासः; *See* **Merriment.** -ful, a. हृष्ट, उल्लसित, आनंदित, प्रमुदित; *See* **Merry.**

Misacceptation, s. अन्यथा-विपरीत-ग्रहणं.

Misadventure, s. *See* **Calamity.**

Misanthropy, s. नर-जन-द्वेषः, विश्वशत्रुता, सर्वलोकद्वेषः. -ic,-ical, a. नर-जन-द्वेषिन्, विश्ववैरिन्-द्वेषिन्. -ist, s. जन-नर-द्वेषी-शत्रुः, सर्वलोकशत्रुः, विश्वशत्रुः.

Misapply, v. t. अन्यथा-मिथ्या विनि-प्र-युज् 7 A, 10 or व्ययू 10 or निक्षिप् 6 P. -ication, s. दुर्विनियोगः, कुव्ययः, अपव्ययः.

Misapprehend, v. t. अन्यथा-मिथ्या-ग्रह् 9 U or बुध् 1 P, विपरीतं उपलभ् 1 A. -Misapprehension, s. अन्यथा or विपरीत-ग्रहणं or बोधः, भ्रमः, मिथ्यामति f.

Mis-appropriate, v. t. अपहृ 1 P. 2 अस्थाने युज् 7 P.

Misbecome, v. t. न युज् pass. or उप-पद् 4 A.

Misbegot, a. विजात, कुजन्मन्.

Misbehave, v. i. असम्यक्-अयुक्तं आचर् 1 P or वृत् 1 A. -ed, a. दुर्वृत्त, दुःशील, दुश्चेष्टित, दुराचार. -Misbehaviour, s.

अविनयः, दुर्वृत्तता, दुराचारः, कुचेष्टितं, अनार्यवृत्ति *f.*

Misbelieve, -belief, *See* **Distrust.**

Miscalculate, *v. t.* अन्यथा-मिथ्या-गण् 10. **-ion,** *s.* मिथ्यागणनं, कुगणना.

Miscall, *v. t.* मिथ्या अभि-धा 3 U or आख्या 2 P.

Miscarry, *v. i.* गर्भः स्रु 1 P or पत् 1 P or च्यु 1 A (with gen. of woman); च्युतगर्भा भू 1 P. **2** न सिध् 4 P, विफलीभू, मोघी-वृथा-भू, प्रतिहन्-भंज्- pass. **-iage,** *s.* गर्भस्रावः-पातः-पतनं-च्युति *f.* **2** असिद्धि *f.*, वैफल्यं, भंगः; अशुभफलं, दुर्गति *f.* **3** दुराचारः, कुनीति *f.*, अविनयः;' to cause m.' गर्भं स्रु c. or पत् c.

Miscellaneous, *a.* सं-प्र-कीर्ण, नानाविध, नानाजातीय, विविधप्रकार, नाना-भिन्न-जातीय, विविध. **-ly,** *adv.* संकीर्णं. **-Miscellany,** *s.* संकरः, प्रकीर्णकं, नानाद्रव्य or नानाविषय-संग्रहः or संनिपातः, संकीर्णवस्तुसमुदायः-संग्रहः.

Mischance, *s.* *See* **Calamity,**

Mischief, *s.* अपकारः, हानि *f.*, हिंसा, क्षति *f.*, नाशः, अपायः, ध्वंसः, दोषः, बाधा, अहितं, अनर्थः, अनिष्टं, अरिष्टं; 'm. to crops' शस्यहिंसा. **2** कुचेष्टितं, पापं, दुराचारः, कुचेष्टा; ' m.-maker ' दुर्जनः, दुर्वृत्तः, पिशुनः, कर्णेजपः, उपजापकः, कुव्यापारिन्, कुचेष्टः; ' m.-making ' दौर्जन्यं, पैशुन्यं, कुचेष्टा, दुर्वृत्तिः, कुनीति *f.* **-Mischievous,** *a.* घातुक, हिंसक, हिंसात्मक, अपकार-हिंसा-शील, हिंसारुचि, अपकारिन्, अहितकारिन्, दुष्ट, पाप, दुर्बुद्धि, दुष्टमति. **2** कुचेष्टित, कुचेष्टाप्रिय, दुर्गुणिन्, दुश्चेष्टित; ' m. trick ' कुचेष्टितं; ' a m. person ' लोककंटकः, कुचेष्टाप्रियः. **-ly,** *adv.* दुष्टबुद्ध्या, सापकारं, क्षतिपूर्वं, हिंसया. **-ness,** *s.* हिंस्रता, अपकारशीलता, हिंसारुचि *f.*, दुष्टबुद्धि *f.*, पापात्मता.

Miscomputation, *s.* मिथ्यागणना.

Misconceive, *v. t.* मिथ्या ग्रह् 9 U, अन्यथा बुध् 1 P or उपलभ् 1 A or अवगम् 1 P. **-Misconception,** *s.* मिथ्या-मति-बुद्धि *f.*, मिथ्या or अन्यथा-ग्रहणं or बोधः, विपरीतार्थबोधः, भ्रमः.

Misconduct, *v. t.* असम्यक् निर्वह् c. or प्र-णी 1 P or वृत् c. **2** (Oneself) असम्यक् आचर् 1 P or वृत् 1 A. **-s.** दुर्णयः. असम्यङ् निर्वाहः. **2** दुराचारः, दुश्चेष्टितं, कुचरितं, कुचर्या, अविनयः, मर्यादातिक्रमः, कुकृत्यं.

Misconjecture, *v. t.* मिथ्या तर्क् 10 or ऊह् 1 A. **-s.** मिथ्यातर्कः, मिथ्याऽनुमानं.

Misconstrue, *v. t.* मिथ्या-अन्यथा-अर्थं बुध् 1 P or ग्रह् 9 U, मिथ्या युज् 10 or अर्थं व्या-ख्या 2 P. **-Misconstruction,** *s.* अन्यथार्थबोधः, विपरीत-मिथ्या-ग्रहण- बोधः.

Miscreant, *s.* पापः, खंडितवृत्तः, खलः, नरापसदः, पापिष्ठः, दुरात्मन् *m.*, दुर्वृत्तः, जाल्मः; *See* **Villain.** **2** नास्तिकः, मिथ्यादृष्टिः.

Misdeed, *s.* दुष्कृतं, अपक्रिया, कुकर्मन् *n.* कुकृत्यंक्रिया, दुष्कृति *f.*, अपचारः, कुचरितं, पापं.

Misdemean, *v. i.* *See* **Misbehave.**

Misdirect, *v. t.* विमार्गं दृश् c. or दिश् 6 P, विपथं दिश्. **2** ' **Address** ' (wrongly), q. v. **-ion,** *s.* विमार्गदर्शनं; मिथ्योपदेशः.

Misdoer, *s.* पापः, पापकर्मन् *m.*, पापकृत् *m.*, कुकर्मा. **-Misdoing,** *s.* **Misdeed,** q.v.

Misemploy, *v. t.* अन्यथा विनि-युज् 7 A, 10 or व्यापृ c. **-ment,** *s.* असद्व्ययः, कुविनियोगः, अपव्ययः.

Miser, *s.* कृपणः, कदर्यः, क्षुद्रः, मितंपचः, किंपचानः, दृढ-बद्ध-मुष्टिः, अदानशीलः, दानशत्रुः-विमुखः. **-ly,** *a.* कृपण, कदर्य, क्षुद्र, बद्ध-दृढ-मुष्टि, दानविमुख (स्त्री *f.*), अदानशील, मितंपच, स्वल्पव्ययिन्, व्ययविमुख, अनुदार.

Misery, *s.* दुःखं, विपद्-आपद् *-f.*, व्यसनं, दैन्यं, निःस्वता, विपत्ति *f.*, दुर्गति *f.*, दुर्दशा, कृच्छ्रं, अनिष्टं, कष्टं, अनर्थः. **2** अतिदुःखं, गाढशोकः, दैन्यं, अनिर्वृति *f.*, क्लेशः, अतिव्यथा-बाधा-वेदना, परि-सं-तापः. **-Miserable,** *a.* दुःखित, दुःखान्वित, अतिदुःखार्त, अनिर्वृत, निरानंद, कष्टप्राय, अतिक्लेशार्त, विआ-पन्न, आपद्-विपद्-ग्रस्त, दुर्गत, मंदभाग्य, दैवोपहत, दुर्भाग्य, दुःखापन्न, दुर्दशापन्न; ' a m. man' तपास्विन् *m.*, नरहतकः. **2** कृपण, दीन, तुच्छ, गर्हणीय, गर्ह्य, कुत्सित, निंद्य, निअप-कृष्ट, अधम, क्षुद्र; *See* **Mean.**

Misfeasance, *s.* अतिक्रमः, विकर्मन् *n.*

Misfortune, *s.* मंदभाग्यं, दुर्दैवं, दुर्भाग्यं, दुर्जातं. **2** अनर्थः, अनिष्टं, व्यसनं, आ-वि-पद् *f.*, कृच्छ्रं, दुःखं, अत्याहितं, कष्टं, दुर्गति-विपत्ति-*f.*, अपायः, अनिष्टपातः; 'm. s never come single' रंध्रोपनिपातिनोऽनर्थाः (S. 6), छिद्रेष्वनर्था बहुलीभवंति. **3** अलक्ष्मीः, निर्ऋति *f.*

Misgive, *v. t.* Ex. by वि-आ-शंक् 1 A, न प्रति-इ or विश्वस् 2 P, विकॢप् 1 A, वेप् 1 A, *See* **Doubt;** ' my mind m. s me ' उदेति मे मनसि शंका, शंकते-वेपते मे हृदयं. **-ing,** *s.* शंका, आ-वि-°, संदेहः, संशयः, विकल्पः, अप्रत्ययः, अविश्वासः.

Misgotten, *a.* अन्यायार्जित.

Misgovern, *v. t.* असम्यक् शास् 2 P or पा c. (पालयति) or ईश् 2 A. **-ment,** *s.* कुशासनं, असम्यक् पालनं.

Misguide, *v. t.* अपथे यत् c., विमार्गेण-कुपथेन-नी 1 P or प्रवृत् c., विमार्गं दृश् c. **-ed,** *a.* उन्मार्गप्रवृत्त, मार्गभ्रष्ट, सत्पथभ्रष्ट, कुमंत्रित, दुर्विनीत, अपथगामिन्.

Mishap, *s. See* **Misfortune.**

Misinform, *v. t.* अन्यथा नि-विद् c., मिथ्या कथ् 10 or वि-ज्ञा c. (ज्ञापयति), मृषा बुध् c.

Misinterpret, *v. t. See* **Misconstrue.**

Misjudge, *v. i.* मिथ्या-अन्यथा-विचर् c.

Mislay, *v. t.* अस्थाने नि-धा 3 U or रक्ष् 1 P, नश् c.; *See* **Lose.**

Mislead, *v. t.* प्र-हृ c., वंच् 10; *See* **Cheat;** विमार्गेण-उत्पथं-नी 1 P or गम् c. (गमयति), भ्रम् c. (भ्रमयति), मुह् c., भ्रमं-भ्रांतिं-उत्पद् c., विमार्गं दृश् c. or उपदिश् 6 P, अन्यथा उपदिश्. **-ing,** *a.* भ्रमकारिन्, मोह-भ्रांति-जनन (नी *f.*). **-Misled,** *a.* विमार्ग or उन्मार्गगामिन् or प्रवृत्त, भ्रांत, सत्पथभ्रष्ट, कुमार्ग-गामिन्-प्रवृत्त, भ्रांतबुद्धि.

Mislike, *v. t. See* **Dislike.**

Mismanage, *v. t.* असम्यक् निर्वह् c. or प्र-णी 1 P or प्रवृत् c. **-ment,** *s.* दुर्निर्वाहः, कुप्रणयनं, कुनीति *f.*, अव्यवस्था, दुर्णयः.

Misname, *v. t.* नामांतरेण-अन्यथा अभि-धा 3 U, मिथ्यानाम कृ 8 U.

Misnomer, *s.* मिथ्यानामन् *n.*, मिथ्या or अन्यथा-संज्ञा or नाम, अचरितार्था संज्ञा, असंगत-अनुरूपं नाम.

Misogamy, *s.* विवाहद्वेषः-निंदा. **-ist,** *s.* विवाहद्वेषिन् *m.* [षिन् *m.*

Misogyny, *s.* स्त्रीद्वेषः-निंदा. **-ist,** *s.* स्त्रीद्वेषिन् *m.*

Misplace, *v. t.* अस्थाने नि-धा 3 U or निक्षिप् c. or निक्षिप् 6 P or कृ 8 U, असम्यक् प्रविनि-युज् 7 A, 10.

Misprint, *s.* अशुद्धं, मुद्रणदोषः.

Mispronounce, *v. t.* अशुद्धं उच्चर् c.

Misproportion, *v. t. See* **Disproportion.**

Misquote, *v. t.* अन्यथा-अयथार्थ-उद्धृ 1 P or अव-हृ c. **-ation,** *s.* अयथार्थं अवतरणं.

Misreport, *v. t.* मिथ्या-अन्यथा-निविद् c. or कथ् 10 or आ-ख्या 2 P. **-s,** अन्यथा-निवेदनं, मृषाकथनं, अयथार्थाख्यानं.

Misrepresent, *v. t.* मिथ्या कथ् 10 or वर्ण् 10, असत्यं निविद् c. or ख्या 2 P, अर्थं साचीकृ 8 U or परिवृत् c. **-ation,** *s.* मिथ्याकथनं-निवेदनं, मिथ्या-अन्यथा-मृषा-वादः -वर्णनं, असत्यकथनं-वर्णनं.

Misrule, *s.* कुशासनं, दुर्णीति *f.*, असम्यक् पालनं-शासनं.

Miss, *s.* (As a prefixing title) *ex.* by भर्तृदारिका, कुमारी. **2** भ्रमः, दोषः, अपराधः, भ्रंशः. **3** हानि *f.*, अभावः, विरहः, नाशः, लोपः; *See* **Loss.** *-v. i.* मोघी-विफली-भू 1 P, न सिध् 4 P; 'never-m. ing arrow' अमोघः बाणः. **2** भ्रम् 1, 4 P, प्रमद् 4 P, स्खल् 1 P. **3** च्यु 1 A; *See* below. *-v. t.* भ्रंश् 1 Á, 4 P, च्यु, विचल् 1 P (with abl.), हा pass. (with instr.); *See* **Lose;** 'he m. ed the mark in shooting' स लक्ष्यच्युतसायकः; निमित्तादपराद्धेषुः; 'm. ed his way' मार्गाद् भ्रष्टः &c. **2** न प्राप् 5 P or विद् 6 U or लभ् 1 A, (Get q. v.). **3** क्षिप् 6 P, हा 3 P, त्यज् 1 P, अपास् 4 U, विसृज् 6 P; 'you have m. ed a splendid opportunity' शोभनावसरस्त्वया क्षिप्तः, न गृहीतः, त्यक्तः. **4** (Feel the absence of) अभावं ज्ञा 9 U or वि-भू c., न्यून-*a.* मन् 4 A; उत्कंठ् 1 A, उत्तम् 4 P, उत्सुकायते (D.); 'I m. him very much' तस्य बलवदुत्कंठे, तस्यासन्निधानात् नितरां दुःखितोस्मि, तद्दर्शनाय उत्ताम्यामि, तद्विरहाविधुरः &c. **-ing,** *a.* नष्ट, भ्रष्ट, स्थानभ्रष्ट-च्युत,-तिरोहित, अदृष्ट; 'one man is m.' एको नर ऊनो दृश्यते. **2** उत्सुक, उत्कंठित, उत्कालिकाकुल.

Mis-shaped,-shapen, *a.* वि-अप-कु-रूप, कदाकार, विकृताकार.

Missile, *s.* अस्त्रं, शस्त्रं, प्रहरणं, आयुधं, क्षिपणिः. **2** चक्रं. *-a.* क्षेपणीय.

Mission, *s.* दौत्यं, प्रेरणं, प्रेषणं; 'sending or on a m.' प्रतिज्ञासनं. **2** नियुक्त or प्रेरित गणः or जनसमूहः, नियोगिवर्गः. **-ary,** *s.* धर्मार्थं प्रेरितः, धर्मप्रसारार्थं नियुक्तः or प्रेषितः.

Missive, *s.* संदेशः, वाचिकं; *See* **Message.** **2** वार्ता-संदेश-हरः. *-a.* मुक्त, क्षिप्त, अस्त. **2** प्रेरित, प्रेषित, नियुक्त.

Mis-spell, *v. t.* अक्षराणि पर्यस् 4 U, अन्यथा लिख् 6 P. **-ing,** *s.* अक्षरविपर्यासः-व्यत्ययः.

Mis-spend, *v. t.* वि-क्षिप् 6 P, अपात्रे-अस्थाने-व्यय् 10 (व्यययति) or प्र-विनि-युज् 7 A, 10, असद्व्ययं कृ 8 U,

Mis-state, *v. t.* मिथ्या-अयथातथं-अन्यथा-कथ् 10 or नि-आ-विद् c. or ख्या 2 P. **-ment,** *s.* अन्यथा-निवेदनं-विज्ञप्ति *f.*, मिथ्याकथनं-वादः.

Mist, *s.* कूहा, कुज्झटि-टी-टिका *f.*, कुहेडिका, धूमि(पि)का, खबाष्पः, तुषारः. **-y,** *a.* कूहाच्छन्न, धूमिकावृत, तुषारवृत. **2** गहन, असुगम, अस्पष्ट; *See* **Faint.**

Mistake, *s.* भ्रमः, भ्रांति *f.*, व्या-,मोहः, मतिभ्रमः, मिथ्या-मति *f.*-बुद्धि *f.* **2** प्रमादः, दोषः, स्खलितं; 'm. in calling names' गोत्रस्खलितं. *-v. t.* अन्यथा-मिथ्या-ग्रह् 9 U or मन् 4 A or बुध् 1 P, मिथ्या ज्ञा 9 U, भ्रांत्या-संदेहेन-मन्, संदिह् 2 U; *gen. ex.* by बुद्धिः, धीः in comp. or by *s.* (1); 'why do you strike me, m. ing me for Śiva' पुरारातिभ्रांत्या मां किं प्रहरसि; व्याप्रधिया-बुद्ध्या तस्मात् पलायते; फेनपटलैः

संदेहिततूलराशिभिः (Ka. 23); 'which were m. en for heaps of cotton'; केतकशिखासंदिग्धसुग्धेंदवः (Mal. 1) 'the lovely moon being m. en for a Ketaka point.' -v. i. भ्रम् 1, 4 P, मुह् 4 P, भ्रमद् 4 P, स्खल् 1 P, अपराध् 4, 5 P; 'you m. in this opinion' अयं तवाभिप्रायः भ्रम एव, भ्रांतः. -able, a. संदिग्ध; 'in no m. terms' असंदिग्धवचोभिः. -en, a. भ्रांत, प्रमादिन्, मूढ, संदिग्ध. 2 अयथार्थ, अशुद्ध, मृषा-मिथ्या-अन्यथा-in comp.; 'a m. opinion' मतिभ्रमः, मिथ्यामतिः.

Mister, s. आर्यः, श्री pr.

Mis-timed, a. See **Late.**

Mistle-toe, s. वृक्षाश्रया, तरुरोहिणी.

Mistress, s. गृहिणी, गेहिनी, गृहस्वामिनी, कुटुंबिनी; स्वामिनी, अधिष्ठात्री, शासित्री, अध्यक्षा, सेव्या, ईश्वरी, भट्टिनी (of servants). 2 अध्यापिका, आचार्या, उपदेशिका, अध्यापयित्री, उपाध्याया-यी. 3 उपस्त्री, उपपत्नी, भुजिष्या, अवरुद्धा. 4 प्रिया, प्रियतमा, वल्लभा, कांता दयिता, रमणी, कामिनी, प्रमदा. 5 कुशला, निपुणा.

Mistrust, v. t. न विश्वस् or प्रति-इ 2 P, शंक् 1 A. -s. अविश्वासः, अप्रत्ययः, आ-परिशंका, अप्रतीति f. -ful, a. अविश्वासिन्, अप्रत्ययिन् m. शंका-अश्रद्धा-शील, साशंक, आशंकित, शंकिन्, संदेहिन्. -fully, adv. साशंकं, अविश्वासेन. -fulness, s. अप्रतीतिः, आशंका.

Misunderstand, v. t. मिथ्या-अन्यथा समर्थ् 10 or कॢप् c. or मन् 4 A or ग्रह् 9 U or सं-भू c. or उपलभ् 1 A. or अवगम् 1 P or बुध् 1 P; 'don't m. me' अलमन्यथा गृहीत्वा (M. 1), अलमस्मानन्यथा संभाव्य (S. 1). -ing, s. मिथ्या or अन्यथा-ग्रहणं or संभावनं, मिथ्यामति f.-बोधः, अयथार्थबोधः, भ्रमः. 2 वैमत्यं, मतिभेदः, विसंवादः, द्वैधं, विअसं-मति f.

Misuse, v. t. मिथ्या-असम्यक् प्र-विनि-उपयुज् 7 A, 10, अनुचितं-अस्थाने व्यापृ c. or व्यय-ह्न c., अप-व्ययय् 10 (व्यययति). -s., -age, s. कुप्रयोगः, असत्प्रयोगः, कु or असम्यग्-व्यापारः or व्यवहारः, अन्यथोपयोगः, असद्विनि-योगः, अपव्ययः.

Mite, s. अणुः, लवः, कणः, लेशः, कणिका, अल्पमात्रा. 2 धनलवः-लेशः, अत्यल्पं धनं, काकिणी, कपर्दिका.

Mithridate, s. विषनाशनं, विषघ्नं.

Mitigate, v. t. शम् c. (शमयति), प्र-उप-°, लघू-कृ 8 U, लघयति (D.), न्यूनीकृ, अल्पीकृ; नि-यम् 1 P or c.; See **Moderate;** 'to be m. ed' शम् 4 P, लघूभू 1 P. -ion, s. शमः, शमनं, शांति f., प्र-उप-°, लघूकरणं, न्यूनता. -ive, -Mitigant, a. शमक, शांतिद, शांतिकर (री f.).

Mix, v. t. मिश्र् 10, सं-व्या-वि°-, संयुज् 7 U, 10, सं-यु 2 P; संसृज् 6 P, संपृच् 2 A, 7 P, प्रक्षिप् 6 P, एकीकृ 8 U, एकत्र कृ, संमिल् c. 2 संकृ 6 P, संकुलीकृ. -v. i. मिश्रीभू 1 P, संमिल् 6 P, संकृ-संयुज्-संसृज्-pass.; संयोग-संसर्ग-इ-या 2 P or गम् 1 P, संगम् 1 A, संगमनुवज् 1 P, सं-इ-. -ed, a. मिश्रित, संयुक्त, संसृष्ट, संपृक्त, संयुत, व्या-सं-मिश्र, समवेत, संबद्ध. -ing, -ture, s. मिश्रणं, संयोगः, संसर्गः, संपर्कः. 2 मिश्रता, संयुक्तता, संसृष्टता, संकीर्णता. 3 संकरः, संनिपातः, नानाद्रव्य-संमिश्रद्रव्य-समुदायः, मिश्रद्रव्यं, मिश्रं.

Mixen, s. विट्-पुरीष-राशिः.

Mizzen-mast, s. पश्चिमकूपकः.

Mizzle, s. तुषारवर्षः, शीकरासारः

Mnemonic, a. स्मृतिसहायभूत, स्मरणोपकारिन्. -s. (M.s) स्मरणविद्या.

Moan, v. i. दीर्घं रु 2 P or निश्वस् 2 P, सशब्दं आक्रंद् 1 P or आक्रुश् 1 P or विलप् 1 P, आर्तरवं मुच् 6 P; See **Groan, Lament.** -s. आर्तनादः-रवः, दीर्घनिश्वासः-रवः, क्रंदितं, विलपनं, परिदेवनं. -ful, a. विलापकारिन्, परिदेविन्. -fully, adv. सनिश्वासं, सविलापं.

Moat, s. परिखा, प्रतिकूपः, खातकं, उपकुल्या. -ed, a. परिखान्वित.

Mob, s. प्राकृतजनाः, जनसमूहः, अप्रबुद्धजनगणः, लोक or जन-संघः or संकुलं, जनता, बहुजन-मेलकः, पृथग्जनाः, नीच-अधम-जनाः.

Mobile, a. अस्थिर, चंचल, चपल, चरिष्णु, गतियोग्य, जंगम. -Mobility, s. Mob, q. v. 2 अस्थिरता, चांचल्यं, गतिक्षमता.

Mock, v. t. विडंब् 10, अव-उप-हस् 1 P: सोपहासं अनुकृ 8 U. 2 गर्ह् 1, 10 A, अव-ज्ञा 9 U, अवक्षिप् 6 P, अवमन् 4 A, अवहासास्पदं मन्; See **Contemn.** 3 वंच् 10, प्रतृ c., विप्र-लभ् 1 A, मुह् c.; See **Cheat.** -a. कृत्रिम, कृतक, कपट-व्याज in comp.; 'm. fight' कृत्रिमयुद्धं, व्याजयुद्धं. -er, s. उप-अव-हासकः, अवक्षेपकः, विडंबनकृत् m. -ery, -ing, s. उप-अव-हासः, अवज्ञा, विडंबनं, अवक्षेपः, गर्हणं, तिरस्कारः, अवमानः. 2 उपहासपात्रं-आस्पदं-भूमि f.-पदं, अवहासस्थानं-विषयः, तिरस्कारपदं-विषयः. 3 वंचनं-ना, व्याजः, कपटं, छलं, विडंबना, विडंबनहेतुः; अनर्थकारंभः, वृथोद्यमः, वृथोपयत्नः, निष्फलचेष्टा. -ingly, adv. सोपहासं, सावहासं, सतिरस्कारं.

Mode, s. रीति f., प्रकारः, मार्गः, पद्धति f., विधिः, वृत्ति f., कल्पः, क्रमः, विधा, in comp.; See **Manner.** 2 रूपं, आकारः, आकृति f. 3 आचारः, व्यवहारः, प्रचारः, रीतिः, सं-

प्रदायः. 4 सभ्य-शिष्ट-मार्गः, व्यवहारः, शिष्टाचारः. 5 वाच्यं, अर्थः. 6 रागः, रागिणी. **-al,** *a.* रूपविषयक. **-ish,** *a.* शिष्टाचारानुरूप, सभ्यरीत्यनुसारिन्; *See* **Fashionable.**

Model, *s.* आदर्शः, प्रतिरूपं, प्रतिमा-मानं, उपमा-मानं; 'a m. prince' आदर्शः सर्वभूपाणां. 2 संस्कारः, संस्थानं, आकारः, आकृतिः *f.* **-e,** *v. t.* संस्कृ 8 U, रूप् 10, सरूप-*a.* कृ; तक्ष् 1, 5 P; कल्प् c.

Moderate, *a.* परि-,मित, समर्याद, नि-सं-यत, अल्प, सावधिक. 2 नियतवृत्ति, मर्यादानतिक्रामिन्; 'm. in expenses' मितव्ययिन्, अल्पव्ययः; 'm. in desires' अलुब्ध, अल्पसंतुष्ट, अल्पाकांक्षिन्; 'm. in eating' मिताहार, मिताशन, स्वल्पाहार; 'm. in speech' मितवाच्-भाषिन्. 2 (Middling) मध्यम, सामान्य, अनति-नाति- in comp.; 'trees of a m. height' नातितुंगा वृक्षाः. **-e,** *v. t.* शम् c. (शमयति), प्र-उप-°, लघयति (D.), लघूकृ 8 U, न्यूनी-अल्पी-कृ, नियम् 1 P or c.: छायाद्रुमैर्नियमितार्कमयूखतापः (S. 4) 'the heat of the sun's rays being m. ed by shady trees.' 2 नि-सं-यम्, निग्रह् 9 P, संह् 1 P, आ-वृ 5 U. **-e,** *v. i.* शम् 4 P, निवृत् 1 A, विगम् 1 P, अल्पी-लघू-भू 1 P. **-ion,** *s.* लघूकरणं, प्रशमनं. 2 संयमः, निग्रहः, दमः, अनतिक्रमः, मर्यादानतिक्रमः, परि-,मितता-त्वं. 3 समता, समवृत्ति *f.*, समभावः, क्षमा, क्षांति *f*; 'm. in desires' अलोभः, अल्पसंतोषः, अल्पाकांक्षा. **-ly,** *adv.* परिमितं, समर्यादं, नियतं, स्वल्पं; ईषत्, आ, मंद्, नाति, अनति in comp.; 'm. heated' ईषत्तप्त, मंदोष्ण, कोष्ण, &c.: 'm sharp' अनतितीव्र. **-or,** *s.* नियंतृ *m.*, मध्यस्थः.

Modern, *a.* आधुनिक (की *f.*), अधुनातन-इदानींतन-(नी *f.*), अर्वाचीन, अप्राचीन, अपुराण, नूतन, नव, नवीन, नूतनकालीन. **-ness,** *s.* नूतनता, अप्राचीनत्वं. **-Moderns,** *s.* अधुनातनाः, आधुनिकाः (pl.).

Modest, *a.* विनीत, लज्जावत्, लज्जाशील, सलज्ज, सव्रीड, शालीन, विनयवत्, सत्रप, ह्री मत्, लज्जा-त्रपा-व्रीडा-अन्वित or युक्त, सविनय, अप्रगल्भ, अधृष्ट. 2 (not proud) अगर्व, नम्र, निरभिमान, निरहंकार, सविनय, अनुद्धत, विनत, नम्रशील. 3 अव्यभिचारिन्, साधुशील, सद्वृत्त. 4 परि-, मित, अल्पपरिमाण. **-ly,** *adv.* सविनयं, सव्रीडं, सलज्जं, सत्रपं, अगर्वं, अनुद्धतं, निरभिमानं. **-y,** *s.* विनयः, शालीनता, लज्जा, ह्रीः, व्रीडा, त्रपा, लज्जाशीलता, अप्रागल्भ्यं, अधार्ष्ट्यं, मर्यादा, विनीतता. 2 नम्रता, अगर्वः, अनहंकारः, निरभिमानता, अनौद्धत्यं, नम्रशीलता, विनयः. 3 अव्यभिचारः, सद्वृत्ति *f.* 4 परिमितता.

Modicum, *s.* अल्पांशः, अल्पभागः, लवः, लेशः, किंचित्, किंचन.

Modify, *v. t.* रूपं परिवृत् c. or परिणम् c. (-णमयति), विकृ 8 U or c.; रूपांतर्-रूपभेदं-कृ or चि-धा 3 U. 2 नियम् 1 P, संह् 1 P, शम् c.; *See* **Limit, Moderate. -ied,** *a.* विकृत, विकृतरूप, परिणतरूप, नियमित. **-ication,** *s.* रूपांतरविधानं, रूपपरिवर्तनं. 2 विकारः, विकृति *f.*, परिणामः, परिवृत्ति *f.*, रूपांतरं, रूपभेदः, विशेषः. 3 भेदः, विभेदः, विशेषः.

Modulate, *v. t.* स्वरलयं उत्पद् c., स्वरानुपूर्व्यं कृ 8 U. 2 स्वरभेदं कृ. **-ion,** *s.* संक्रमः, परिवर्तनं; 'm. of voice' स्वरसंक्रमः (Mr. 3). 2 स्वरभेदः-लयः-अनुक्रमः; स्वरानुपूर्व्यं. 3 **Melody,** q. v.

Moiety, *s.* अर्धः-र्धं, अर्धभागः-अंशः.

Moil, *v. t.* **Dirty,** q. v. **-e,** *v. i.* व्रातं कृ 8 U, देहायासेन श्रम् 4 P.

Moist, *a.* आर्द्र, क्लिन्न, सरस, उन्न, उत्त, सद्रव, सिक्त, जलार्द्र, तिमित; 'to be m.' क्लिद् 4 P, स्तिम् 4 P. **-en,** *v. t.* क्लिद् c., आर्द्रीकृ 8 U, सिच् 6 P, उंद् 7 P, उक्ष् 1 P. **-ening,** *s.* क्लेदनं, उक्षणं, उंदनं. **-ness,** *s.* आर्द्रता, क्लिन्नता, सरसता. **-ure,** *s.* क्लेदः, तेमः, स्तेमः, रसः, सजलता, आर्द्रता, क्लिन्नता; oft. ex. by जलं.

Molar, *s.* दंष्ट्रा, चर्वणदंतः.

Molasses, *s.* गुडः, इक्षुसारः, मस्त्यंडी-डिका, फाणितं.

Mold, *s.* *See* **Mould.**

Mole, *s.* तिलकः, जडुलः, कालकः, पिप्लुः. 2 वप्रः-प्रं, सेतुः, चयः, पिंडलः, आलि *f.* 3 छुछुंदरी, गंधमुखी, दीर्घतुंडी, दिवांधिका; 'm.-eyed' सूक्ष्मनयन; 'm.-hill' वल्मीकः-कं, वामलूरः, कृमिशैलः, कूलकः, स्यमीकः; 'he makes mountains of m.-hills' तिले तालं पश्यति.

Molecule, *s.* अणुः, परमाणुः, कणः.

Moles, *s.* व्यंगं.

Molest, *v. t.* बाध् 1 A, अर्द् 1 P or c., पीड् 10, उपद्रु 1 P, आ-यस् c., उपरुध् 7 U: *See* **Harass. -ation,** *s.* बाधा, पीडा, उपद्रवः, आयासः, क्लेशः. **-er,** *s.* उत्पीडकः, बाधकः, आयासकः.

Mollient, *a.* मृदुकारिन्, शमक, शांतिद्.

Mollify, *v. t.* शम् c. (शमयति), प्र-उप-°, सांत्व् 10, मृदूकृ 8 U, लघूकृ.

Molten, *a.* विलीन; *See* **Liquid.**

Moment, *s.* क्षणः, मुहूर्तः, निमि(मे)षः, पलं; 'pleasant for the m.' आपातरमणीय; 'but for a m.' क्षणमात्रं; 'this very m.' अस्मिन्नेव क्षणे; 'the m. he is here' अत्र तस्मिन्नागतमात्रे or आगत एव; 'for the present m.' आपाततः; 'in a m.' क्षणात्,

क्षणेन, निमेषमात्रात्, एकपदं; 'auspicious m.' शुभमुहूर्तः, लग्नं; *See* **Instant** also. **2** गुरुत्वं, महत्त्वं, प्रभावः, गौरवं, महिमन् *m.*; *See* **Importance**; 'of little m.' अगुरुक, अकिंचित्कर (री *f.*), लघ्वर्थ, क्षुद्र. **-ary**, *a.* क्षणिक, क्षणस्थायिन्, अचिर, अस्थायिन्; क्षण, निमेष in comp.: 'm. flash' अचिरप्रभा, क्षणद्युति *f.*; 'm. obstacle' क्षणविघ्नः. **-ous**, *a.* गुरु, गुरुप्रभाव, अलघु; *See* **Important**.

Momentum, *s.* जवः, वेगः, आ-सं-वेगः.

Monachism, *s.* मठवासः, संसारत्यागः, आरण्यकवृत्ति *f.*

Monad, *s.* अभेद्य-अच्छेद्य-वस्तु *n.*

Monarch, *s.* राजन् *m.*, ईशः, ईश्वरः, पतिः, अधिपः, अधीशः, स्वामिन् *m.*; *See* **Lord**; 'm. of the herd' यूथपतिः-पालः. **2** अधीश्वरः, नृपः, नृपालः, भूपतिः; *See* **King**. **-al, -ic, -ical**, *a.* राजकीय, राजयोग्य, राज in comp. **2** एकप्रभुक, एकराजायत्त, सम्राड्धनि. **-y**, *s.* एकराजशासनं, एकराजतंत्रं, एकराजाधिपत्यं. **2** राज्यं, विषयः, राष्ट्रं.

Monastery, *s.* विहारः, मठः, आश्रमः, मुनिवासः, वानप्रस्थाश्रमः. **-Monastic, -ical**, *a.* विहारिक, आश्रमिक (की *f.*), वैखानस (सी *f.*); 'm. vow' वैखानसं व्रतं.

Monday, *s.* सोमवारः-वासरः, इंदुवासरः.

Monetary, *a.* द्रव्यसंबंधिन्, मौद्रिक (की *f.*).

Money, *s.* धनं, अर्थः, वित्तं, द्रव्यं, विभवः, वसु *n.*; *See* **Wealth**. **2** मुद्रा, निष्कः-ष्कं, नाणकं, टंककः; 'm.-bag' कोशः-षः, मुद्राकोषः; 'm.-changer' मुद्रापरिवर्तकः; 'm.-lender' कुसीदिकः, वार्द्धुषिकः, वृद्धजीवः, वार्द्धुषिः; उत्तमर्णः. **-ed**, *a.* धनिन्, धनिक, धनसंपन्न, धनाढ्य. **-less**, *a.* धनहीन, निर्धन, निःस्व, गतविभव, परिक्षीण; *See* **Poor**.

Monger, *s.* व्यापारिन् *m.*, व्यवहारिन् *m.*, क्रयविक्रयिकः, वणिज् *m.*

Mongoose, *s.* *See* '**Mungoose**.'

Mongrel, *a.* संकीर्ण, संकरजातीय, संकरज.

Monism, *s.* अद्वैतवादः.

Monitor, *s.* शासकः, बोधकः, उपदेशकः, शिक्षकः. **2** उपगुरुः. **-y, -Monitive**, *a.* प्रबोधक, उपदेशक, शिक्षक, उपदेशरूप.

Monk, *s.* यतिः, संन्यासिन् *m.*, मुनिः, योगिन् *m.*, मठवासिन् *m.*, तपस्विन् *m.*, वानप्रस्थः. **-ish**, *a.* मुनिसंबंधिन्, यतिसदृश (शी *f.*).

Monkey, *s.* वानरः, कपिः, मर्कटः, प्लवं(व)गः, शाखामृगः, वलीमुखः, कीशः, वनौकस् *m.*; 'm.-like' कापेय (यी *f.*).

Monochord, *s.* एकतंत्रीवाद्यं.

Monochromatic, *a.* एकवर्ण-रंग.

Monochronic, *a.* समकालीन, वर्तमान.

Monocrat, *s.* अधीश्वरः, अनायत्तशासनः.

Monocular, *a.* एकाक्ष (क्षी *f.*), एकनयन, काण. **2** एकनेत्रोपयुक्त.

Monogamy, *s.* सकृद्विवाहः, एकपत्नीव्रतं, एकस्त्रीविवाहः. **-ist**, *s.* एकपत्नीकः, एकस्त्रीकः.

Monologue, *s.* आत्म-स्व-गतभाषणं.

Monomachy, *s.* द्वंद्वं, नियुद्धं, द्वंद्वयुद्धं.

Monomania, *s.* एकविषयासक्ति *f.*, एकविषयोन्मादः. **-Monomaniac**, *a.* एकविषयोन्मत्त.

Monopetalous, *a.* एकदलविशिष्ट.

Monoplane, *s.* एकतलं विमानं.

Monopoly, *s.* एकाधिकारः, अनन्यसाधारणः अधिकारः, एकव्यापारः-व्यवसायः. **-ist, -izer**, *s.* पूर्वक्रयिन् *m.*, सर्वग्राहकः. **-ize**, *v. t.* (सर्वं) पूर्वं क्री 9 U; (सर्वं) स्वायत्तीकृ 8 U, आत्मसात्कृ, अनन्यसाधारणं आत्माधीनीकृ, असामान्येन भुज् 7 A or जुष् 6 A.

Monosyllable, *s.* एकाक्षरं. **-Monosyllabic**, *a.* एकाक्षर, एकाच्; 'm. roots' एकाचो धातवः.

Monotheist, *s.* अद्वैतवादिन् *m.* **-Monotheism**, *s.* अद्वैतं, अद्वैतवादः.

Monotony, *s.* एकस्वरः-स्वनः, स्वराभेदः, एकस्वरसंतानः, स्वरसमता, स्वरभेदाभावः. **2** एकसम-समान-रूपता, विशेषाभावः, एकव्यापारसंततिः *f.* **-ous**, *a.* एकस्वर-तान-स्वन, सम-अभिन्न-स्वर. **2** एक-सम-समान-रूप, एकप्रकार, निर्विकार, निर्विशेषं. **-ously**, *adv.* एकस्वरेण, समरूपेण, निर्विकारं. **-ousness**, *s.* *See* (*s.*) above.

Monsoon, *s.* वर्षाः (*f.* pl.), वर्षाकालः-समयः, प्रावृष् *f.*, मेघकालः, पर्जन्यकालः.

Monster, *s.* राक्षसः, क्रूर-घोर-कर्मन् *m.* **2** राक्षस-विकट-भीम-शरीरः-विग्रहः, बृहत्परिमाणः, विकटाकारः; *See* **Giant**. **3** अद्भुतं, अपूर्ववस्तु *n.*, अपरूपं, विरूपविषयः; 'm.s in the form of men' मानवराक्षसाः; 'm.s of the deep' मकरादयः, यादांसि. **-Monstrous**, *a.* अद्भुत, विलक्षण, अपूर्व, सृष्टिक्रमबाह्य. **2** अप-वि-रूप, विकृताकृति. **3** राक्षसरूप, घोरदर्शन, विकट-भीम-कराल-रूप-शरीर, अतिमहत्, घोररूप, घोराकृति, विकटाकार, भीम-उग्र-रौद्र-दर्शन. **4** (Of acts) दारुण, घोर, अतिबीभत्स, विकट. **-ly**, *adv.* अद्भुतं, विकटं, दारुणं, उत्कटं, भृशं, अतीव, अत्यंतं, अतिशयेन; *See* **Exceedingly**. **-ness, -Monstrosity**, *s.* अद्भुतता, घोरता, दारुणता, &c.

Month, *s.* मासः; 'half a m.' पक्षः; 'bright half of the m.' शुक्ल-शुद्ध-सित-पक्षः, पूर्वपक्षः; 'dark half' कृष्ण-उत्तर-तमिस्र-पक्षः, बहुलः, तमिस्रः; 'a m. old' मासजात. **-ly**,

a. मासिक (की *f.*), मास्य, प्रतिमासिक; 'half-m.' पाक्षिक (की *f.*); 'm. allowance' मासिकं. *-adv.* मासे मासे, प्रतिमासं.

Monument, *s.* कीर्ति-यशः-स्तंभः, स्मारकचिह्नं. **2** चैत्यं, समाधिः, स्तूपः. **-al,** *a.* स्मरणार्थक, स्मरणकारिन्. **2** चैत्यसंबंधिन्.

Mood, *s.* भावः, वृत्ति *f.*, प्रकृति *f.*, अवस्था, दशा, चित्तवृत्तिः, मनोभावः; 'an angry m.' कोपवृत्तिः. **2** वाच्यं, अर्थः. **-y,** *a.* रुष्ट, कुद्ध, वक्रभाव, उदासीन, उदासीनवृत्ति, चित्तोद्विग्न, विषण्ण, उद्विग्न, दीनमनस्क. **2** स्वच्छंद, स्वैरिन्; *See* **Humorsome.**

Moon, *s.* चंद्रः, शशिन् *m.*, इंदुः, सोमः, विधुः, चंद्रमस् *m.*, निशाकरः, रजनि(नी)करः, ग्लौः, शशधरः, शशांकः, मृगांकः, हिमांशुः, सुधांशुः, शुभ्रांशुः, ओषधीशः, ओषधीपतिः, कुमुदबांधवः, द्विजराजः, कलानिधिः-नाथः, अब्जः, जैवातृकः, नक्षत्रेशः, क्षपाकरः; and comp. of पतिः, ईशः, नाथः, पः, with words for 'Night,' 'Star,' or of 'Ray' with 'Cold' or 'Nectar,' q. v.; क्षपानाथः, शीतकरः, तारानाथः, उडुपः; 'orb of the m.' बिंबः-बं, मंडलं; 'digit of the m.' कला, रे(ले)खा; 'full m.' पूर्णिमा, पौर्णमासी; 'new m.' अमा, अमाव(वा)सी, अमाव(वा)स्या, दर्शः, सूर्येंदुसंगमः; 'm.-beam' चंद्रपादः, शशिकरः-रश्मिः, सुधांशुः, (Ray, q. v.); 'm.-light' कौमुदी, चंद्रिका, ज्योत्स्ना, चंद्र-शशि-प्रभा, चंद्रातपः; (*a.*) ज्योत्स्नावत्, ज्योत्स्नायुक्त, चंद्रप्रकाशित; 'enjoys m.-light evenings' ज्योत्स्नावतीं निर्विशति प्रदोषान् (R. VI. 34); 'm. plant' सोमलता, सोमवल्ली-वल्लरी, ब्राह्मी, मत्स्याक्षी; 'm.-shine' चंद्रप्रभा-द्युति-कांति *f.*; 'm.-stone' चंद्रकांतः, सोमकांतः, चंद्रमणिः; 'm.-struck' विक्षिप्त-भ्रांत-बुद्धि, विप्लुत-हत-मति. **-less,** *a.* हत-नष्ट-चंद्र, चंद्रहीन. **-y,** *a.* चंद्रतुल्य.

Moor, *v. t.* रज्ज्वा बंध् 9 P or गतिं रुध् 7 U. *-s.* 'm.-land' कच्छः, कच्छ-अनूप-भूः. **-ish,-y,** *a.* आनूप (पी *f.*), कच्छ, in comp; अनूप.

Moot, *v. t.* विचर् c., परीक्ष् 1 A, वि-तर्क् 10; *See* **Discuss.** **2** उपक्षिप् 6 P, उपन्यस् 4 U; 'm.-case', 'm.-point' विचारविषयः-पदं-आस्पदं-स्थानं, संदिग्ध-विवादविषयः.

Mop, *s.* संमार्जनी, शोधनी. **2** बालिका, तरुणी. *-v. t.* मृज् 2 P or c., शुध् c.

Mope, *v. i.* वि-अव-सद् 1 P, क्लै 1 P, दुर्मनायते (D.), विषण्णीभू 1 P. **-ing,-ish,** *a.* विषण्ण, अवसन्न, उद्विग्न, दुर्मनायमान, विषण्णवदन; *See* **Deject,-ed.**

Moppet, *s.* वस्त्रपांचालिका, पटपुत्रिका.

Moral, *a.* साधु, साधुवृत्त, सदाचार, धार्मिक-सात्विक- (की *f.*); नीतिमत्, नयानुसारिन्, धर्म्य, पुण्य, न्यायानुसारिन्, धर्मानुरूप, न्याय्य; gen. ex. by सत्, नीति, नय in comp., 'm. instruction' नयोपदेशः, नीति *f.*; 'm. lessons' नीतिपाठाः; sometimes by चित्त, मानस in comp.; 'm. freedom' चित्तस्वातंत्र्यं; 'm. advancement' मानसोन्नति *f.*; 'm. science' नीतिशास्त्रं; 'm. duties' शाश्वतधर्मः, सदाचारः. **2** नियमाधीन. **3** अनुमान-युक्ति-सिद्ध. *-s.* तात्पर्यं, अभिप्रायः, भावार्थः, तात्पर्यार्थः. **-ist,** *s.* नीतिशास्त्रज्ञः, नीतिज्ञः, नयज्ञः; नीत्युपदेशकः, नीतिविद्, सदसद्विवेचकः. **-ity,** *s.* नीतिः, नयः, नीति or नय विद्या or शास्त्रं, सद्व्यवहारशास्त्रं, सदसद्विवेकः-विचारः. **2** धर्मानुष्ठानं, साधुवृत्तं, पुण्यशीलता, सदाचारः, सु-सत्-चरितं, धर्मवृत्ति *f.* **3** न्याय्यता, धर्म्यता, धर्म-न्याय-अनुसारः. **-ize,** *v. t.* धर्मोपदेशास्पदीकृ 8 U. *-v. i.* नीत्युपदेशं दा 3 U or लिख् 6 P. **-ly,** *adv.* नीतिशास्त्रानुरूपं, नयतः, नीत्या, धर्मेण, धर्मतः, न्यायेन, न्यायतः. **2** युक्त्या, मनसा, अनुमानेन. **-Morals,** *s.* नीतिः, नीतिशास्त्रं-विद्या. **2** आचारः, आचरणं, वृत्तिः, चरितं, वृत्तं, व्यवहारः, रीति *f.*; 'good m.' सुशीलं, सदाचारः, साधुवृत्तं, विनयः, साधु-सु-सत्-चरितं.

Morass, *s.* कच्छः, अनूपः, अनूपभूः.

Morbid, *a.* दूषित, उद्भ्रांत, विकृत, अस्वस्थ, असुस्थ, रोगाक्रांत, व्याधित.

Morbific, *a.* रोग-व्याधि-कर (री *f.*), रोगद.

Morbose, *a.* रोगजनित, व्याध्युद्भव.

Mordacious, *a.* दंशक. **-Mordacity,** *s.* दंशकता, दंशनं.

Mordant, *a.* उग्र, अरुंतुद, तीक्ष्ण, निदाघर्म.

More, *a.* अधिक, भूयस्, अधिकतर; उत्तर, अतिरिक्त, पर, अन्य; oft. ex. by तर or ईयस् affixed; 'm. in strength' बलीयस्, प्रबलतर; 'something m.' किंचित् अन्यदपि; 'what m.' किमपरं, किमन्यत्; 'after m. than three years' समधिकाद्वर्षत्रयात्; 'm. or less' न्यूनाधिक; 'for m. than 1,000 years' परः सहस्राः शरदः. *-s.* अधिकं, आधिक्यं, अतिरेकः, अतिशयः; oft. ex. by अपरं, अन्यत्; *See* above; 'm. or less' न्यूनातिरेकः, न्यूनाधिक्यं; 'no m. of solicitation' अलं-कृत-अतिप्रार्थनया; 'what m.' किमन्यत्; किं-बहुना. *-adv.* (With adj.) ex. by अधिक in comp.; अधिकमनोज्ञ; or gen. by compar. degree in तर or ईयस्. **2** (With verbs) by अधिकं, अधिकतरं, अतःपरं, पुनः, भूयः; 'm. and m.' उत्तरोत्तरं, अधिकाधिकं; 'no m.' न अतः-इतः-परं or ऊर्ध्वं; अलं, कृतं; *See* **Enough;**

'how much m.' किं पुनः, किमुत. **-Moreover,** *adv.* अन्यच्च, अपरं-अपि-च, किंच, परं, अपि तु, अपि.

Morganatic, *a.* अनुलोम (विवाहः).

Moribund, *a.* मृतकल्प-प्राय, मुमूर्षु.

Moringa, *s.* सो(सौ-शो-शों)भाजनं, शिग्रुः, तीक्ष्णगंधकः, अ(आ)क्षीवः, मोचकः.

Morion, *s.* शिरस्कं, शिरस्त्राणं, शीर्षकं.

Morn, Morning, *s.* वि-प्र-भातं, प्रत्यु(त्यू)षः-षस् *n.*, उषा, उषस् *f.*, व्युष्टं, कल्यं, अरुणोदयः, प्रातर् *ind.*, अहर्मुखं, प्रभात or उषः-कालः or समयः. **2** (Opposed to afternoon) पूर्वाह्णः, प्राह्णः; 'it is broad m.' सुप्रभाता रजनी; 'in the m.' प्रातः, प्रातःकाले, प्रभाते, प्रत्यूषे, व्युष्टं, प्रगे; 'I bid you good m.' 'good m. to you' शुभस्ते प्रातःकालः (भूयात्); 'early in the m.' सुप्रातः, महति प्रत्यूषे, अतिप्रगे, प्रातरेव. **-a.** प्रातः-उषः-कालीन, प्राभातिक, औषिक (की *f.*), उषस्य, प्रभातीय; gen. ex. by प्रातर् or (*s.*) in comp.; 'm. breeze' विभातवायुः; 'm. devotion' प्रातरुपासना; 'm. star' प्रभाततारा; 'm. twilight' प्रातःसंध्या.

Morose, *a.* कर्कश-कटु-वक्र-स्वभाव-प्रकृति, वाम or वक्र-भाव or शील, रूक्षस्वभाव, सदावक्र, प्रतीप, उदासीन, दुःशील, उदासवृत्ति. **-ly,** *adv.* वक्रभावेन, कर्कशभावात्, स्वभावरौक्ष्येण. **-ness,** *s.* कर्कशता, रूक्षता, वामता, वक्रता, स्वभावकटुता, वक्रशीलता, प्रतीपता, औदासीन्यं.

Morrow, *s.* पर or उत्तर-दिवसः or दिनं; 'on the m.' श्वः, परेद्युः, परेद्यवि, कल्ये, उत्तरेद्युः.

Morsel, *s.* कवलः, ग्रासः, पिंडः. **2** खंडः, लवः, शकलः-लं, क्षुद्रभागः.

Morsure, *s.* दंशनं.

Mortal, *s.* मर्त्यः, मनुष्यः, मर्त्यधर्मन्, जन्मिन्, प्राणिन् शरीरिन्, देहिन्, all *m.*, देह-तनुभृत्, मृत्युवशः; *See* **Man.** **-a.** मर्त्य, मर्त्यधर्मन्, मरणशील, मृत्युवश, नश्वर, नाश-मरण-अधीन. मरण-काल-आयत्त, अनित्य, विनाशिन्; 'men are m.' मनुष्या मर्त्यधर्माणः. **2** प्राणहर (री *f.*), जीवितापह, प्राणांतक, मारात्मक, मर्मभेदिन्, अंतकर (री *f.*), प्राणापह, प्राणघ्न (घ्नी *f.*), मरणावह. **3** मर्त्य, मानुष (षी *f.*), मनुष्यधर्मन्; *See* **Human.** **4** अत्यंतदारुण, अतिक्लेशक; 'm. enemy' आमरणांतवैरिन् *m.*, दृढ-बद्ध-वैरः. **-ity,** *s.* मर्त्यता, मरणशीलता, मृत्युवशता, मृत्यु-मरण-धर्मः, कालधर्मः, नश्वरता, अनित्यता. **2** मृत्यु, मरणं, नाशः, जीवितनाशः. **3** मानुष्यं, मानुषता **-ly,** *adv.* सप्राणनाशं, ex. by *a.*; 'he was m. wounded' तस्य प्राणहरा व्रणाः संजाताः, भिन्नमर्माऽभूत्.

Mortar, *s.* उलू(लू)खलं; 'm. and pestle' उलूखलमुसले. **2** लेपः, सुधा, चूर्णलेपः.

Mortgage, *s.* आधिः, क्षेत्र-स्थावर-आधिः, भूमिनिक्षेपः, बंधकः, न्यासः. **-v.** *t.* आ-धा 3 U, आधीकृ 8 U, बंधे दा 3 U, (स्थावरधनं) न्यासीकृ. **-ee,** *s.* आधिग्राहकः, आधिबंधक-न्यास-ग्राहिन् *m.* **-or,** *s.* आधातृ *m.*, निक्षेप्तृ *m.*

Mortiferous, *a.* मरणावह; *See* **Mortal.**

Mortify, *v. t.* अभिभू 1 P, अवमन् c., अपकृष् 1 P, मानं-गर्व-भंज् 7 P, खंड् 10; *See* **Humble.** **2** निग्रह् 9 P, सं-नि-यम् 1 P, दम् c. (दमयति), वशीकृ 8 U, आवृ 5 U, जि 1 P. **3** क्लिश् 9 P, सं-परि-तप् c., आयस् c.; *See* **Afflict.** **4** चैतन्यं नश् c. or हृ c. **-v.** *i.* नश् 4 P. चैतन्यं नश् c. **2** तप् 4 A, तपस्तप् or चर् 1 P, तपस्यति (D.). **-ed,** *a.* अभिभूत, खंडित, आत्त-हृत-भग्न-गर्व, खंडितमान, भग्न-दर्प-मान. **2** दांत, वशीकृत, जित; 'whose passions are m.' जितेंद्रियः, वशिन् *m.*, दांतः, वीतकामः, वीतरागः, निःस्पृहः. **3** क्लिष्ट, सव्यथ, पीडित. **4** नष्ट-चैतन्य-मांस, कोथीभूत. **-ication,** *s.* अभिभवः, अवमानः, अपकर्षः, मान or दर्प-भंगः or खंडनं, मानहानि *f.* **2** दमः, निग्रहः, संयमः-मनं, जयः, इंद्रियदमः-जयः; कामविरक्तिः *f.*, विषयविसुखता, वैराग्यं. **3** तपश्चर्या, तपस्या, कृच्छ्रं. **4** दुःखं, क्लेशः, आयासः, व्यथा. **5** आशाभंगः-नाशः, मनोभंगः. **6** मांसपाकः, मांसकोथः, चैतन्यनाशः. **-ing,** *a.* मानध्वंसिन्, दर्पहारिन्, व्यथावह; क्लेशकर, (री *f.*), संतापक.

Mortise, *s.* काष्ठसंधिः, दारुसीवनं, दारु-काष्ठ-च्छिद्रं. **-v.** *t.* काष्ठद्वयं सं-धा 3 U.

Mortmain, *s.* अन्यादेयभोगः.

Mortuary, *s.* श्मशानं, परेतभूमि *f.*- वासः.

Mosaic, *a.* नानावर्ण (विध) प्रस्तरखचित, 'm. work' *s.* चित्रकर्मन् *n.*

Mosque, *s.* यावनधर्ममंदिरं, यवनीयं देवतायतनं.

Mosquito, *s.* मशः. मशकः.

Moss, *s.* शैव(वा)लः, शेव(वा)लूः-लं, जलनीली-लिका, 'm.-grown' रूढशैवल, शैवलावृत. **-y,** *a.* शैवलवत्, शैवलिन्.

Most, *a.* भूयिष्ठ, अधिकतम, बहु (pl.); प्रायेण सर्व; 'm. people think so' प्रायेण सर्वे (बहवः) एवं मन्यंते. **2** निरतिशय, अत्यधिक, परम, उत्तम; 'for the m. part' भूयिष्ठं, प्रायः, प्रायेण, बहुशः. **-s.** भूयिष्ठ परमभागः, बहुतम-अधिक-भागः, प्रायः, सर्वभागः; बहुतरभागः; 'm. of the spot is green' प्रायशः सा स्थली हरिद्वर्णा; 'to the m. of one's power' यावच्छक्तितः, यावच्छक्यं. **-***adv.* भूयिष्ठं, परमं, अत्यंतं, अतीव, सु-अति-अत्यंत-in comp.: gen. ex. by super-

lative of adj. 2 अधिकं, सर्वाधिकं (with verbs). **-ly**, *adv.* प्रायः, प्रायेण, भायशः, भूयसा, बहुशः, बहुधा, सामान्यतः, साधारणतः; gen. ex. by भूयिष्ठ affixed to adj.; 'an assembly m. composed of learned men' अभिरूपभूयिष्ठा परिषद् (S. 1).

Mote, *s.* बिंदुः, अणुः, लवः, अणुरेणुः, परमाणुः, कणिका; ' the m. thou seest in the eyes of others, but not the beam in thine own ' खलः मर्षपमात्राणि परिच्छिद्राणि पश्यति । आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति.

Moth, *s.* शलभः, पतंगः, कीटः.

Mother, *s.* मातृ *f.*, जननी, अंबा, जनयित्री, प्रसूः, प्रसवित्री, जनी, प्रसविनी; ' m. of offspring ' पुत्रवती, सुतिनी, अपत्यवती; 'm.-in-law' श्वश्रूः; 'm. of a hero' वीरसूः-माता, वीरप्रसवा; ' born of a different m.' भिन्नोदर, अन्योदर, असोदर. **-hood**, *a.* मातृत्वं, जननीत्वं, मातृभावः-धर्मः. **-less**, *a.* अमातृक, हीन-मृत-मातृक. **-ly**, *a.* मातृसदृश (शी *f.*), मातृ-संनिभ-अनुरूप-योग्य, मातृ in comp. **-***adv.* मातृवत्, मातृभावेन, मातृस्थाने भूत्वा.

Motile, *a.* चल, जंगम.

Motion, *s.* गति *f.*, गमनं, चलनं, सर्पणं, चरणं. 2 चेष्टा, व्यापारः, अंगविक्षेपः; 'to set in m.' ईर् c., आ-धू 5, 9 U, 6 P, कंप् c. 3 क्षोभः; वेगः, सं-आ-वेगः, मनोविकारः, मनोवृत्तिः-वेगः, भावः, वासना, कल्पना. 4 प्रेरण-णा, प्रोत्साहनं, प्रचोदना. 5 उपन्यासः, उपक्षेपः, कार्योपक्षेपः, सूचना. 6 रेकः, रेचनं-ना, उच्चारः. **-***v. i.* संज्ञां दा 3 U or कृ 8 U, संकेतं दा. **-less**, *a.* निश्चल, निश्चेष्ट, अचल, अचेष्ट, गतिहीन-शून्य, निष्कंप, अस्पंद, स्तब्ध, स्थिर.

Motive, *a.* चालक, प्रेरक, प्रवर्तक, हेतुक in comp., कारणीभूत. **-***s.* हेतुः, कारणं, निमित्तं, प्रयोजनं, कार्यं, अर्थः, निदानं, निबंधनं, प्रवर्तकं, प्रवृत्ति-निमित्तं-हेतुः; ' without m. s ' निष्कारणं, अनिमित्तं, अहेतुकं, निष्प्रयोजनं, अकस्मात्.

Motley, *a.* चित्रविचित्र, नानाविध-वर्ण, बहुप्रकार, विविध.

Motor, *s.* चालकः, प्रेरकः.

Mottle, *v. t.* चित्र् 10, कर्बुरीकृ 8 U. **-ed**, *a.* चित्रित, कर्बुरित, कल्माषित.

Motto, *s.* वाक्यं, वचनं, आदर्शवाक्यं.

Mould, *s.* संस्कारः, आकारः, आकृति *f.*, संस्थानं, रूपं, मूर्ति *f.* 2 मृद् *f.*, मृत्तिका, मृदुचूर्णं. 3 प्रकृति *f.*, कारणं. **-***v. t.* संस्कृ 8 U, कल्पय् c., आकारं-रूपं-दा 3 U, प्रवृत् c., रच् 10, रूपय् 10. **-y**, *a.* मलिन, मलावृत, समल, कलंकमय (यी *f.*).

Moulder, *v. i.* विशृ pass., जॄ 4 P, चूर्णीभू 1 P, अव-सद् 1 P, शनैः नश् 4 P or क्षि pass.

Pine, *s.* देवदारुः-रु, पीतद्रुः, सरलः, पूतिकाष्ठं; *See* **Fir** also. **-***v. i.* (Away) अवसद् 1 P, परि-,म्ले-ग्लै 1 P, क्षि-pass., खिद्-यती 4 A. **2** (For) उत्तप् 4 P, उत्कंद् 1 A. उत्सुकायते (D.); oft by उत्क, उत्सुक, उत्कंठ in comp.; ' a heart p. ing away in absence ' विरहोत्कंठं हृदयं; 'p. ed for his home ' गृहं गंतुमुदताम्यत्; अद्रिसुतासमागमोत्कः (K. vi. 95) ' p. ing to be united with Parvati '; अंतःपुरविरहपर्युत्सुकस्य राजर्षेः (S. 3) ' who is p. ing by separation &c. **-ing,** *s.* ग्लानि *f.*, अवसादः, उत्कंठा. **-***a.* ग्लान, क्षीण, विषण्ण, उत्क, उत्सुक, सोत्कंठ.

Pinion, *s.* पक्षः, पर्ण **2** बाहुपाशः-बंधः. **-***v. t.* पक्षौ बंध् 9 P, बाहू बंध्.

Pink, *s.* पाटलवर्णः, पाटलः. **2** अग्रं, शिखरं, पराकाष्ठा. **-***a.* पाटल, पाटलवर्ण; ' p.-eyed ' गज-सूक्ष्म-नेत्र. **-***v. t.* व्यध् 4 P; *See* **Perforate.**

Pinnace, *s.* क्षुद्र-लघु-नौका.

Pinnacle, *s.* अट्टः, प्रासादाग्र-शृंगं, प्रोच्छ्रितं हर्म्यं. **2** शिखरं, शृंगं, अग्रं.

Pioneer, *s.* आटविकः, काष्ठ-तरु-छिद् *m.* **2** मार्गदर्शकः, अग्रेसरः, अग्रयायिन् *m.* *See* **Forerunner.** **-***v. t.* सैन्यमार्गं शुध् c.

Pious, *a.* धार्मिक (की *f.*), पुण्य-धर्म-शील, धर्मात्मन्, पुण्य, पुण्यात्मन्, भक्तिमत्, शुद्धि-

व्रत, भक्ति or धर्म-निष्ठ or परायण, धर्माचारिन्; 'led a p. life' धर्माचरणेन आयुरक्षपयत्; 'p. action' धर्म्यक्रिया; for p. purpose' धर्मार्थं. 2 धर्म-भक्ति-मूलक. -ly, *adv.* भक्त्या, धार्मिकवत्. -ness, -Piety, *s.* धर्मनिष्ठा-परता-आसक्ति *f.*, धर्मात्मता, पुण्यशीलं, ईश्वर-धर्म-भक्ति *f.*, ईश्वरनिष्ठा-सेवा, पुण्यता, भक्तिः; 'distinguished for p.' धर्मप्रधान. 2 पितृसेवा, पुत्रधर्मः. [वि-रु 2 P.

Pip, *s.* बीजं. 2 बिंदुः, अंकः. -*v. i.* कूज् 1 P,

Pipe, *s.* वंशः, वेणुः, सुषिरं. 2 नालः, नाडि-डी-लि-ली *f.*, प्रणालः-ली; 'water-p.' सारणि *f.*, प्रणालिका. -*v. i.* वेणुं वद् c. or ध्मा 1 P. -er, *s.* वांशिकः, वेणुध्माः.

Piquant, *a.* उग्र, तिक्त, कटु, तीक्ष्ण, प्र-,खर. 2 मिष्ट, स्वादु, सरस.

Pique, *s.* कलिः, कलहः; ईषत्कोपः. -*v. t.* ईषत् कुप् c. or रुष् c. 2 उत्तिज् c., उत्पद् c., प्रोत्सह् c., प्र-वृत् c. 3 (Oneself) अभिमन् 4 A; विकत्थ् 1 A; 'he p.s himself upon his learning' पंडितंमन्योऽसौ.

Pirate, *s.* समुद्रदस्युः. 2 साहसिकनौका. 3 अब्धिचौरः. -*v. t.* अपह्नु 1 P, लुंट्-ऌ 1 P, 10. **Piracy,** *s.* समुद्रीयचौर्यं-लुंठनं. -**Piratical,** *a.* साहसिन, साहसिक (की *f.*).

Piscator, *s.* See **Fisherman.**

Pisces, *s.* मीनः, मीनराशिः.

Piscivorous, *a.* मत्स्याशन, मत्स्याद.

Pismire, *s.* See **Ant.**

Piss, *s.* मूत्रं, मेहः. -*v. t.* मूत्रं उत्सृज् c., मिह् 1 P, मूत्र 10.

Pistil, *s.* गर्भकेसरः-रं.

Pit, *s.* गर्तः-र्ता, बिवरं, बिलं, अवटः; 'p.-coal' आकरांगारः; 'p.-fall' गूढ or छन्न-कूपः or गर्तः, अंधकूपः. -*v. t.* सूक्ष्मगर्तैः अंकू 10 or चिह्नयति (D.). 2 योद्धुं प्रोत्सह् c., प्रतियुध् c.

Pitch, *v. t.* रच् 10, प्रतिवि-धा 3 U; रुह् c. (रोपयति), स्था c. (स्थापयति), निविश् c. 2 क्षिप् 6 P, प्र-,अस् 4 P, नि-,पत् c. 3 अरालेन अंज् 7 P. -*v. i.* आ-अव-पत् 1 P, अवरुह् 1 P, अव-तॄ 1 P, अध्यास् 2 A. 2 निविश् 6 A, शिबिरं अध्यास्. 3 अधोमुखेन पत्, अवाक् गम् 1 P. 4 (Upon) वृ 5 U; See **Choose.** -*s.* तिंदुः, रालः, अरालः, यक्षधूपः सर्जरसः, सर्वरसः, बहुरूपः. 2 कोटि *f.*, काष्ठा, अग्रं, शिखरं; 'highest p.' परा काष्ठा-कोटिः. 3 परिमाणं, पर्यंतः; See **Degree.** 4 उत्संगः, कटकः-कं. 5 स्वरः; 'mineral p.' शिलाजतु *n.* -y, *a.* तिंदुलिल. 2 सूचिभेद्य, अंध, अतिकृष्ण.

Pitcher, *s.* कुंभः, घटः, घटी, कलसः-शः, पुटग्रीवः; See **Jar.**

Pith, *s.* मज्जा, गर्भः, सारः. 2 सारः, सारांशः, सत्त्वं, तत्त्वं. 3 निर्यासः, रसः. 4 सत्त्वं, ह्रीर्, बलं, उत्साहः. -**less,** *a.* असार, निःसार, फल्गु, निःसत्त्व, विरस. -y, *a.* ससार, सत्त्वपूर्ण, सरस, ससत्त्व, सारवत्, सारगर्भ. 2 सप्रभाव, तेजस्विन्, वीर्यवत्, ससत्त्व.

Pittance, *s.* स्तोकांशः, अत्यल्पभागः; अल्पमूल्यं-वेतनं, ग्रासाच्छादनमात्रं.

Pity, *s.* दया, अनुकंपा, करुणा, घृणा, कृपा, अनुक्रोशः; 'in p. to my passion' (रागजनितं) दुःखं मे निरवेक्ष्य (Mr. 5); 'what a p. it is' अहो नु कष्टमेतत्. -*v. t.* 'take p. on' दृय् 1 A (with gen.); अनुकंप् 1 A, दयां कृ 8 U (with loc.); प्रसद् 1 P. -**Piteous, Pitiable,** *a.* अनुकंप्य, करुणा-अनुकंपा-योग्य, दयाविषयः-भाजनं-पात्रं, करुण, दीन; 'in p. accents' करुणस्वनैः. 2 वराक (की *f.*), तपस्विन् (of persons). -ly, *adv.* करुणं, दीनं. -ness, *s.* अनुकंप्यता, कारुण्यं; दैन्यं. -**Pitiful, -Pitying,** *a.* करुणार्द्र, करुणामय (यी *f.*), करुणा-दया-शील, सदय, सानुकंप, दयालु, कृपालु; See **Kind;** 'a p. person' दयानिधिः-सागरः, दीनबंधुः-बत्सलः. 2 करुण, दीन, शोच्य 3 **Contemptible.** q. v. -ly, *adv.* सदयं, सानुकंपं, सकरुणं. -ness, *s.* दयालुता, कारुण्य, दयार्द्रता. -**Pitiless,** *a.* निर्दय, निरनुक्रोश, निर्घृण, निष्कृप, क्रूर, निष्ठुर, कठोर, अकरुण. -ly, *adv.* निर्दयं, क्रूरं निष्ठुरं.

Pivot, *s.* विवर्तनकीलः.

Placard, *s.* घोषणापत्रं. -*v. t.* घोषणापत्रेण प्रकाश् c.

Placate, *v. t.* **Appease,** q. v. -**Placable,** *a.* क्षमाशील; सांत्वनीय, आराध्य, प्रसाद्य.

Place, *s.* स्थानं, स्थलं, प्र-,देशः, स्थली, भू-भूमि *f.*, धिष्ण्यं. 2 पदं, आस्पदं, विषयः. 3 पदं, पदवि-वी *f.*, अधिकारः, नियोगः, अधिकारपदं; See **Office.** 4 अवकाशः, अवसरः, प्रसरः; 'p. of honour' संमानपदं, गौरवपदं; 'in one p.' एकत्र; 'in many p.s' बहुत्र; 'p. of residence' निवासस्थानं; वसति *f.*; 'p. for dancing' नृत्यशाला-स्थानं; 'out of p.' अस्थाने, अनुचितं; 'in the p. of a father' पितृस्थाने-भूमौ; 'p. for fear' भयस्थानं-कारणं-हेतुः; 'in one p.-in another p.' क्वचित्-क्वचित्, इतः-इतः, एकत्र-अन्यत्र; 'in the first p.' प्रथमं, प्रथमतः, प्रथमं तावत्; 'in the next p.' अपरंच, पुनः, पुनश्च; 'to give p.' स्थानं त्यज् 1 P, व्यप-सृप् 1 P, अप-सृ 1 P; 'to take p.' See **Happen, Occur.** -*v. t.* स्था c. (स्थापयति), धा 3 U, नि-आ°-, वि-,न्यस् 4 U, निक्षिप् 6 P, आनि-विश् c., अवरुह् c. (रोपयति), भू 10; oft. by कृ 8 U, दा 3 U, व्याप् c., (व्या-

पारयामास करं किरीटे R. VI. 19); 'p. over' अधिकृ, अधि-ष्ठा 1 P; 'p. in an office' पदे नियुज् 7 A, 10 or आरुह् c.

Placid, *s.* शांत, प्र-उप°-, प्रसन्न, निराकुल, अनुद्विग्न, जितक्रोध, असंभ्रम, शांतात्मन्, प्रसन्नाचित्त. **-ly,** *adv.* प्रसन्नं, शांत्या, शांतचेतसा, निराकुलं. **-ity, -ness,** *s.* शमः, शांति *f.*, प्रसादः, अक्रोधः, असंभ्रमः, अक्षोभः.

Plagiarism, *s.* शब्दचौर्यं, वाग्पहारः. **Plagiarist,** *s.* शब्द-ग्रंथ-चौरः.

Plague, *s.* मारी, महामारी, म(मा)रकः. 2 उत्पातः, अरिष्टं, अनर्थः, शल्यं, उपद्रवः, कंटकः, उपप्लवः; *See* **Pest.** *-v. t.* मार्या ग्रस् 1 A or आक्रम् 1 U, 4 P. 2 बाध् 1 A, पीड् 10, तप् c., दु 5 P; *See* **Harass. -ing,** *a.* बाधक, पीडक, क्लेशद, पीडाप्रद.

Plain, *s.* समभूमि *f.*-देशः-स्थलं-ली, समभूभागः; *See* **Level.** *-a.* सम, सपाट. 2 विनीत, निरलंकार, अभूषित, निर्भूषण. 3 स्पष्ट, व्यक्त, विशद, परि-स्फुट, सुबोध, स्पष्टार्थ, भिन्नार्थ, प्रकाश, प्रत्यक्ष, प्रकट. 4 केवल, मात्र in comp. 5 (Style) अनलंकृत, शुद्ध, अनलंकार, अव्यंजन. 6 (Food) उपस्कर-हीन-शून्य, असंस्कृत. 7 अमाय, दक्षिण, निष्कपट, निर्व्याज, सरल, कपट-माया-हीन, निर्व्यलीक, अकृत्रिम, ऋजु; *See* **Frank.** 8 सामान्य, साधारण (णी *f.*); मध्यमरूप, नातिसुंदर (री *f.*); 'a p. woman' 'one p. in person' सामान्यलावण्योपपन्ना, नातिसुभगा, अनतिसुंदरी; 'p. dealing' न्यायाचार, शुद्ध-सरल-मति, निर्व्यलीक, दक्षिण, अमाय, ऋजु; (*s.*) सारल्यं, निष्कापट्यं. *-v. t.* समीकृ 8 U. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, स्पष्टार्थं, सुबोधं, प्रकाशं, प्रकटं, प्रत्यक्षं. 2 निर्व्याजं, निर्व्यलीकं, अवक्रं, सारल्येन, अमायया, निष्कपटं. 3 विनीतं, अनलंकारं; 'p. dressed' विनीतवेष. **-ness,** *s.* समता, विनीतत्वं, भूषणाभावः, व्यक्तता, स्पष्टता, वैशद्यं, सुबोधता, प्रकाश्यं, अव्याजः, निर्व्याजता, अकापट्यं, सारल्यं, अमाया, आर्जवं, &c.

Plaint, *s.* प्रतिज्ञा, अभियोगः, °भाषापादः, भाषा, पूर्वपक्षः, पक्षः. 2 विलापः, विलपनं, परिदेवनं-ना, शोकः. **-Plaintiff,** *s.* अर्थिन् *m.*, वादी, अभियोगी, कार्यार्थी, अभियोक्तृ *m.*, सूचकः. **-Plaintive,** *a.* परिदेविन्, विलापिन्. 2 शोकावह, शोकार्थक, शोक-दुःख-गर्भ; करुण, दीन, सकरुण; 'in p. words' परिदेवितार्थाक्षरः. **-ly,** *adv.* करुणं, दीनं.

Plait, *s* भंगि-गी *f.*, भगः, ऊर्मि *f.*, पुटः, चूर्णः. 2 वेणि-णी *f.*, कचरी, धम्मिल्लः. *-v. t.* ग्रंथ् 9 P, व्या-वृत् c., पुटीकृ 8 U, संदे 1 P, वेणीकृ, वेणीरूपेण ग्रंथ्.

Plan, *s.* उपायः, प्रयोगः, प्र-,युक्ति *f.*, कल्पना. 2 सूत्रपातः, चित्रलेखनं; आलेख्यं, स्थूलवर्णनं. *-v. t.* प्र-सं-कल्पृ c., प्र-,युज् 10, चिंत् 10, मंत्र् 10 A, अनुसंधा 3 U, आलोच् 10, मनसा विचर् c. or वि-भू c. 2 आलिख् 6 P, सूत्रपातं कृ 8 U. **-ning,** *s.* उपाय-कल्पना-योजना.

Planch, *See* **Plank.**

Plane, *a.* सम, समस्थ. *-s.* समं, समक्षेत्रं, धरातलं. 2 तक्षणी, त्वक्षणी. *-v. t.* समीकृ 8 U. 2 तक्ष् 1, 5 P.

Planet, *s.* ग्रहः, ज्योतिस् *n.*; 'minor p.' उपग्रहः; 'passage of a p.' संक्रमः, संक्रांति *f.*; 'aspect of a p.' ग्रहदृशा; 'influence of a p.' ग्रहावेशः. **-ary,** *a.* ग्रह in comp.

Planish, *v. t.* समीकृ 8 U., तिज्c., प्र-मृज् c.

Plank, *s.* फलकः-कं; दारु-काष्ठ-फलकः. *-v. t.* फलकैः आस्तृ 9 U or आच्छद् 10.

Plant, *s.* ओषधि *f.*, लता; तरुः, वृक्षः. *-v. t.* (Seeds) आ-,रुह् c. 2 प्रति-,स्था c. (स्थापयति), वि-,न्यस् 4 U, निविश् c., नि-खन् 1 P, नि-धा 3 U, रुह् c. 3 अधि-, वस् c. **-ation,** *s.* रोपणं. 2 क्षेत्रं, in comp., वाटः-टी, वाटिका; शाकटं-शाकिनं in comp., वृक्षवाटिका; 'sugar-p.' इक्षुशाकटं-वाटिका. 3 **Colony,** q. v. **-er,** *s.* रोपयितृ *m.*, रोपकः. 2 वाटिकेश्वरः.

Plantain, *s.* कदली-लः, रंभा, वारणबुसा-षा, मोचा, अंशुमत्फला, काष्ठीला; 'p. fruit' कदलीफलं; मोचं; 'wild p.' काष्ठकदली.

Plantigrade, *a.* पादतलचारिन्.

Plash, *s.* आघातः, आस्फालनं. 2 क्षुद्रजलाशयः. *-v. i.* जले क्रीड् 1 P, जलं आस्फल् c. *-v. t.* अवच्छिद् 7 P, लू 9 U, कृत् 6 P. 2 संग्रंथ् 9 P. **-y,** *a.* जलार्द्र.

Plaster, *s.* लेपः, सुधा, चूर्णलेपः. 2 उपनाहः उपदेहः. *-v. t.* लिप् 6 P, वि-अनु-प्र-°, दिह् 2 U, उप-नह् 4 P. **-er,** *s.* लेपकः, पलगंडः. **-ing,** *s.* वि-प्र-लेपः-पनं.

Plastic, *a.* आकारद, कल्पक. 2 नम्य, सुखनम्य.

Plat, *s.* **Plot,** q. v. *-v. t.* **Weave,** q. v. 2 प्र-सं-कल्पृ c., चिंत् 10.

Plate, *s.* पात्रं, भाजनं. 2 कोशः-षः, हेमरूप्यं. 3 फलकः-कं, पत्रं; पट्टः-ट्टं, पट्टिका; 'copper p.' ताम्रपट्टः, ताम्रपत्रं; 'p.s of grant' शासन-नियम-पत्राणि. *-v. t.* रजतपत्रेण आवृ 5 U or आच्छद् 10; रजतेन अलंकृ 8 U. **-ed,** *a.* रजतपत्रावृत, रूप्यनिबद्ध.

Plateau, *s.* समस्थली, अधित्यका; *See* **Level.**

Platform, *s.* वेदि *f.*, वेदिका, उन्नतस्थानं.

Platoon, *s.* गुल्मः-ल्मं.

Platter, *s.* पात्रं, भाजनं.

Plaudit, *s.* प्रशंसा, धन्यवादः, जयघोषः.
Plausible, *a.* सत्याभास, सत्यसंकाश, वाह्यतः रमणीय.
Play, *v. i.* क्रीड् 1 P, रम् 1 A, चि-हु 1 P, विलस् 1 P, खेल् 1 P. **2** (At dice) दिव् 4 P, क्रीड्, ग्लह् 1 A; 'p. s at dice' अक्षैः -अक्षान्-दीव्यति. **3** वद् c. (instrument). **4** चेष्ट् 1 A, वृत् 1 A, चल् 1 P. —*v. t.* रूप् 10, नट् 10, अभिनी 1 P, ex. by denom.; 'p. s the king' नृपायते; 'p. s the woman' स्त्रीवाचरति. **2** प्र-,चल्-य् c., प्रवृत् c., प्रसृ c. **3** वि-धा 3 U, कृ 8 U, अनु-ष्ठा 1 P. —*s.* क्रीडा, खेला-लनं, लीला, केलि *f.*, विनोदः, विलासः, विहारः, कौतुकं, परिहासः; 'in p.' लीलया, परिहासेन. **2** नाटकं. **3** अक्षक्रीडा, द्यूतं, देवनं. **4** अभिनयः, गति *f.* 5 आचरणं, चेष्टितं; वृत्ति *f.*, व्यापारः, कृत्यं, चेष्टा; foul p.' दुश्चेष्टितं. **6** चलनं, सरणं. **7** प्रसरः, अवकाशः, अवसरः; 'p.-day' अनध्यायदिवसः-तिथिः, विश्रामदिवसः; 'p. house' नाटक-रंग-शाला; 'p.-thing' क्रीडनकं, क्रीडाद्रव्यं-वस्तु. **-er,** *s.* क्रीडकः; (at dice) अक्ष-,देविन् *m.*, अक्षक्रीडकः, अक्षद्यूतः. **2** नटः, कुशीलवः, नर्तकः, अभिनेतृ *m.* पात्रं. **-ful,** *a.* क्रीडासक्त,क्रीडापर-मग्न,केलि-क्रीडा-लीला-शील,लीला-खेला-पर, विलासिन्, विनोदिन्; (of things) सलील -क्रीडा-केलि in comp.; 'p. anger' प्रणयक्रीडा-कोपः, केलिकोपः. **-fully,** *adv* क्रीडापूर्वं, परिहासेन (jokingly); लीलया, सकौतुकं, सविलासं, सखेलं. **-fulness,** *s.* क्रीडासक्ति *f.*, लीलापरता, सलीलत्वं, क्रीडाशीलता.
Plea, *s.* कारणोत्तरं, उत्तरं, उत्तरपादः. **2** व्यपदेशः, छद्मन् *n.*, अपदेशः, निमित्तं, कारणं, मोचनहेतुः. **3** वादः, व्यवहारः, कार्यं. **4** प्रार्थना; 'raising a p.' स्वजीकरणं. **-Plead,** *v.* उत्तरं दा 3 U or प्रतिपद् 4 A or वद् 1 P, निमित्तं दृश् c., वि-,अप-दिश् 6 P; 'p. guilty' अपराधी अस्मीति वद् or प्रतिपद्; 'tears shall p. in vain' अश्रुपातो निर्गुणो भवेत्. **2** विनयेन प्रार्थ् or अभ्यर्थ् 10 A, सविनयं याच् 1 A; 'p. ed for his life' जीवितदानार्थं प्रार्थयामास. **3** उप-क्षिप् 6 P, उपन्यस् 4 U, व्यपदेशार्थं पुरः क्षिप्. 4 (Cause) प्रति-पद् c., परार्थं उत्तरं वद्, परपक्षं समर्थ्; 'p. ing headache as an excuse' शिरःशूलस्पर्शं व्यपदिशन्; 'p. ing illness' अस्वास्थ्यव्यपदेशेन. **-er,** *s.* अभिभाषकः, उत्तरवादिन् *m.* समर्थकः, हेतुवादिन् *m.* **-ing,** *s.* हेतु-उत्तर-वादः, व्यपदेशनं, हेतूपन्यासः.
Please, *v. t.* प्री 9 P, 10 (प्रीणयति), तृप् c., सं-परि-, रम् c. (रमयति), प्रमुद् c., सुखयति (D.), आ-नंद् c., सं-,तुष् c., प्रसद् c., आह्लाद् c., हृष् c., आराध् c., अनुरंज् c.; oft. by इच्छा, प्रसादः, कृपा; विषमप्यसूतं क्वचिद्भवेदसूतं वा विधिमीश्वरेच्छया (R. VIII. 46) 'if it p. God to do so' &c.; 'he was p. ed to accept my presents' ममोपायनानि स सुप्रीतमनसा-सुप्रसन्नं-स्वीचकार; 'may it p. your ladyship' प्रसीदतु भट्टिनी (M. 4). **2** (Like) *See* below. —*v. i.* 'to be p. ed' तुष् 4 P, तृप् 4 P; रम्-सुद् 1 A, नंद् 1 P. **2** अर्ह् 1 P or प्रभ 1 P, with inf., or simply by Imperative; 'p. sit here' अत्रोपविशत्वार्यः; 'worthy Sir, p. to wait for 2 or 3 days' द्वित्राण्यहान्यर्हसि सोढुमर्हन् (R. v. 25) **3** रुच् 1 A, इष् 6 P; *See* **Like;** 'just as my friend p. s' यदभिरोचते वयस्याय; 'do as you p.' यथाभिलषितं क्रियतां. **-ance,** *s.* क्रीडोद्यान. **-ant,** *a.* सुखकर (री *f.*), मधुर, सुखद्-पद, सुखावह, रम्य, रमणीय, प्रिय, मनोहर-रम, अभिराम, सुभग, अभिमत, सुख, काम्य, कांत, हर्षावह, रुचिर, हृद्य, हृदयंगम, प्रीति-तुष्टि-कर, मनोज्ञ, मंजुल, चारु; 'a p. joke' हृदयंगमः परिहासः (Mal. 3). **-antly,** *adv.* सुखं, रम्यं, मधुरं, प्रियं, रुचिरं. **-antry,** *s.* परि(री)हासः, नर्मभाषितं, विनोदः, नर्मालापः, विनोद-नर्म-उक्ति *f.* **-ing,** *a.* सुख in comp.; रम्य, कांत; *See* **Pleasant,** 'p to the ear' सुखश्रव, श्रुतिसुख, मंजुल-स्वन, सुश्राव्य; 'p. to the eye' प्रेक्षणीय, नयनाभिराम, सुदृश्य; 'p. language' चादु *m. n.*, चाटूक्तिः. **-ingly,** *adv.* सुभगं, सुखं, सुख-चारु in comp. **-Pleasure,** *s.* सुखं, सं-परि-तोषः, आनंदः, प्रीति *f.*, सौख्यं, तुष्टि *f.*, प्र-, मोदः, आह्लादः, हर्षः, मुदा. **2** अभि-, रुचि *f.*, इच्छा, अभिलाषः, छंदः-दस् *n.*, कामः; 'at one's p.' स्वेच्छया, कामतः, यथाकामं, यदृच्छया, स्वैरं; 'wandering at p.' कामचारिन्, स्वच्छंद-गामिन्; 'sensual p.' भोगः, विषयसुखं, विषयानुरागः; 'sexual p.' रति *f.*, रति-सुखं, सु-,रतं; 'p.-boat' केलि-क्रीडा-नौका; 'p.-ground' आरामः, क्रीडा-केलि-विलास-वनं-काननं, प्रमदवनं, क्रीडोद्यानं; 'p.-mansion' केलिगृहं-भवनं, लीलागारं, विलासमंदिरं. **3** प्रसादः, अनुग्रहः. **-able,** *a.* रम्य, रमणीय, सुखद, सुख, *See* **Pleasant. -ist,** *s.* विषयिन् *m.*, विषयासक्तः, भोगासक्तः, भोगपरायणः.
Plebian, *a.* प्राकृत (ती *f.*), सामान्य, साधारण (णी *f.*), अवरवर्ण, अकुलीन. —*s.* प्राकृतः, प्राकृतजनः, पृथग्जनः; नीच-अवर-जनः.
Plectrum, *s.* कोणः, शारिका.

Pledge, *s.* न्यासः, निक्षेपः, आधिः, उपनिधिः, उपन्यासः-निक्षेपः, पणः. **2** अभिज्ञानं; ' p. of love ' प्रीत्यभिज्ञानं. **3** प्रतिज्ञा, क्षणः, परिपणः-णनं; 'I have given a p.' विहित-प्रतिज्ञः-गृहीतक्षणः-अहं. **4** प्रतिभूः, लग्नकः, बंधकः. **-v.** *i.* न्यस् 4 U, निक्षिप् 6 P, आ-नि-धा 3U, परि-,पण् 1 A, आधी-न्यासी-कृ 8 U. **2** (One's word) प्रति-श्रु 5 P, प्रति-ज्ञा 9 A, (with dat. of person), उरीकृ, वचनेन बंध् 9 P; ex. by (*s.*); अस्मत्सौदामिनीसमक्षमनयोर्वृत्तेयं प्रतिज्ञा (Mal. 1) ' they two p. ed their word' &c.; ' he has p. ed his virtue (honor) that he would not harm you ' तव विरूपकरणे तेन सुकृतमंतरे धृतं (P. iv. 1); ' he who has p. ed his word ' कृत-विहित-प्रतिज्ञः, प्रतिज्ञा-वचन-बद्धः, दत्तवचनः-प्रतिज्ञः, गृहीतक्षणः.

Pledget, *s.* पट्टः, आवेष्टनं.

Pleiades, *s.* कृत्तिकाः.

Plenary, *a.* सं-परि-पूर्ण, समग्र.

Plenipotent, *a.* पूर्णशक्तियुक्त. **-Plenipotence,** *s.* पूर्णसामर्थ्यं शक्ति *f.* **Plenipotentiary,** *s.* पूर्णशक्तियुक्तः, महादूतः.

Plenish, *v. t.* उपस्कृ 8 U, परि-छद् 10.

Plenist, *s.* पूर्णतावादिन् *m.*

Plenitude, *s.* पूर्णता, प्राचुर्यं, वैपुल्यं, समृद्धि *f.*, अतिरेकः, उत्सेकः, परा कोटिः-काष्ठा.

Plenty, *s.* बाहुल्यं, प्राचुर्यं, वैपुल्यं, बहुत्वं, समृद्धि *f.*, उद्रेकः, अतिरेकः, उत्सेकः, स्फीति-वृद्धि- *f.* **-Plenteous, Plentiful,** *a.* प्रभूत, प्रचुर, विपुल, बहु, बहुल, भूरि, भूयिष्ठ, पुष्कल, समृद्ध, सं-परि-पूर्ण, उद्रिक्त, स्फीत, उत्सिक्त, उपचित. **-ly,** *adv.* बाहुल्येन, बहुशः, भूयिष्ठं, भूरि, प्रभूतं, विपुलं, अतिरिक्तं. **-ness,** *s.* बाहुल्यं, प्राचुर्यं; *See* (*s.*).

Pleonasm, *s.* अधिकपददोषः; शब्दाधिक्यं, शब्दातिशयः. **-Pleonastic,** *a.* अधिकशब्द, बहुपद.

Plethora, *s.* रक्तपित्तं. **2** बाहुल्यं, प्राचुर्यं, अतिवृद्धि *f.* **-Plethoric,** *a.* रक्तपित्तरोगिन्.

Pleurisy, पार्श्वशूलं.

Plexus, *s.* नाडी-शिरा-जालं.

Pliant, Pliable, *a.* आ-,नम्य, सुखनम्य, मृदु, शिथिल, अदृढ, आयम्य.

Pliers, *s.* *See* ' **Pincers.**'

Plight, *s.* दशा, अवस्था, स्थिति *f.*, भावः, वृत्ति *f.*, गति *f.*; ' sorry p.' दुर्दशा, दुर्गतिः. **2 Pledge.** q. v. **-v.** *t.* प्रति-ज्ञा 9 A, न्यस् 4 U; *See* **Pledge. -ed,** *a.* प्रतिज्ञात, न्यस्त; ' p. word ' विहितप्रतिज्ञा, संगरः, अभिसंधिः.

Plinth, *s.* स्तंभमूलं-तलं; प्राकारमूलं.

Plod, *v. i.* अविरतं श्रम् 4 P or आयासं कृ 8 U, मंदं मंदं आयस् 1, 4 P. **-der,** *s.* मंदं मंदं निरंतरायासिन् *m.*, नित्योद्योगिन्, *m.* पिपीलिकाधार्मिन् *m.* **-ding,** *s.* अतिमांद्येन निरंतरश्रमः-नित्यायासः.

Plot, *s.* भू-भागः-प्रदेशः, क्षेत्रं, स्थलं-ली, भू-भूमि- *f.* **2** कपटप्रबंधः, कूटप्रबंधः, कपटोपायः, मंत्रणा, कुं-संकल्पः-मंत्रणा-कल्पना, कूटोपायः, उपजापः; (generally) उपायः, सकल्पः, प्रयोगः. **3** कथा, वस्तु *n.*; ' arrangement of p. ' वस्तुरचना-विन्यासः; ' the p. of which is composed by Kālidāsa ' कालिदासग्रथितवस्तु नाटकं (S. 1.) **-v.** *i.* कपटप्रबंधान् चिंत् 10 or युज् 10, उपायान् कल्प् c. or निरूप् 10 or अनुसं-धा 3 U; ' p. against ' द्रुह् 4 P (with dat.), अभिद्रुह् (with acc.); ' p. against one 's life ' जीवितापहरणाय कपटप्रबंधान्रचयंति. **-ter,** *s.* कुमंत्रणाकृत् *m.*, अभिद्रोग्धृ *m.*

Plough, *s.* हलं, लांगलं, सी(शी)रः, हालः, गोदारणं; 'body of a p.' निसीर्श-र्षं; कुदकं, फालः, कृषकः; 'pole of a p.' ईषा-शा, (लांगलीषा), लागलदंडः; 'handle of a p.' ईषा-दंडः; ' furrow made by a p. ' सीता, लांगलपद्धति *f.*; ' p.-boy ' बालकर्षकः; ' p.-gear ' हलसज्जा-उपकरणं; ' p.-land ' सीत्यं, हल्यं, फालकृष्टं, हल्यक्षेत्रं; ' p.-man' हालिकः, लांगलिन् *m.*, हलिन् *m.* लांगलिकः, सैरिकः, हलधरः-भृत् *m.* कृषकः, कर्षकः; ' p.-share ' कुशी, फालः, कृषकः. **-v.** *t.* कृष् 1 P, 6 U, भिद् 7 P, विद् 9 P or c., उत्कृ 1 P, (सद्यः सीरोत्कर्षणसुरभि Me. 16). **-v.** *i.* हलं वह् c. or चल् c. **-ed,** *a.* कृष्ट, हल्य, सीत्य; ' twice, thrice, p. ' द्वि-त्रि-हल्य; ' p. after sowing ' बीजाकृत, उप्तकृष्ट. **-er,** *s.* कर्षकः, हालिकः. **-ing,** *s.* कर्षणं, उत्कर्षणं, भूमिदारणं.

Pluck, *v. t.* (Off) लू 9 U, निष्कृष् 1 P; ' crows with feathers p. ed off ' लूनपक्षाः काकाः; (out) उत्पट् 10, सं-,उद्ध 1 P, निर्हृ; (hair) लुंच् 1 P, अव-उत्-°, उत्पट् c.; (up) उन्मूल् 10, उत्-खन् 1 P, उच्छिद् 7 P, उत्पट्, उद्धृ, कृष्. **2** (Gather) चि 5 U, अव-सं-°,लू, छिद्, आ-दा 3 A, ग्रह् 9 U. **-s.** सत्त्वं, वीर्यं, पौरुषं, उत्साहः; *See* **Courage. -ing,** *s.* उत्पाटनं, उद्धरणं, उल्लुंचनं, अव-,चयः.

Plug, *s.* रोधनी, स्तंभनी. **-v.** *t.* पि-धा 3 U, स्तंभ् 9 P.

Plum, *a.* कर्कंधूः,-फलं; *See* **Jujube.**

Plumage, *s.* पक्षाः (pl.), पिच्छकलापः, बर्हभारः, पक्षः, पर्णं, पतत्रं, गरुत् *n.*

Plumb, *s.* लंबः,-सूत्रं. **-***a.* लंब, ऋजु, लंबरूप. **-v.** *t.* सूत्रेण समायुज् 7 U, 10. **2** वेर्ध परि-मा 3 A, 2 P. **-er,** *s.* सीसकारः.

Plume, *s.* पक्षः, पर्णं, पिच्छं; *See* **Feather.** **2** शिखा, चूडा, शेखरः. **-***v. t.* पर्णानि रच् 10. **2** पक्षान् निर्हृ 1 P or उत्पद् 10. **3** (Oneself upon) आत्मानं श्लाघ् 1 A, विकत्थ् 1 A; 'p. s himself upon his learning' ज्ञानेन आत्मानं अतीव श्लाघते-विकत्थते, पांडितंमन्यः, पांडितमानी. **-less,** *a.* पक्षहीन. **-ous, -ose, -y, Plumigerous,** *a.* सपक्ष, पक्षवत्, पक्षविशिष्ट.

Plummet, *s.* लंबः, लंबसूत्रं, लंबसीसकं, सीसकसूत्रं.

Plump, *a.* पीन, पीवर, पुष्ट, स्थूल, उच्चून, आप्यान, स्फीत; *See* **Fat.** -*adv.* अकस्मात्. -*v. t.* आप्यै c., श्वि c., स्फायू c. (स्फावयति). **-ly,** *adv.* व्यक्तं, स्पष्टं. **-ness,** *s.* पीनता, पुष्टि *f.*, स्फीति *f.*

Plunder, *v. t.* (धनादि), अप-, हृ 1 P, मुष् 9 P, चुर् 10, वि-, लुंठ्-द् 1 P, 10. **-***s.* विलुंठनं, लोत्रं, लोप्त्रं, अपहारः, अपहृतं धनं. **-er,** *s.* अपहारकः, विलुंठकः, मोषकः. **-ing,** *s.* अपहारः, अपहरणं, मोषणं.

Plunge, *v. i.* मस्ज् 6 P, नि-अव-°, आप्लु 1 A, गाह् 1 A, वि-अव-°, प्रविश् 6 P. -*v. t.* Causal of roots above. -*s.* अवगाहः-हनं, नि-, मज्जनं, आप्लवः, प्रवेशः. **-ed,** *a.* मग्न, अवगाढ, आप्लुत, लीन, प्र-नि-विष्ट.

Plungeon, *s.* प्लवः, प्लाविन् *m.*

Plural, *a.* (Number) बहुवचनं. **2** अनेक, बहु. **-ity,** *s.* बहुत्वं, अनेकता; ex. by 'Many' q. v.

Plus, *s.* धनं; सहित, संकलित in comp.

Pluto, *s.* यमः, कालः, कृतांतः.

Plutocracy, *s.* धनवत्सत्तात्मकं राज्यं. **-Plutocrat,** *s.* धनवत्-सत्तावत् *m.* -शासितृ *m.*

Pluvial, Pluvious, *a.* वृष्टिमत्, प्रचुर-बहु-वृष्टि.

Ply, *v. t.* पत् c., धा 3 U, न्यस् 4 U, प्रयुज् 7 A, 10; पुनः पुनः प्रयुज् or व्याप् c., सततं व्याप् c.; 'p.-thy work' कार्यव्यापृतो भव, कार्यं निर्वाहय; 'p. thy needle' सूच्या कार्यं प्रवर्तस्व. **2** (प्रयत्नेन) चल् c., संचर्-चल् c. **3** आग्रहेण उप-स्था 1 U, अनुनिर्बंध् 9 P; *See* **Importune;** 'p. with entreaties' अतिप्रार्थनया उद्विज् c. -*v. i.* अविरतं व्याप् 6 A or प्रवृत् 1 A or उद्यम् 1 A or चेष्ट् 1 A. -*s.* पुटः, भंगः; *See* **Fold.**

Pneumatic, *a.* वायुरूप, वायुमय (यी *f.*), वायव (वी *f.*), वायु in comp. -*s.* (P. s) वायुविद्या-शास्त्रं.

Pneumonia, *s.* क्लोमपाकः.

Poach, *v. t.* ईषत् पच् 1 P. **2** (Game) कूटोपायेन ग्रह् 9 U or अपह् 1 P or चुर् 10. **3** ग्रहणार्थं अनुसृ 1 P or अनुगम् 1 P; *See* **Pursue.** **-er,** *s.* मृगयाचौरः, जांगलचौरः. **-ing,** *s.* मृगया-जांगल-चौर्यं, पक्षिग्रहणं.

Pock, *s.* *See* **Pimple.** **-mark,** *s.* मसूरिकाक्षतं-चिन्हं.

Pocket, *s.* कोषः, आधारः. -*v. t.* कोषे नि-धा 3 U, (छलेन) आत्मसात्कृ 8 U. **2** (Insult) सह् 1 A; *See* **Bear.** **-ed,** *a.* कोषगुप्त, कोषांतर्गत, अंतर्हित.

Pod, *s.* बीजकोशः-शुक्ति *f.*, शिंबा, शिंबि-बी *f.*, शिंबिका.

Podagrical, *a.* वातकिन्, वातरोगिन्.

Poet, *s.* कविः, सूरिः; 'a ready p.' शीघ्र-कविः. **-ic, -ical,** *a.* Ex. by कविता-काव्य in comp.; 'p. genius' कवित्वशक्तिः. **2** श्लोक-कविता-रूप-बद्ध, पद्यमय (यी *f.*), छंदोबद्ध-रूप, पद्यात्मक; 'p. work' पद्यात्मको ग्रंथः. **-ically,** *adv.* पद्यरूपेण, छंदोरूपेण. **-Poetics,** *s.* काव्यशास्त्रं, पद्यशास्त्रं; साहित्यं. **-Poetry,** *s.* काव्यं, कविता. **2** पद्यं (opp. of prose). **3** काव्यरचना, कवित्वं, कविताविद्या. **-Poetaster,** *s.* कुकविः, कविदेश्यः. **-Poem,** *s.* काव्यं, काव्यप्रबंधः, काव्यबंधः, कविता; 'a p. interspersed with prose' खंडकाव्यं. **-Poesy,** कवित्वं-त्ता. **2** काव्यरचना, कविताशक्तिः *f.*

Poignant, *a.* उग्र, तीक्ष्ण, तीव्र, तिग्म, अर्दितुद, मर्मस्पृश्-भिद्. **-Poignancy,** *s.* तीक्ष्णता, तीव्रता.

Point, *s.* अग्रं, आणिः-णी *f.*, धारा, कोटिः *f.*, अग्रिः *f.*, पालि-ली *f.*; शिखा, शिखरं. **2** (Of land) उदग्रस्थलं, भूनासिका. **3** मर्मन् *n.*, रहस्यं, रसः. **4** दिश्-शा, ककुभ्, आशा, हरित्, काष्ठा, (all *f.*). **5** बिंदुः, चिह्नं, अंकः. **6** आशयः, अभिप्रायः, उद्देशः, अर्थः, लक्ष्यं. **7** पर्यंतः, अंतः; अवधिः, परिमाणं. **8** विषयः, पदं, वस्तु *n.*, अर्थः, स्थानं, स्थलं, आस्पदं, प्रकरणं, प्रस्तावः; 'p. at issue' विवादवस्तु-विषयः. **9** लक्षणं, विशेषचिह्नं, विशेषणं, विशिष्टगुणः. **10** प्रसंगः, कालः, समयः; 'being to the p.' प्रास्ताविक (की *f.*), प्रकृत, प्रस्तुत; 'to such a p.' एतावत्, एतावत्पर्यंतं; 'come to the p.' प्रस्तुतमनुसंधीयतां; 'on the p. of' ex. by उन्मुख (खी *f.*), उद्युक्त, उद्यत, by desid. or by fut. part., आसन्न in comp.; 'on the p. of death' मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु; 'on the p. of departing' निर्गंतुमुद्यत, निर्जिगमिषु; 'on the p. of delivery' प्रसवोन्मुखी, आसन्नप्रसवा; 'gain a p.' अभीष्टं साध् 5 P; 'p. of view' दृष्टि *f.*; *See* under **View.** -*v.* नि-शो 4 P; तिज् c., तीक्ष्णीकृ 8 U. **2** उद्दिश् 6 P, सं-धा 3 U, लक्षीकृ, अभि-प्रेष् c.; 'p. ing to it' तदुद्दिश्य, तदधिकृत्य. **3** (Out) प्र-उप-आ-

दिश् (as a way); (at) अंगुल्या निर्दिश् or आ-रुह्या 2 P, (मार्गमंगुलीदलाविलासेनारुह्यातदत्यः Mal 1); 'p. ing towards the north' उदङ्मुख, उत्तराभिमुख; 'p. blank' स्पष्ट, असंदिग्ध. **-ed,** *a.* नि-,शित, तीक्ष्णाग्र, साग्र, मधार; oft. by सूचि *f.*; 'pricked by the p. Kusa grass' कुशसूचिविद्धे (S. 4); *See* **Sharp.** **2** मार्मिक (की *f.*), अरुंतुद्, मर्मस्पृश्-भिद्; सरस, रसिक, रसपूर्ण.**3**निर्दिष्ट, सूचित &c. **-edly,** *adv.* उद्दिश्य, उद्देशपूर्वं, मर्मभेदपूर्वं, स्पष्टं, भिन्नार्थं. **-er.** *s.* निद्-प्र-,देशकः, प्र-,दर्शकः, सूचकः. **2** (Of a dial) प्रदेश(शि)नी. **-ing,** *s.* निर्देशः, सूचनं, अंगुलिनिर्देशः. **-less,** *a.* धाराहीन, अनिशित, अतीक्ष्ण, निरग्र. **2** रसहीन, अरसिक, फल्गु. **3** अप्रकृत, अप्रस्तुत.

Poise, *v. t.* तुल् 10, तुल्यी-समीकृ 8 U, समभारीकृ. **-***s.* भारः, तोलः. **2** भारतुल्यता-साम्यं, समभारता, समतोलः, तुल्यता.

Poison, *s.* विषः-षं, गरलं, क्ष्वेडः, जांगुलं; administering p. ' विषप्रयोगः-दानं; curing p. ' विषघ्न (घ्नी *f.*), विषापह, विषहर (रि *f.*); ' curer of p. ' विषवैद्यः, जांगुलिकः. **-***v. t.* विषेण दिह् 2 U or अंज् 7 P or सिञ्च् 10. **2** विषं दा 3 U, विषदानेन हन् 2 P or मृ c. or नशूं c.; (oneself) विषं भक्ष् 10 or सेव् 1 A or भुज् 7 A. **3** कलुषीकृ 8 U, दुष् c. (दूषयति). **-ed,** *a.* विषाक्त, विषदिग्ध, विषलिप्त; ' p. arrow ' विषाक्तः, दिग्धः, लिप्तकः. **2** विषनाशित. **-er,** *s.* विषघातिन् *m.*, विषदायिन् *m.* **-ous,** *a.* विषमय (यी *f.*), सविष, विषालु, सगर, विषपूर्ण, गरविशिष्ट, विष in comp.

Poke, *v. t.* (Fire) चल् c., उत्तिज्ञ् c. **2** तङ् 10, आहन् 2 U; प्रह् 1 P. **3** (दंडादिना) परामृश् 6 P, अन्विष् 4 P. **-***v. i.* **Grope,** q.v **-***s.* ताडनं, प्रहारः, आघातः. **-er,** *s.* उत्तेजनी (शलका); अंगारोत्थापकः.

Pole, *s.* यष्टि *f.*, दंडः, काष्ठं; 'raised on a p.' उद्दंड. **2** (Of a carriage) धुर् *f.*, धुरा; कूबरः, युगंधरः. **3** दंडः. **4** ध्रुवः-वकः; ' p.-axe ' परशुः, कुठारः, परश्वधः; ' p.-cat ' गंधमार्जारः; 'p.-star ' ध्रुवः, उत्तानपादजः, नक्षत्रनेमिः, ज्योतीरथः; ध्रुवतारा. **-Polar,** *a.* ध्रुव in comp.; ' p. longitude ' ध्रुवः. **-ity,** *s.* ध्रुवाभिमुखता,ध्रुवाभिसारिता. **-y,** *a.* ध्रुवानिसरिन्, ध्रुवाभिगामिन्.

Polemics, *s.* वादानुवादः. **-Polemic,-al,** *a.* विवादात्मक, वादानुवादार्थक, वादकुशल. **-***s.* विवादकुशलः, वादानुवादशीलः.

Police, *s.* रक्षापुरुषाः; नगररक्षिणः, नगरपालाः (all pl.), रक्षिगणः-दंडः; 'rural p.' ग्रामरक्षिणः, ग्रामपालाः; 'p.-man', 'p. officer' नगरराक्षिन् *m.* नागरिकः, राक्षिन् *m.* राजपुरुषः; ' p. magistrate ' दंडाधिकारिन् *m.*

Policy, *s.* नीति *f.*, नयः; नीतिक्रमः-मार्गः. राजनीतिः-नयः, राज्यशासनरीतिः-मार्गः. **2** नीतिचातुर्यं, वैदग्ध्यं, राज्यशासनकौशलं, नीतिज्ञता. **3** युक्ति *f.*, प्रयोगः, उपायः, व्यवहारः, रीतिः; ' prudential p. ' समीक्षा, समीक्ष्यकारित्वं; ' bad p. ' कुप्रयोगः, कुयुक्तिः. **4** (a written contract) नियमपत्रं, समयलेखः. **-Politic,** *a.* नीतिज्ञ, नीतिविद्-कुशल, नयविद्-ज्ञ, नीतिचतुर-निपुण. **2** व्यवहारकुशल-दक्ष, विचक्षण, कुशल, चतुर, निपुण. **3** सुप्रयुक्त, सुघटित, सुनीत, समीक्ष्यकृत, हित, सु pr. **-al,** *a.* नीति-राज in comp.; ' p. affairs ' राजकार्याणि; ' p. science ' राजनीतिशास्त्रं; ' p. economy ' अर्थशास्त्रं, अर्थविज्ञानं; ' he led a p. life ' राजकार्यव्यापृतो जीवितमत्यवाहयत्; ' p. institutions ' राज्यतंत्राणि; ' p. rights ' राज्यनिर्वाहाधिकाराः. **-ian,** *s.* नीतिज्ञः, नीतिविद् *m.* -कुशलः, नयज्ञः-विद् *m.*, राजनीतिनिपुणः, राजकार्यधुरंधरः. **-Politics,** *s.* नीतिः, नयः, राजनीतिः, राज्यशासनशास्त्रं. **2** राजकार्याणि, राज्यव्यवहाराः. **-Polity,** *s.* राजनीतिः-रीतिः-व्यवस्था, दंडनीतिः; (generally) नीतिः, व्यवस्था, विधिः.

Polish, *v. t* तिज् c., धाव् 10, निः-तप् c., प्र-,मृज् 2 P or c., परिष्कृ 8 U, श्लक्ष्णीकृ, कांतिं दा 3 U. **2** परिष्कृ, वि-नी 1 P, उपस्कृ 8 U, संस्कृ (lit. also); आदर्शं निघर्षणक्रियया संस्क्रियमाणे (S. B. 72). **-***s.* कांति *f.*, शोभा, तेजत् *n.*, स्निग्धता, श्लक्ष्णता. **2** संस्कारः, परिष्कारः, सभ्यता, शिष्टता, सौजन्यं. **-ed,** *a.* निष्टप्त, परिष्कृत, प्रमृष्ट, निर्धौत, उत्तेजित. **2** शिष्ट, संस्कृत, सभ्य, परिष्कृत, विनीत, अग्राम्य. **-er,** *s.* तेजकः, कांतिदः, मार्जकः, परिष्कारकः; *See* **Furbisher.**

Polite, *a.* दक्षिण, सौजन्यवत्, सुजन, विनीत, शिष्ट, सभ्य, संस्कृत, सभ्यशील, शिष्टाचार, सुशील, आदरशील, प्रियंवद. **-ly,** *adv.* सौजन्येन, दाक्षिण्येन, सविनयं, शिष्टवत्. **-ness,** *s.* शिष्टता, सभ्यता, सौजन्यं, विनयः, दाक्षिण्यं, सुशीलता **2** शिष्टाचारः, सुशीलवृत्ति *f.*

Poll, *s.* शीर्षं, शिरस् *n.*; *See* **Head.** **2** नामावलि-ली *f.*; नामालिखनं, नामारोपणं. **-***v. t.* (केशान्) लू 9 U, छिद् 7 P, आवप् 1 P. **2** नामानि लिख् 6 P or निविश् c.

Pollard, *s.* लूनाग्रवृक्षः.

Pollen, *s.* रेणुः, परागः, रजस् *n.*, पांशुः, पुष्परजः-परागः.

Pollute, *v. t.* कलंकयति-मलिनयति-कलुषयति-(D.), दुष् c (दूषयति), मलिनी-कलुषी-कृ 8 U, मलेन लिप् 6 P or दिह् 2 U. **2** भ्रंश् c., दुष् c., आधृष् c., सतीत्वं भ्रंश् c.

or नश् c. -er, s. दूषकः, आधर्षकः. -ion, s. दूषणं, कलुषीकरणं. 2 मालिन्यं, अमेध्यता, कालुष्यं, मलं, कलंकः, अशौचं. 3 Emission, q. v.

Poltroon, s. *See* Coward.

Polyandry, s. अनेकभर्तृकता. -ist, s. अनेकपतिका, बहुभर्तृका.

Polychrome, a. बहुवर्ण.

Polygamy, s. अनेकपत्नीकता, बहुभार्यत्वं. -ist, s. बहु-अनेक-भार्यः. 2 बहुपत्नीवादिन् m.

Polygenous, a. बहु-विध-प्रकार-जाति.

Polyglot, a. बहुभाषामयं (यी f.).

Polygon, n. बहुभुजः, बह्वस्रं. -al, a. बहुकोण-भुज-अस्र

Polymathy, s. बहुशास्त्रज्ञानं.

Polypetalous, a. बहु-अनेक-पर्ण.

Polyphonous, a. बहुस्वर-स्वन.

Polypus, s. अनेकपादः, बहुमूलः.

Polysyllabic, a. बह्वक्षर, अनेकाच्. [शाला.

Polytechnic, s. बहुकला-बहुव्यवसाय-पाठ-

Polytheist, s. अनेकदेववादिन् m. -Polytheism, s. बहुदेववादः.

Pomade, Pomatum, s. *See* Perfume.

Pomegranate, s. (Fruit) दाडि(लि)मं, दाडिमफलं; (tree) दाडि(लि)मः, डालिमः, दार्डिबः, करकः.

Pommel, s. गुल्मः, पिंडः, गंडः. -v. t. तड् 10, प्रह् 1 P.

Pomp, s. आडंबरः, शोभा, श्रीः, प्रतापः, ऐश्वर्यं, वैभवं. -ous, a. विभ्राजमान, शोभन, सश्रीक, साडंबर, अतिशोभन, महाप्रताप. 2 दांभिक (की f.), साटोप, गर्वित, दर्पाध्मात; (style) सालंकार, अलंकृत. -ously, adv. साडंबरं, अतिशोभया, अतिप्रतापेन. 2 सदंभं, साटोपं, सगर्वं. -ousness, s. ऐश्वर्यं, &c. 2 दंभः, आटोपः.

Pond, s. तडागः-गं, जलाशयः, कासारः, जलाधारः, पद्माकरः, सरसी, सरस् n.; 'deep p.' ह्रदः; 'small p.' पल्वलः-लं, वेशंतः, अल्पसरः; (for drinking water) आहावः, निपानं.

Ponder, v. चिंत् 10, ध्यै 1 P, विचर् c., विमृश् 6 P, मनसा कल्पय् c. or भू c. or विगण् 10; *See* Meditate.

Ponderous, a. अतिगुरु, भारवत्, अतिभारिन्, सभार. -ly, adv. अतिभारेण. -Ponderosity, s. भारवत्त्वं, अतिगुरुता.

Poniard, s. कृपाणिका, छुरिका, असिपुत्रिका, असिधेनुका.

Pontage, s. सेतुसंधानशुल्कं.

Pontiff, s. प्रधानधर्माध्यक्षः, मुख्यपुरोहितः. -Pontificate, s. धर्माध्यक्षाधिकारः.

Pony, s. अश्वशावः, क्षुद्रघोटकः.

Pool, s. जलाशयः, जलाधारः, कुंडं, पल्वलं. निपानं; *See* Pond.

Poop, s. नौपृष्ठं, नौपश्चाद्भागः.

Poor, a. दरिद्र, निर्धन, निःस्व, दीन, अधन, अकिंचन, धन-द्रव्य-अर्थ-हीन, अल्प-धन-विभव, दुर्गत, परिक्षीण, क्षीणधन; 'to be p.' दरिद्रा 2 P. 2 दीन, तपस्विन्, वराक (की f.), कृपण, अनुकंप्य. 3 कुत्सित, अपकृष्ट, तृणप्राय, तुच्छ, गर्हित, अधम, विगुण; oft. ex. by कु, कद्, दुर्, अप, in comp.; 'p. food' कदन्नं; *See* Bad, Mean; 'p. soil' निर्गुणा-असारा-भूमिः, ईरिणा-रूक्षा-भूमिः; 'p. house', 'p. asylum' दरिद्रालयः, अनाथालयः, दरिद्रगृहं; 'p.-spirited' दीन-कृपण-बुद्धि, कृपण, अल्पसत्त्व, क्षुद्रमति. -ly, adv. दरिद्रवत्, दीनं, निर्धनवत्; 'p.-dressed' दीनवेषं दधान. 2 निष्फलं, व्यर्थं, सिद्धिं विना. -ness, Poverty, s. दारिद्र्यं, दैन्यं, निर्धनता, निःस्वता. दुर्गतिं f., दरिद्रदशा-अवस्था, अकिंचनत्वं; 'reduced to p.' नष्ट or गत-विभव or धन, दुर्गत; *See* (a.); 'struck with p.' दारिद्र्योपहत, दारिद्र्यग्रस्त.

Pop, s. आकस्मिकध्वनिः-शब्दः. -v. i. अकस्मात् प्रविश् 6 P. 2 सहसा निर्गम् or निःसृ 1 P. 3 सहसा क्वण्-स्वन् 1 P. -v. t Causal of roots above.

Popinjay, s. *See* Parrot.

Poppy, s. खसतिलः.

Populace, s. लोकः, जनः, सामान्य-प्राकृत-जनाः; *See* People. -Popular, लोक-जन-प्रिय, सर्वप्रिय. 2 लौकिक (की f.) लोकप्रसिद्ध, लोकरूढ-संमत, जन-लोक in comp.; 'p. scandal' लोकापवादः; 'seeking p. favor' लोक-जन-रंजनं; 'p. usage' रूढि f., जनव्यवहारः, लोकाचारः, लोकमर्यादा-रीति f.; 'p. report' जनप्रवादः; लोक or जन-वार्ता or श्रुति f., किंवदंती; 'p. tumult' प्रकृतिक्षोभः; 'conformity to p opinion' लोकानुसरणं. 3 सामान्य, साधारण (णी f.). -ity, s. लोकप्रियता, लोक-जन-प्रीति f.-अनुरागः-संमानः. -ly, adv. लोके, लौकिकतया, साधारणतः, सामान्यतः, लोकरंजनार्थं. -Populate, v. t. वस् c., जनैः आकृ 6 P or पूर् 10. -v. i. प्रजा उत्पद् c. प्रजन् 4 A, प्रजावृद्धिं कृ 8 U. -ion, s. प्रजा, प्रजा-लोक-संख्या, जनाः, लोकाः. -Populous, a. जनाकीर्ण, जनसंकुल-पूर्ण, बहु or प्रचुर-जन or प्रज, जनसंबाध. -ness, s. लोक-प्रजा-बाहुल्यं.

Porcelain, s. (चीनदेशीय) मार्तिकं, कौलालकं, मृद्भांडानि.

Porch, s. प्रघाणः, प्रघणः, अ(आ)लिंदः, द्वारप्रकोष्ठः.

Porcine, a. शूकरोपम, शूकरसंबंधिन्.

Porcupine, *s.* शल्यः-ल्यकः, श्वाविध् *m.*; ' quill of a p. ' शलं, शललं-ली.

Pore, *s.* रो(लो)मरंध्रं-कूपः. **2** (सूक्ष्म) रंध्रं, कूपः. **-v.** *i.* अनन्यदृष्टया-सामिनिवेशं-अधी 2 A or वच् c. **-ous,** *a.* बहुरंध्र, रंध्रबहुल, रंध्रपूर्ण-विशिष्ट, सरंध्र. **2** रोमकूपमय (ची *f.*), स्वेदमार्गविशिष्ट, विरलावयवक. **-ousness, Porosity,** *s.* रंध्रबाहुल्यं, रंध्रविशिष्टता.

Pork, *s.* शूकर-वराह-मांसं. **-er,** *s.* शूकरः, वराहः.

Porpoise, *s.* शिशुकः, शिशुमारः, उल्लूपिन् *m.*

Porridge, *s.* यूषं, जूषं.

Porringer, *s.* यूषपात्रं-भाजनं.

Port, *s.* नौकाशयः, नौकाश्रयः, उत्तरणस्थानं, आश्रयः, रक्षणस्थानं, आशयः; ' arrived at the wished-for p. ' इष्टदेशं जगाम. **2** द्वारं; *See* **Door. -able,** *a.* वहनीय, लघुभार, सुवाह्य, लघु, सुखवाह्य, हस्तवाह्य. **-er,** *s.* द्वाःस्थः, द्वारपालः, प्रतीहारः, दौवारिकः. **2** भारवाहः, भारहरः, वोढृ *m.*, भारिकः. **-erage,** *s.* भारवहनं. **2** वहनमूल्यं. **-Portal,** *s.* द्वारं, मुखं, प्रवेशद्वारं; *See* **Door.**

Portend, *v. t.* अग्रे (अनिष्टं) सूच् 10 or निविद् c. or शंस् 1 P. **-Portent,** *s.* उत्पातः, दुर्निमित्तं, अशुभलक्षणं, अजन्यं, उपसर्गः, दुर्लक्षणं, दुश्चिह्नं, अपशकुनं, कुलक्षणं, अत्याहितं, उपप्लवः, अरिष्टं, अद्भुतं. **2** पूर्वचिह्नं-लक्षणं. **-ous,** *a.* उत्पात-अनिष्ट-अशुभ-शंसिन्, अद्भुत; अत्याहित, औपसर्गिक-औत्पातिक-(की *f.*). **-ously,** *adv.* सोत्पातं, दुर्लक्षणपूर्वं.

Portfolio, *s.* पत्राधारः.

Porthole, *s.* नौपार्श्वमुखं.

Portico, *s. See* **Porch.**

Portion, *s.* अंशः, वि-,भागः, खंडः-डं, छेदः, शकलः-लं. **2** अंशः, वंटः, उद्धारः, वि-,भागः; ' p. of an estate ' दायः, रिक्थभागः, उद्धारः; ' wife's p. ' स्त्रीधनं, यौतकं, औद्वाहिकं. **-***v. t.* विभज् 1 U, वंट् 10, विभागशः कल्प् c. **2** शुल्कं-वृत्तिं दा 3 U. **-ing,** *s.* विभागः, भागकल्पनं, वंटनं. **-less,** *a.* अनंश, अंशहीन.

Portly, *a.* गौरवगति-वृत्ति, उदात्त, धीर, धीरदर्शन, गंभीराकृति. **2** स्थूल, बृहत्, स्थूलकाय, पृथूदर, पीन, पीवर. **-iness,** *s.* स्थूलकायत्वं, शरीरगौरवं.

Portmanteau, *s.* चर्ममंजूषा-पेटकः.

Portray, *v. t.* आ-,लिख् 6 U, चित्र् 10, वर्ण् 10. **2** उप-,वर्ण्, कृत् 10. **-Portrait,** *s.* चित्रं, आलेख्यं, प्रतिकृति *f.*, प्रतिमा; *See* **Picture;** ' p.-painter ' चित्रक(का)रः.

Pose, *v. t.* स्तंभ् 9 P, मुह् c., निरुत्तरीकृ 8 U, कुंठ् 10.

Posit, *v. t.* प्रतिज्ञा 9 A, उपन्यस् 4 P.

Position, *s.* प्रतिज्ञा, उक्ति *f.*, हेतुः, पक्षः. उपन्यासः; ' wrong p. ' पक्षाभासः, हेत्वाभासः. **2** स्थिति *f.*, स्थानं, पदं, आस्पदं, पदवि-वी *f.* **3** प्रतिष्ठा, गौरवं. **4** अवस्था, दशा, आकारः, संस्थानं, भावः, वृत्ति *f.*; ' attain the p. of ' पदं या 2 P, (यांत्येवं गृहिणीपदं युवतयः S. 4); ' holding the p. of mistress of the house ' गृहिणीपदभाक्, गृहिणीपदे स्थिता; ' give the p. of ' पदं ग्रह् c., भावं गम् c., (महिषीपदं ग्राहिता, देवीभावं गमिता); ' p. in life ' स्थितिः, निसर्गजातिः, अवस्थानं.

Positive, *a.* स्पष्ट, असंदिग्ध, अगूढ, प्रत्यक्ष, व्यक्त, अवक्र, परिस्फुट, साक्षात् *ind.*: ' reply in the p. ' भवतु-बाढं-तथा-इति वद् 1 P. **2** अवश्यक, अवैकल्पिक (की *f.*). अविशंक्य; *See* **Peremptory. 3** सु-,नियत, निश्चित, निर्णीत, निर्दिष्ट. **4** सत्य, तथ्य, यथार्थ, वास्तविक-तात्त्विक-(की *f.*). **5** विविक्त, केवल, अनन्यसंबद्ध. **6** दृढ-कृत-निश्चय, दृढमति-संकल्प, निर्विकल्प, निःसंदेह; मताभिमानिन्, स्वमताग्रहिन्, दृढोक्ति; ' a p. quantity ' धनं (opposed to ऋणं, क्षयः, व्ययः, हानिः). **-ly,** *adv.* स्पष्टं, व्यक्तं, असंदिग्धं, साक्षात्. **2** अवश्यं, निर्विकल्पं, अविचार्यं. **3** सुनिश्चितं, नियतं, नूनं, खलु. **4** वस्तुतः, तत्त्वतः, परमार्थतः, सत्यं, यथार्थतः. **5** सुनिश्चयेन, दृढनिश्चयपूर्वं. **6** मताग्रहेण, मताभिमानेन, दृढोक्त्या. **-ness,** *s.* स्पष्टता, असंदिग्धता, दृढनिश्चयः-निर्णयः, तथ्यता, याथार्थ्यं, मताग्रहः, दृढोक्ति *f.*, &c.

Possess, *v. t.* भू 1 P,10, धा 3 U, भू 3 U. **2** भुज् 7 U, अधि-ष्ठा 1 P, अध्यास् 2 A, सेव् 1 A; better by वत्, मत्, इन् &c.; *See* below. **3** आप् 5 P, लभ् 1 A, अधिगम् 1 P; *See* **Get. 4** अधिकृ 8 U, प्रभू 1 P, अधि-ष्ठा, पदं कृ. **5** आविश् 6 P, आक्रम् 1 U, 4 P, उपसृज् 6 P, बाधृ 1 A, उपहन् 2 P, ग्रस् 1 A, व्याप् 5 P, oft. ex. by ' p. ed. ' **-ed,** *a.* धृत, भुक्त, अधिष्ठित, अध्यासित, अधीन, हस्तगत. **2** प्राप्त, लब्ध, अधिगत. **3** आविष्ट, आक्रांत, उपसृष्ट, ग्रस्त, उपहत. **4** (By spirits) भूताविष्ट, भूतोपसृष्ट, वेतालोपहत, भूतग्रस्त. **5** (Having) युक्त, युत, उपेत, संपन्न, उपपन्न, अन्वित, सनाथ, शालिन् in comp.; by वत्, मत्, इन्, विन् affixed, or by Bah. comp. **-ion,** *s.* भोगः, भुक्तिं *f.*, अधिकारः, आवेशः, आक्रमः-मणं, आत्मसात्करणं, ' to take p. of ' आक्रम्, आविश्, स्वायत्तीकृ, आत्मसात्कृ; पदं कृ or वि-धा; *See* **Enter;** ' to put in p. ' अधिकृ c., अधिकारं दा, नियुज् 7 A, 10; ' being in one's p. ' स्वाधीन, हस्तगत, वशवर्तिन्. **2** संपन्नता, युक्तत्वं, सना-

थता; वत्त्वं, शालिता in comp.; ' p. of wealth ' धनवत्त्वं,सधनता. 3 आवेशः,उपसर्गः, बाधा, पीडा; भूतावेशः, भूतपीडा-बाधा-संचारः. 4 द्रव्यं, स्वं वस्तु, स्वाधीनं द्रव्यं, (p.s) द्रव्यजातं, वस्तुजातं, द्रव्याणि, वस्तूनि; वित्तं, विभवः, द्रविणं; अर्थः, क्षेत्रादि, भूमि *f.*, (landed). **-ive**, *a.* संबंध in comp.; 'p. case' षष्ठी. **-or**, *s.* भोक्तृ *m.*, भोगिन् *m.*, स्वामिन् *m.*, अधिकारिन् *m.*, शाली-धारि-in comp.

Possible, *a.* शक्य, साध्य, संभाव्य; gen. ex. by pot. pass. part.; ' not p. to be united ' दुःसंधेय; ' p. to be done ' करणीय, संपाद्य, साध्य; oft. by शक्नु pass.; ' to be p. ' संभू 1 P, (सर्वं सौदामिन्यां संभाव्यते Mal. 1), उपपद् 4 A, घट् 1 A; उभयथापि घटते (V. 3) ' it is p. in both ways ' (both sides are p.); ' as far as p. ' यावच्छक्यं, यथाशक्ति. **-Possibility**, *s.* संभवः, शक्यता, संभाव्यता, उपपत्तिः *f.*, घटना, संगतिः *f.* **Possibly**, *adv.* Ex. by शक्यं or शक्नु pass. **2** कदाचित्, कदापि, नाम, by pot. mood; *See* **Perhaps. 3** (In questions) इव, नाम, वा; ' who p. that is dead, is not born again ' मृतः को वा न जायते (P. I. 1).

Post, *s.* स्तंभः, स्थाणुः, स्थूणा, उपस्तंभः; ' p. for securing an elephant ' आलानं, बंधस्तंभः; ' p. for tethering cattle ' शिवकः, कीलकः, मेधिः-धिः, खलेदारु *n.* **2** पदं, अधिकारः, नियोगः, अधिकारपदं. **3** स्थानं, स्थलं, आस्पदं, अवस्थानं, स्थितिः *f.*, पदवी. **4** गुल्म-सैन्य-स्थानं. **5** पत्रवाहः, पत्रवाहनसाधनं; ' p.-boy ' जवाश्वपालः; 'p.-chaise' जवरथः-वाहनं; 'p.-haste' सवेगं, अतिजवेन, जवाश्ववत्; 'p.-horse' जवाश्वः, जवतुरगः; 'p. -man' पत्र or लेख-वाहः or हारः; 'p.-master' पत्रस्थानाधिकारिन् *m.*, पत्रवाहाध्यक्षः; ' p. office ' पत्रस्थानं-गृहं. **-*v. t.*** स्था c. (स्थापयति), सं-प्रति-°, नियुज् 7 A, 10. **2** स्तंभे बंध् 9 P. **3** पत्रस्थाने निविशँ् c. or क्षिप् 6 P. **4** प्रकाशँ् c., आ-सज् c. **-*v. i.*** जवेन गम् or व्रज् 1 P; ' p. up ' अवबुध् c.; ' p. off ' व्याक्षिप् 6 P, विलंबँ् c. **-age**, *s.* पत्रवाहनमूल्यं. **-er**, *s.* जवनः, जवः, जवाश्वः, प्रजविन् *m.* **-Postilion**, *s.* जवाश्वारूढः.

Post-date, *v. t.* पश्चात् तिथिं लिख् 6 P.

Post-diluvian, *a.* प्रलयोत्तरकालीन.

Posterior *a.* पश्चात्-उत्तर-कालीन, उत्तर, अपर, अवर, अर्वाच्. **-ity**, *s.* परता, उत्तरता. **-ly**, *adv.* पश्चात्, उत्तरं-रतः, परतः, परस्तात्. **-Posteriors**, *s.* नितंबः, गुदप्रदेशः.

Posterity, *s* संततिः *f.*, अपत्यं, संतानः, वंशः, प्रजा, पुत्रपौत्रादयः.

Postern, *s.* पक्षद्वारं, पक्षकः.

Posthumous, *a.* मरणादनंतरं प्रकाशित, मृत्यूत्तरजात.

Post-meridian, *a.* अपराह्णतन (नी *f.*), पराह्णकालिक (की *f.*).

Post-mortem, *a.* मरणोत्तर, मृत्यूत्तर.

Post-natal, *a.* जन्मोत्तर.

Post-nuptial, *a.* विवाहोत्तर, विवाहोर्ध्व.

Postpone, *v.t.* व्याक्षिप् 6 P. विलंबँ् c., (नियतकालं यावत्) त्यज् 1 P, विसृज् 6 P. **-ment**, *s.* व्याक्षेपः, विलंबः.

Post-script, *s.* अनुलेखः.

Postulate, *s.* स्वीकृतपक्षः, गृहीतपदं, परिग्रहः. **-*v. t.*** परिग्रहँ् 9 P, स्वीकृ 8 U.

Posture, *s.* सं-,स्थितिः *f.*, संस्थानं, संस्था, अंगविन्यासः-स्थितिः; आसनं, बंधः; वीरासनं, कमलबंधः &c.; ' in a sitting p. ' आसीन, उपविष्ट. **2 Condition**, q. v.

Posy, *s.* कुसुमस्तबकः, पुष्पगुच्छः. **2** अंगुलीयकलेखः.

Pot, *s.* घटः, कलसः-शः, कुंभः, पात्रं, भाजनं, भांडं; ' cooking-p. ' स्थाली, उखा, पिष्टपचनं, ऋजीषं, पिठरः; 'p.-bellied' तुंदिल, लंबोदर, पिचिंडिल, तुंदिन्; ' p.-belly ' पिचिंडः, लंबोदरं; ' p.-companion ' पानमित्रं-सुहृद्, सहपायिन् *m.* 'p.-house' शुंडा, पानं; ' p.-sherd ' घटशकलं, भिन्नपात्रं. **-ter**, *s.* कुंभकारः, कुलालः, घटकारः, चक्रिन् *m.* **-tery**, *s.* कुंभ-घट-स्थानं. **2** कौलालकं, मार्तिकं, मृद्भांडानि.

Potable, *a.* पेय, पानीय, पानार्ह.

Potash, *s.* सज्जिका, क्षारः; *See* **Natron.**

Potation, *s.* पानं, सपीतिः *f.*, तुल्यपानं.

Potato, *s.* गोलालुः.

Potent, *a.* प्रबल, सप्रभाव, वीर्यवत्, सप्रताप, शक्तिमत्, प्रभविष्णु; *See* **Strong. -ate**, *s.* अधिपतिः, नरेश्वरः, प्रभुः; *See* **King. -ly**, *adv.* प्रबलं, सप्रतापं, बलवत्.

Potential, *a.* शक्य, उपपन्न, संभवनीय; (mood) विधिलिङ् **-ity**, *s.* शक्यता, संभाव्यता.

Pother, *See* **Bustle, Perplex.**

Potherb *s*, शाकः, हरितकं, शिग्रुः.

Potion, *s.* अगदः, पानं, पेयौषधं.

Pottage, *s.* जूषं.

Potulent, *a.* आमत्त. **2** पानयोग्य.

Pouch, *s.* स्यूतः, प्रसेवः, कोशः-षः. **2** लंबोदरं. **3** पेशि-शी, *f.*, उपजठरं. **-*v. t.*** कोशे निविशँ् c. or नि-धा 3 U.

Poulterer, *s.* नैतांसिकः, शौनिकः, पक्षिविक्रयिन् *m.*

Poultice, *s.* उपनाहः, प्र-,लेपः. **-*v.t.*** उपनाहं दा 3 U.

Poultry, *s.* गृहपक्षिणः; ' p.-yard ' कुक्कुटादिस्थानं.

Pounce, *v. t.* अवपत्य ग्रह् 9 U, सहसा अवपत् 1 P or अवस्कंद् 1 P or आक्रम् 1 U, 4 P. *-s.* नखः, नखरः. **2** मसीशोषणचूर्ण.

Pound, *s.* (For cattle) अवरोधः, अवरोधस्थानं, व्रजः, गोष्ठं. *-v. t.* सं-, चूर्ण् 10, मृद् 9 P, पिष् 7 P, क्षुद् 7 P, खंड् 10; ' p. to dust ' चूर्णशः कृ, चूर्णपेषंपिष्, चूर्णीकृ 8 U. **2**(व्रजे) नि-अव-रुध् 7 U, or बंध् 9 P. **3** तड् 10, तुद् 6 P, प्रह् 1 P. **-age,** *s.* शुल्कं, राजस्वं. **-er,** *s.* पेष्टृ *m.*, पेषणः. **2** मुसलः-लं, अयोग्रं, मुद्गरः. **-ing.** *s.* चूर्णनं, पेषणं, मर्दनं, खंडनं.

Pour, *v. t.* पत् c., नि-,सिच् 6 P, प्र-,स्रु c.; ' p. water in ' जलेन पू 3, ९ U, सिच्. **2** (Out, forth) प्र-निर्-सुच् 6 P, उत्-वि-सृज् 6 P, अवपत् c., अवतृ c., निःसृ c., उत्क्षिप् 6 P, उद्-गृ 6 P, उदीर् c., उद्गम् 1 P, वृष् 1 P, प्र-वि-कृ 6 P; निर्वृष्, निर्गल् c.; ' which has p.ed out its watery contents ' :निर्गलितांबुगर्भः, पानीयरिक्तोदरः (घनः); ' p. out the water from the pot ' पात्रं जलरिक्तं कुरु; ' p. ed forth arrows' शरवृष्टिं मुमोच; ' p. one's soul to another ' अन्यस्मै स्वमनोगतं सर्वात्मना निविद् c. *-v. i.* स्रु 1 P, प्र-परि-°, प्र-,स्यंद् 1 A, श्रवत् 1 A, जलं स्रु c. or प्रवह् 1 P. **2** वृष्, निर्गल् 1 P. **3** निःसृ 1 P, निर्गम् 1 P, निःस्रु ' rain p. ed down in torrents ' धारासारैर्महती वृष्टिर्बभूव (H. 3); ' p. in upon ' समापत् 1 P, अभिद्र् 1 P, बहुशः आपत् or आक्रम् 1 U, 4 P. **-er,** *s.* स्रावकः, सेचकः, सेक्तृ *m.* **-ing,** *s.* सेकः, स्रावः, स्रवः, श्रवोतः

Pout, *v. i.* (क्रोधात्) ओष्ठौ प्रसृ c. or दृश् c. **2** उन्नत-उच्छ्रित-*a.* भ्रू 1 P. *-s.* क्रोधावेशः.

Poverty, *See* under **Poor.**

Powder, *s.* चूर्णं, पिष्टं, क्षोदः; ' gun-p. ' आग्नेयचूर्णं; ' perfumed p.' वासयोगः, पिष्टातः-तकः, पटवासकः. *-v. t.* ' to reduce to p. ' चूर्ण् 10, क्षुद् 7 P, चूर्णीकृ, पिष् 7 P; *See* **Poond, 2** चूर्णेन लिप् 6 P, or भू c. or मिश्र् 10. **-y,** *a.* पांशुल, चूर्णवत्, चूर्णमय (*f.* यी), सचूर्ण, सक्षोद.

Power, *s.* शक्ति *f.*, सामर्थ्यं, बलं, प्रभावः, वीर्यं, ऊर्जः, सहस्-ओजस्-*n.*, विभवः (वाग्विभवः); (martial) तेजस् *n.*, वि-पराक्रमः, शौर्यं. **2** (Ability) शक्तिः, क्षमता, धीशक्तिः; ' p. of thinking ' विचारणाशक्तिः; ' according to one's p. ' यथाशक्ति-चलं, यावच्छक्यं. **3** (Influence) प्रभुत्वं, प्रभावः, वशः-शं, बलं, गौरवं, अधिकारः; आधिपत्यं, ईशत्वं, सत्ता, ऐश्वर्यं, अधीनता. **4** अधिपः-पतिः, अधीशः, प्रभुः. **5** (Legal) अधिकारः, or by अर्ह् 1 P. **6** अधिकारिजनः, अधिकृतः. **7** घातः. **8** सेना, बलं, पृतना; ' have or exercise p. over ' प्रभू 1 P, ईश् 2 A (with gen.), वशीकृ, आयत्तीकृ, आत्मवशं नी 1 P; in (under) the p. of' वश, अधीन, आयत्त, तंत्र in comp.; ' fallen into another's p.' पर हस्तगत; ' to be in one's p.' ex. by शक् 5 P or:by (*s.*). **-ful,** *a.* बल-सामर्थ्य-वत्, शक्त, बलिन् सबल, प्रबल, ऊर्जस्वल, ओजस्विन्, शक्तिमत्, ऊर्जितसत्त्व बलाढ्य, सप्रभाव, प्रभविष्णु. **2** शूर, वीर, विक्रांत, तेजस्विन्, महाप्रताप, प्रतापवत्, धामवत्, उरुविक्रम. **3** (Medicine) वीर्यवत्, अमोघ, गुणावह, प्रबल, अलंतम. **4** दृढ, प्रतीतिकारिन्, प्रबल. **-fully,** *adv.* बलवत्' प्रबलं, सप्रभावं, अत्यंतं. **-fulness,** *s.* प्राबल्यं, शक्तत्वं. **-less,** *a.* निर्बल, शक्तिहीन, अशक्त, अबल, निष्प्रभाव, असमर्थ, अक्षम. **-lessness,** *s.* अशक्ति *f.*, असामर्थ्यं.

Pox, *s.* **Small-pox,** q. v. **2** उपदंशः.

Practice, *s.* प्र-आ-चारः, संप्रदायः, व्यवहारः, रीति *f.*, मार्गः, पद्धति *f.*, क्रमः, वृत्तिः *f.* **2** अभ्यासः, क्रिया-प्रबंधः-सातत्यं, नित्यवृत्तिः-चर्या-अनुष्ठानं,अनुशीलनं, निरंतरप्रवृत्तिः, आवृत्तिः;'does not require p.'नाभ्यासक्रममीक्षते. **3** क्रिया, आचारः, आचरणं, कर्मन् *n.* कृति *f.*, व्यापारः, व्यवसायः; करणं, विधानं, अनुष्ठानं; (execution) प्रवृत्तिः, प्रचारः; व्यवहारः; ' bring or put into p. ' प्रवृत्त c., व्यवह् c.; ' has long been in p. ' चिरप्रवृत्त. **4** (Opp. of theory) प्रयोगः. **5** छलं, व्याजः, कैतवं; *See* **Fraud;** 'ancient p.' वृद्धाचारः, वृद्धपरंपरा; ' family p.' कुलसंप्रदायः, कुलधर्मः, कुलाचारः; ' local p. ' देशाचारः; ' good p. ' सदाचारः; 'following good p. s' सदाचार, सद्वृत्ति, सद्वृत्त; साधुवृत्त;'bad p.'दुराचारः, कुमार्गः, दुर्वृत्तिः; ' following bad p. s' दुर्वृत्त, दुराचार; ' p. of medicine वैद्यक्रिया-उपचारः, चिकित्सा, भेषजप्रयोगः, उपक्रमः; ' p. of arms ' शस्त्राभ्यासः, शस्त्रचर्या; ' p. of law ' व्यवहारः, व्यवहाराभ्यासः; ' p. in archery' शराभ्यासः, उपासनं. **-Practise,** *v. t.* अभ्यस् 4 U, नित्यं कृ 8 U, &c. **2** आचर् 1 P, अनु-ष्ठा 1 P, कृ, वि-धा 3 U, आ-स्था 1 U. **3** प्र-उप-युज् 7 A, 10, प्रवृत् c., व्यवह् c., सेव् 1A, आश्रि 1 U, आ-अवलंब् 1 A; 'what profession do you p. ' कां वृत्तिमुपजीवत्यार्यः (Mr. 2). *-v. i.* शाठ्येन आचर् or व्यवह् 1 P, छलं-कपटं-कृ. **-ed,** *a.* अभ्यस्त, आचरित, अनुष्ठित, कृत, सेवित, &c. **2** अभिज्ञ, परिचयवत्, बहुदृष्ट, व्यवहारज्ञ, दृष्टकर्मन्, पक्वबुद्धि, ज्ञानवृद्ध, जाताभ्यास; also ex.by(*s.*). **-ing,** *a.* अभ्या-

सिन्, सेविन्, शालिन्, in comp.; आस्थित, आश्रित. **-Practicable,** *a.* करणीय, कर्तुं शक्य, साध्य, संभाव्य, शक्य, सुकर, सुखसाध्य, उपाद्य. **-Practical,** *a.* अभ्यासिक-व्यवहारिक-(की *f.*), अभ्याससिद्ध-प्राप्त, आचार-व्यवहार in comp.; ' p. knowledge व्यवहारज्ञानं, लौकिकज्ञानं. **2** अभ्यासक्षम, व्यवहार्य, प्रयोज्य, प्रवर्तनीय, व्यवहारोचित; ' a p. scheme ' व्यवहारोचित उपायः; ' he is a p. teacher ' स शिक्षणप्रयोगनिपुणः. **3** व्यवहारज्ञ, दृष्टकर्मन्. अभिज्ञ; *See* **Practised.** **-ly,** *adv.* कार्यतः, अर्थतः, वस्तुतः, परमार्थतः, व्यवहारतः, फलापेक्षया. **2** अभ्यासेन, व्यवहारेण. **Practitioner,** *s.* सेविन्, व्यवसायिन् *m.* व्यापारिन् *m.* वृत्ति, आजीव in comp. **2** वैद्यः, वैद्यवृत्तिः, चिकित्सकः **3** व्यवहारज्ञः, व्यवहारदर्शिन् *m.*-निपुणः.

Pragmatic,-al, *a.* परकार्यचर्चक, अनधिकारव्यापारिन्; *See* **Meddle,** &c.

Praise, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, ईड् 2A, नु 2 P. स्तु 2 U, वर्ण् 10, गै 1 P, कृत् 10, वि-प्र-° ख्या 2 P or c. (ख्यापयति), पन् 1 P, नू 6 P. -*s.* प्र-,शंसा, श्लाघा, स्तुति *f.*, स्तवः, वर्णनं-ना, कीर्तनं, नुति *f.*, ईडा, स्तोत्रं. **-er,** *s.* प्रशंसकः, स्तावकः, वर्णकः, वंदारुः. **-Praiseworthy,** *a.* प्रशस्य, प्रशंसार्ह, श्लाघ्य, स्तुत्य.

Prance, *v. i.* प्लु 1 A, वल्ग् 1 P, वृत् 4 P. **-ing,** *s.* प्लुतं, वल्गितं, प्लवनं.

Prank, *s.* क्रीडा, चेष्टा, चापलं, ललिा, छंदः-दस् *n.*; ' idle p. ' वानर or मर्कट-चेष्टा or क्रीडा; ' mischievous p. ' कु-दुः-चेष्टितं. -*v. t.* दंभार्थं भूष् 10 or अलंकृ 8 U. **-ish,** *a.* कुचेष्ट, चपल, क्रीडाशील.

Prate, Prattle, *v. i.* प्र-,लप् 1 P, प्र-,जल्प् 1 P, अनर्थकं वद् 1 P or भाष् 1 A. **-er,** *s.* वाचाटः, वाचालः, जल्प (ल्पा)कः, वावदूकः, बहुभाषिन् *m.* **-ing,** *s,* प्रलापः, प्रलपितं, प्र-,जल्प-ल्पितं-ल्पनं; बालालापः, बालभाषणं-प्रलापः.

Pravity, *s.* भ्रष्टता, विक्रिया, विकारः.

Pray, *v.* (A deity) स्तु 2 U, प्र-अभि-सं-°, नमस्यति (Ď.), अभिवद् c., आराध् c., प्रणम् 1 P; (मनसा) पूज् 10, उपास् 2 A, धये 1 P, चिंत् 10. **2** आशंस् 1 A. **3** याच् 1 A, प्र-अभि-अर्थ् 10 A; वि-ज्ञा c. (ज्ञापयति), gen. ex. by अर्ह् 1 P with inf.; *See* **Please;** ' I p. you tell me ' मह्यं कथयितुमर्हति भवान्. **4** (Lowly) जप् 1 P. **-er,** *s.* स्तवः, स्तोत्रं, प्रार्थना-नं, नमस्या, उपासना, पूजा; (mental) ध्यानं, आवाहनं; (low) जपः; स्वाध्यायः. **2** याच्ञा, प्रार्थना, अभ्यर्थना, विज्ञप्ति *f.*, विज्ञापना. **-ful,** *a.* प्रार्थनाशील, भजनपरायण.

Preach, *v. t.* उदीर् c., उद्-घुष् 10, उच्चर् c, प्र ख्या c. (ख्यापयति), प्रकाश् c., प्रवद् 1 P, कृत् 10. -*v. i.* धर्मं प्रवच् 2 P or शास् 2 P or उपदिश् 6 P. **-er,** *s.* उपदेशकः, प्रवक्तृ *m.*, प्रचारकः, धर्मशासकः, धर्मोपदेशिन् *m.* **2** घोषकः, प्रख्यापकः. **-ing,** *s.* वि-,घोषणं-णा, प्रख्यापनं, धर्मोपदेशः, धर्मशासनं, प्रवचनं, उपदेशः.

Preamble, *s.* उपोद्घातः; *See* **Introduction.**

Prebend, *s. See* **Canon.**

Precarious, *a.* संदिग्ध, अनिश्चित, अनिर्णीत, अनियत, अस्थिर, अध्रुव. **2** पराधीन, परायत्त, अस्वतंत्र; *See* **Doubtful, Dangerous.** **-ly,** *adv.* संदिग्धं, अनियतं. **-ness,** *s.* अनियतत्वं, अन्याधीनता.

Precative, Precatory, *a.* याचक, प्रार्थनात्मक; ' p. mood ' आशीर्लिङ्.

Precaution, *s.* पूर्वोपायः, निवारणोपायः, पूर्व-समीक्षा-चिंता, पूर्वावधानं, पूर्वप्रबोधः; ' take p. s ' पूर्वमेव उपायं समीक्ष् 1 A or चिंत् 10; ' hence I give you this p. ' अतस्त्वामेवं प्रबोधयामि. **-ary,** *a.* पूर्वोपाय-रूप; by (*s.*).

Precede, *v. t.* पूर्वं-अग्रे-पुरतः गम्-सृ-चर् 1 P- or इ-या 2 P or वृत् 1 A or स्था 1 P; oft. ex. by पूर्वं, प्राक्, प्रथमं, ततः, अनंतरं; ' the flower p. s the fruit ' उदेति पूर्वं कुसुमं ततः फलं, so घनोदयः प्राक् तदनंतरं पयः (S. 7.); ' visarga p. ed by अ ' अपूर्वः विसर्गः; ' many kings p. ed Rāma ' रामात् पूर्वं बहवो नृपाः समजायंत. **2** (In rank) अग्रपदे वृत्, अग्रमानं अर्ह् 1 P. **-ence,** *s.* अग्रगमनं, पुरःसरणं. **2** अग्र-श्रेष्ठपदं, पुरस्कारः, उत्कर्षः, प्राधान्यं, अग्रत्वं, अग्रणीत्वं, आग्रमानः-पूजा, सुखरता, श्रेष्ठत्वं, प्राथम्यं. **-ent,** *s.* (पूर्व) निदर्शनं, उदाहरणं, आदर्शः, प्रतिमा, प्रमाणं, दृष्टांतः; ' having no p. ' अप्रतिम. -*a.*, **-ing,** *a.* पूर्व-अग्रगामिन्, अग्रग, पूर्वग, पूर्व, अग्र, प्रथम, अग्रे-पुरः-सर. **-ented,** *a.* भूत-दृष्ट-पूर्व, दृष्टप्रतिम; ' un.-p. ' अप्रतिरूप, निरुपम, अतुल.

Precentor, *s.* मुख्यगायकः, गायकाग्रणीः.

Precept, *s.* नियोगः, आ-नि-देशः, अनु-शासनं, अनुज्ञा, विधिः, नियमः, प्र-,चोदनं-ना, कल्पः, आज्ञा, स्थिति *f.*, मर्यादा. **2** वचनं, उपदेशः; ' moral p. s ' नीतिवचनानि; ' religious p. ' धर्मानुज्ञा, धर्मशासनं; ' example is better than p. ' शासनात् करणं श्रेयः, वाचः कर्मातिरिच्यते. **-ial, -ive,** *a.* वैधिक-नैयमिक-(की *f.*), विधिरूप, (*s.*) in comp. **-or,** *s.* गुरुः, शिक्षकः, उपदेशकः, आचार्यः, अध्यापकः, उपाध्यायः.

Precession, *s.* अग्रगति *f.*; 'p. of the equinoxes' अयनचलनं, क्रांतिपातगति *f.*

Precinct, *s.* सीमा, पर्यंतः, मर्यादा, अवधिः, परिसरः उपांतं, उपकंठं, समंतदेशः.

Precious, *a.* महार्ह-र्घ, महा-बहु-मूल्य, अनर्घ्य, अमूल्य, उत्कृष्ट, बहुमत, गुरु, परम; 'p. stone' उपलरत्नं, अमूल्यरत्नं, रत्नं, मणिः. **-ness,** *s.* महार्घता, बहुमूल्यं.

Precipice, *s.* प्रपातः, भृगुः, अतटः. **-Precipitous,** *a.* पातुक, विषम, प्रवण, अवसर्पिन्. **2 Rash,** q. v.

Precipitate, (Precipitant,) *a.* अवाङ्-मुख (स्त्री *f.*), अधोमुख, अवाक्शिरस्. **2** असमीक्ष्य-क्षिप्र-अविमृश्य-कारिन्, साहसिन्, साहसिक (की *f.*); (act) सरभस, अविमृष्ट, अतिक्षिप्र, साहस in comp. **-*v. t.*** रभसा अधः क्षिप् 6 P or पत् c. **2 सरभसं** प्रवृत् c. or प्रोत्सह् c., त्वर् c. (त्वरयति). **-*v. i.*** अव-अधः-पत् 1 P, नि-सद् 1 P. **2** (Fig.) अविचार्य-सरभसं-व्याप् 6 A or c. **-ly,** *adv.* अवाक्, अवाक्शिरसा, अधोमुखेन. **2** अविमृश्य, असमीक्ष्य, सहसा, साहसेन, अतिक्षिप्रं, सरभसं. **-ion,-ness,** *s.* अधःपातनं-क्षेपणं, अवपातनं. **2** साहसं, साहसिकता, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता. **Precipitance,** *s.* साहसं; *See* above.

Precis, *s.* सारः, संक्षेपः, संग्रहः.

Precise, *s.* नियत, निर्दिष्ट, निश्चित, परिच्छिन्न, यथार्थ, विशेष in comp.; *See* **Exact. 2** व्यक्त, स्फुट, सूक्ष्म. **3** (Of persons) सामयिक (की *f.*), समयानुवर्तिन्, संकेतानुरोधिन्, सूक्ष्मनियमनिष्ठ. **-ly,** *adv.* नियतं, यथार्थं, सूक्ष्मतया; oft. by एव; 'at noon p.' मध्याह्नसमये एव; 'p. so' एवमेव. **-ion,-ness,** *s.* नियतत्वं, निर्देशः, सूक्ष्मता, सुनिश्चितता, याथार्थ्यं, व्यक्तता, &c.

Preclude, *v. t.* निरु c., नि-प्रति-षिध् 1 P, नि-प्रति-रुध् 7 U, बाध् 1 A, प्रतिबंध् 9 P; *See* **Obstruct. -Preclusion,** *s.* प्रतिबंधः, निवारणं, नि-प्रति-षेधः; निरोधः. **-Preclusive,** *a.* निवारक, प्रतिबंधक, निरोधक.

Precocious, *a.* अकालपक्व-परिणत-प्रौढ. **2** बालप्रौढ-पक्व. **-ness, -Precocity,** *s.* अकालपरिणतिः *f.* -प्रौढता, बालप्रौढि *f.*

Precogitate, *v. i.* पूर्वं-अग्रे चिंत् 10 or विचर् c. or विमृश् 6 P.

Precognition, *s.* पूर्वज्ञानं-बोधः.

Preconceive, Preconcert, *v. t.* पूर्वं चिंत् 10 or कल्पय् c. or वि-भू c. **-ed,** *a.* पूर्वकल्पित-निर्धारित, पूर्वघटित-निर्णीत. **-ion,** *s.* अग्र-पूर्व-कल्पना-बोधः-ज्ञानं; पूर्वघटनं-संकेतः.

Precursor, *s.* पूर्वगः, अग्रेसरः, अग्रयायिन् *m.* पुरःसरः; *See* **Harbinger. 2** पूर्वलक्षणं-चिह्नं-लिंगं. **-y,** *a.* पूर्वग, पुरःसर, अग्रवर्तिन्.

Predatory, *a.* दस्युवृत्ति, अपहारक, उपद्रविन्, लुंठक, चौर in comp.

Predecessor, *s.* पूर्वगः, पूर्वाधिकारिन् *m.*

Predestinate, Predestine, *v. t.* पूर्व-अग्रे-निरूप् 10 or प्रकल्पय् c. or निर्दिश् 6 P. **-ed,** *a.* अग्र or पूर्व-निर्दिष्ट or निरूपित, भाविन, दैवाधीन, दैवायत्त, दैष्टिक (की *f.*). **-ion,** *s.* अग्रनिरूपणं-निर्देशः. **2** दैववादः, दैवपरता अदृष्ट-प्रारब्ध-वादः, दैष्टिकता. **-Predestinarian,** *s.*: दैवपरः, दैव-अदृष्ट-वादिन् *m* यद्भविष्यः, दैवायत्तः, दैष्टिकः.

Predetermine, *v. t.* पूर्व-अग्रे-निश्चि 5 U or निर्णी 1 P. **-ate,-ed,** *a.* पूर्वनिश्चित निर्णीत. **-ation,** *s.* पूर्व-अग्र-निश्चय संकल्पः-निर्णयः.

Predial, *a.* क्षेत्र, भूमि in comp.

Predicament, *s.* पदार्थः; वर्गः, जाति *f.* अवस्था, दशा, वृत्ति *f.*, भावः, स्थिति *f.* कष्टावस्था, दुः-स्थितिः, कृच्छ्रं.

Predicate, *v. t.* उद्दिश्य वद् 1 P or वच् 2 P or कथ् 10 or अभि-धा 3 U; विशि 7 P or c., वि-धा, निर्दिश् 6 P. **-*s.*** विधेयं वाच्यं, विशेषणं. **-ion,** *s.* विधानं, विशेषणं निर्देशः, अभिधानं. **-Predicable,** *a* वाच्य, अभिधेय.

Predict, *v. t.* पूर्व-अग्रे-कथ् 10 or वच् 2 or निरूप् 10, आ-समा-दिश् 6 P; कथ्, व 1 P, with words for 'Future,' q. v 'p. ed that she would be the sol wife of Hara' तां समादिदेशैकव भवित्रीं...हरस्य (K. I. 51); कथयत्यागामि नमप्यर्थं (Ka. 46) 'p. s (unforeseen events'. **-ion,** *s.* अनागतकथनं, भावि कथनं, आ-समा-देशः, भविष्यद्वादः. **-or,** पूर्ववादिन् *m.* अग्रनिरूपकः, सिद्धः; आदेष्टृ *n*

Predilection, *s.* पक्षपातः, पूर्वस्नेहः, अनु राग:; *See* **Partiality.**

Predispose, *v. t.* पूर्वं प्रवृत् c. or प्र-उद्युज् 7 A, 10, प्रवणीकृ 8 U; ex. by प्रवण उद्यत, उन्मुख, शील in comp.; 'p. ed t anger' क्रोध-प्रवण-शील. **-ition,** *s.* प्रावण्यं प्रवृत्ति *f.*, शीलं.

Predominate, *v. i.* प्र-भू 1 P, प्रबल-अधिक वरीयस्-*a.* भू 1 P, अतिरिच्-विशिष्-pass *See* **Excel. -Predominant,** *a.* प्रबल अतिरिक्त, प्रधान, विशिष्ट, अधिक, प्रभविष्णु **-ly,** *adv.* प्राधान्येन, प्रबलं, विशिष्टतया **-Predominance,** *a.* प्राबल्यं, प्राधान्यं आधिक्यं, अतिरेकः.

Pre-eminent, *a.* सर्वप्रधान, श्रेष्ठ, सर्वोत्कृ अग्रगण्य, परम, उत्तम, विशिष्ट, प्रमुख, अ ग्रणी, अग्रीय, वरेण्य; oft. by व्याघ्र शार्दूलः पुंगवः, ऋषभः, प्रकांडः, &c. i comp.: *See* **Excellent. -ly,** *adv.* परः प्रधानतः, विशिष्टं, सातिशयं, अत्यंतं, सविशे

-Pre-eminence, *s.* उत्कर्षः, प्राधान्यं, प्रमुखता, श्रेष्ठता, उत्तमता, अग्रगण्यत्वं, वैशिष्ट्यं.

Pre-emption, *s.* पूर्वक्रयः, पूर्वक्रयाधिकारः.

Pre-engage, *v. t.* पूर्वं प्रतिज्ञा 9 A, पूर्वं संकल्प् c. **-ment,** *s.* पूर्वसंकेतः-प्रतिज्ञा.

Pre-exist, *v. i.* पूर्वं भू 1 P('Be' q. v.) **-ence,** *s.* प्राग्भावः-जन्मन् *n.*-जीवनं. **-ent,** *a.* पूर्वभव-भूत.

Preface, *s.* आमुखं, प्रस्तावना, मुखबंधः, उपोद्घातः, वाङ्मुखं, उपन्यासः, प्रारंभः. *-v. t.* प्रस्तु 2 U, प्रस्तावनां लिख् 6 P or कृ 8 U. **-Prefatory,** *a.* प्रस्तावना-उपोद्घात-रूप.

Prefer, *v. t.* उन्नम् c. (नमयति), उत्कर्षं नी 1 P or प्राप् c., पुरस्कृ 8 U, उत्कृष्टपदे नियुज् 7 A, 10, प्रतिपत्तिं प्राप् c. **2** अधिकं रुच् 1 A or मन् 4 A or c. or प्रईप्स् 1 P; वृ 5 U or 10, (वरयति); gen. ex. by वरं-न with पुनः, च, तथापि; 'I p. death to disgrace': वरं मृत्युः न पुनरपमानः; वरं वंध्या भार्या न चाविद्वान् तनयः &c. **3** सम्-ऋ c. (अर्पयति), निविद् c., उपह 1 P; *See* **Offer. -able,** *a.* वरीयस्, श्रेयस्, गरीयस्; better ex. by (*v.*). **-ence,** *s.* अभिरुचि *f.*, अधिकानुरागः. **2** आदराधिक्यं, अधिकमानः; 'in p. to' विहाय, अतीत्य, अपेक्षया in comp. **-ment,** *s.* उन्नति *f.*, पदोत्कर्षः, प्रतिपत्ति *f.*, उत्कर्षः; स्थानोन्नतिः, प्रतिष्ठापदं, गौरवास्पदं.

Prefigure, *v. t.* प्रतिबिंबं दृश् c. **-ation,** *s.* पूर्वलक्षणं-दर्शनं.

Prefix, *s.* उपसर्गः. *-v. t.* पूर्वं आ-प्र-युज् 7 A, 10, पूर्वं-अग्रे-विन्यस् 4 U or नि-आ-धा 3 U or लिख् 6 P.

Pregnant, *a.* गर्भिणी, गर्भवती, सगर्भा, अंतर्वत्नी, आपन्नसत्त्वा, ससत्त्वा, धृत-रूढ-गृहीत-गर्भा, गर्भधारिणी; 'to be p.' गर्भ-आधा 3 U or धृ 1 P, 10, भू 1 P with (*a.*); 'a p. woman longing for things' श्रद्धालुः, दोहदवती. **2** अर्थयुक्त-गर्भ. **3** संपरि-पूर्ण, आढ्य-गर्भ in comp. **-Pregnancy,** *s.* गर्भः, दौर्हृदं, गर्भधारणं-ग्रहणं, गर्भिणीभावः; 'showed signs of p.' दौर्हृद-लक्षणं दधौ (R. III. 1); 'advanced in p.' कठोरगर्भा.

Prehistoric, *a.* प्राक्-पौराणिक-कालीन.

Prejudge, *v.* पूर्वं निर्णी 1 P or विचर् c. or निश्चि 5 U. **-ment,** *s.* पूर्वनिर्णयः-निश्चयः.

Prejudicate, *See* **Prejudge.**

Prejudice, *s.* दुराग्रहः, आ-,ग्रहः, चेतोविकारः-विक्रिया, वक्रीभावः, अविचारमति *f.*, अविचारपूर्वः निर्णयः. **2** पक्षपातः, संगः. **3** नाशः, क्षति *f.*, हानि *f.*, अपायः, अपकारः; *See* **Harm.** *-v. t.* विकृ 8 U, साचीकृ, आवृज् 10, पूर्वं प्रवृत् c. **2** अपकृ, नश् c., क्षण् 8 P; *See* **Injure. -ial,** *a.* हानि-क्षयकर (री *f.*), अहित, अननुकूल, अपकारक. **-ially,** *adv.* सापायं. सापकारं.

Pre-knowledge, *s.* पूर्वज्ञानं-बोधः.

Prelate, *s.* *See* **Bishop.**

Prelect, *v. t.* प्र-वच् 2 P, प्र-पठ् c. **-ion,** *s.* *See* **Lecture.**

Prelibation, *s.* पूर्वास्वादः, पूर्वभुक्ति *f.*

Preliminary, *a.* पूर्व-आदि-प्रथम in comp.; प्राथमिक (की *f.*). **2** पारिभाषिक (की *f.*), प्रस्तावनारूप. *-s.* (pl.) पूर्वकार्याणि, पूर्वविषयः. **2 Preface, Introduction,** q. v.

Prelude, *s.* प्रस्तावना, आमुखं, पूर्वरंगः. **2** आ-प्रारंभः, उपक्रमः. *-v. t.* प्रस्तु 2 U, प्रारभ् 1 A, उपक्रम् 1 A.

Premature, *a.* अकालपरिणत-पक्व, अपूर्णकाल, अपूर्णकालज, असामयिक-अ(आ)-कालिक-(की *f.*), अकाल-असमय in comp.; 'p. death' अकालमृत्युः. **2** साहसिन्, अकालसह; *See* **Rash. -ly,** *adv.* अपूर्णकालं, अकाले, असमये; 'p. born' अपूर्णकालः; 'p. bald' युवखलतिः. **-ness,** *s.* अकालिकत्वं.

Premeditate, *v. i.* पूर्वं संकल्प् c. or विचर् c. or चिंत् 10. **-ed,** *a.* पूर्वसंकल्पित-चिंतित, मति-बुद्धि-पूर्व, सांकल्पिक-सांकेतिक-(की *f.*), बुद्धिकृत. **-ion,** *s.* पूर्वसंकल्पः-विचारः-घटना.

Premier, *s.* प्रधानामात्यः, मुख्यमंत्रिन् *m.*, प्रधानसचिवः. *-a.* प्रधान, मुख्य, प्रमुख. **-ship,** *s.* प्रधानमंत्रिपदं.

Premise, *v. t.* उपन्यस् 4 U, उपक्षिप् 6 P, पूर्वं कथ् 10 or ब्रू 2 U or वद् 1 P, प्रस्तु 2 U or c., प्रस्तावनारूपेण कथ् or ख्या 2 P, प्र-उप-क्रम् 1 A. *-s.*, **-Premiss,** *s.* पक्षः, प्रतिज्ञा; 'major p.' उदाहरणं; 'minor p.' उपनयः. **-Premises,** *s.* गृहक्षेत्रादि, गृहपरिसरः.

Premium, *s.* लाभः, फलं, अधिकमूल्यं, पारितोषिकं.

Premonish, *v. t.* पूर्वं सूच् 10 or उपदिश् 6 P, प्रबुध् c. **-Premonition,** *s.* पूर्वबोधः, प्रबोधनं. **-Premonitory,** *a.* पूर्वबोधक, प्रबोधक.

Preoccupy, *v. t.* पूर्वं ग्रह् 9 U or भुज् 7 A or आक्रम् 1 U, 4 P. **-ation,** *s.* पूर्वभोगः-आक्रमः.

Preordain, *v. t.* पूर्वं प्रकल्प् c. or निर्दिश् 6 P.

Prepare, *v. t.* प्र-उप-परि-कल्प् c., सज्जीकृ 8 U, सं-,विधा 3 U, निर्मा 3 A, 2 P, घट् c. (घटयति), उप-प्र-युज् 7 A, 10 (medicines); संभृ 1, 3 U, उपकरणद्रव्यैः संयुज्; oft. by कृ; (food) प्रसाध् c., सिध् c. (साधयति),

संस्कृ, पच् 1 P, निष्पद् c.; (army) सन्नह् 4 P or c., आयुधैः उपकल्प् c.; (a book &c.) प्रणी 1 P, निर्मा, प्र-नि-बंध् 9 P, वि-,रच् 10; (lesson) शिक्ष् 1 A, पद् 1 P, अधि-इ 2 A, पारं गम् 1 P; तॄ 1 P (p. well). -v. i. उपकरणानि-द्रव्याणि-संभृ or कल्प् c. 2 सज्जीभू 1 P, उद्यत-उद्युक्त-सज्ज-सिद्ध-a. भू. -ation, s. उपकल्पनं, योजनं, साधनं, विधानं, सज्जीकरणं, वि-,रचनं-ना, करणं. 2 संभारः, संविधा, संविधानं, सिद्धि f., सिद्धता, सामग्री; 'marriage-p. s' विवाह-संभाराः; 'war-p.s.' युद्धसामग्री; तदुत्तिष्ठ गच्छावो गमनसंविधानाय वत्सस्य (Ka. 294) 'come, let us go to make p. s' &c. 3 योगः. 4 संस्कारः, निष्पत्ति f., सिद्धि f. -ative,-atory, a. उपक्रमोपकारिन्, उपक्रमानुकूल; उपकल्पक, प्रथम, आद्य. -s. उपक्रमसाधनं, सिद्धिसाधनं; better ex. by (v. t.). -ed, a. कृत, निर्मित, घटित, रचित, उपकल्पित, कल्पित, निष्पन्न, &c. 2 सिद्ध, सन्नद्ध, सज्ज, उद्यत, उद्युक्त. -edness, s. सिद्धता, सज्जता. -er, s. उपकल्पकः, साधकः, रचकः, संस्कर्तृ m.

Pre-payment, s. पूर्वदानं-शोधनं.

Prepense, a. चिंतितपूर्व, मतिपूर्व; *See* **Premeditated**; 'malice p.' द्रोहचिंता.

Preponderate, v. i. अतिरिच्-विशिष्-pass., भारेण-गौरवेण-अतिरिच् or वृध् 1 A, प्र-भू 1 P, अधिक-गुरुतर-a. भू. -**Preponderance**, s. आधिक्यं, अतिरेकः, प्राबल्यं, प्राधान्यं, प्रभावः, गौरवं. 2 अधिकभारः, भाराधिक्यं.

Preposition, s. उपसर्गः. -al, a. औपसर्गिक (की f.).

Prepossess, v. i. (चित्तं) आवृज् 10, ग्रहीकृ 8 U, आकृष् 1 P, साचीकृ. 2 पूर्वं अधि-इ 1 P or भुज् 7 A. -ed, a. (सद्यः) आकृष्टचित्त, ससंग, जातानुराग. -ing, a. (सद्यः) हृदयग्राहिन्, चित्ताकर्षिन् -ion, s. पक्षपातः, संगः, ग्रहः, प्रावण्यं, चित्ताकर्षणं. 2 पूर्वभोगः.

Preposterous, a. विपरीतक्रम, विपर्यस्त. 2 (अतीव) अयुक्त, असंगत, अनुपपन्न, असंबद्ध, अनर्थक. -ly, adv. अयुक्तं, असंगतं. -ness, s. वैपरीत्यं, क्रमविपर्यासः, अयुक्तता, असंगति f., असंबंधः.

Prepuce, s. शिश्नाग्रत्वच् f.

Pre-requisite, a. पूर्वाकांक्षित. -s. पूर्वाकांक्षा.

Prerogative, s. असाधारणाधिकारः, विशेषाधिकारः, विशेषशक्ति f., सत्ता.

Presage, v. t. पूर्वं सूच् 10 or आदिश् 6 P; *See* **Forebode, Predict.** -s. पूर्वसूचनं-ना, पूर्वलक्षणं-चिह्नं; *See* **Omen.**

Prescience, s. पूर्वज्ञानं, भविष्यद्विज्ञानं, भावि-अनागत-ज्ञानं, समवेक्षणं. -**Prescient**, a. भाविज्ञानिन्, अनागतवेदिन्; gen. ex. by पूर्वं ज्ञा 9 U or बुध् 1 P.

Prescribe, v. t. निर्दिश् 6 P, वि-धा 3 U, प्रकल्प् c., प्र-चुद् 10, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), नियम् 1 P. -ed, a. निर्दिष्ट, विहित, प्र-,चोदित, विध्यनुरूप, वैधिक, (की f.). -er, s. निर्देशकः, शास्तृ m. -**Prescript**, s. आदेशः, विधिः, आज्ञा, चोदनं-ना. -a. निर्दिष्ट, प्रकल्पित. -ion, s. कल्पः, योगः, अगदनिर्देशः, उपचार-औषध-विधिः. 2 विधिः, निर्देशः, आज्ञा, प्र-,चोदनं-ना, शासनं, वचनं. 3 चिर or बहुकाल-भोगः or भुक्ति f.; अनादिपरंपरा, अस्मार्तभोगः -ive, a. चिरकालभुक्त, अनादिपरंपरायात, चिरव्यवहारसिद्ध.

Present, v. t. उपह् 1 P, उपहारं दा 3 U, प्र-उप-दा 3 U, ऋ c. (अर्पयति), विदॄ 1 P, वि-अर्ण् 10, उपढौक् c., प्रति-पद् c., (oblation) निर्वप् 1 P, निविद् c., उत्सृज् 1 P; *See* **Offer.** 2 उपन्यस् 4 P, उपक्षिप् 6 P, पुरो निधा 3 U. 3 (oneself) आविर्भू 1 P, उप-स्था 1 P, प्रादुर्भू, दृश्-लक्ष्-pass., प्रविश् 6 P, आत्मानं दृश् c. 4 दर्शनं कृ c., प्रविश् c.; दृश् c., पुरस्कृ 8 U, समक्षं नी 1 P; सकाशं नी; 'p. me to the king' मां राजदर्शनं कारय. 5 प्रदृश् c., आविष्कृ, व्यंज् 7 P or c., प्रकटयति (D.), प्रकटीकृ, सूच् 10; oft. ex. by **Appear** q. v.; 'the court p. ed a gay scene' अधिकरणमंडपः सुतरां रमणीयो बभौ, रम्यालोक आसीत्; 'what a charming sight do these girls p.' अहो मधुरमासां (कन्यकानां) दर्शनं (S. 1), अहो मनोज्ञदर्शनः कन्याजनः; 'p. an appearance of' विडंबू 10, अनुकृ (with gen.). -a. प्रस्तुत, प्रकृत. 2 (Mind) सावधान, अभ्रांत, अव्यग्र, अशून्य, समाहित, अव्याकुल, निराकुल, असंभ्रम; प्रत्युत्पन्न. 3 विद्यमान, वर्तमान, आधुनिक-सांप्रतिक-(की f.), अधुनातन-इदानींतन-(नी f.). 4 सद्यस्क, तात्कालिक (की f.); अविलंबित; 'in the p. state' अस्यामवस्थायां; 'at p.', 'for the p. time' अधुना, सांप्रतं, इदानीं; *See* **Now.** 5 उपस्थित, सन्निहित, प्रत्यक्ष, संअभि-मुख (खी f.), समीपवर्तिन्; *See* **Near**; 'to be p.' उप-स्था 1 P, सन्निधा-pass., समीपं वृत् 1 A; 'you should be p.' त्वयोपस्थातव्यं, सन्निहितेन भाव्यं; 'to be p. in one's thoughts' हृदये-चित्ते-वस् 1 P. -s. भवत् n.; समतीतं च भवच्च भावि च (R. VIII. 78) 'the past, p. and future.' 2 वर्तमान-प्रस्तुत-कालः, तत्कालः, तत्क्षणः, आपातः. 3 (In grammar) लट्. 4 उपायनं, उपहारः, उपदा, प्र-,दानं, वितरणं, पारितोषिकं, उपग्राह्यं, प्राभृतं, प्रदेशनं, प्रीतिदानं; 'p. of money' दक्षिणा; *See* **Gift.** -able,

a. उपहार्य, देय, दर्शनीय, प्रवेश्य. **2** पांक्तेय, पांक्त्य, सभ्य. **-ation,** *s.* उपहरणं, अर्पणं, प्रतिपादनं, दानं; 'p. of an oblation' बलिदानं, निर्वपणं. **-ly,** *adv.* अधुना, संप्रति, सांप्रतं. **2** सपदि, अनंतरं, द्राक्, तत्क्षणं-णे, तत्काले, सद्यः, अचिरात्,झटिति, झिटिति. **-Presence,** *s.* संन्निधिः, समुपस्थिति *f.*, उपस्थानं, सांनिध्यं, सन्निधानं, प्रत्यक्षता, समक्षता, आभिमुख्यं; 'in the p. of' समक्षं, प्रत्यक्षं, संमुखं, साक्षात्, in comp. or with gen.; in the p. of fire' अग्निं साक्ष्ये आधाय (R. vi.:20); 'into the p. of' सकाशं-शे, समीपं-पे,अंतिकं, in comp.or with gen. **2** आकारः, आकृति *f.*, रूपं, शरीरसंस्था. **3** (Of mind) प्रत्युत्पन्नमति *f.*, प्रतिभा, प्रतिभानं, प्रतिभानवत्त्वं, समाहितत्वं, अव्यग्रता, असंभ्रमः, निराकुलत्वं; 'p.-chamber' दर्शनशाला, आस्थानं-नी.

Presentiment, *s.* पूर्वज्ञानं-बोधः-कल्पना; 'my mind has a p. of evil' मम मनः किमप्यशुभमाशंकते.

Preserve, *v. t.* रक्ष 1 P, त्रै 1 A, पा c. (पालयति), उद्-धृ 1 P, 10, गुप् 1 P, पा 2 P, तॄ c., अव् 1 P, परि-आप् desid. (ईप्सति), (इमां परीप्सुः दुर्जातिः M. 5). **2** सं-,भृ 3 U, पुष् c., संवृध् c., पा c. (पालयति). **3** सं-धा 3 U, उपस्कृ 8 U. **-s.** संधितं,उपस्करः, मिष्ट or संधित-फल or द्रव्यं. **2** वि(वी)तंसः, विहगस्थानं. **-ation,** *s.* सं-, रक्षा-क्षणं, त्राणं, स्थितिपालनं, गोपनं, तारणं. **-ative,** *s.* रक्षा, रक्षणं, रक्षण-त्राण-साधनं, त्रं-त्राणं in comp. **-***a.* रक्षक, पालक, तारक.

Preside, *v. i.* (Over) अधि-ष्ठा 1 P, अध्यास् 2 A, (with acc.); अधीश् 2 A, प्र-भू 1 P (with gen.); अवेक्ष् 1 A, अध्यक्षः-अधिपतिः-भू, अभिमन् 4 A; अग्न्याद्यभिमानिनीभिर्देवताभिः (S. B. 725) 'p.ing over fire &c.' **-ency,** *s.* अध्यक्षता, अधिष्ठानं, अधिकारः. **2** आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षपदं, अधीशत्वं, better by (*v.*); 'during his p.' तस्मिन्नधितिष्ठति. **3** मंडलं, भोगः, देशविभागः. **-ing,** *a.* अध्यक्ष, अधिष्ठातृ, अभिमानिन्, अधि pr.; 'the p. deity' अधिदेवता, अधिष्ठात्री देवता; 'the soul p. over the body' शरीराभिमानी आत्मा. **-President,** *s.* अध्यक्षः, अधिष्ठातृ *m.* अधीशः, अधि-,पतिः, अध्यासीनः, अधिकारिन्, *m.* प्रभुः, नायकः. **-ship,** *s.* आधिपत्यं, अध्यक्षता; *See* **Presidency.**

Press, *v. t.* पीड् 10, निः-आ-°, निष्कुष् 1 P, निर्द्रु 1 P, निर्दुह् 2 U; (together) संपीड्, संहन् 2 P, संद्रु, संकुच् 1 P, संपिंड् 10, संघट्ट् c. **2 Clasp,** q. v; 'p. ing him to the bosom' तं वक्षसा परिरभ्य; भुजाभ्यां आपीड्य 'p. ing in the arms' &c. **3** प्रेर् c., प्रचुद् 10, प्रणुद् 6 P or c., आकृष् 1 P, आकृ c. **4** निर्बंध् 9 P, अनु-अनुनिर्-बंध्, साग्रहं-निर्बंधेन-प्रच्छ् 6 P or याच् 1 A or अर्थ् 10 A, पुनः पुनः प्रच्छ्; *See* **Importune. 5** बलेन प्रवृत् c. or नियुज् 7 A, 10 or व्यापृ c. **6** बाध् 1 A, पीड्, क्लिश् 9 P, उद्विज् c., सं-परि-तप् c., व्यथ् c. (व्यथयति). **7** मुहुर्मुहुः-पुनः पुनः-उपदिश् 6 P or कथ् 10 or अनुशास् 2 P. **-***v. i.* समापत् 1 P, आ-अधि-क्रम् 1 U, 4 P, अभिद्रु 1 P; (against,) संघट्ट 1A, प्रतिहन् 2 P, अभ्याहन्; संघट्टयन्नंगदमंगदेन (R. vi. 73); 'making his Angada ornament p. against Indra's.' **2** सवेगं प्रगम् or प्रसृ 1 P, सरभसं उपसृप् 1 P or संगम् 1 A; 'p.-ing close to the rock' शिलायामात्मानं निबिडं-निरंतरं-संसंजयन्. **3** प्र-, बाध् 1 A; 'my time p. es' कालातिपातो मया नैव कर्तुं शक्यते; 'p. through' अतीत्य-अतिक्रम्य-गम्, उल्लंघ् 1 A, 10, निस्तॄ 1 P. **-***s.* पीडनं, निष्कर्षः. **2** मुद्रण-मुद्रायंत्रं. **3** पीडन-पेषण-यंत्रं. **4** जनसंकुलं-संमर्दः-लोकनिवहः. **5** निर्बंधः, पीडा, अतिभारः. **-er,** *s.* पीडकः, बाधकः. **-ing,** *a.* अतिनिर्बंधक, बाधक, अत्यवश्यक, अविलंब्य, अव्याक्षेप्य, विलंबाक्षम, अनतिपात्य; 'p. business of state' आशुसंपादनीयं-विलंबाक्षमं-राजकार्यं. **-ingly,** *adv.* निर्बंधेन, सनिर्बंधं, साग्रहं. **-ure,** *s.* पीडनं. **2** बलं, शक्ति *f.*, प्रभावः, वेगः, प्रवर्तनं, प्रेरणा, प्रणोदः, प्रोत्साहः. **3** भारः, पीडा, बाधा, क्लेशः; 'p. of business' कार्यभारः; having much p. of work' कार्यसमाकुल.

Prestige, *s.* दीर्घरूढा प्रतिष्ठा, चिरप्रतिष्ठितं गौरवं. **2** माया, इंद्रजालं.

Presto, *adv. See* **Quickly.**

Presume, *v. t.* (अविचार्य-अनिश्चित्य) तर्क् 10, सं-भू c., अनु-मा 3 A, 2 P. **2** धृष् 5 P, धर्षेण आक्रम् 1 U, 4 P, उत्सह् 1 A, प्र-भू 1 P; प्रगल्भ् 1 A, दृप् 4 P, साहसं कृ 8 U; कः पतिर्देवतामान्यः परिमार्ष्टुमुत्सहेत (S. 6) 'p. to lay hands on &c.'; तद्दोषनिरूपणं रूपं साहसं मा कुरु 'do not p. to find fault with him'. **-Presumption,** *s.* तर्कः, कल्पना, भावना, अनुमानं, ग्रहणं. **2** साहसं, धाष्टर्यं, प्रागल्भ्यं. **3** अवलेपः, दर्पः, अभिमानः, अहंकारः, गर्वः. **4** संभाव्यता, संभवः. **-Presumptive,** *a.* आनुमानिक (की *f.*), अनुमानसिद्ध, संभावित; 'p. proof' अनुमाननिर्णयः. **-Presumptuous,** *a.* साहसिक (की *f.*), धृष्ट, धृष्ण, प्रगल्भ. **2** अवलिप्त, अत्यभिमानिन्; 'a p. statement' साहसोक्ति *f.*, साहसं. **-ly,**

adv. साहसेन, धृष्टवत्, प्रगल्भं, सावलेपं, सगर्वं. **-ness,** *s.* धृष्टता, प्रागल्भ्यं; प्रतिभा, प्रतिभानं.

Presuppose, *v. t.* पूर्वं कॢप् c. or भू c. **-ition,** *s.* पूर्वकल्पना-भावना.

Pretend, *v.* अप-व्यप-दिश् 6 P, छलं-कपटं-व्याजं-कृ 8 U ध्वजीकृ; gen. ex, by मिथ्या, कृतक, कपट, व्याज, छद्म in comp. or by भू c., दृश् c.; 'p. ing to be asleep' सुप्तमिव आत्मानं संदर्श्य, व्याजसुप्त, सुप्तलक्षण, मिथ्यासुप्त; 'p. ing to be affected by poison' भावितविषवेगः; 'p. s not to hear' अश्रुतिमभिनयति; 'p. ing to be just' आर्यध्वजिन्-लिंगिन्; 'p. ed weeping' कपट-व्याज-रोदनं. **2** अभिमन् 4 A, मिथ्या मन्; 'he p. s to know everything' अहं सर्वज्ञोस्मीति तस्याभिमानः (अवलेपः). **3** मिथ्याहेतुं दृश् c. or वच् 1 P. **-ed,** *a.* छाद्मिक-कौटिक-(की *f.*), व्याज-कपट-छद्म-कूट-मिथ्या in comp.; 'p. ascetic' छद्मतापसः, तापसध्वजी-लिंगी; *See* **Hypocrite;** *See* (*v.*) also. **-edly,** *adv.* सकपटं, सव्याजं, छलेन, मिथ्या. **-ing,** *a.* **-er,** *s.* छाद्मिकः, कापटिकः, अभिमानी-ध्वजी-लिंगी-मन्यः-अभियोगी in comp.; 'p. in learning' पंडितंमन्यः, विद्याभिमानी; 'p. in religion' धर्मध्वजी, आर्यलिंगी, धार्मिकवेशधारी, कपटधर्मी; 'p. to the throne' राज्याभियोगी. **-Pretence,** *s.* व्याजः, अप-व्यप-देशः, छद्मन् *n.*, उपधिः, कपटं, छलं, उपधा, कूटः-टं, कैतवं, मिषं, मिथ्याहेतुः, निमित्तं. **2** अभिमानः, अभियोगः. **-Pretension,** *s.* अभिमानः, अभियोगः, स्वत्वप्रतिपादनं; 'lay p. s to' *See* **Claim.** **2** महत्त्वाकांक्षा, यशोलिप्सा, लोभः; 'p. s to the throne' राज्यं मदीयमिति प्रतिपादनं, राज्याभियोगः.

Preterite, *a.* भूत, परोक्ष; 'p. tense' लङ्.

Preterition, *s.* अतिक्रमः-मणं, अत्ययः.

Pretermit, *v. t.* *See* **Omit.**

Preternatural, *a.* अद्भुत, विलक्षण, निसर्ग-प्रकृति-बाह्य. **-ly,** *adv.* अद्भुतं, वैलक्षण्येन.

Pretext, *See* **Pretence** under **Pretend.**

Pretty, *a.* सु in comp., चारु, शोभन, कमनीय, वाम, सुंदर; *See* **Beautiful, Lovely.** *-adv.* ईषत्, स्तोकं, अल्पं; आ, कल्प, देश्य, देशीय in comp.; 'p. warm' मंदोष्ण, कोष्ण, कदुष्ण; 'p. clear' शुद्धकल्प-प्राय; 'p. ripe' आपक्व, पक्वप्राय. **2** (P. nearly) प्रायेण, प्रायशः, बहुशः, कल्प-भूयिष्ठ-प्राय in comp.; 'p. nearly finished' समाप्त-भूयिष्ठ &c. **-ly,** *adv.* चारु, सुंदरं, चारु-सु in comp. **-ness,** *s.* चारुता, सौंदर्यं, लावण्यं.

Prevail, *v. i.* अभिभू 1 P, प्र-भू, पराभू, पराजि 1 A, आक्रम् 1 U, 4 P; अति-शी 2 A, अतिरिच् pass., प्रबल-क्षम-*a.* भू; *See* **Excel.** **2** (In) प्रचलित-प्रवृत्त-*a.* भू, प्रचल्-र् 1 P, प्रवृत् 1 A; 'darkness p. ed everywhere' सर्वं तमोवृतं आसीत्. **3** सिध् 4 P, निष्पद् 4 A; 'p. with, on, or upon' अनुनी 1 P, प्रवृत् c., प्रोत्सह् c.; *See* **Persuade;** 'p. against' मूर्च्छ् 1 P, (मारुतस्य रंहः शिलोच्चये न मूर्च्छति R. II. 34). **-ing, -Prevalent,** *a.* प्रचलित, साधारणी-बहुली-भूत, प्रसिद्ध, प्रचल, प्रवृत्त, साधारण (णी *f.*); 'universally p.' सर्वत्र प्रचलित, सर्वप्रवृत्त 'long since p.' चिरप्रवृत्त. **2** प्रबल, प्रधान, अतिरिक्त, आधिकबल, प्रभविष्णु, सप्रभाव. **-ingly,** *adv.* प्राबल्येन, सप्रभावं. **-Prevalence,** *s.* प्रचारः, प्रवृत्ति *f.*, प्रचलनं, प्रसिद्धि *f.*, साधारण्यं. **2** प्राबल्यं, प्राधान्यं, आधिक्यं, अतिरेकः.

Prevaricate, *v. i.* सापह्नवं मिथ्योत्तरं दा 3 U, अप-व्यप-दिश् 6 P, छलं कृ 8 U, अपलप् 1 P, अप-नि-ह्नु 2 A, वाक्छलं कृ; 'when he p. ed' यदा वाक्यभेदान् बहूनकथयत् (Mu. 2). **-ing,** *a.* अपलापिन्, निह्नवकारिन्, व्यपदेशिन्. **-ion,** *s.* वाक्छलं, अपलापः, अप-नि-ह्नवः, व्यप-अप-देशः, वक्रोक्ति *f.*, छद्मवादः, उत्तराभासः.

Prevent, *v. t.* वृ c., नि-विनि-°, रुध् 7 U, प्रति-अव-नि°, प्रति-नि-धि 1 P, प्रतिकृ 8 U, बाध् 1 A, प्रतिबंध् 9 P, प्रतिषंभ् 9 P, प्रति-व्या-हन् 2 P, प्रत्या-ख्या 2 P, निवृत् c., अंतरायः-भू- परिपंथीभू 1 P; 'do not p. me from fighting' युध्यमानं मां मा रुंद्धि, युध्यमानस्य मेंऽतरायो मा भूः. **-ion,** *s.* प्रति-, रोधः, नि-, वारणं, प्रतिबंधः, प्रतिकारः, व्याघातः, प्रतिषेधः; 'p. is better than cure' प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं. **-ive,** *a.* हर (री *f.*), घ्न (घ्नी *f.*), in comp., निवारक, प्रतिबंधक, निरोधक. *-s.* वारणं, प्रतिबंधकं.

Previous, *a.* पूर्व, प्राग्भूत, भूत, गत, अतीत, पूर्ववृत्त-गत, प्राक् in comp. **-ly,** *adv.* पूर्वं, प्राक्, पुरस्तात्, पूर्व in comp.

Previse, *v. t.* अग्रेदृश् 1 P or नि-रूप् 10. **2** पूर्वं सूच् 10 or प्र-बुध् c. **-ion,** *s.* अग्रनिरूपणं-दृष्टि *f.*

Prey, *s.* आनिषं (fig. also); मांसं, भक्ष्यं, अन्नं, खाद्यं, भोज्यं; 'fell a p. to enemies' द्विषामामिषतां ययौ (R. XII. 11). *-v. i.* भक्ष्यं आ-अप-ह्नु 1 P. **2** (Upon) भक्ष् 10; संतप् c., बाध् 1 A, क्रमशः नश् c.

Price, *s.* मूल्यं, अर्घः, पण्यं, अवक्रयः, वस्न; 'high p.' महार्घः, बहुमूल्यं. *-v. t.* मूल्यं स्था c. (स्थापयति) or संकल्प् c. **-ed,** *a.* कृतमूल्य; 'high-p.' महार्घ-र्घ्य, बहुमूल्य.

दुर्मूल्य; 'low-p.' अल्पमूल्य. **-less,** *a.* अनर्घ-र्घ, अमूल्य.

Prick, *v. t.* व्यध् 4 P, निद्-,भिद् 7 P, तुद् 6 P, पीड् 10; व्यध् c. (व्यधयति), क्लिश् 9 P or c. **2** प्रेर् c., उत्तिज् प्रोत्सह् c., प्रणुद् 6 P or c. **3** (Ears) उन्नम् c. (नमयति), उच्छ्रि 1 U, स्तब्धीकृ 8 U; 'with ears p. ed' स्तब्धकर्ण. **-s.,** **-ing,** *s.* प्रतोदः, तोत्रं,तोदनं; सूचि शल्यं, कंटकः. **2** वेधः-धनं, तोदनं. **3** यातना, तीव्रव्यथा, आतंकः, शूलः-लं. **-ed,** *a.* विद्ध, भिन्न, शल्य-सूचि-विद्ध-भिन्न; 'p. at heart' भिन्न-विद्ध-मर्मन्. **-er,** *s.* वेधकः. **2** तोत्रं; *See* (*s.*).

Prickle, *s.* कंटकः, सूचि-ची *f.*, शल्यं, शूकं. **-y,** *a.* सकंटक, सशूक, बहुकंटक-शूक.

Pride, *s.* (Good) अभिमानः. **2** अहंकारः, गर्वः, उत्सेकः, अवलेपः, दर्पः, औद्धत्यं, मदः, मादः, आटोपः, अहंमानः, मानः, चित्तसमुन्नति *f.*, अवष्टंभः, चित्तोद्रेकः, स्मयः; (impudent) प्रागल्भ्यं, धृष्टता, प्रतिभा-भानं. **3** अलंकारः, अवतंसः, ललामं,अभिमानास्पदं-भूमिः. **-***v. t.* (Oneself upon) आत्मानं श्लाघ् 1 A or विकत्थ् 1 A, अभिमन् 4 A, or ex. by (*s.*); 'p.-ing himself on his learning' पंडितमानी, पंडितंमन्यः, विद्याभिमानी, जातज्ञानावलेपः; 'p. ing herself upon her beauty' रूपगर्विता. **-Proud,** *a.* (In a good sense) अभिमानिन्. **2** दृप्त, गर्वित, अवलिप्त, सगर्व, सदर्प, उत्सिक्त, उद्धत, उत्सेकिन्, अभिमानिन्, साटोप, साहंकार; अहंमानिन्, उत्-, मत्त, समुन्नद्ध; प्रगल्भ, धृष्ट, प्रतिभावत्, गर्वितचित्त, मदोद्धत; दर्पाधमात, स्मयाकुल. **3** (Building &c.) उत्तुंग, प्रोच्छ्रित, विशाल, सप्रताप; 'p. of one's birth' कुलाभिमानिन्; रूपगर्वित, यौवनोन्मत्त,&c.; 'to be p.' दृप् 4 P गर्व 1 P, प्रगल्भ् 1 A. **-ly,** *adv.* सदर्प, सगर्व, सावलेपं, साटोपं, साहंकारं, उद्धतं.

Priest, *s.* (Family) पुरोहितः, पुरोधस् *m.* कुलाचार्यः. **2** (Sacrificial) ऋत्विज् *m.*, याजकः, अध्वर्युः,होतृ *m.* याज्ञिकः. **3**(Vedic) श्रोत्रियः, मंत्रविद् *m.*, ब्राह्मणः, द्विजः, विप्रः. **4** आचार्यः, गुरुः, उपाध्यायः, पुरोहितः, धर्माचार्यः, धर्माध्यक्षः. **5** (Of a deity) पूजकः, उपासकः, अर्चकः; 'p.-craft' उपाध्यायछलं-कैतवं; 'p.-ridden' पुरोहिताधीन. **-ess,** *s.* होत्री, याजिका. **-hood,** *s.* पौरोहित्यं, उपाध्यायपदं-वृत्तिः *f.*, **2** पुरोहिताः,पुरोहित or याज्ञिक-गणः or वर्गः, पौरोहित्यं. **-ly,** *a.* याजकीय, पौरोहित्यसंबंधिन्, (*s.*) in comp.

Prig, *s.* दांभिकः, दंभिन् *m.*, रूपगर्वितः. **-gish,** *a.* दांभिक (की *f.*), आत्माभिमानिन्.

Prim, *a.* अतिविनीत, अतिसूक्ष्म.

Prime, *s.* आदिः, आरंभः, पूर्व-प्रथम-भागः. **2** उत्तमदशा, प्रौढता, उत्तमभागः-अंशः; 'in the p. of youth' प्रथमे वयसि; the p. of youth' प्रथमं वयः, नव-अक्षत-यौवनं, यौवनश्रीः; 'being in the p. of youth' अक्षत-नव-यौवन. **-***a.* प्रथम, आद्य. **2** मुख्य, प्रधान, प्रमुख, अग्र्य; 'p. minister' मुख्य-मंत्री, प्रधानामात्यः, महामंत्री. **3** उत्कृष्ट, श्रेष्ठ, परम, उत्तम, विशिष्ट; *See* **Principal.** **-ly,** *adv.* प्रथमं, श्रेष्ठं. **-ness,** *s.* उत्तमता, विशिष्टता. **-Primary,** *a.* प्रथम, आद्य, आदिम, पूर्व, मौल (ली *f.*), मूल-आदि in comp.; 'p. cause' आदिकारणं-बीजं, निदानं, मूलहेतुः; 'p. sense' मूलार्थः. **2** प्रधान, मुख्य, प्रमुख, अग्र्य; *See* **Prime.** **-ily,** *adv.* प्रथमं-मतः, आदौ, पूर्वं, मुख्यशः, प्राधान्येन. **-iness,** *s.* प्रथमता, प्राधान्यं. **-Primate,** *s.* प्रधानोपाध्यायः. **-Primer,** *s.* प्रथम-आरंभ-पुस्तकं. **-Primeval,** *a.* आद्य, आदिम, प्राक्कालीन, पूर्वकालीन, प्राक्तन (नी *f.*), मौलिक-प्राथमिक- (की *f.*). **-Primitive,** *a.* प्राथमिक, प्रथमं, आद्य; *See* **Primeval.** **2** मूल in comp., अव्युत्पन्न; *See* **Primary.** **3** प्राक्तनमार्गसेविन्. **-ly,** *adv.* आदौ, आरंभे, प्रथमं-मतः. **2** प्राक्तनव्यवहारानुसारेण.

Primogenial, *a.* प्रथम-आदि-जात, मूल in comp.

Primogenitor, *s.* प्रथम-कुल-पुरुषः. **-Primogeniture,** *s.* पूर्वजत्वं, ज्येष्ठत्वं, अग्रजत्वं, वयोज्येष्ठता.

Primordial, *a.* आद्य; बीजभूत, मौल (ली *f.*), *See* **Primeval.**

Prince, *s.* कुमारः, राजपुत्रः-सुतः, युवराजः. **2** नृपः, राजन् *m.*, पार्थिवः; *See* **King.** **3** भर्तृदारकः, कुमारः, (in dramas). **-dom,** *s.* राज्यं, राष्ट्रं, विषयः. **2** यौवराज्यं. **-like,** **-ly,** *a.* राजयोग्य-सदृश (शी *f.*),राजार्ह,नृपोचित,नृपोपम, राजकीय, प्रतापवत्, ऐश्वर्यवत्; प्रताप-वैभव-शालिन्. **2** राजवंश्य, राजकुलज; 'p. birth' राजवंशप्रसूतिः; 'p. merits' राजोचिता गुणाः **-Princess,** *s.* कुमारी, राजपुत्री, नृपात्मजा, नृपसुता; भर्तृदारिका.

Principal, *s.* अध्यक्षः, अधि-,पतिः, नायकः, मुख्यः; *See* **Leader.** **2** मूलं,मूलधनं, नीवी *f.*, परिपणः. **-***a.* मुख्य, परम, प्रधान-वर in comp., प्रमुख, अग्र, अग्रच्च, प्रवर, श्रेष्ठ, विशिष्ट, उत्कृष्ट, उत्तम, अनुत्तम, वर्य, वरेण्य, परार्ध्य, अग्रि(ग्री)य, प्राग्रहर; नायक, अग्रणी, मुखर, धुर्य, धुरीण, धूर्वह, धुरंधर; oft. ex. by व्याघ्र, पुंगव, ऋषभ, कुंजर, सिंह, शार्दूल, नाग, प्रकांड, in comp.; *See* **Excellent,** 'p. door' सिंहद्वारं; 'p. queen' अग्र-पट्ट-महिषी; 'p. minister' प्रधानामात्यः. **-ity,** *s.* राष्ट्रं, प्रदेशः, मंडलं,

राज्यं. **-ly,** *adv.* प्रधानतः, प्राधान्येन, मुख्यशः, विशेषतः, विशेषेण.

Principle, *s.* तत्त्वं, मूलतत्त्वं, बीजं, सारः. **2** कारणं, हेतुः, आदिबीजं-हेतुः, मूलं, अंगं, अवयवः, साधनं, मूलांगं-द्रव्यं. **3** नियमः, विधिः, सूत्रं, उत्सर्गः, स्थिति *f.*, व्यवस्था. **4** गुणः, भावः, धर्मः, स्वभावः. **5** क्रमः, रीति *f.*, मार्गः, मर्यादा, धारा, पद्धति *f.* **6** आधारः, आश्रयः, उपष्टंभः, मूलं; (opp. of practice) आगमः, शास्त्रं; ' grounded in p. s ' आगमिन्, शास्त्रनिपुण, 'having good p.s ' सुनियमनिष्ठ, सुवृत्त; ' of bad p- s.' ; खंडितवृत्त, भ्रष्टचरित.

Print, *v. t.* मुद्रयति (D.). अंक् 10. मुद्राक्षरैः अंक्. **-s.** चिह्नं, अंकः, मुद्रा; ' foot-p. पदं, पदमुद्रा-चिह्नं. **2** मुद्रणयंत्रं. **3** मुद्रणं; 'in p.' मुद्र्यमाण. **-ed,** *a.* मुद्रित, मुद्रांकित, मुद्राक्षरांकित. **-er,** *s.* मुद्रकः; मुद्रणकृत् *m.* **-ing,** *s.* मुद्रणं, मुद्रांकनं, ' p.-house ' मुद्रणयंत्रालयः, मुद्रणशाला; ' p.-press ' मुद्रणयंत्रं.

Prior, *a.* प्रधान, गरीयस्, गुरुतर, पूर्व, अग्र्य, आदिम, आद्य, पूर्व-आदि-प्राक् in comp.: ' p. existence ' प्राग्भावः, पूर्वं जन्म; ' p. and subsequent ' पूर्वापर, परापर, परावर. **-s.** मठाध्यक्षः, मठाधिपतिः, विहारपालः. **-ity,** *s.* पूर्वता, प्रथमता. **2** (Of rank) अग्रपदं-मानः; श्रेष्ठपदं, प्राधान्यं. **-y,** *s.* मठः-विहारः, आश्रमः.

Prism, *s.* क्रकचायतं. **-Prismatic,** *a.* क्रकचायत.

Prison, *s.* कारा, बंदिशाला-गृहं, बंधनालयः, कारागृहं, चारः-रकः, गुप्तिस्थानं; ' escaped from the p. ' बंधनं भित्त्वा पलायांचक्रे; ' keep in p. ' बंधने निरुध् 7 U. **-er,** *s.* बंदि-दी *f.*, कारागुप्तः, रुद्धः, कारागारस्थः. **2** (Of war) युद्धगृहीतः.

Pristine, *a.* प्राक्तन (नी *f.*), पुराण, पूर्व, पूर्वकालिक (की *f.*), प्राचीन, प्राक्कालीन.

Private, *a.* विजन, विविक्त, निर्जन, एकांत, निभृत, निःशलाक. **2** स्व, आत्मीय, असाधारण (णी *f.*). असामान्य, विविक्त, स्व-आत्म in comp. **3** गुप्त, गूढ, रहस्य, प्र-,छन्न, अप्रकट, अव्यक्त, रहस्-मिथः-अंतः-in comp. **4** अनधिकारिन् अनधिकारिक (की *f.*); ' p. profit ' आत्महितं, स्वलाभः; ' p. road ' गूढ-प्रच्छन्न-मार्गः; ' p. door' अंतर्द्वारं, गूढद्वारं, प्रच्छन्नं; ' p. apartments' अंतःपुरं, अवरोधगृहं, ' अंतर्गृहं; ' now is the time to be p. ' रहस्यमधुना (Bh. II 97); ' p. talk ' रहःसंकथा, मिथोजल्पः; ' p. parts ' गुह्यं, उपस्थः; ' p. room अंतःशाला-कोष्ठः, उपरोधकं. **-s.** सैनिकः. **-ly,** 'in p. ' *adv.* रहः, रहसि, मिथः, रहस्ये, निभृतं, विविक्ते, एकांते, विजने, उपांशु, गूढं, प्रच्छन्नं, गुप्तं, अप्रकाशं, अप्रकटं. **-ness, :Privacy,** *s.* रहस् *n.*, विविक्तं, विजनं, रहोभावः, विविक्त-एकांत-वासः; रहस्यं, गुप्तता, छन्नता, अप्राकाश्यं. **2** रहः-स्थानं-स्थलं, विविक्त-निर्जन-स्थानं, निर्जनदेशः.

Privation, *s.* अभावः, विरहः, राहित्यं, हानि *f.*, क्षयः, लोपः, नाशः. **2** कष्टं, कृच्छ्रं, आपद्-विपद् *f.* **3** आहारविरहः, आहाराभावः, सुख-साधनलोपः, अन्नवस्त्रहानिः. **-Privative,** *a.* हानि-क्षय-लोप-कर (री *f.*). **2** अभावात्मक, अभावरूप, अभाववाचिन्. **-s.** अभाव-शब्दः, नञ्पदं. **-ly,** *adv* अभावरूपेण.

Privilege *s.* विशेषाधिकारः, असामान्याधिकारः, स्वाधिकारः, अधिकारः, स्वत्वं. **-v.** *t.* विशेषाधिकारं दा 3 U. **-ed,** *a.* अधिकार-विशिष्ट, साधिकार, विशेषाधिकारयुक्त.

Privy, *a.* गूढ, प्रच्छन्न, विविक्त, रहः in comp.; *See* **Private.** **2** (To) संसर्गिन्, सहाय, सहकारिन्; सहज्ञानिन्, सहवेदिन्; ' p. council ' गूढसभा; ' p. councillor ' गूढसभासद्. **-s.** शौचस्थानं-कूपः, उच्चार-प्रस्रावस्थानं. **-ly,** *adv.* रहसि, गूढं; *See* **Privately.** **-Privity,** *s.* सहकारिता, सहायता, संसर्गः, सहज्ञानं. **2** गुह्य or गुप्त-स्थानं or इंद्रियं, अधोंगं.

Prize, *s.* पारितोषिकं, उपायनं, प्रतिफलं. **2** रत्नं, बहुमूल्यं वस्तु, महार्घद्रव्यं. **3** युद्धजितं धनं-द्रव्यं. **4** जय or सिद्धि-फलं or लाभः. **5** स्पर्धा-पण-जेयं, पणः; ' p.-fighter ' मल्लः; 'p.- fighting ' मल्लयुद्धं, स्पर्धायुद्धं. **-v.** *t.* बहु मन् 4 A, अवेक्षया पा c. (पालयति), संमन् c. **2** मूल्यं-अर्घं-निरूप् 10 or निर्णी 1 P. **-ed,** *a.* बहुमत, अभीप्सित, इष्ट.

Pro, *Prefix,* प्रु, अग्रे; ' p. s and cons.' विधिनिषेधपक्षौ.

Probable, *a.* संभाव्य, सत्यसंकाश; gen. ex. by सं-भू 1 P, उप-पद् 4 A, युज् pass. or by (*adv.*); ' It is p. ' एतत् उपपद्यते, संभवति, युज्यते, स्याद्धाम एवं. **-Probably,** *adv.* प्रायेण, प्रायः, प्रायशः, किल, नाम, स्यात्; by pot. pass. part. of भू; एतेन मम प्रियमित्रेण भाव्यं ' he is p. my dear friend. ' **-Probability,** *s.* संभवः, संभाव्यता, अनुमानं, better by (*adv.*).

probate, *s.* मृतलेखप्रमाण.

Probation, *s.* परीक्षा-क्षणं. **-ary,** *a.* परीक्ष्यमाण. **-er,** *s.* परीक्ष्यमाणः; अंतेवासिन् *m.*, नवशिष्यः, प्राथमकल्पिकः.

Probe, *s.* शलाका, एषणी. **-v.** *t.* शलाकया परीक्ष् 1 A. **2** निपुणं-सूक्ष्मं-परीक्ष् or आलोच् 10. **-ator,** *s.* परीक्षकः. **-ing,** *s.* क्षतपरीक्षणं.

Probity, *s.* *See* **Honesty.**

Problem, *s.* प्रश्नः, विकल्प or विवाद-प्रश्न or विषयः. **2** कृत्यं, उपपाद्यं. **3** (Question) उद्देशकः (in Math.); 'its solution' न्यासः (Lit.). **-atical,** *a.* संदिग्ध, अनिश्चित, वैकल्पिक (की *f.*).

Proboscis, *s.* प्रोथः, करः, शुंडा, हस्तः.

Proceed, *v. i.* प्रचल् 1 P, प्र-या 2 P, प्रगम् सू 1 P, अग्रे गम्, प्र-स्था 1 A. **2** प्रवृत् 1 A, न विरम् 1 P; 'the play still p. s' क्रीडा अद्यापि प्रवर्तते एव. **3** पुनः वक्तुं प्रवृत्. **4** प्रवृत्, आरभ् 1 A, प्र-उप-क्रम् 1 A; (with) प्रस्तु 2 U or c., प्रवृत् c., (प्रारब्धं) सं-पद् c., निष्पद् c., निर्वह् c.; 'p. with your tale' ततस्तः, ततः, परं कथय; 'p with the matter at issue' प्रस्तूयतां विवादवस्तु (M. 2); 'you may p. with your dinner preparations in honor of the worthy Brāhmaṇas' प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः (Mu. I). **5** प्र-उत्-सं-भू 1 P, प्रवृत्, उत्पद् 4 A. प्र-,जन् 4 A, उद्-इ 2 P, निः-सृ, निर्गम्; oft. ex. by कारणं, मूलं, निमित्तं, हेतुः; 'from what cause does thy disorder p.' किंनिमित्तं ते संतापः (S. 3). **6** (Against) अभियुज् 7 A, 10, राजकुले निविद् c. **-ing,** *a.* उत्पन्न, जात, प्रभव, उद्भव, उत्थित, मूल, कारण, निमित्त, हेतु in comp. *See* (*v.*). **-s., -Procedure,** *s.* कार्यं, व्यवहारः, व्यापारः, चरितं, चेष्टितं, आचारः, वृत्तं, कृति *f.*, विधानं, अनुष्ठानं. **2** रीति *f.*, क्रमः, संप्रदायः, मार्गः, पर्यायः; 'legal p.' व्यवहारविधिः, व्यवहारक्रमः. **-Proceeds,** *s.* उत्पन्नं, उदयः, लाभः, फलं. **-Process,** *s.* प्रसरः, प्रगमः, प्रवृत्तिः, -यार्णं. **2** क्रमः, रीतिः, मार्गः, पर्यायः, विधिः, गतिः, परिपाटि-टी *f.*, सराणि-णी *f.*, पद्धति *f.* **3** व्यवहारः, कार्यं; 'in p. of time' कालक्रमेण, दिनेषु गच्छत्सु, गच्छता कालेन. **-Procession,** *s.* यात्रा, जन or लोक-यात्रा or श्रेणी. **2** प्रगमनं, प्रस्थानं, प्रचलनं, प्रवृत्तिः. **-al,** *a.* यात्रारूपं.

Proclaim, *v. t.* घुष् 10, उत्-वि°-, प्र-ख्या c. (ख्यापयति), प्रकाश् c., प्रकटयति (D.), प्रकटीकृ, कृत् 10, उच्चैस् c. **2 Outlaw,** q. v. **-er,** *s.* घोषकः, प्रख्यापकः. **-Proclamation,** *s.* घोषः-णं-णा, ख्यापनं, प्रकाशनं, उत्कीर्तनं; 'written p.' घोषणपत्रं, राजाज्ञापत्रं.

Proclivity, *s.* प्रावण्यं, प्रवृत्ति *f.*, शीलता in comp. **-Proclivious,** *a.* प्रवण, शील in comp.

Procrastinate, *v.* विलंब् 1 A, व्याक्षिप् 6 P, कालं क्षिप् or हृ 1 P, चिर(रा)यति (D.), मंदायते (D.). **-ion,** *s.* विलंबः, दीर्घसूत्रता, व्याक्षेपः, कालयापनं-हरणं-क्षेपः. **-or,** *s.* दीर्घ-सूत्रः-त्रिन् *m.* चिरक्रियः.

Procreate, *v. t.* प्र-सू 2, 4 A, उत्पद् c., जन् c. (जनयति). **-ion,** *s.* प्रसवः, प्रसूति *f.*, जननं, उत्पत्ति *f.*, प्रजोत्पादनं. **-ive,** *a.* उत्पादक, सावक, जनयितृ. **-or,** *s.* जनकः, उत्पादयितृ *m.*

Proctor, *s.* प्रतिहस्तः, प्रातीनिधिः.

Procumbent, *a.* शयान, पतित.

Procure, *v. t.* आ-नी 1 P, सं-पद् c., घट् c. (घटयति). **2** लभ् 1 A, आप् 5 P, अधिगम् 1 P, विद् 6 U, आ-समा-सद् c.; *See* **Get. -er,** *s.* प्रापकः, संपादकः. **3** विटः, नर्मसचिवः, संचारकः, कुंडाशिन् *m.* **-ess,** *s.* कुट्(ट्टि)नी, शंभली, दूती-तिका, संचारिका, सु-,रततालीं.

Prodigal, *a.* मुक्तहस्त, अति-अमित-बहु-व्ययिन्, उत्सर्गिन्, अतिव्ययशील-पर, अतित्यागिन्. **-s.** मुक्तहस्तः, व्ययपरः. **-ity,** *s.* अतिव्ययः, अपचयः, बहु-अमित-व्ययः, अतित्यागः, अत्युत्सर्गः, अर्थोत्सर्गः, मुक्तहस्तत्वं. **-ly,** *adv.* महाव्ययेन, मुक्तहस्तेन, अत्युत्सर्गेण.

Prodigy, *s.* अद्भुतं; अद्भुत or अपूर्व-विषयः or वस्तु, उत्पातः, महाश्चर्यं, अनन्यसाधारणं वस्तु. **2** (Of persons) अद्भुतशक्ति, अद्भुतबुद्धिसंपन्न. **-ious,** *a.* महाप्रमाण, अतिमहत्, बृहत्, विकट-राक्षस-शरीर, अद्भुताकार; *See* **Giant. 2** अद्भुत, अपूर्व, विलक्षण, विचित्र, आश्चर्य **-iously,** *adv.* अद्भुतं, साश्चर्यं. **-iousness,** *s.* अद्भुतता, अतिमहत्त्वं.

Produce, *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, उत्पद् c., जन् c. (जनयति), उत्-सं-भू c., साध् 5 P or c., कृ 8 U, वि-धा 3 U, कल्पय् c., घट् c., (घटयति), वि-,रच् 10. **2** प्र-,सू 2, 4 A, उत्पद् c., सं-प्र-जन् c. **3** प्र-,दृश् c., आ-उपा-नी 1 P, प्रसू c., पुरस्कृ, पुरोनि-धा, अग्रे स्था c. (स्थापयति) or निविश् c., आविष्कृ, प्रकटीकृ, निष्कृष् 1 P. **4** प्र-,दा 3 U. **5** वृध् c. **-s.** फलं, उत्पन्नं, लाभः, उत्पत्ति *f.*, प्रसवः. **-ed,** *a.* उत्पन्न, उत्पादित, निर्मित, घटित, सृष्ट, जनित, जात, उद्भूत; 'to be p.' जन् 4 A, उत्पद् 4 A, उत्था 1 P, सं-उद्-भू 1 P; *See* **Arise;** gen. ex. by ज, जात, जन्य, प्रभव, उद्भव, हेतु, प्रवृत्त, प्रयुक्त in comp.; 'p. from water' अंभोज, जलोद्भव, &c.; 'p. from flowers' कुसुमभव &c. **-er,-ing,** *s.*, *a.* उत्पादक, प्रसविन्, प्रद, द, दायिन्, आवह, कारिन्, कर (री *f.*), in comp. **-Product,** *s.* फलं, उत्पन्नं, लाभः. **2** परिणामः, फलं, उत्तरफलं. **3** गुणनफलं, वधः, घातः, फलं, गुणाकारः. **-ion,** *s.* उत्पादनं, निर्माणं, सृष्टि *f.*, घटनं, विधानं, निष्पादनं. **2** जननं, उत्पत्तिः, प्रसवः, उद्भवः, संभवः, जन्मन् *n.* **3** निर्मितद्रव्य-वस्तु, शिल्पनिर्माणं. **-ive,** *a.* शस्यप्रद-दायिन्, सफल, अवंध्य. **2** उत्पादक; दायिन्,

द, प्रद, कारिन्, आवह in comp ; 'p. of gain' लाभप्रद, लाभावह. 3 लाभ or फल-प्रद

Proem, *s. See* **Preface.** [or कर.

Profane, *v. t.* अपवित्रीकृ 8 U, दुष् c. (दूषयति). 2 लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अतिचर् 1 P. 3 **Contemn,** q. v. –*a.* अपवित्र; अपुण्य, अमेध्य, अशुद्ध; not **Holy** q. v. 2 अधार्मिक (की *f.*), धर्म-ईश्वर-द्वेषिन्, धर्म-ईश्वर-निंदारूप. 3 असंस्कृत, अप्रतिष्ठित, संस्कारहीन. 4 लौकिक-सांसारिक-प्रापंचिक-(की *f.*). –**ation,** *s.* दूषणं, अपवित्रीकरणं, अतिक्रमः-मणं. –**ly,** *adv.* धर्मनिंदापूर्वं, अधार्मिकवत्. –**ness,** *s.* धर्म or ईश्वर-निंदा- or द्वेषः, धर्म or ईश्वर-अवज्ञा or अतिक्रमः.

Profess, *v. t.* प्रति-ज्ञा 3 A, प्रकाश् c., प्रतिज्ञापूर्वं कथ् 10 or वद् 1 P, स्वी-अंगी-कृ 8 U, उ(ऊ)रीकृ, अभ्युपगम् 1 P. 2 छद्म-छलं-कृ, दृश् c., भू c.; *See* **Pretend;** oft. by नाम; तव कन्या नाम भवेयं (D. K. II. 5) 'I shall p. myself to be your daughter'. 3 उद्यम् 1 A, चेष्ट् 1 A. –**ed,** *a.* स्वीकृत, अंगीकृत, प्रकाशित, प्रकटित, व्यक्तोदित, प्रकाश. –**edly,** *adv.* प्रतिज्ञापूर्वं, प्रकाशमेव, सप्रतिज्ञं. –**ion,** *s.* प्रतिज्ञा, उक्ति *f.*, वचनं, अंगी-स्वी-कारः, प्रकाशवादः-वचनं, ख्यापनं. 2 **Pretension,** q. v.; 'p. s of love' कृत्रिमप्रीतिः, अलीकः रागाविर्भावः. 3 वृत्ति *f.*, आ-उप-जीविका, आजीवः, व्यवसायः, व्यापारः; 'military p.' शस्त्राजीवः, क्षत्र-वृत्तिः. –**ional,** *a.* वृत्तिमत्, व्यवसायिन्, (*s.*) in comp. –**or,** *s.* अध्यापकः, गुरुः. 2 ख्यापकः, प्रकाशकः, प्रतिज्ञातृ *m.*, स्वीकर्तृ *m.* –**orship,** *s.* अध्यापकपदं-पदवी.

Proffer, *v. See* **Offer.**

Proficient, *a.* प्रवीण, कुशल, निपुण, अभिज्ञ, विचक्षण, पारंगत, अभ्यंतर, निष्णात, व्युत्पन्न, लब्धप्रतिष्ठ, पटु. –**Proficience,-cy,** *s.* प्रावीण्यं, वैचक्षण्यं, प्रतिष्ठा, कौशलं, पाटवं; 'has attained p. in all sciences' सर्वशास्त्रेषु परां प्रतिष्ठां गतः, परं कौशलमवाप, सकलशास्त्रपारंगतः.

Profile, *s.* पार्श्वदृश्यं, अर्धमुखदर्शनं.

Profit, *s.* लाभः, हितं, उपकारः, अर्थः, कल्याणं. 2 फलं, लाभः, आयः, उदयः, वृद्धि *f.*, कलांतरं, लभ्यं; 'p. and loss' लाभालाभौ; 'capital with p. thereon' मूलकलांतरे. –*v. t.* हितमावह् 1 P, उपकृ 8 U, हिताय भू 1 P. –*v. i.* (Oneself) फलं-लाभं-प्राप् 5 P or विद् 6 U. 2 वृध् 1 A, उन्नतिं-उत्कर्षं-या 2 P, प्र-उप-चि pass.; *See* **Improve.** –**able,** *a.* लाभ-अर्थ-कर (री *f.*), लाभप्रद, लाभ-फल-द, फल-लाभ-आवह. 2 हित, हितकर, हितावह, उपयुक्त, उपकारिन्, सोपकार. –**ableness,** *s.* साफल्यं, फलदता, उपयुक्तता. –**ably,** *adv.* सलाभं, सफलं, सहितं, असुधा. –**less,** *a.* निष्फल, अफल, अहित, व्यर्थ, निरर्थक.

Profligate, *a.* खंडितवृत्त, दुश्चरित्र, दुराचार, पाप-निरत-अभिनिविष्ट, व्यसानिन्, दुर्वृत्त, भ्रष्ट-नष्ट-चरित्र, भोग-विषय-आसक्त. –*s.* व्यसानिन् *m.* लंपटः, विषयिन् *m.* भोगासक्तः. –**ly,** *adv.* सव्यसनं, दुर्वृत्ततया. **Profligacy,** *s.* व्यसनिता, भ्रष्टचरितं, दुराचारः, भ्रष्टता, भोगासक्ति *f.*, दुर्वृत्तता.

Profound, *a.* प्र-,गाढ, अतिग(गं)भीर, घन, अगाध. 2 परम, गाढ, घन, अत्यंत, सु-अति-pr.; 'p. respect' परमादरः, आदरातिशयः. 3 गहन, नि-,गूढ, गूढार्थ, दुर्बोध, दुर्ज्ञेय, परमगहन. 4 (Of persons) निष्णात, पारंगत, परम, व्युत्पन्न, अभिनिविष्ट, गूढतत्त्वज्ञ. –**ly,** *adv.* गंभीरं, गाढं, अत्यंतं, भृशं, सु-अति pr. –**ness,-Profundity,** *s.* गांभीर्यं, अगाधता. 2 घनता, गाढता. 3 गहनता, गूढता. 4 अभिनिवेशः.

Profuse, *a.* प्रचुर, प्रभूत, अपरिमित, विपुल, बहु, अत्यधिक, अतिरिक्त, समृद्ध, उद्रिक्त, अतिशय-सु-अति in comp. 2 मुक्तहस्त, अतिव्ययिन्, व्ययपर; *See* **Prodigal;** 'he is a p. writer' वाग्उपचयप्रियः, प्रचुरवाक्यानि लेखे प्रयोजयति. –**ly,** *adv.* प्रचुरं, भृशं, भूरि, बाहुल्येन, अत्यंतं, सु-अति pr.; अतिव्ययेन, अपरिमितं. –**ness,-Profusion,** *s.* अतिव्ययः, अमितव्ययः, अत्युत्सर्गः. 2 समृद्धि *f.*, प्राचुर्यं, उद्रेकः, अतिरेकः, उपचयः, बाहुल्यं.

Prog, *s.* भोजनं, अन्नं, भेक्ष्यं.

Progenitor, *s.* पितृ *m.* प्रजापतिः, पूर्वजः, पूर्व-कुल-पुरुषः, जन्मदः, जनयितृ *m. See* **Ancestor.**

Progeny, *s.* संतानः, अपत्यं, संतति *f.*, प्रजा.

Prognostic, *s.* निमित्तं, अजन्यं, शकुनः-नं, लक्षणं; *See* **Omen.** –*a.* प्र-उद्-बोधक, अग्रसूचक. –**ate,** *v. t.* पूर्व-अग्रे-सूच् 10 or दृश् c.; *See* **Forebode.** –**ation,** *s.* पूर्व-सूचनं-ना. –**ator,** *s.* पूर्वलक्षणज्ञः, अग्रसूचकः.

Programme, *s.* सूचिपत्रं; कार्यक्रमः-परिपाटी.

Progress, *s.* प्र-,वृद्धि *f.*, उत्कर्षः, क्रमशः वृद्धिः, उत्कर्षक्रमः. 2 प्राप्ति *f.*, आगमः; 'p. in learning' विद्यागमः, विद्याभिनिवेशः. 3 प्र-गमनं, प्रयाणं, यानं, यात्रा, प्रस्थानं, प्रसरः, क्रमः-मणं, अयनं; *See* **March;** 'difficult p.' संक्रमः, दुर्गसंचरः. –*v. i.* उत्कृष् pass., वृद्धि-उन्नतिं-या 2 P, प्र-,वृध् 1 A, प्र-उप-चि pass.; *See* **Improve.** 2 प्रगम्-चल्-सृ- 1 P, प्रया 2 P, प्रस्था 1 A; *See* **Advance.** –**ion,** *s.* श्रेढी, श्रेढीव्यवहारः; 'first term' मुखं, वदनं, आदिः; 'common difference' चयः; 'geometric mean' चयो गुणः; 'sum' श्रेढीफलं; 'number of terms' गच्छः. –**ive,** *a.* आनुक्रमिक (की *f.*),

क्रमिक, अधिकाधिक, उत्तरोत्तर, क्रमशः वर्धमान. **-ively,** *adv.* क्रमशः, अनुक्रमेण, उत्तरोत्तरं, अधिकाधिकं.

Prohibit, *v. t.* नि-प्रति-विध् 1 P, प्रत्यादिश् 6 P, निवृ c., प्रत्या-रुध् 7 U. **-ion,** *s.* नि-प्रति-षेधः, प्रत्यादेशः, निरोधः, निवारणं, बाधा. **-or,** *s.* निवारकः, निषेधकः. **-ive, -ory,** *a.* निषेधक, निवारक, नि-प्रति-षेधिन्, निषेधार्थक, निषेधवाचिन्.

Project, *s.* उपायः, प्र-,युक्ति *f.*, कल्पना, प्रयोगः, संकल्पः, प्रबंधः. **2** अभिप्रायः, आशयः, उद्देशः. *-v. i.* प्रलंब् 1 A, बहिर्लंब्, उपरि लंब्, बहिः स्था 1 P or भू 1 P or वृत् 1 A. *-v. t.* प्र-,क्षिप् 6 P, प्रास् 4 U, निपत् c., प्रसुच् 6 P; *See* **Throw. 2** (मनसा) कल्प् c., निरूप् 10, चिंत् 10, युज्ज् 10, आलोच् 10, अनुसं-धा 3 U. **-ile,** *a.* प्रक्षेपणीय, दूरक्षेपिन्. *-s.* अस्त्रं; *See* **Missile. -ing,** *a.* प्र-,लंब, उन्नत, उद्यत, उत्तुंग, बहिर्वर्तिन्; oft. by उत्सेध, उत्सेधिन्; 'with a p. nose' प्रलंबनास, घोणोन्नत, उन्नस; 'having p. teeth' उद्यद्दत्, करालदंत; 'having p. breasts' स्तनाभोगवती, उन्नतस्तनी; 'shattered by falling over (her) p. breasts' पयोधरोत्सेधनिपातचूर्णिताः (K. v. 24). **-ion,** *s.* प्रलंबता, उद्यता. **2** आभोगः, उत्सेधः; निर्यूहः, दंतकः. **3** छेद्यकं. **-or,** *s.* चिंतकः, योजकः.

Prolapse, Prolapsus, *s.* भ्रंशः. *-v. i.* भ्रंश् 1 A, 4 P.

Prolated, *a.* प्लुत (vowel), दीर्घोच्चारित.

Prolegomenon, *s.* प्रस्तावना, उपोद्घातः.

Prolepsis, *s.* पूर्वग्रहणं, पूर्वादानं.

Prolific, *a.* अवंध्य, बहुप्रज-प्रसव-अपत्य, प्रसवशील, सुतिन्, बहुसंतान. **2** बहुफलप्रद, बहुफल; *See* **Productive. -ally,** *adv.* प्राचुर्येण, विपुलं.

Prolix, *a.* सु-अति-विस्तर, प्रपंचित, सुदीर्घ, दीर्घसूत्रिन्, अत्यायत. **-ity,** *s.* अतिविस्तरः, प्रपंचः, वाग्विस्तरः-प्रपंचः, वाग्प्रपंचयः; दीर्घसूत्रता, अतिविस्तारः. **-ly,** *adv.* विस्तरशः; अतिविस्तरेण, सप्रपंचं.

Prologue, *s.* प्रस्तावना, आमुखं, प्रास्ताविकी विज्ञप्तिः; 'benedictory p.' नांदी.

Prolong, *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, वि-प्र-सृ c., विस्तृ c.. आयम् 1 A or c. **2** व्याक्षिप् 6 P or विलंब् c.; 'a p. ed note' तानः. **-ation,** *s.* विस्तारः, वितति *f.*, आयतिः, दीर्घीकरणं.

Prolusion, *s.* *See* **Prelude.**

Promenade, *v. t.* विहृ 1 P, विचर् 1 P, विहारार्थं परिभ्रम् 1, 4 P. *-s.* विहारः, परिभ्रमणं. **2** विहारस्थानं.

Prominent, *a.* प्रधान, प्रमुख, श्रेष्ठ, मुख्य, विशिष्ट, परम; *See* **Principal. 2** सुस्पष्ट, सुप्रकाश, सुव्यक्त, सुदृश्य. **2** उन्नत, उद्यत, उत्तुंग, प्रलंब, साभोग, उत् pr.; *See* **Projecting. -ly,** *adv.* प्राधान्येन, विशेषतः, सुप्रकाशं, सुस्पष्टं, उन्नतं. **-Prominence,** *s.* प्राधान्यं, विशिष्टता, श्रेष्ठता, उत्कर्षः, परमपदं. **2** उन्नति *f.*, उत्सेधः, उत्तुंगता, आभोगः.

Promiscuous, *a.* प्र-सं-कीर्ण, संकुल, अविविक्त, निर्विशेष, अपरिच्छेद्, अभेद्, संमिश्रित 'p. union' संकरः, सांकर्यं. **-ly,** *adv.* निर्विशेषेण, संकीर्णं, अभेदेन, अक्रमेण, अपरिच्छेदेन. **-ness,** *s.* संकीर्णता, संकुलता, अभेदः, संकरः.

Promise, *v. t.* सं-प्रति-आ-शंस् 5 P, प्रति-ज्ञा 9 A, (with dat. of persons); स्वी-अंगी-कृ 8 U, अभ्युपगम् 1 P, अभ्युप-इ 2 P, संविद् 2 A, संगृ 6 A, उ (ऊ) रीकृ, उररीकृ, परि-,पण् 1 A; the plan p. s to succeed' उपायः सफलो भवेदित्यनुमीयते or अहं आशंसे; 'a p. ing boy' वर्धिष्णुर्बटुः, आशानिबंधनं. *-s.* प्रतिज्ञा, समयः, सं-प्रति-श्रवः, वचनं, संविद् *f.*, नियमः, संगरः, संकेतः, अभिसंधा, अभ्युपगमः, स्वीकारः, उरीकारः, अंगीकारः, परिपणनं. **2** आशा, आशंसा; 'hollow p.' सुधावचनं, शब्दपांडित्यं, 'breaking a p.' प्रतिज्ञा-वचन-भंगः, संविद्-व्यतिक्रमः; विसंवादः; keep or fulfil a p.' प्रतिज्ञां पा c. (पालयति) or क्षुध् c., *See* **Keep, Fulfil:** 'p. breaker प्रतिज्ञालंघिन्-व्यतिक्रामिन्, विसंवादिन्; give a p. orally' वाचा प्रतिज्ञा, वाग्दानं कृ. **-ory,** *a.* प्रतिज्ञाविशिष्ट.

Promontory, *a.* उद्यभूमिं *f.*, भूशिरस्-नासिका.

Promote, *v. t.* वि-,वृध् c., उपकृ 8 U, पुरस्कृ, प्रवृत् c., साध् c., उपचि 5 U, प्रयुज्ज् 10; (a person) सं-,उन्नम् c. (नमयति), उन्नतिं नी 1 P or प्राप् c., पदं वृध् c. पदोत्कर्ष-प्रतिपत्ति-प्राप् c., अधिकपदे नियुज्ज्. **3 Prompt,** q. v. **-er,** *s.* प्रवर्तकः, उपकर्तृ *m.* *See* **Patron. -ion,** *s.* उपकारः, पुरस्कारः, प्रवर्तनं, साहाय्यं, वर्धनं, वृद्धिं *f.*, उपचयः, उन्नतिः, उत्कर्षः, पदवृद्धिः, पदोन्नतिः, प्रतिपत्ति *f.*, श्रेष्ठपदावाप्ति *f.* **-ive,** *a.* प्रवर्तक, साधक, उपकारिन्.

Prompt, *a.* सत्वर, अविलंब, क्षिप्र, अविलंबित, अदीर्घसूत्र; (of persons) उद्यत, उद्युक्त. अविलंबिन्, आशुकारिन्, प्रत्युत्पन्नमति. सप्रतिभ, पटु, उद्यमिन्, उद्योगिन्. *-v. t.* प्र-उत्सह् c., प्रणुद् 6 P or c., प्रचुद् 10, प्रवृत् c., प्र-उद्-युज्ज् 10 उत्तिज् c., प्र-रुच् c., आकू c.. उद्दीप् c., उत्था c. (उत्थापयति), प्र उद्-बुध् c.; 'p. ed by hunger' क्षुद्बोधित. **2** प्र-अनु-बुध् c., सूच् 10. **-er,** *s.* प्रोत्साहकः, प्रवर्तयितृ *m.*, प्रयोजकः, &c. **2** अनु-प्र-बोधकः, सूचकः; 'who seldom wanted a p.' यः सदा प्रत्युत्पन्नमतिः, प्रबो-

धननिरपेक्षः. **-ing,** *s.* प्रेरणं, प्रोत्साहनं, उत्तेजनं, &c. **2** सूचना, प्रबोधनं. **-ness, -itude,** *s.* औत्सुक्यं, अविलंबः, उत्साहः, क्षिप्रता. **2** प्रतिभा, प्रत्युत्पन्नमति *f.*, पटुता. **3** उद्यमः, उद्योगः. **-ly,** *adv.* सत्वरं, अविलंबेन, क्षिप्रं, सद्यः, आशु, आचिरात्, सप्रतिभं.

Promulgate, *v. t.* प्रकाशय् c., वि-,घुष् 10, कृत् 10, प्र-ख्या c. (ख्यापयति); *See* **Proclaim. -ion,** *s.* प्रकाशनं, घोषणं, कीर्तनं. **-or,** *s.* प्रकाशकः, घोषकः.

Prone, *a.* प्रवणं, शील, आलु in comp., उद्यत, उन्मुख; *See* **Inclined, Apt;** 'p. to fall' पतयालु, पातुक, पतनशील. **2** (Bent) नत, नम्र, अधोवदन, अधोमुख-अवाङ्मुख-(खी *f.*). **-ness,** *s.* प्रावण्यं, प्रवृत्ति *f.*, उन्मुखता, शीलता, आलुता in comp. **2** अधोमुखता, नम्रता.

Prong, *s.* शूलः-लं, कंटकः, अग्रं, शिखा.

Pronoun, *s.* सर्वनामन् *n.*

Pronounce, *v. t.* उच्चर् c., उदीर् c., उदाख्या-ह्व 1 P,गद् 1 P, वद् 1 P प्र-,वच् 2 P, प्र-ख्या 2 P, कृत् 10;'p. judgment' निर्णयं कथ् 10; उत्तरं दा 3 U, &c. **2** निश्चयेन वद्, दृढं प्रति-ज्ञा 9 A; 'imperfectly p. ed' ग्रस्त, असंपूर्णोच्चरित, लुप्तवर्ण-पद्. **-Pronunciation,** *s.* उच्चारणं, उदाहरणं, उदीरणं; 'science of p.' शिक्षा; 'easy of p.' सुखोच्चार्य.

Proof, *s.* *See* under **Prove.**

Prop, *s.* आश्रयः, शरणं, आधारः, अवष्टंभः, आ-अव-लंबः-बनं, उपक्षः. **-***v. t.* धृ 1 P, 10, आ-अव-लंब् 1 A, अवष्टंभ् 9 P;'a tree that p. s another creeper' उपग्रतरु.

Propaganda, *s.* धर्मप्रसारकसंस्था.

Propagate, *v. t.* विस्तृ c., प्रवृध् c., वि-प्र-तन् 8 U; वि-प्र-सृ c.; (opinions) प्रचर्-लू c., प्रवृत् c. or संचर् c., प्रचलीकृ, प्रसु c. **2** परंपरया उत्पद् c. or प्र-सू 2 A, प्रसवपरंपरया जातिं वृध् c. शावकान् प्रसू or जन् c. or उत्पद् c. **-ion,** *s.* प्र-,वर्धनं, प्रसारः, विस्तारः, वितति *f.*, प्र-,वृद्धि *f.*, प्रचारः-रणं. **2** परंपरोत्पत्ति *f.*, प्रसूतिपारंपर्य-क्रमः; प्रजा-संतान-वृद्धि *f.* **-or,** *s.* प्रचारकः, प्रवर्तकः.

Propel, *v. t.* प्रेर् c.,:प्र-,नुद् 6 P, or c., संचल् c., प्रचुद् 10, सं-,चर् c., कृष् 1 P; *See* **Prompt.**

Propense, *a.* प्रवण, उन्मुख, आसन्न, उद्यत. **-ity,** *s.* प्रवणता, प्रवृत्ति *f.*, उन्मुखता, प्रावण्यं, प्रवाहः, शीलता-आलुता in comp.; 'p. to fall' पतयालुता; 'good p.' सुशीलं, साधुवृत्तिः; 'evil p.' व्यसनं, दुर्गुणः, दुःशीलं.

Proper, *a.* स्वीय, निज, आत्मीय, स्व-आत्म in comp. **2** युक्त, योग्य, उचित, उपपन्न, अनुरूप, न्याय्य, संगत, सदृश (शी *f.*), यथार्ह, यथोचित, समंजस, पर्याप्त, सांप्रतिक (की *f.*); oft. ex. by pot. pass. part.; 'to be p.' युज् pass., उपपद् 4 A; 'it is p.' स्थाने; स्थाने व्रीडिता अप्सरसः (V. 1.), स्थाने भवान् अकिंचनत्वं व्यनक्ति (R. v. 16). **-ly,** *adv.* युक्तं,उचितं, यथार्हं,सम्यक्, स्थाने, न्यायतः, सांप्रतं, यथायोग्यं, धर्मेण. **2** यथार्थतः, परमार्थतः; तत्त्वतः, वस्तुतः; 'p. speaking' वस्तुतः, यथार्थदृष्ट्या. **-ty,** *s.* धर्मः, गुणः, लक्षणं, स्वभावः, विशेषः, रूपं, स्वरूपं, धर्मः, सहज-प्रकृति-गुणः. **2** स्वत्वं, स्वाम्यं, अधिकारः, प्रभुत्वं. **3** संपत्ति *f.*, द्रव्यं, अर्थः, धनं, वित्तं, वसु *n.*, विभवः; द्रव्य-अर्थ-जातं, रिक्थं; 'woman's p.' स्त्रीधनं, 'landed p.' भूमिधनं, भूमिः, स्थावरं धनं; 'public p.' गण-सामान्य-द्रव्यं; 'p. in cattle' गोधनं. **-Propriety,** *s.* युक्तता, औचित्यं, उपपत्ति *f.*, न्यायः, सामंजस्यं, योग्यता, यथार्थता, पात्रता, संगति *f.*, 'p. of conduct' विनयः, मर्यादा, अनतिक्रमः, सुचरितं.

Prophesy, *v. t.* भावि कथ् 10 or सूच् 10 or प्रदृश् c., अनागतं नि-आ-विद् c.; *See* **Predict. -Prophecy,** *s.* भाविकथनं-सूचनं, भविष्यद्वादः, आदेशः, भविष्यार्थः, सिद्धादेशः. **-Prophet,** *s.* सिद्धः, भविष्यद्वादिन् *m.*, अग्रनिरूपकः, भाविकथकः, अनागतविद्-दर्शिन्; 'saying of a p.' सिद्धादेशः. **-ess,** *s.* अनागतदर्शिनी, भविष्यद्वादिनी. **-ic,-ical,** *a.* (*s.*) in comp.

Prophylactic, *a.* रोगहारिन्-हृत्.

Propinquity, *s.* सन्निधिः, संनिकर्षः, सामीप्यं; *See* **Nearness.**

Propitiate, *v. t.* प्रसद् c., आराध् c., अनुरंज् c., सांत्व् 10, अनुनी 1 P, प्र-,शम् c. (शमयति),सं-परि-तुष् c. **-ion,** *s.* प्रसादनं, आराधनं, अनुरंजनं, सांत्वनं, अनुनयः; प्र-उप-शमः-मनं. **-or,** *s.* प्रसादकः, आराधयितृ *m.*,अनुरंजकः &c. **-ory,** *a.* शमक, सांत्वक, शांतिकर (री *f.*), शांतिप्रद्; 'p. rite' शांतिक्रिया. **-propitious,** *a.* सु-प्रसन्न, सदय, अनुकूल, हितकाम - बुद्धि, अभिमुख (खी *f.*), प्रवणीकृत, अनुग्राहिन्, वरद. **2** शुभ, मंगल, कल्याण (णी *f.*), शर्मद, शुभंकर. **-ly,** *adv.* प्रसन्नं, अनुकूलं, सदयं, सानुग्रहं. **-ness,** *s.* प्रसादः, आनुकूल्यं, आभिमुख्यं; शुभता.

Proportion, *s.* प्रमाणं, परिमाणं; आनुगुण्यं, आनुरूप्यं, परस्पर-अन्योन्य-संबंधः-अन्वयः-अनुषंगः-सादृश्यं-समता; अन्वयः, संबंधः; संधानं, संयोगः, संमिति *f.* (of limbs &c.) **2** अंशः, विभागः; *See* **Part. 3** अनुपातः, सबंधसाम्यं; 'in p. to' ex. by अनुगुण, अनुरूप, सदृश, प्रमाणतः, अनुसारेण, यथा in comp.; 'in p. to one's strength' यथाशक्ति, शक्त्यनुसारेण, शक्तितः; 'spend

in p. to your gains' 'आयप्रमाणेन व्ययं कुरु;' 'p. of limbs' अंगसंयोगः, अवयवसंगतिः. -v. t., -ate, v. t. अनुरूपी-सदृशी-कृ 8 U, समीकृ, संमा 3 A, 2 P. -al, a. समप्रमाण, परस्परानुगुण. -ate,-able,-ed, a. अनुरूप, अनुगुण, सदृश, संमित, सम, तुल्य, अनुसारिन्; 'with jars p. to their size (strength)' स्वप्रमाणानुरूपैर्घटैः (S. 1), 'her body beautiful, being p.' चतुरश्रोभि तस्या वपुः (K. 1. 32). -ately, -ably, adv. अनुरूपं-पेण, अनुगुणं, अनुसारेण, सदृशं, यथाप्रमाणं, यथाभागशः.

Propose, v. t. प्र-स्तु 2 U, उपन्यस् 4 U, उपक्षिप् 6 P, प्रति-ज्ञा 9 A, सूच् 10, कर्तव्यं निर्दिश् 6 P or अभि-धा 3 U. 2 उद्दिश्, आकांक्ष् 6 P; See Intend. -al, s. प्रस्तावः, उपन्यासः, उपक्षेपः, अभिधानं, प्रतिज्ञा, वचनं, कर्तव्यनिर्देशः. -ition, s. Proposal, q. v. 2 प्रतिज्ञा, सिद्धांतः, प्रमेयं.

Propound, v. t. प्रति-पद् c., उपन्यस् 4 U, उपक्षिप् 6 P, निर्दिश् 6 P, प्रति-ज्ञा 9 A.

Proprietor, s. स्वामिन् m. प्रभुः, ईशः, पतिः, अधिकारिन् m. See Owner. -ship, s. स्वाम्यं, प्रभुत्वं, स्वामित्वं, अधिकारः. -Proprietary, a. स्वाम्यधीन, प्रभुनिष्ठ, स्वामिगत; 'p. right' स्वाम्यं, अधिकारः, स्वत्वं.

Propulsion, s. प्रेरणा, चोदना.

Prorogue, v. t. व्याक्षिप् 6 P. (नियतकालं यावत्) विसृज् 6 P or त्यज् 1 P. -Prorogation, s. कार्यत्यागः-निवृत्ति f., व्याक्षेपः.

Proscribe, v. t. घोषणापूर्वं दंडं आदिश् 6 P or बहिष्कृ 8 U or निर्वस् c., 'here is Jivasiddhi being disgraced and p. ed from the city' एष जीवसिद्धिः सनिकारं नगरान्निर्वास्यते (Mu. 1). 2 निषिध् 1 P, निह् c. -Proscription, s. सघोषण दंडाज्ञा.

Prose, s. गद्यं. -a. गद्यात्मक, गद्यरूप, गद्य in comp. -Prosaic, a. गद्यरूप, गद्यात्मक, गद्य in comp. 2 नीरस, विरस, रस-सत्त्वहीन.

Prosecute, v. t. (नित्यं-अनवरतं) प्रवृत् c., अनुस् 1 P, अनु-ष्ठा 1 P, अनु-सेव् 1 A, निर्वह् c., अनुशील् 10; 'p. studies,' अध्ययनक्रममनुस्; 'p. one's efforts' अनवरतं उद्यम् 1 A or प्रयत् 1 A; 'p. one's undertaking' प्रारब्धं उद्वह् 1 P, प्रतिपन्नं निर्वह् c. 2 अभियुज् 7 A, 10, अभिशंस् 1 P; सूच् 10, निविद् c. -ion, s. अनुशीलनं, प्रवर्तनं, नित्यानुष्ठानं, नित्यप्रवृत्ति f., निर्वाहणं, अविरतानुसरणं. 2 अभियोगः, निवेदनं; 'p. of effort' नित्योद्योगः; 'p. of study' नित्याध्ययनं, अध्ययनक्रमः. -or, s. निर्वाहकः. 2 अभियोक्तृ m., वादिन् m., अर्थिन् m., अभिशंसकः.

Proselyte, s. परधर्माश्रयिन्, स्वधर्मत्यागिन्, पक्षांतर-मतांतर-ग्राहिन्; See Convert. -ize, v. i. स्वधर्मं ग्रह् c., -ism, s. मतांतरग्रहणं, धर्मांतरस्वीकारः.

Prosody, s. छंदस् n., छंदःशास्त्रं. -al,-ical, a. छांदस (सी f.), छंदः in comp. -ian, s. छंदःशास्त्रज्ञः.

Prospect, s. आलोकः, दर्शनं, चक्षुर्विषयः, दृग्गोचर-प्रदेशः-विषयः. 2 आयतिf., उत्तरापेक्षा; 'he has good p. s before him' शुभा तस्यायतिः. 3 आशा, प्रत्याशा, आशंसा, अपेक्षा. -ive, a. उत्तर, उत्तरकालीन, भाविकालप्राप्य, उत्तरकालसापेक्ष; See Future. -ively, adv. उत्तरकालापेक्षया.

Prosper, v. i. सं-,ऋध् 4, 5 P, प्र-वि-वृध् 1 A, स्फाय् 1 A, एध् 1 A, प्र-उप-चि pass., समृद्धि-वृद्धि या 2 P or उप-इ 2 P; 'I hope your (commercial) business is p. ing' अपि प्रचीयंते संव्यवहाराणां लाभाः (Mu. 1). 2 सिध् 4 P, सं-पद् 4 A, सफलीभू 1 P, कृतार्थीभू. -v. t. वृध् c., प्र-उप-चि 5 U. एध् c., उपकृ 8 U, अनुग्रह् 9 P, सफलीकृ, साध् c., सिद्धिं नी 1 P. -ity, s. सं-, ऋद्धि f., संपद् f., संपत्ति f., अभ्युदयः, श्रीः, लक्ष्मीः, वि-,भूति f., सौभाग्यं, वैभवं, पुण्योदयः, ऐश्वर्यं; 'time of p.' संपत्-समृद्धि-उदय-कालः-समयः. 2 समृद्धिः, उत्कर्षः, उन्नति f., उदयः, प्र-उप-चयः, वि-सं-वृद्धि f.; साफल्यं, कृतार्थता, सिद्धि f. 3 क्षेमः-मं, कौशल्यं, कल्याणं, शुभं, शिवं, हितं, भद्रं. -ous, a. समृद्ध, श्रीमत्, समृद्धिमत्, लक्ष्मीवत्, सश्रीक, ऐश्वर्यशालिन्; (state &c.) वार्धिष्णु, प्र-उप-चीयमान, एधमान, वर्धमान; 'in p. days' संपत्सु, अभ्युदयकाले, भूतिसमये, समृद्धिकाले. 2 सफल, सिद्ध, कृतार्थ, सिद्धार्थ; (happy) सुस्थ, निरापद, क्षेम, कुशल, कल्याण (णी f.), शिव, भद्र, मंगल. शुभ, सौभाग्यवत्, धन्य. -ously, adv. समृद्ध्या, अभ्युदयेन, सुसंपदा, सौभाग्येन, शुभं, भद्रं.

Prostitute, s. वेश्या, वेशवधूः, गणिका, वारपण्य स्त्री-अंगना-योषित्, भोग्या, सामान्यस्त्री, रूपाजीवा; (false to her husband) पुंश्चली, बंधकी, असती, कुलटा, स्वैरिणी, पांसु(शु)ला, धर्षिणी, इत्वरी. -v. t. निंद्यकर्मार्थं प्र-उप-विनि-युज् 1 A, 10 or व्यापृ c. -ion, s. वेश्याजीवः, वेश्या-गणिका-वृत्ति f., वारसेवा, बंधकीत्वं, पौंश्चल्यं, &c.

Prostrate, a. प्रणत, भूमिगत, साष्टांगप्रणतपतित; 'lie or fall p.' See (v.); 'p. on the bed' शयनगत, शयने अवमूर्धशय; 'lying p. at the feet' चरण or पाद-पतित or प्रणत. 2 अवसन्न, क्षीण. -v. t. (Oneself)

दंडप्रणामेन-साष्टांगपातं-नम् 1 P or प्रणिपत् 1 P, दंडवत् पत्; नीचैः प्रणम् or प्रणिपत्. **2** नि-अव-पत् c.; भूमिं गम् c. (गमयति). **3** (Strength) अवसद् c; ध्वंस् c., प्र-वि-नश् c., हृ 1 P; क्षि 1, 5 P. **-ed,** *a.* प्रणिपतित, भूमिंगत, निपतित, &c. **2** क्षीणबल-शक्ति, हृत or नष्ट-शक्ति or ओजस्. **-ion** *s.* दंडप्रणामः अष्टांगप्रणामः-प्रणिपातः, सांष्टांगप्रणामः-वंदनं; प्रणिपातः, प्रणामः. **2** (Of spirits) अवसादः, ग्लानि *f.*, विषण्णता, उद्वेगः; 'p. of strength' शक्तिपातः-क्षयः, सत्त्वहानि *f.*

Protect, *v. t.* रक्ष् 1 P, अव् 1 P, परि-त्रै 1 A, गुप् 1 P, पा 2 P, पा c (पालयति), परि-प्रति°; तृ c. **2** संवृध् c., परि-, पुष् c. **-ion,** *s.* गोपनं, गुप्ति *f.*, पालनं, त्राणं, रक्षा, रक्षणं, अभ्युपपत्ति *f.*, संवर्धनं, परिपोषणं. **2** शरणं, आ-संश्रयः, आ-अव-लंबः, आधारः; 'go for p.' आश्रि 1 U, आलंब् 1 A, शरणं गम् 1 P or प्रपद् 4 A; 'paper granting p.' अभयपत्रं. **-or,** *s.* रक्षकः, गोप्तृ *m.*, पालयिता, रक्षिता, रक्षिन्, पालकः, त्राता, शरणं, शरण्यः; आश्रयः, पः-पालः in comp. **-Protege,** *s.* आश्रितः, पालितः, उपजीविन् *m.*, पोष्यः, शरणं गतः.

Protend, *v. t.* विस्तृ c., प्रसृ c.; *See* **Extend.**

Protest, *v. i.* दृढं-दृढोक्ति पूर्वं-वद् 1 P or आख्या 2 P; 'p. against' दृढं विरुद्धं वद्, दृढं-दृढोक्तिपूर्वं नि-प्रति-षिध् 1 P, दृढं असंमतिं प्रकाशय् c. or ज्ञा c.; 'I strongly p. against this order' अयमादेशोऽन्याय्य इति सनिश्चयं वदामि 'p. in writing' असंमतिलेखं-विप्रतिपत्ति-पत्रं-प्रकाशय् c. *-s.* दृढनिषेधवाक्यं, अस्वीकार-असंमति-वादः, विरुद्धवादः, अस्वीकारप्रकाशनं; 'written p.' असंमतिपत्रं. **-ant,** *s.* रोमीयमतविरुद्धः. **-ation,** *s.* दृढवचनं-उक्तिः-वादः, विरुद्धवचनं, निषेधोक्तिः.

Proteus, *s.* कामरूपः.

Prototype, *s.* आदर्शः, मूलं, मूलप्रतिमा.

Protract, *v. t.* विलंब् c., व्याक्षिप् 6 P; *See* **Delay. 2** प्र-,तन् 8 U; प्रसृ c., दीर्घीकृ 8 U. **-ed,** *a.* सुदीर्घ, विलंबित, चिरस्थित, चिर in comp.; 'p. note' तानः; 'p. sound' कृतः. **-ion,** *s.* विलंबः, व्याक्षेपः.

Protrude, *v. i.* प्रः-निः-सृ 1 P, निर्गम् 1 P, उद्भिद् pass., प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. *-v. t.* Causal of roots above. **-ing,** *a.* बहिर्लंब, बहिःस्थ. **-Protrusion,** निःसरणं, उद्भेदः, प्रलंबनं. **-Protuberance,** *s.* वि-,स्फोटः, गंडः, शोथः, शोफः, श्वयथुः, (on the skin). **2** प्रलंबनं, उत्सेधः, उच्चैः-गता, आभोगः, उन्नति *f.* **-Protuberant,** *a.* उन्नत, उच्चैंग, उच्छ्रित, उच्छ्रून, प्रलंब; 'having p. breasts' तुंग-उन्नत-स्तनी, घट-कुंभ-स्तनी; oft. ex. by उत्सेधः; पयोधरोत्सेधविशीर्णसंहति (K. v. 8) the continuity being broken by her p. breasts.' **-Protuberate,** *v. i.* प्रलंब् 1 A; *See* **Project, -ing** &c.

Proud, *a.* *See* under **Pride.**

Prove, *v. t.* उप-प्रति-पद् c., साध् c., वि-भू c., प्र-मा 3 A, 2 P, प्रमाणीकृ 8 U, सत्याकृ, स्था c. (स्थापयति). **2** प्र-,दृश् c., सूच् 10, निर्दिश् 6 P, प्रकाशय् c., व्यंज् 7 P or c.; 'he was p. ed guilty' अपराधी स्थापितः; 'good men p. their usefulness by deeds, not by words' जनते हि फलेन साधवो न तु कंठेन निजोपयोगितां (N. II. 48), कर्मणा न तु वाङ्मात्रेण दर्श-यंति. **3** परीक्ष् 1 A, निरूप् 10, निर्णी 1 P, निश्चि 5 U, प्रति-इ c.; *See* **Test.** *-v. i.* सं-उत्-पद् 4 A, वृत् 1 A, सं-,भू 1 P; निर्णी-निश्चि-प्रती-pass.; 'the tilled ground p. ed a treasure indeed' कृष्टा भूमिरेव कोषस्थाने बभूव, कोषत्वमापद्यत. **-er,** *s.* साधकः, विभावकः. **-Proof,** *s.* साधनं, प्रमाणं, उप-पत्ति *f.*, उप-प्रति-पादनं; 'written p.' लेखप्रमाणं, साधनपत्रं; 'burden of p.' साधनधर्मः, क्रियानिर्णयः; 'the burden of p. lies on both parties' द्वयोरपि वादिनोः क्रिया प्रमोति (V. M. 6.). **2** लक्षणं, चिह्नं. **3** परीक्षा-क्षणं, निर्णयः, निश्चयः; 'to put to the p.' परीक्ष्. **4** स्थूल-प्रथम-मुद्रणं. **5** अभेद्यता, अहार्यता, अविकार्यता; 'p. against advice' उप देशाहार्य; 'water p.' जलेनाभेद्य. **-less,** *a.* निष्प्रमाण, साधनहीन.

Provenance, *s.* उत्पत्ति *f.*, संभवः, उद्गमस्थानं.

Provender, *s.* पाथेयं; खाद्यं, पशुभोज्यं, शुष्कतृणादि *n.*

Proverb, *s.* जनप्रवादः, लोकवादः, आभाणकः, जनोक्ति *f.*, न्यायः, वचनं, उक्तिः. **-ial,** *a.* लौकिक (की *f.*), लोकप्रासिद्ध-प्रचलित, लोक-जन in comp., न्यायरूप. **-ially,** *adv.* लोके, जनरूढ-वा.

Provide *v. t.* (पूर्वं) सं-,युज् 7 U, 10, संभृ 3 U, प्र-उप-कृप् c., सनाथीकृ 8 U, द्रव्यसामग्रीं उपपद् c. or वि-धा 3 U or कृ; *See* **Prepare. 2** (पूर्वं) नियम् 1 P, प्रति-ज्ञा 9 A, परिपण् 1 A, संकेतं-समयं-कृ; निर्दिश् 6 P; *See* **Enjoin, Ordain;** (**for,** against) gen. ex. by अर्थे-अर्थं in comp.; 'should p. wealth against times of want' आपदर्थं धनं रक्षेत्; 'who p. s for the future' अनागतविधातृ; 'p. against' निवारणाय सज्जीभू, प्रति-कारोपायं कृप् c. **-ed,** *a.* (पूर्वं) संभृत, परिकल्पित; युक्त, उपेत, सहित, अन्वित,

सनाथ, सनाथीकृत; 'he is duly p. for' तस्य समुचिताः संविधाः कृताः; उपकरणसामग्रीयुक्तः, अन्नवस्त्रादियुक्तः. **2** पूर्वं निर्दिष्ट, परिपणित, पूर्वं संकेतित; 'p. that' यदि, चेत्, एतेन समयेन. **-ence,** *s.* विधिः, परमेश्वरः; *See* **God. 2** सुविमर्शः, दूरदर्शित्वं, पर्यवेक्षणं, पूर्वविवेकः-विचारः, सुसमीक्षा, दूर-दीर्घ-दृष्टि *f.* **-ent,** *a.* दूरदर्शिन्, विमृश्यकारिन्, विवेकिन्, दूर-दीर्घ-दृष्टि. **-ential,** *a.* ईश्वर-विधातृ-कृत-प्रयुक्त-घटित. **-entially,** *adv.* विधिवशात्, ईश्वरेच्छया, दैवात्, दिष्ट्या. **-ently,** *adv.* सविवेकं, सुसमीक्ष्य, सुविमृश्य, दूरदृष्ट्या. **-Provision,** *s.* परिकल्पनं, विधानं, उपपादनं. **2** पूर्वोपायः, पूर्वकल्पना, संविधा-धानं. **3** समयः, संकेतः, प्रतिज्ञा, पणः, नियमः, अभिसंधिः. **4** (P. s.) सामग्री, संभारः, संचयः, संग्रहः, साहित्यं, संविधा, उपस्करः, उपकरणजातं; (for journey) पाथेयं, भोज्यं, भक्ष्यं, भक्ष्यादिसामग्री, गमनसंविधा; (for army) वीवधः. **-v.** *t.* **Provide,** q. v. **-al,-ary,** *a.* सामयिक (की *f.*), अल्पकालस्थायिन्, आपात in comp., आपाततः नियुक्त. **-ally,** *adv.* आपाततः, समयानुरूपेण, स्तोककालं. **-Provisory,** *a.* सप्रतिज्ञ, सामयिक. **-Proviso,** *s. See* (*s.*) (3).

Province, *s.* विषयः, राष्ट्रं, देशः, चक्रं, मंडलं. **2** नियोगः, कार्यं, कर्मन् *n.*, कर्तव्यं, अधिकारः. **3** प्रकरणं, अंगं, विषयः (fig. also), (सर्वत्रौद्दरिकस्याभ्यवहार्यमेव विषयः V. 3. **-ial,** *a.* देशीय, देश्य, राष्ट्रीय, राष्ट्रिक-दैशिक-(की *f.*), देश-राष्ट्र in comp. **-s.** देशस्थः, ग्रामस्थः. **-ialism,** *s.* ग्रामीणभाषा, असंस्कृतभाषा.

Provoke, *v. t.* प्र-,कुप् c., क्रुध् c., क्रोधं-कोपं-उत्पद् c. or उद्दीप् or उत्तिज् c. **2** उत्पद् c., जन् c., (जनयति), प्रवृत् c., उत्तिज् c.; *See* **Excite, Cause. 3** धृष् 5 P, आह्वे 1 A. **-ing,** *a.* प्रकोपक, उद्दीपक, उत्तेजक, क्रोधावह, संतापकारिन्, संतापक. **-ingly,** *adv.* Ex. by (*v.*). **-Provocation,** *s.* प्रकोपः, क्रोधोद्दीपनं, कोपोत्तेजनं; कोपकारणं-हेतुः. **2** उद्दीपनं, उद्बोधनं. **-Provocative,** *a.* उद्दीपक, उद्बोधक. **-s.** दीपनं, अग्निवर्धनं, क्षुद्बोधनं, प्ररोचनं.

Provost, *s.* अध्यक्षः, आधिकारिन् *m.*, अधीशः.

Prow, *s.* पोताग्रभागः,

Prowess, *s.* शौर्यं, वीर्यं, वि-परा-क्रमः, पौरुषं, ओजस् *n.*, रणोत्साहः-शौर्यं; 'personal बाहुवीर्यं, भुजबलं.

Prowl, *v. i.* (भक्ष्यार्थं); परि-,भ्रम् 1, 4 P, पर्यट् 1 P. **-ing,** *s.* परिभ्रमणं, पर्यटनं.

Proximate, *a.* समीप, निकट, आसन्न, संसक्त, सन्निकृष्ट. **-ly,** *adv.* समीपं, संसक्तं. **-Proximity,** *s.* सन्निधिः, सन्निकर्षः, सान्निध्यं, नैकट्यं, संसक्तिं *f.*; *See* **Nearness.**

Proximo, *adv.* आगामिनि (मासे)

Proxy, *s.* प्रतिनिधिः-पुरुषः, प्रतिहस्तः; 'by p.' प्रतिनिधिद्वारा.

Prude, *a.* (Woman) अतिविनीता, विनयाभिमानिनी, सूक्ष्माचारनिष्ठा. **-ry,** *s.* अतिविनीतता, विनयाभिमानः, मिथ्याविनयः. **-ish,** *a. See* (*a.*).

Prudent, *a.* दूरदर्शिन्, विमृश्य-समीक्ष्यकारिन्, विवेकिन, दूर-दीर्घ-दृष्टि, परिणामदर्शिन्, सद्सद्विवेकिन्; बुध, मनस्विन्, नीतिज्ञ, विज्ञ, प्र(प्रा)ज्ञ, मनीषिन्, सावधान, कृतधीः *See* **Wise,** also. **2** (Of acts) समीचीन, श्रेयस्, वरं *ind.* **-ial,** *a.* सविवेक, विवेक-समीक्षा-प्रयुक्त. **-ly,** *adv.* विमृश्य, समीक्ष्य, सविवेकं, दूरदर्शितया, परिणामदृष्ट्वा, प्रज्ञवत्. **-Prudence,** *s.* दूरदर्शिता, दूर-दीर्घ-दृष्टि *f.*, विवेकः, प्रसमीक्षा, समीक्ष्यविमृश्य-कारित्वं, सद्सद्विवेकः, नीति *f.*, मनीषा, मति-बुद्धि *-f.*

Prune, *v. t.* अग्राणि लू 9 U or अव-च्छिद् 7 P or निकृत् 6 P. **-ing,** *s.* अवच्छेदः, निकृंतनं; 'p.-knife' विटपच्छेदनी क्षुरिका.

Prurigo, Prurient, *See* **Itch,-y.**

Pry, *v.* (Into) सूक्ष्मं निरीक्ष् 1 A or निरूप् 10 or दृश् 1 P; निपुणं अनुसं-धा 3 U or अन्विष् 4 P or चर्च् 6 P. **-ing,** *s.* सूक्ष्मनिरूपणं-अन्वेषणं, सूक्ष्मचर्चा.

Prythee, *adv.* अयि, नन्नु, (नन्नु मां प्रापय पत्युरंतिकं K. IV. 32).

Psalm, *s.* स्तोत्रं, गेयं, गीतं, भक्ति-धर्म-गीतं. **-ist,** *s.* गीत-स्तोत्र-कारः. **-Psalter,** *s.* गीतसंहिता-संग्रहः.

Pseudo, prefix, Ex. by मिथ्या, कपट, कूट-छद्म, कृतक, कृत्रिम in comp.; *See* **False. -nym,** *s.* कृतकनामन् *n.*

Pshaw, *interj.* धिक्, अपेहि.

Psychic, *a.* आध्यात्मिक.

Psychology, *s.* अध्यात्मविद्या, आन्वीक्षिकी.

Puberty, *s.* यौवनं, वयस् *n.*, तारुण्यं, यौवनदशा-अवस्था, प्रौढदशा; 'a woman attained to p.' स्त्रीधर्मिणी, उदक्या; *See* under **Menstrual. -Pubescent,** *a.* प्राप्तयौवन, प्रौढ, तरुण.

Public, *s.* लोकाः, जनाः, प्रजाः, प्रकृतयः, (pl.); लोकः, जनः, प्रजा; 'in p.' प्रकाशं, लोकसमक्षं, प्रकटं, सर्वप्रत्यक्षं. **-a.** प्रजा-लोक-संबंधिन्; साधारण (णी *f.*,) सामान्य, सर्वजनीन-य, सार्वलौकिक (की *f.*). लोक-जन-गण in comp.; 'p. odium' जनद्वेषः, 'p. good' लोकहितं; 'p. property' गण-द्रव्यं. **2** प्रसिद्ध, लोक-जन-प्रसिद्ध, सर्वत्र प्रचलित, बहुलीभूत, लोकविश्रुत, प्रकाशीभूत,

सार्वलौकिक (की *f.*). **3** प्रकाश, अगूढ, अच्छन्न, अविविक्त, सर्वप्रकाश, राज in comp.; ' p. road ' राजमार्गः; ' p. sale ' प्रकाशविक्रयः; ' p. house ' शुंडा, पानं, शुंडापानं, सुरालयः, सुरापणः; *See* under **Liquor**; ' p.-minded', ' p.-spirited ' उपकारशील, जनहितबुद्धि, सर्वजनहितपरायण, लोकहित, जनहितैषिन्. **-an,** *s.* शौंडिकः, सुरापणिकः. **2** कर-शुल्क-ग्राहिन् *m.* **-ity,** *s.* प्रकाशता, प्राकाश्यं, प्रख्याति *f.*, प्रसिद्धि *f.*, विश्रुति *f.*, जन-लोक-प्रसिद्धिः, स्पष्टता; ' give p. ' **Publish,** q. v. **-ly,** *adv.* प्रकाशं-शतः, प्रसिद्धं, प्रकटं, सर्वप्रकाशं-संसुखं-समक्षं; अगूढं, अच्छन्नं, सुव्यक्तं, स्पष्टं. **-Publish,** *v. t.* प्रकाशू c., प्रथ् 10, ख्या c. (ख्यापयति), प्र-वि-श्रुष् 10, ज्ञा c. (ज्ञापयति), प्रचर् c., श्रुष् c., प्रकाशीकृ 8 U, प्रकटीकृ, आविष्कृ, प्रकटयति, (:D.), प्रकटी-प्रसिद्धी-कृ; (books &c.) प्रकाशू c. **-er,** *s.* प्रकाशकः, प्रकाशयितृ *m.*, ख्यापकः. **-Publication,** *s.* प्रकाशनं, घोषणं, ख्यापनं. **2** प्रकाशितपुस्तकं-ग्रंथः.

Pucker, *v. t.* संकुच् 1 P, आकुंच् c., संह 1 P, पुटीकृ 8 U. **-s.,** **-ing,** *s.* संकोचः, पुटः, वलि-ली *f.* **-ed,** *a.* संकुचित, पुटीकृत. **2 Wrinkled,** q. v.

Puddle, *s.* पंकिलजलं, पंकगुल्मः, पंकजलाशयः; **-***v. t.* आविली-कलुषी-कृ 8 U; *See* **Spoil.**

Pudency, *s. See* **Modesty.**

Pudendum, Pudenda, *s.* योनि *f.*, भगं, उपस्थः.

Puerile, *a.* बालिश, बालोचित, बालेय, बालशिशु-योग्य. **-ity,** *s.* बालिश्यं, बालधर्मः.

Puerperal *a.* प्रसव-प्रसूति in comp. **-Puerperous,** *a.* बालप्रसविनी.

Puff, *v. t.* ध्मा 1 P, आ-उप-°, उत्-, श्वि c., (lit. & fig.); वातेन पूर् 10, उद्-हन् 2 P, स्फाय् c. (स्फावयति). **-***v. i.* श्वस् 2 P, कृच्छ्रेण श्वस्, उद्-ध्मा. **2** वा 2 P. **3** फुत्कृ 8 U, मारुतं निःसृ c. 4 श्वि-उद्धन्-ध्मा-pass., स्फीत-आध्मात-उच्छून- *a.* भू 1 P; ' do not p. up, when praised ' स्तूयमाना नोत्सिच्यंते (Ka. 329). **-***s.* श्वासः, सुखमारुतः. **2** फूत्कारः, फूत्कृतं. **3** वात्या, वातवेगः; *See* **Gust.** **4** अतिप्रशंसा. **-ed,** *a.* आध्मात, उच्छून, स्फीत, उद्धत, मारुतपूर्ण, श्वासपूरित; ' p. up with pride ' दर्पाध्मात, उत्सिक्त, मदोद्धत, उद्धत. **-ing,** *s.* उत्सेकः, *See* **Pride.**

Pug-faced, *a.* वानरवदन, कपिमुख.

Pug-nose, *s. See* under **Flat.**

Pugilist, *s.* मुष्टियोधः, मल्लः. **-Pugilism,** *s.* मुष्टि-मल्ल-युद्धं, मुष्टीमुष्टि युद्धं.

Pugnacious, *a.* कलह-युद्ध-प्रिय, रणोत्सुक, युयुत्सु, रण-युद्ध-कलह-काम. **-Pugnacity,** *s.* युयुत्सा, कलहेच्छा, कलह-युद्ध-कामः.

Puisne, *a.* अवर, अवरपदस्थ.

Puissant, *a.* शूर, विक्रांत, वीर्यवत्, प्रबल. **-Puissance,** *s.* शौर्यं, वि-परा-क्रमः, वीर्यं; *See* **Bravery.**

Puke, *v. i.* वम् 1 P, छर्द् 10. **-***s.* (वांतिकृत्) औषधं.

Pulchritude, *s. See* **Beauty.**

Pule, *v. i.* बालकवत् रु 2 P or कूज् 1 P.

Pull, *s.* कर्षणं, आकर्षः; ग्रहणं, धरणं. **-***v. t.* कृष् 1 P, आ-सं-°. **2** ग्रह् 9 U, आ-दा 3 A, धृ 1 P, 10. **-down,** नि-, पत् c., अधः पत् c., अवकृष्; (in strength) अव-सद् c., अप-चि 5 U, क्षि 5 P, अपकृष्. **-off,** अपनी 1 P, अप-उत्-कृष्, अवतृ c., उन्मुच् 6 P, अपह् 1 P; निष्कृष्, निर्ह्. **-out,** उद्धृ, निष्कृष्, वि-उत्-पद् 10, उत्खन् 1 P, निर्ह्; (hair) उत्-, लुंच् 1 P. **-towards,** आ-समा-कृष्. **-up,** उन्मूल् 10, उद्धृ, उच्छिद् 7 P, उत्पद्; *See* **Eradicate.** **-ing,** *s.* आकर्षणं, ग्रहणं, &c.; ' p. by the hair ' केशग्रहः-हणं; ' mutual p. of the hair ' केशाकेशि युद्धं.

Pullet, *s.* कुक्कुटशावः.

Pulmonary, *a* तिलक-फुप्फुस in comp.

Pulp, *s.* मज्जा, सारः, वसा. **2** गर्भः, बीजं. **-ous,-y,** *a.* मज्जाबहुल, मज्जागुणक, मांसल, मज्जोपम, कोमल.

Pulpit, *s.* पीठं, आसनं.

Pulse, *s.* नाडि-डी *f.*; (beating) नाडीस्फुरणं-स्पंदनं; ' feel the p. ' नाडीं दृश् 1 P or स्पृश् 6 P. or परीक्ष् 1 A, ' the p. is quick ' लघुगतिः नाडी; ' the p. is low on account of phlegm ' कफान्मंदगतिर्नाडी). **2** वैदलः, शमी-शिंबी-धान्यं; शमीजः. **-Pulsate,** *v. i.* स्पंद् 1 A, स्फुर् 6 P; *See* **Throb.** **-ion,** *s.* गतिः *f.*, स्फुरणं, आघातः, स्पंदनं; ' p. of the heart ' हृदयोद्धर्षः.

Pulverize, *v. t.* चूर्ण् 10, क्षुद् 7 P, पिष् 7 P. **-Pulverulent,** *a.* चूर्ण-क्षोद-मय (यी *f.*).

Pummel, *s.* वंका.

Pump, *s.* उत्तोलनयंत्रं, जलोत्क्षेपणं. **-***v. t.* (जलादि) उत्तुल् 10, उत्क्षिप् 6 P. **2** (Out) निष्कृष् 1 P, रिच् 7 P, or c., रिक्तीकृ 8 U.

Pumpkin, *s.* कूष्मांडः-डकः, कर्कारुः.

Pun, *s.* श्लेषः **-***v. t.* श्लेषं प्रयुज् 7 A, 10-

Punch, *s.* प्रहारः, आ-अभि-घातः. **2** विदूषकः, भंडः. **3** वेधनिका. *-v. t.* तुद् 10 or प्रह 1 P. **2 Perforate** q. v.

Punchy, *a.* स्थूलकाय; *See* **Fat.**

Punctilio, *s.* सूक्ष्मता, अतिसौक्ष्म्यं; सूक्ष्म-विषयः-नियमः. **-Punctilious,** *a.* सूक्ष्म-नियमनिष्ठ-निरत, सूक्ष्माचारनिष्ठ, अतिसूक्ष्म-दृष्टि *f.* **-ness** *s.* सूक्ष्मनियमनिष्ठा; अति-सूक्ष्मदृष्टि *f.*

Punctual, *a.* सामयिक (की *f.*), संकेत-समय-निष्ठ-अनुवर्तिन्; 'let us be p.' सामयिका भवामः (M. 1). **-ity, -ness,** *s.* समय-संकेत-पालनं-निष्ठा-अनुवर्तनं, सामयिकता. **-ly,** *adv.* यथासमयं-संकेतं-कालं.

Punctuate, *v. t.* विरामचिह्वानि लिख् 6 P; चिह्नैः अंक् 10.

Puncture, *v. t.* कीलाग्रेण व्यध् 4 P or भिद् 7 P. *-s.* वेधः-धनं; *See* **Prick.**

Pungent, *a.* तीव्र, तीक्ष्ण, प्रखर, तिग्म, उग्र, चंड. **2** मर्मभिद्, अरुंतुद्, मर्माविध्, कटु. **3** (To the taste) तीक्ष्ण, तिक्त, तीव्र. कटु, उष्ण. **-Pungency,** *s.* प्रखरता. उग्रता. चंडता, तीक्ष्णता. कटुता, तीव्रता *&c.*

Punish, *v. t.* दंड् 10, शास् 2 P, (with two acc.); निग्रह् 9 P, दम् c. (दमयति); तुद् 10 (by beating); 'p. ed him by an unjust death' अन्यायेन तं जघान, अन्याय्यवधं तमदंडयत्; 'should p. as a thief' चौरदंडेन दंडयेत् (Y. II. 269). **2 Plain,** q. v. **-er,** *s.* शास्तृ *m.*, शासकः, दंडयिता. **-ment,** *s.* दंडः, शासनं, निग्रहः; साहसं; दमः. **-Punitive, Punitory,** *a.* दंड in comp.

Punt, *s.* तरालः, तरांधुः.

Puny, *s.* क्षुद्र, अत्यल्प, अतिलघु.

Pupil, *s.* शिष्यः, छात्रः, अंतेवासिन् *m.*, अध्येतृ *m.*, विद्यार्थिन् *m.* **2** कनीनिका, तारा. तारका. **-age,** *s.* शिष्यदशा-अवस्था. अंतेवासित्वं.

Puppet, *s.* पुत्रिका, पांचालिका; *See* **Doll;** 'p.-show' पुत्रिकाक्रीडा.

Puppy, Pup, *s.* कुक्कुरशावः-शिशुः

Purblind, *a.* हतदृष्टि, ईषदंध.

Purchase, *v. t.* क्री 9 U. **2** व्ययेन-श्रमेण प्राप् 5 P or लभ् 1 A. *-s.* क्रयः. **2** क्रीत-द्रव्यं. **3** संग्रहणं. ग्राहः; 'p.-money' क्रयमूल्यं, अर्घः, मूल्यं. **-er,** *s.* क्रयिन् *m.*, क्रेतृ *m.*

Pure, *a.* वि-, शुद्ध, शुचि (in all senses); स्वच्छ, विशद, निर्-वि-अ-मल, प्रसन्न, अनाविल, अकलुष. **2** पुण्य, अनघ, निष्पाप, साधु. अपाप, अलिप्त, निष्कलंक, अकल्मष. **3** पवित्र, पावन, मेध्य, परि-,पूत, प्रयत, तीर्थ in comp. **4** केवल, शुद्ध, मात्र in comp. **5** अदुष्ट, अभ्रष्ट, असंसृष्ट. अविकृत. **6** (Language) अपशब्दहीन-रहित, असंकीर्ण. **7** (Woman) सती, साध्वी, अज्ञातव्यवाया, सुरतानभिज्ञा, अस्पृष्टा, अक्षतयोनिः, पुरुषास्पृष्टा; 'of p. descent' सद्वंशज, शुद्धान्वय; of p. heart', 'p.-minded' शुद्धात्मन्, विमलात्मन्, शुद्धमति, शुद्धहृदय; प्रयतात्मन्; 'to be p.' शुध् 4 P. **-ly,** *adv.* निर्मलं, विशुद्धं, शुचि; निष्पापं, &c.; मात्रं, केवलं &c. **-ness, -Purity,** *s.* वैमल्यं, वि-,शुद्धि *f.*, शुद्धता, प्रसादः; वैशद्यं, शुचिता, शौचं, पुण्यता, साधुता, अपापता, पवित्रता, पूतता, साध्वीत्वं, &c. **-Purify,** *v. t.* परि-,पू 9 U or c., शुध् c., वि-परि-,° शुचीकृ 8 U, निर्मलीकृ, पवित्रीकृ, संस्कृ; प्र-,मृज् 2 P, निर्णिज् 3 U, प्रक्षल् 10, धाव् 10. **-ed,** *a.* परि-,पूत, शुद्ध. शोधित, प्रक्षालित, धौत, निर्णिक्त, &c.; 'p. by penance' प्रयतात्मन्. **-ication,** *s.* परि-,पूति *f.*, वि-परि-शुद्धि *f.*, शौचं, संस्कारः, पावनं, शोधनं, निर्मलीकरणं, प्रक्षालनं, धावनं, मार्जनं. **-icative, -icatory,** *a.* पावन, पवित्र, पावक, तीर्थ in comp.; अघ-पाप-नाशिन्, अघमर्षण; *See* **Pure,** 'p. rites' शांतिक्रिया, संस्कारः. **-ing,** *a.* पावन, पावक, पाविन्, &c.

Purge, *v. t.* शुध् c., वि-,रिच् 7 P or c., मलं निःसु c. or शुध् c. **2** परि-,पू 9 U, शुध् c., **2** पापं-अघं-शुध्; *See* **Purify.** *-s.* वि-,रेचनं-कं; उदरशोधनं. **-ation,** *s.* वि-, रेचनं, वि-,रेकः, शोधनं, शुद्धि *f.* **-ative,** *a.* वि-,रेचक-न, सारक, शोधन. *-s.* वि-, रेचनं-कं, सारकं. **-atory,** *s.* शोधक, पावन, अघनाशन-मर्षण. *-s.* पापमोचनस्थानं.

Purlieu, *s. See* **Border.**

Purloin, *v. See* **Rob, Steal.**

Purple, *a.* धूम्र, धूमल, नीललोहित, धूम्रवर्ण. *-s.* धूम्रः, धूमलः, धूम्रवर्णः, नीललोहितः. *-v. t.* धूम्रीकृ 8 U. **-ish,** *a.* आधूम्र, ईषद्धूमल.

Purport, *s.* भावः, अभिप्रायः, तात्पर्यं, अर्थः, आशयः, भावार्थः, तात्पर्यार्थः. *-v. t.* अभिप्र-इ 2 P; उद्दिश् 6 P; *See* **Intend, Mean.**

Purpose, *s.* हेतुः, अभिप्रायः, आशयः, अर्थः, संकल्पः, उद्देशः, तात्पर्यं, चिकीर्षितं, इच्छा, आकूतं, आकांक्षा, कार्यं, मति-बुद्धि-*f.*, धीः; *See* **Intention;** 'fixed p.' स्थिर or दृढ-संकल्पः or निश्चयः; 'of unfailing p.' दृढ-सत्य-संकल्प, स्थिरधी-मतिः; 'to no p.' निरर्थकं, वृथा, सुग, व्यर्थं, निर्गुणं; 'who has effected his p.' कृती, कृतार्थः, कृत-कृत्यः; 'for the p. of' ex ly अर्थ-अर्थं, हेतोः, निमित्तं-त्ते, in comp., कृते (with gen. or by dat.); 'for what p.' किमर्थं, किमुद्दिश्य, केन हेतुना. *-v. t.* अभिप्र-इ, 2 P, उद्दिश् 6 P, संकल्प् c, इष् 6 P; *See*

Intend. -ly, ' on p. ' *adv.* कामतः, बुद्धि-बोध-पूर्वं, ज्ञानतः, बुद्धचा, साभिप्रायं.

Purse, *s.* धनभस्त्रिका-कोषः, ग्रंथिः. **2** धनं; *See* **Wealth;** p. cutting ग्रंथिच्छेदः-भेदः; p. pride' धनगर्वः-दर्पः- अभिमानः, ' p.-proud ' धनोन्मत्त, वित्तगर्वित; धनदृप्त, *-v. t.* कोषे नि-धा 3 U or निविश् c. **2 Contract,** q. v.

Pursue, *v. t.* अनुसृ 1 P, अनुगम्-धावृ-व्रज् 1 P, अनु-या 2 P, अनुवृत् 1 A, अनुक्रम् 1 U, 4 P. **2** अनु-ष्ठा 1 P, आचर् 1 P, आचर् 1 P, नि-,सेव् 1 A, आश्रि 1 U, आ-स्था 1 P. **3** प्रवृत् c., निर्वह् c., सततं प्रणी 1 P; *See* **Prosecute. 4** आप् desid. (ईप्सति), लभ् desid. (लिप्सते); ' p. one's way ' मार्गं आक्रम्, वह् 1 P; *See* **Follow. -er,** *s.* अनुसारिन् *m.*, अनुधावकः, अनुगामिन् *m.* **-Pursuit,** *s.* अनुसरणं-धावनं-गमनं; अन्वेषणं, मार्गणं. **2** अनुष्ठानं, आचरणं, निषेवणं, अभिनिवेशः, अनुशीलनं; प्रवृत्ति *f.*, लिप्सा, अर्जनप्रयत्नः, निष्ठता-परता in comp. **3** व्यापारः, व्यवसायः, उद्योगः, उद्यमः, आरंभः, व्यवहारः, कार्यं, प्र-,वृत्तिः; ' literary p. s. ' विद्यागम-कार्याणि, ज्ञानसंपादनारंभाः. **-Pursuant,** *a.* अनुवर्तिन्, अनुसारिन्, अनुरोधिन्, अनुरूप. **-ly,** *adv.* अनुरूपं, अनुसारेण-रतः, अनुरोधेन, यथा in comp. **-Pursuance,** *s.* अनुसरणं, वर्तनं-गमनं-रोधः; ' in p. of ' अनुरूपं, अनुसारेण, &c. **-Pursuivant,** *s.* अनुचरः, दूतः.

Pursy, *a* स्थूलह्रस्व, उच्छून, स्फीत. **2** दुःश्वासिन्, कृच्छ्रश्वास.

Purtenance, *See* **Appertenance.**

Purulent, *a.* पूयपूर्ण-मय (यी *f.*). पूयस्रावि्न्, सपूय. **-Purulence,** *s.* पूयपूर्णता, सपूयता.

Purvey, *v. t.* उपकरणानि उपकल्प् c., सं-भृ 1, 3 U or संयुज् 7 U,10; *See* **Provide. -ance,** *s.* भोजनपरिकल्पनं-संभारः-सामग्री. **2** परिकल्पनं, संभारः, संविधा-धानं. **-or,** *s.* भोजनाधिकारिन् *m.*, आहाराधिकृतः.

Purview, *s.* विषयः.

Pus, *s.* पूयः-यं, दूष्यं, पूयरक्तं.

Push, *v.* (हस्तादिना) प्रसृ c., संचल् c., प्रक्षिप् 6 P, प्रचुद् 10, प्रेर् c., प्रणुद् 6 P or c.; *See* **Drive. 2** तुद् 10, प्र-हृ 1 P; आव्यध् 4 P, प्रति-अभि हन् 2 P, आहन् 2 U; ' p. aside ' अपसृ c., बहिष्कृ 8 U, निःसृ c.; ' p. forward ' प्रणुद् c., प्रचल् c., प्रसृ c.; ' p. afar ' उत्सृ c. **-s,** **-ing,** *s.* प्रसारणं, प्रक्षेपः, प्रेरणं-णा, प्रचोदना. **2** ताडनं, आघातः, प्रहारः. अभ्याघातः. **3** वेगः, प्रयत्नः. **-ing,** *a.* उद्यमिन्, उद्योगिन्, साहसशील, प्रगल्भ, साहसिन्.

Pusillanimous, *a.* कृपण, दीन, क्षुद्रमनस्, कृपणबुद्धि-मति, लघुचेतस्, पांमर, भीरुहृदय, कातर, कापुरुष, क्लीब. **-Pusillanimity,** *s.* कार्पण्यं, दैन्यं, क्लीबता, कातर्यं, भीरुता, कृपणमतित्वं, क्षुद्रता.

Puss, Pussy, *s. See* **Cat.**

Pustule, *s.* **Pimple,** q. v. **-ous,** *a.* स्फोटपूर्ण.

Put, *v. t.* स्था c. (स्थापयति), नि-आ-धा 3 U, आरुह् c., दा 3 U, कृ 8 U, ऋ c. (अर्पयति), निविश् c., वि-,न्यस् 4 P. **2** आ-समा-युज् 7 U, 10. **3** Incite, q. v.; ' p. to death ' हन् 2 P or c., सूद् c., व्यापद् c.; *See* **Kill,** ' p. to flight ' वि-द्रु c., ' p. in mind ' स्मृ c., प्र-अनु-बुध् c.; ' p. in order ' यथाक्रमं-यथातथं-रच् 10 or स्था c. or विन्यस्, सज्जीकृ; ' p. in writing ' पत्रे निविश् c., लेख्ये आरुह् c. **-about,** परिवृत् c. **-aside,** by, अपास् 4 U, मुच् 6 P, त्यज् 1 P; *See* **Abandon. 2** परि-,रक्ष् 1 P; सं-चि 5 U. **-away,** अपनिः-सृ c., निष्कस् c., बहिष्कृ, व्याक्षिप् 6 P, विलंब c. **-down,** भूमौ निधा, अवतृ c., निक्षिप्. **2** नश् c., विलुप् c., उच्छिद् 7 P; *See* **Destroy, Overthrow. 3** (In writing) पत्रे लिख् 6 P or निविश् c. or आरुह् c. **-forth,** प्रसृ c. **2** आविष्कृ, व्यंज् 7 P, व्यक्तीकृ, प्रकाश् c., प्र-, दृश् c. **3** उपक्षिप्, उपानी, उपन्यस्, उद्दाह् 1 P. **4** उद्-भिद् c.; ' a creeper having p. forth foliage ' सन्नद्धपल्लवा लता (R. III. 7). **-off** व्याक्षिप्, विलंब c., अतिपत् c. **2** उन्मुच्, अवतृ c., अपनी, उच्छिद् 10, अपह्नु 4 P. **3** निराकृ, निःसृ c.; *See* **Discard, Discharge. 4** (From land) प्रस्थानम्, अपया, अपसृ 1 P; ' the boat p. off ' मुक्ता नौः (D. K. II. 6). **-on,** वस् 2 A, परिधा; धृ 1 P, 10, सं-व्ये 1 P; प्रसाध् c., आच्छद्; प्रा आ-वृ 5 U; ' p. on armour ' संनह् 4 P. **2** ग्रह् 9 U, स्वीकृ, धृ, दृश् c. **3** संक्रम् c., संचर् c. **4** आसंज् c.; निविश् c. **-out,** विस्तृ c., प्रसृ c., वितन् 8 U. **2** (Eyes &c.) सं-,उद्भू, वि-उत्-पद् 10. **3** निर्वा c. (वापयति), प्र-उप-शम् c. (शमयति). **4** विलक्षीकृ, व्रीडया आकुलीकृ, *See* **Embarrass. 5** निःसृ c., बहिष्कृ. **6** प्र-विनि-युज् 7 A, 10; ' p. out at interest ' वृद्धिलाभाय विनियोजित. **-over,** अधिकृ c.,अधि-ष्ठा c. **2 Put off,** q. v. **-to, Expose,** q. v.; ' p. to the sword ' खड्गेन छिद् 7 P or हन् 2 P; ' p. to sea ' नावं मुच्; ' p. to a stand ' स्तंभ् 9 P. **-together,** संयुज्; संधा, सं-ग्रंथ् 9 P. **-up,** उत्पत् 1 P. वस् 1 P; *See*

Lodge. 2 (with) सह् 1 A, क्षम् 1 A; *See* **Bear.** 3 व्यक्तीकृ, प्रकाशं स्था c., प्रदृश् c.; 'an article p. up for sale' क्रय्यं द्रव्यं; 'p. up to' प्रणुद् c., प्रोत्सह् c.

Putative, *a.* प्रसिद्ध, अभिमत.

Putrify, *v. i.* पूतीभू 1 P, पूय् 1 A, दुर्गंध-*a.* भू; वि-,गल् 1 P, वि-ली 4 A. -*v. t.* पूतीकृ 8 U, गल् c., विली c. **-action,** *s.* पूति *f.*, दुर्गंधता, पूतिगंधः, गलनं, विलयः. **-Putrid, Putrescent,** *a.* पूतिगंधि, उग्रगंध, दुर्गंध, विगलित, विलीयमान. **-ness, Putrescence,** *s.* पूतिः, दुर्गंधः, पूतिगंधः.

Puzzle, *v. t.* व्या-,मुह् c., सं-वि-भ्रम् c. (भ्रमयति), आकुलीकृ 8 U, व्यस् 4 U; *See* **Confuse, Perplex.** -*s.* कूटं, प्रहेलिका, प्रवह्लिका. 2 व्या-मोहः, भ्रांति *f.*, संभ्रमः, वैक्लव्यं, व्याकुलता, व्यग्रता. **-ed,** *a.* मूढ, भ्रांत, व्यस्तचित्त, आकुलमनस्, किंकर्तव्यतामूढ. **-ing,** *a.* भ्रम-मोह-कारिन्, संभ्रमप्रद.

Pygmy, *s.* ह्रस्वः, खर्वः, वामनः. -*a.* ह्रस्व, खर्व, वामनमूर्ति.

Pyramid, *s.* सूच्यग्रस्तंभः, **-al,** *a.* सूच्याकार, सूच्यग्र, शिखरिन्, शुंडाकृति.

Pyre, *s.* चिता, चित्या, चिति *f.*

Pyretic, *a.* ज्वरसंबंधिन्. -*s.* ज्वरघ्नोऽगदः, ज्वरोपायः.

Pyrites, *s.* स्वर्णमाक्षिकं.

Pyrrhonist, *s.* नास्तिकः, मिथ्यादृष्टिः.

Q

Quack, *s.* कुवैद्यः, दांभिकः, छद्मवैद्यः, मिथ्याचिकित्सकः. 2 हंसनादः-रवः. -*v. t.* हंसवत् नद् 1 P or रु 2 P. **-ery,** *s.* दुश्चिकित्सा; मिथ्याभिमानः. 2 **Boast,** q. v.

Quadrangle, *s.* चतुर्भुजः, चतुष्कोणः; (of a house) प्रकोष्ठः, चत्वरं, संजवनं, चतुःशालं. **-Quadrangular,** *a.* चतुष्कोण, चतुरस्र.

Quadrant, *s.* चतुर्थभागः, पादः. 2 वृत्तपादः. **-drate,** *s. See* **Square.** **-dratic,** *a.* चतुरस्रीय. 2 (equation) वर्गसमीकरणं.

Quadrature, *s.* पदसंस्थानं.

Quadrennial. *a.* चातुर्वार्षिक (की *f.*).

Quadrilateral, *a.* चतुर्भुज, चतुःपार्श्व.

Quadripartite, *a.* चतुर्विध.

Quadrisyllable, *s.* चतुरक्षरं.

Quadruped, *s.* चतुष्पदः (दी *f.*), चतुष्पाद्.

Quadruple, *a.* चतुर्गुण. -*v. t.* चतुर्गुणीकृ 8 U.

Quaff, *v. t.* (सतृष्णं) पा 1 P, उत्-चुलुंप् 1 P. **-er,** *s.* अतिपायिन् *m.*

Quagmire, *s. See* **Marsh.**

Quail, *s.* वर्तकः, वर्तिका, लावः. -*v. i.* कंप् 1 A, वेप् 1 A. 2 वि-अव-सद् 1 P, क्षि pass.; म्लै 4 A.

Quaint, *a.* अपरूप, विलक्षण, असंगत. 2 विदग्ध, चतुर, अतिसूक्ष्म. **-ly,** *adv.* विलक्षणं, असंगतं.

Quake, *v. i.* कंप् 1 A, उद्विज् 6 A, त्रस् 1, 4 P; (with abl.). -*s.* कंपः-पनं, उत्-प्र-कंपः, वेपथुः.

Qualify, *v. t.* योग्य-उचित-क्षम-*a.* कृ 8 U; ex. by 'q. ed' 2 नियम् 1 P, परिच्छिद् 7 P, परि-मा 3 A, 2 P, निबंध् 9 P. 3 **Moderate,** q. v. **-ed,** *a.* योग्य, क्षम, समर्थ, पर्याप्त, कर्मक्षम, अलंकर्मीण. 2 गुणिन्, गुणोपेत, गुणसंपन्न. 3 नियत, परिच्छिन्न, समर्याद; *See* **Limited.** **-ication,** *s.* योग्यता, क्षमता, पात्रता, औचित्यं, गुणविशिष्टता. 2 गुणः, पात्रत्वं, विशिष्टगुणः. 3 परिच्छेदः, मर्यादा, नियमनं, नियतत्वं, परिमाणं. **-Quality,** *s.* गुणः. 2 भावः, धर्मः, गुणः, स्वभावः, प्रकृति *f.*; स्व-,रूपं, लक्षणं, विशेषभावः-धर्मः-लक्षणं, शीलं; शक्ति *f.* 3 कुलीनता, श्रेष्ठ-विशिष्ट-पदं, प्रतिष्ठा, गौरवं, उत्कृष्टपदं. 4 प्रकारः, जाति *f.*, *See* **Kind;** 'good q.' गुणः, सद्गुणः, सद्भावः, 'having good q. es' गुणिन्, गुणवत्, गुणोपेत, गुणयुक्त, सद्गुण; 'bad q.' दुर्गुणः, अवगुणः; 'inherent q. of a thing' निसर्गधर्मः, वस्तुशक्तिः; 'men of q.' कुलीनजनाः, अभिजात-कुलीन-वर्गः.

Qualm, *s.* वमनेच्छा, विवमिषा. 2 मनस्तापः, अनुशयः, अनुतापः. **-ish,** *a.* विवमिषु.

Quandary, *s. See* **Difficulty.**

Quantity, *s.* परिमाणं, प्रमाणं, मानं, मात्रा, अंशः, भागः. 2 मात्रा. 3 राशिः. 4 (Large) संचयः, ओघः, पूगः, पुंजः, राशिः, संग्रहः; 'a great q. of' प्रभूत, प्रचुर, बहु, विपुल; 'great q.' बाहुल्यं, प्राचुर्यं, बहुभागः, भूयिष्ठांशः; ex. by बहु, प्रचुर, विपुल (Much, q. v.); 'in large q. es' बहुशः, बाहुल्येन, प्राचुर्येण; 'small q.' स्तोकांशः, अल्पभागः, अल्पं, स्तोकं, अल्पमात्रं; 'in small q. es' अल्पशः, स्तोकांशेन; 'long q.' दीर्घः; 'short q.' ह्रस्वः; 'known q.' व्यक्तराशिः; 'unknown q.' अव्यक्तराशिः; 'positive, negative, q.' धन-ऋण-राशिः; 'what q. of' कियत्.

Quantum, *s.* परिमाणं, मात्रा, कल्पितभागः.

Quarantine, *s.* गमनागमन-संसर्ग-निषेधः.

Quarrel, *s.* कलहः, कलिः, विवादः, विसंवादः, विप्रतिपत्ति *f.*, वाक्कलहः, वाग्युद्ध, विप्रलापः; द्वंद्वं, वैरं. **-***v. i.* विवद् 1 A, विप्रलप् 1 P, विसंवद् 1 P, विप्रतिपद् 4 A, वैरायते-कलहायते (D.), कलहं कृ 8 U, युध् 4 A. **-er,** *s.* विवादिन् *m.*, कलहकारी. **-some,** *a.* कलह-कलि-प्रिय, विवादशील, विसंवादिन्, कलह-कलि-पर, कलहकारिन्, युयुत्सु, विवादार्थिन्.

Quarry, *s.* आकरः, ख(खा)नि-नी *f.*, पाषाणस्थानं-भूमि *f.* **2** आभिषं, मार्गितजंतुः. **-***v. t.* खन् 1 P; *See* **Dig.**

Quartan, *a.* चातुर्थिक.

Quarter, *s.* पादः, तुयः, तुरीयः, अर्धार्धं, तुरीय-चतुर्थ-भागः; a rupee and a q. सपादरूपकः. **2** दिश्-शा, आशा, काष्ठा, ककुभ्, हरित्; *See* **Direction;** 'in intermediate q.' अपदिशं; 'guardian of a q.' दिक्पालः, लोकपालः; 'guardian elephant of the q.' दिग्गजः, **3** प्र-,देशः, उद्देशः, स्थानं, दिक्-शा, दिग्भागः, दिग्देशः, दिगंतः; 'from various q.s' नानादिग्देशात्, नानादिगंतेभ्यः, नानादिग्भ्यः; 'in every q.' चतुर्दिक्षु. **4** (Q. s) वासः, वसति *f.*, निकेतनं, वासस्थानं, निवेशः, कटकः-कं; 'head q. s' सेनापतिनिवेशः, कटकः. **5** दया, कृपा, जीव-प्राण-दानं; 'give q.' दयां कृ 8 U, अभयं दा 3 U. **6** (Of night) यामः, प्रहरः. **7** मासत्रयं, त्रिमासं, वत्सरपादः; 'to close q. s' बाहूबाहवि, हस्ताहस्ति, मिथःप्रत्यासन्न *a.*; 'they two came to close q. s' तौ बाहूबाहवि ध्यासृजेताम् (Si. XVIII. 12). **-***v. t.* चतुर्धा विभज् 1 U or खंड् 10 or छिद् 7 P. **2** वस् c., निविश् c. **-***v. i.* निवस् 1 P, निविश् 6 A, अध्यास् 2 A. **-ly,** *a.* त्रैमासिक (की *f.*), पादिक (की *f.*). **-***adv.* मासत्रयांते, प्रतित्रिमासं.

Quarto, *s.* चतुःपत्रकं.

Quash, *v. t.* मृद् 9 P, पराजि 1 A, पराभू 1 P. **2** खंड् 10, निवृत् c., विलुप् 6 P or c., उच्छिद् 7 P, निरस् 4 U.

Quasi, Ex. by कु, कल्प, देशीय, in comp.

Quaternion, *s.* चतुष्टयं, चतुष्कं.

Quatrain, *s.* चतुष्पद्श्लोकः.

Quaver, *v. i.* **Tremble,** q. v. **2** भग्नस्वरेणगै 1 P. **-***s.* स्वरभंगः, कंपस्वरः.

Quay, *s.* घट्टः, घट्टी, तीर्थं, उत्तरणस्थानं.

Quean, *s. See* **Prostitute.**

Queen, *s.* राज्ञी, महिषी, देवी (title of address), राजपत्नी-महिषी; 'q.'s metal' क्लांस्यं. **-like, -ly,** *a.* राज्ञीसदृश (शी *f.*), अनुरूप.

Queer, *a.* विलक्षण, असंगत, अपरूप, अद्भुत; *See* **Odd.**

Quell, *v. t.* शम् c. (शमयति), प्र-उप-,° निवृत् c., विनश् c., उच्छिद् 7 P. **2** दम् c. (दमयति), वशीकृ 8 U, पस-अभि-भू 1 P पराजि 1 A.

Quench, *v. t.* (Thirst) शम् c. (शमयति), प्र-उप-,° छिद् 7 P, निवृत् c., अपनी 1 P. **2** निर्वा c. (वापयति), प्र-उप्-शम् c. **-ing,** *s.* शमनं, शांति *f.*, वि-,च्छेदः.

Querulous, *a.* दुःखित, परिदेवनाकुल, विलापिन्, परिदेविन्, विलापशील, शोकगर्भ, दुःखात्मक. **-ly,** *adv.* सविलापं. **-ness,** *s.* विलपनशीलता.

Query, *s. See* **Question.**

Quest, *s.* अन्वेषणं, अनुसंधानं, मार्गणं, निरूपणं; 'in q. of prey' भक्ष्यार्थं.

Question, *s.* प्रश्नः, अनुयोगः, पृच्छा; 'put a question to' प्रच्छ् 6 P, अनुयुज् 7 A; 'you have put me a good q.' सम्यक् पृष्टोस्मि भवता. **2** जिज्ञासा, निरूपणं, परीक्षा-क्षणं, अनुसंधानं, विचारः-रणा. **3** संदेहः, संशयः, वितर्कः, विकल्पः, आ-,शंका; 'here a q. arises' अत्रेदं प्रष्टव्यं. **4** वि-,वादविषयः-पदं-वस्तु-आस्पदं; विचारविषयः, &c.; 'call in q.' विचर् c., (आज्ञा गुरूणां ह्यविचारणीया R. XIV 46); the topic in q.' प्रस्तुत-प्रकृत-विषयः; 'the q. arose as to &c.' इति-विवादः-प्रश्नः-समुपस्थितः. **-***v. t.* प्रच्छ्, अनुयुज्, ज्ञा desid. (जिज्ञासते); 'ascetics may be q.ed without reserve' अनियंत्रणानुयोगस्तपस्विजनः (S. 1). **2** परीक्ष् 1 A, निरूप् 10, अनुसंधा 3 U, विचर् c. **3** आशंक् 1 A, न प्रतिइ 2 P, न विश्वस् 2 P, वितर्क् 10, विकल्प् 1 A; *See* **Doubt. -able,** *a.* विचार्य, विशंक्य, शंकनीय, संदिग्ध, शंकार्ह, संदेह-शंका-पदं. **-ably,** *adv.* साशंकं, संदिग्धं. **-ary,** *a.* प्रश्नात्मक. **-er,** *s.* पृच्छकः, प्रष्टृ *m.*, अनुयोक्तृ *m.*, अनुयोगिन् *m.*, जिज्ञासुः. **-less,** *adv.* निःसंशयं, निःशंकं.

Quibble, *s.* वाक्छलं, वक्रोक्ति *f.*, वक्रभणितं, कैतववादः, अप-व्यप-देशः, अपलापः, अपह्नवः. **-***v. i.* अपलप् 1 P, वक्रं भण् or वद् 1 P, अपदिश् 6 P, वाक्छलं कृ 8 U. **-er,** *s.* अपलापिन् *m.*, वक्रोक्तिवादिन् *m.* **-ing,** *s. See* (*s.*).

Quick, *a.* शीघ्र, त्वरित, द्रुत, क्षिप्र, सत्वर, अविलंबित, तूर्ण; 'q.-wit' प्रत्युत्पन्नधीः-मतिः &c.; 'q. as thought' मनोजवेन, संकल्पस्य त्वरयेव. **2** तीक्ष्ण, सूक्ष्म, तीव्र, शीघ्रग्राहिन्, आशुकारिन्. **3** शीघ्र, शीघ्र-द्रुत-गति, सवेग, चपल; *See* **Sharp. 4** सजीव, चल, स्पंदमान; 'q. with child' चलित-गर्भा, आपन्नसत्त्वा, *See* **Pregnant;** 'be q.', 'q., q.' त्वरस्व, त्वरस्व; 'q.-lime'

चूर्णजलं, तप्तचूर्णं; 'q. sand' अस्थिर-पुलिनं-सैकतं; q.-sight' तीक्ष्ण-सूक्ष्म-दृष्टि *f.*; 'q.-silver' पारदः; *See* **Mercury**, 'q.-witted' शीघ्र-तीक्ष्ण-बुद्धि-मति, प्रत्युत्पन्नमति. **-*adv.* Quickly**, q. v. **-*s.*** मर्मन् *n.*, मर्मस्थानं-देशः; 'piercing to the q.' मर्मस्पश्-भिद्-च्छिद्-आविध्. **-en**, *v. t.* त्वर् c. (त्वरयति), गतिं वृध् c. **2** जीव् c., सोच्छ्वास-*a.* कृ 8 U, जीवं दा 3 U. **3** उद्दीप् c., उत्तिज् c., शो 4 P, प्ररुच् c., वृध् c.; *See* **Sharpen.** **-*v. i.*** त्वर् 1 A, द्रुततरं गम् or चल् 1 P. **2** जीवित्वं-चैतन्यं-प्राप् 5 P, सजीवीभू. **3** स्पंद् 1 A, चल् 1 P, स्फुर् 6 P. **-ening**, *a.* जीवद्, उद्दीपक. **-ly**, *adv.* शीघ्रं, सत्वरं, त्वरितं, तूर्णं, लघु, आशु क्षिप्रं, द्रुतं. अविलंबं, अविलंबितं, चपलं, अरं, शीघ्र-क्षिप्र- द्रुत in comp.; 'going q.' द्रुतगामिन्, शीघ्र-गति. **2** अह्नाय, सपदि, सद्यः; झटिति, अचिरात्, अचिरेणैव. **-nese**, *s.* शीघ्रता, तीक्ष्णता, &c.

Quiescent, *a.* निश्चल, निश्चेष्ट, स्थिर, अचल; विरत, शांत. **-Quiescence**, *s.* निश्चलता, चेष्टाभावः, शांति *f.*, &c.

Quiet, *a.* शांत, प्र-उप-°, निश्चल, अचल, स्थिर, निष्कंप; अक्षुब्ध, अव्याकुल, स्तिमित, निर्वात, निवृत्तवायु, (sea); विरत, विश्रांत. **2** सौम्य, मृदु, अचंड, अनुग्र; *See* **Mild.** **3** स्वस्थ, निर्विघ्न, अबाध, निरुपद्रव, निरुपप्लव, निरुद्वेग, अभंग. **4** निःशब्द, तूष्णीक; 'keep q.' मौनमवलंबस्व, जिह्वां धारय, तूष्णीं भव, जोषमास्स्व. **-*s.*** स्थिरता, निश्चलत्वं, शांति *f.*, शमः, प्र-उप-°, विश्रामः, स्वास्थ्यं, निरुपद्रवता, निर्वातत्वं, अक्षोभः, निरुपप्लवता, &c. **-*v. t.*** सांत्व् 10, प्र-उप-शम् c. (शमयति), निवृत् c., विरम् c., विश्रम् c., स्थिरीकृ 8 U. **-ism**, *s.* शमः, वैराग्यं, निवृत्तिमार्गः. **-ist**, *s.* विरागिन् *m.* **-ly**, *adv.* शांतं, शांत्या, निराकुलं, अव्याकुलं, अक्षुब्धं, स्वास्थ्येन, अनुग्रं, अचंडं; तूष्णीं, निःशब्दं. **-ness, -itude**, *s.* शमः; *See* (*s.*).

Quill, *s.* पक्षः, पर्णं; (for writing) कलमः, लेखनी; (of a lute) रणः, शारिका, कोणः; (of a porcupine) शलं, शललं-ली.

Quilt, *s.* तूला, तूलिका, तूलिकाप्रच्छदः-संस्तरः; प्रच्छदपटः. **-*v. t.*** तूलादिना निषिव् 4 P.

Quinary, *s.* पंचकं. **-*a.*** पंचरूप, पंचक.

Quindecagon, *s.* पंचदशभुजः.

Quinquennial, *a.* पंचवार्षिक (की *f.*), पंचवर्षीय.

Quinsy, *s.* श्लेष्मजा रोहिणी; कंठपाकः.

Quintessence, *s.* सारः, तत्त्वं; *See* **Essence.**

Quintuple, *a.* पंचगुण; पंचविध.

Quip, *See* **Taunt.**

Quire, *s.* गायकगणः.

Quirk, *s.* **Quibble**, q. v. **2** उपालंभः, अवक्षेपः, धिक्कारः. **3** छंदस् *n.*, मनोलौल्यं; *See* **Fancy.** **-ish**, *a.* चपल, लोलमति.

Quit, *v. t.* त्यज् 1 P, हा 3 P, अपास् 4 U, वि-उत्-सृज् 6 P; *See* **Abandon;** अप-सृप् 1 P, निर्गम् 1 P, अप-या 2 P, व्यप-इ 2 P. (with abl.). **2** (Debt) वि-मुच् 6 P or c., शुध् c., निस्तॄ c., निरा-अपा-कृ 8 U. **-*a.*** वि-,मुक्त, शोधित, निस्तीर्ण. **-tance**, *s.* निष्कृति *f.*, मोक्षः, शुद्धि *f.*, निस्तारः, मुक्ति *f.*, साधनं; 'q. of a spite' वैरशुद्धिः-शोधनं.

Quite, *adv.* सर्वथा, सर्वशः, साकल्येन, निःशेषं. **2** सु-अति pr.; अत्यंतं, अतीव, भृशं; *See* **Exceedingly.**

Quiver, *s.* तूणः-णी, तूणीरः, निषंगः, इषुधिः, उपासंगः. **-*v. t.*** स्फुर् 6 P, कंप् 1 A, स्पंद् 1 A, वेप् 1 A. **-ed**, *a.* तूणिन्, तूणीरभृत्. **-ing**, *a.* कंपमान, वेपमान, कंपित, स्फुरित, सकंप, चंचल, लोल, चपल. **-*s.*** स्फुरणं, स्पंदनं, कंपः-पनं.

Quixotic, *a.* अद्भुत, विचित्र, असंभव.

Quiz, *s.* उपहासकः, अवक्षेपकः. **-*v. t.*** उप-अव-हस् 1 P, अवक्षिप् 6 P.

Quoit, *s.* चक्रं, वलयः-यं. **-*v.*** चक्रैः क्रीड् 1 P.

Quondam, *a.* पूर्व; *See* **Former.**

Quorum, *s.* निर्दिष्टसंख्या, कार्यनिर्वाहक्षमा संख्या.

Quota, *s.* अंशः, भागः.

Quote, *v. t.* उद्-हृ 1 P, अवतॄ c., उपन्यस् 4 U, उद्-गृ 6 P, उदा-हृ, उप-नी 1 P. **-ation**, *s.* उद्धारः, अवतरणं, उद्धारणं, उपन्यासः, उद्धृत or अवतारित-वाक्यं or लेखः.

Quoth, *v.* आह, वदति, &c.

Quotidian, *a.* दैनंदिन (नी *f.*), प्रात्याहिक (की *f.*); अन्येद्युष्क.

Quotient, *s.* फलं, गुण्यः; 'by dividing is obtained the q.' भजनेन लब्धो गुण्यः.

R

Rabbit, *s.* शशः, शशकः.

Rabble, *s.* प्राकृताः, पृथक्-प्राकृत-जनाः; नीचाः; प्राकृतगणः.

Rabid, *a.* उन्मत्तं, संभ्रांत, विक्षिप्तचित्त, वातुल. **-ly**, *adv.* सोन्मादं, उन्मत्तवत्. **-ness**, *s.* उन्मादः, वातुलता.

Race, *s.* अन्वयः, कुलं, वंशः, संतानः, संतति *f.*, वंशावलि-ली *f.*, गोत्रं. **2** जाति, वर्गः. **3 March**, q. v. **4** चर्या, धावनं. **5** मूलं; 'to run a r.' अहमहमिकया-परस्पराजिगीषया-धाव् 1P; 'slow and steady wins the r.' मंदोद्योग-विरतोद्योगः सदा विजयभाग्भवेत्, (कूर्मवृत्तिं समास्थाय सर्वत्र विजयी भवेत्); 'r.-course' चर्याभूमि *f.*; 'r.-horse' जवाश्वः, जवनः. **-v.** *i* धाव् 1 P; *See* **Run**. **-ial**, *a.* जातीय, वर्गीय.

Rack, *s.* तीव्रवेदना, यातना, अतिव्यथा; 'put to the r.' अई 1 P or c., संपीड् 10. **2** गवादनी, द्रोणि-णी *f.* **3** संपीडनयंत्रं, प्रमाथ-यातना-यंत्रं; 'r.-and ruin' उच्छेदः. **-v.** *t.* अत्यंतं पीड् or व्यथ् c. (व्यथयति), यातना-यंत्रेण पीड् or प्रमथ् c.

Racket, *s.* कोलाहलः, कलकलः. तुमुलरवः, **2** शुलिकाताडनी. **-y**, *a.* तुमुलकारिन्.

Racy, *a.* सरस, रसवत्; तीक्ष्ण-उग्र-रस.

Radiate, *v. i.* निर्गम् 1 P, समंततः प्रसृ 1 P or उद्-इ 2P (rays); स्फुर 6 P, किरणान् विक 6 P or प्रसृ c., दीप् freq. (देदीप्यते). **-ion**, *s.* अंशुप्रसरणं-स्फुरणं, किरणपातनं-विकिरणं. **-Radiant**, *a.* उज्ज्वल, दीप्तिमत्, सुप्रभ, देदीप्यमान, तेजस्विन्; *See* **Bright**. **-ly**, *adv.* सुप्रभं, अतितेजसा, उज्ज्वलं. **-Radiance**, *s.* प्रभा, दीप्ति *f.*, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं; *See* **Lustre, Light**.

Radical, *a.* मूलं in comp., मौलिक (की *f.*); मौल (ली *f.*). **2** निसर्गज, स्वाभाविक-नैसर्गिक-(की *f.*); *See* **Natural**. **-ly**, *adv.* समूलं, मूलतः, आमूलं. **2** स्वभावतः, प्रकृत्या, जातितः.

Radish, *s.* मूलकः-कं.

Radius, *s.* त्रिज्या, जीवा; व्यासार्धं, विष्कंभार्धं. **2** (Of a wheel) अरः.

Raff, *s.* *See* **Rabble**.

Raft, *s.* उडुपं, प्लवः; कोलः, तरंडः.

Rafter, *s.* तुला, दीर्घस्थूणा-काष्ठं, दीर्घदारु, गृहस्थूणा

Rag, *s.* वस्त्रखंडः-डं, पटखंडः, चीरं, चीवरं, कर्पटः, न(ल)कः. **2** जर्जर-जीर्ण-वस्त्रं, पटच्चरं; 'dressed in r.s' चीरवाससु, परिहितचीर, कर्पटिक. **-ged**, *a.* जीर्ण, जर्जर.

Rage, *s.* संरंभः, मन्युः, रोषः, क्रोधः, प्रकोपः; उत्तापः, संतापः, क्रोधावेशः, अमर्षः. **2** उत्कटेच्छा, लालसा, तीक्ष्णता, उच्चंडता, तीव्रता, उग्रता, तिग्मता. **-v.** *i.* नितरां क्षुभ् 4 P, 1 A, कुध्-रुष्-कुप् 4 P, संरंभ-मन्युवशं-गम् 1 P or प्राप् 5 P, क्रोधाकुल-*a.* भू 1 P. **2** उग्र-चंड-तीक्ष्ण -*a.* भू; 'r. on (oh cloud)' गर्ज, गर्जास्तिष्ठ. **-ful**, *a.* क्रोधान्वित, कोपाकुल, रुष्ट; कुपित, जातामर्ष संरंभिन. **-ing**, संरंभिन, उग्र, तीक्ष्ण, तीव्र, उच्चंड, वेगवत्.

Raid, *s.* अवस्कंदः, आपातः.

Rail, *v. i.* अव-आ-अधि-क्षिप् 6 P, अप-भाष् 1 A, अपवद् 1 A, आक्रुश् 1 P, शप् 1, 4 U, गर्ह् 1, 10 A, निंद् 1 P, भर्त्स् 10 A; 'r. ing words' आक्षेपवादः, गर्हणा, निंदावचः. **-v.** *t.* लोहस्तंभैः परिवृ 5 U or परिवेष्ट् 1 Ā or c., निरुध् 7 U. **-s.** लोहशंकुः-शलाका-तुला; 'r.-way,' 'r.-road' लोहपथः-मार्गः. **-er**, *s.* अवक्षेपकः, निंदकः, निर्भर्त्सकः, अपवादकः, आक्रोशकः. **-ing**, *s.* लोहावरणं, लोहशलाकावृति *f.* **2** अव-आक्षेपः, आक्रोशः, निंदा, निर्भर्त्सना, गर्हणा, अपवादः, उपालंभः, अपभाषणं, तिरस्कारः.

Raiment, *s.* वस्त्रं, वसनं, वासस् *n.*, अंबरं आच्छादनं, वेशः-षः, परिच्छदः; *See* **Cloth, Garment**; 'food and r.' ग्रासाच्छादनं, अन्नवस्त्रं.

Rain, *s.* वृष्टि *f.*, वर्षः-र्षं, पर्जन्यः; 'gentle r.' शीकरासारः; 'heavy r.' अतिवृष्टिः; shower of r.' धारासंपातः, धारासारः; (r.s) वर्षाः *f.* (pl.), प्रावृष् *f.*, वर्ष-मेघ-घन-समयः-कालः, मेघागमः, तपात्ययः, वर्षा, कालः; 'r.-bow' इंद्रधनुस् *n.*, इंद्रचापं and similar comp.; सरधनुः, इंद्रायुधं; 'r.-fall' वर्ष-वृष्टि-पातः; 'r.-water' वृष्टि-वर्ष-जलं. **-v.** *i.* वृष् 1 P, (the subject being 'Indra' 'Sky' or 'Cloud'), जलं सृ or पत् 1 P; 'when it was r.ing gently' मंदं मंदं वर्षति जलधरे-गगने-वासवे, &c.; 'it r.ed in torrents' धारासारैर्वृष्टिर्बभूव; 'to r. off' 'cease to r.' निवृष्. **-v.** *t.* वृष्, जलं सृ c. **-y**, *a.* वृष्टिमत्, वर्षिन्, प्रावृषिक (की *f.*); 'a r. day' दुर्दिनं; 'r. season' वर्षाः, प्रावृट्; *See* (*s.*).

Raise, *v. t.* उत्-स्था c. (उत्थापयति), in all senses; उत्तुल् 10, उन्नी 1 P, उच्छ्रि 1 U, उत्कृष् 1 P; उत्क्षिप् 6 P, उद्यम् 1 A, उन्नम् c. (नमयति), उद्-ह-धृ 1 P, उद्-हन् 2 P; आत्मोद्धतैरपि रजोभिः (S. 1)' r.ed by themselves'; आ-आधि-रुह् c.; oft.ex. by उत् in comp.; 'having r.ed

his neck' उत्कंधरः; उन्मुखः &c.; 'r. ing both his arms' बाहू उद्यम्य· 2 उन्नम् c., उत्कृष्, उच्छ्रि, पदवृद्धिं कृ 8 U, प्रतिपत्तिं प्राप् c., उत्कृष्टपदे नियुज् 7 A, 10. 3 (Doubt, anger, &c.) उत्पद् c., जन् c., प्रवृत् c., उत्था c.; *See* **Cause.** 4 वृध् c., *See* **Increase;** (building) निर्मा 3 A, 2 P, रच् 10; (tax) ग्रह् 9 U; *See* **Levy;** 'to r. one's voice' उच्चैःतारस्वरेण-वद् 1 P; 'r. a cry' उत्क्रुश् 1 P, उद्-घुष् 10; 'r. dust' रजः उद्धन्, उद्-धू 5, 9 U, 6 P; 'r. a siege' अवरोधं त्यज् 1 P or मुच् 6 P. **-ed,** *a.* उत्थापित, उच्छ्रित, उन्नत, उन्नमित, उद्यत, उत्थित, उद्धत; उत्पन्न, जात, जनित; oft. by उत्, उद्यत, उच्छ्रित in comp.; 'having the arms r.' उद्बाहुः &c. **-ing,** *s.* उत्थापनं, उन्नयनं, उन्नति *f.*, उत्क्षेपः, &c.

Raisin, *s.* शुष्कद्राक्षा.

Rake, *s.* विटः, लंपटः, व्यसनिन् *m.*, खंडितवृत्तः; *See* **Libertine.** 2 दंतच्छुरिकाकर्तरिका **-***v. t.* समाह् 1 P, संग्रह् 9 P, सं-चि 5 U. 2 पुन-जीव् c.; उज्जीव् c. **-***v. i.* व्यभिचर्. लंपटवत् आचर् 1 P, भोगासक्त्या आयुः गम् c. **-ish,** *a.* व्यसनिन्, लंपट, भोगासक्त, विषयसुखनिरत.

Rally, *v. i.* एकत्र-सं-भू 1 P, संमिल् 6 P, व्यूहीभू; *See* **Assemble.** 2 (Fig.) सुस्थ-*a.* भू; प्रकृतिं आ-पद् 4 A, प्रकृतौ स्था 1 P, समुत्था, बलं लभ् 1 A. **-***v. t.* एकत्र आनी or समाह् 1 P, पुनः व्यूह् 1 U or क्रमेण विन्यस् 4 U or विरच् 10. 2 **Jest,** q. v.

Ram, *s.* मेषः, उरभ्रः, उरणः, अविः, एडकः, मेढ्रः, उर्णायुः, वृष्णिः, हुडुः, लोमशः; 'a flock of r.s' औरभ्रं. 2 (Sign) मेषः, मेषराशिः. **-***v. t.* बलात्-आविलेन प्र-नि-विश् c. or प्रणुद् c., or संपीड् 10 'R.-rod', 'battering-r.' चूर्णप्रणोदनी यष्टिः.

Ramble, *v. i.* परि-अट् 1 P, परिभ्रम् 1, 4 P; विह् 1 P, इतस्ततः चर् 1 P or भ्रम्; 'r. ing from the subject' अप्रस्तुतालापः. **-***s.* परिभ्रमणं, पर्यटनं, विहारः, विहरणं. **-er,** *s.* पर्यटनशीलः, पथिकः, भ्रमणकारिन्.

Ramify, *v. i.* शाखाप्रतिशाखारूपेण विस्तृ pass., उपशाखारूपेण विभिद् pass. **-***v. t.* बहुशाखीकृ 8 U. **-ied,** *a.* शाखिन्, सूक्ष्मशाखामय (यी *f.*), शाखाप्रतिशाखारूपेण विस्तीर्ण. **-ication,** *s.* प्र-प्रति-शाखा, सूक्ष्म-उप-शाखा.

Rammer, *a.* मुद्गरः, घनः, अयोघनः.

Rammish, *a.* उग्र-तीक्ष्ण-गंध.

Ramous, *a.* शाखिन्, शाखाबहुल.

Ramp, *v. i.* प्लु 1 A, वल्ग् 1 P. **-***s.* प्लुति *f.*, प्लुतं, वल्गितं; *See* **Leap.** **-Rampant,** *a.* अनियंत्रित, निरवग्रह, निर्यत्रण, उच्छृंखल. 2 अतिरिक्त, उद्रिक्त, उत्सिक्त, अतिमर्याद. 3 पश्चात्पादयोः स्थित. **-Rampancy,** *s.* अनियंत्रणा, अतिरेकः, उत्सेकः, अतिक्रमः, उत्क्रमः.

Rampart, *s.* प्राकारः, वप्रः-प्रं, वरणः, सालः; *See* **Fence.**

Rancid, *a.* उग्र or तीक्ष्ण-रस or गंध, विरस, पूतिगंधि.

Rancour, *s.* अभिद्रोहः, विद्वेषः, अतिद्वेषः-द्रोहः, अतिमात्सर्यं; *See* **Malice.** **-ous,** *a.* अभिद्रुग्ध, विद्वेषिन्, अति-दीर्घ-द्वेषिन्-द्रोहिन्, द्रोह-मत्सर-बुद्धि. 2 जिघांसु; विषपूर्ण, द्वेशशील. **-ously,** *adv.* सद्वेषं, अतिद्वेषेण.

Random, *a.* आकस्मिक-यादृच्छिक-(की *f.*), अनियत, अयंत्रित, संधानहीन, दैवादागत, अतर्कितोपनत, सहसा उत्पन्न; 'at r.' अकस्मात्, यदृच्छया, निःसंधानं, अविचार्य, सहसा, असंबद्धं, अनियतं, उच्छृंखलं; अव्यवस्थया, अक्रमेण; 'talk at r.' अक्रमेण जल्प् or वद् 1 P, (जल्पतोरक्रमेण U. 1); 'oh! how he lies at r. carelessly diffused on the ground' हा हा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्यस्तः (U. 3).

Randy, *a. See* **Disorderly.**

Range, *s.* राजिः, श्रेणिः-णी, माला, पंक्तिः, ततिः, आवलिः-ली, आलिः-ली, वीथिः-थी, (all *f.*). 2 गणः, वर्गः, वर्णः. 3 परिभ्रमणं, पर्यटनं. 4 सोपानं, आरोहणं. 5 विषयः, पथिन् *m.*, गोचरः in comp.; 'beyond the r. of sight' चक्षुर्विषयं-नयनगोचरं अतीत्य or अतीतं; 'within the r. of hearing' श्रुतिपथे-विषये-गोचरे; 'beyond the r.' अविषये, अविषय-विषयातीत-*a.*; 'r. of an arrow' शरपातः, बाणविषयः. **-***v. i.* परिभ्रम् 1, 4 P, विचर् 1 P, विह् 1 P (for diversion); 'r. about' इतस्ततो भ्रम्, पर्यट् 1 P. 2 स्था 1 P, वृत् 1 A; *See* **Be.** **-***v. t.* विन्यस् 4 U, क्रमेण रच् 10, व्यूह् 1 U. **-er,** *s.* लुब्धकः, व्याधः. 2 वनग्राहिन् *m.*, वनपालः.

Rank, *s.* श्रेणि-णी *f.*, पंक्ति *f.*, राजि *f.*; *See* **Range, Line.** 2 (Of an army) व्यूहः, दंडः, सैन्यपंक्तिः-विन्यासः. 3 वर्गः, वर्णः, गणः. 4 पदं, स्थानं, आस्पदं, वृत्ति *f.*, स्थिति *f.* 5 प्रतिष्ठा, मानः, गौरवं, उत्कर्षः, उन्नति *f.*, प्रतिपत्ति *f.* प्राधान्यं, उच्च or परम-पदं, or पदवी, कुलोत्कर्षः, आभिजात्यं; 'a man of high r.' प्रतिपत्तिमत्, अभिजात, कुलीन, उच्चपदभाक् **-***v. i.* समान-तुल्य-*a.* वृत् 1 A or स्था 1 P; पंक्तिक्रमेण स्था. **-***v. t.* पंक्तिक्रमेण न्यस् 4 U or रच् 10, वर्गक्रमेण रच्; oft. ex. by वर्गे-पक्षे-स्था c. or गण्-कृत्-10, (दृष्टिपातमप्युपकारपक्षे स्थापयंति Ka. 108); 'fit to be r.ed first' धुरि प्रतिष्ठापयितव्य or कीर्त-

नीय. **2** तुल्य-सम-*a*. मन् 4 A. **-a.** प्रभूत, प्रचुर, विपुल, अतिस्फीत, अतिरिक्त, उद्रिक्त. **2** उग्रगंध, पूतिगंधि, तीक्ष्णगंध. **-ness,** *s.* उद्रेकः, अतिस्फीति-वृद्धि- *f.*, अतिरेकः, प्रचुर-वृद्धिः. **2** उग्रता, तीक्ष्णता.

Rankle, *v.i.* उद्दीप् 4 A; उग्रतर-तीक्ष्णतर- *a.* भू 1 P; oft. ex. by शल्यं; 'those words r. in my heart' तद्वचो मम हृदये शल्यं जातं, शल्यमिव हृदये प्रत्युप्तं; 'I r. in his eyes' अक्ष्णिगतोऽहं तस्य. **2** अंतः पूय् 1 A or पूतीभू; 'the wound r. ed' स प्रहारः करालतां गतः (P. IV. 3).

Ransack, *v. t.* लुंट्-ट् 1 P, 10; *See* **Plunder. 2** निपुण-सूक्ष्म-अन्विष् 4 P or सृग् 10 A.

Ransom, *s.* निष्क्रयः; उद्धारः, निस्तारः, मुक्ति *f.*, मोक्षः; निस्तार परिक्रय-मूल्यं. **-***v. t.* मूल्यं-धनं-दत्वा मुच् c. or उद्भृ 1 P or निस्तृ c., निष्क्री 9 U, परिक्री 9 A. **-er,** *s.* निस्तारकः, निष्क्रेतृ *m.*

Rant, *s.* निरर्थक-निरर्गल-प्रलापः, शब्दमात्रं वाक्यं. **-***v. i.* उच्चैः स्वरेण प्रलप् 1 P, शब्द-पांडित्यं कृ 8 U. **-er,** *s.* प्रलापिन् *m.*

Rap, *v. t.* तीव्रं प्रहृ 1 P or तड् 10 or अभिहन् 2 P. **2** अप-,हृ 1 P; ग्रहू 9 U, चित्तं-मनः-आकृष् 1 P or ग्रहू. **-***s.* तीव्र-प्रहारः-आघातः.

Rapacious, *a.* अति-,लुब्धक, अपहारिन्, अपहरणशील, ग्रसनबुद्धि, सर्वहारिन्-ग्राहिन्, साहसिक (की *f.*). **-ly,** *adv.* प्रसह्य, प्रसभं, बलात्; अपहारबुद्ध्या, अतिलोभेन. **-ness,-Rapacity,** *s.* साहसिकता, आततायित्वं, अपहारशीलता, अपहरणबुद्धि *f.* **2** लुब्धता, अतिलोभः.

Rape, *s.* अप-,हरणं. **2** दूषणं, बलात्कारेण-बलात्-रतं-संभोगः; हठसंभोगः, आधर्षः-र्षणं, बलात्कारः, स्त्रीसंग्रहः; 'to commit r.' बलात्कारेण रम् 1 A or अभिगम् 1 P or संगम् 1 A, आधृष् c.

Rapid, *a.* शीघ्र, द्रुत, क्षिप्र, लघु.**-ity,-ness,** *s.* त्वरा, वेगः, तरस् *n.*; द्रुतता. **-ly,** *adv.* शीघ्रं, सत्वरं, द्रुतं; *See* **Quick,-ly** &c. **-Rapids,** *s.* वेगवत् स्रोतस् *n.*

Rapier, *s.* छुरिका, कर्तरिका, क्षुद्रकृपाणः.

Rapine, *s. See* **Plunder, Pillage.**

Rapt, *a.* हर्षोन्मत्त; परमहृष्ट, अत्यानंदित; (for 'wrapt') पर, लीन, निमग्न in comp. **-Rapture,** *s.* हर्षोन्मादः, आनंदातिरेकः, हर्षावेशः, अत्यंतहर्षः, प्रहर्षः, उन्मादः. **-ed,** *a.* हर्षोन्मत्त, उन्मत्त. **-ous,** *a.* उन्मत्त, परमहर्षद, मोहन; 'r. joy' परमानंदः. **-ously,** *adv.* सोन्मादं, परमहर्षेण; *See* **Ecstasy.**

Rare, *a.* विरल, दुर्लभ, दुष्प्राप, अप्राप्य, अतुलभ; 'of r. occurrence' विरल, विरलदृष्ट. **2** अपूर्व, अदृष्टपूर्व, परम, अत्युत्तम, अतुल्य, अत्युत्कृष्ट. **3** विरल, सूक्ष्म, अघन. **-ly,** *adv.* विरलं, क्वचित्, कृच्छ्रेण, कथमपि, कष्टेन, दुर pr.; oft. ex. by (*a.*); 'r. to be found' दुष्प्राप, दुर्लभ; 'r. to be seen' दुर्लभदर्शन. **-ness,** *s.* विरलता, दुष्प्रापता, दुर्लभत्वं. **2** अपूर्वता, अत्युत्तमता. **3** सूक्ष्मता. **-Rarity,** *s.* अपूर्वं वस्तु, चमत्कारः, कौतुकं, दुर्लभवस्तु. **2 Rareness,** q. v. **-Rarefy,** *v. i.* सूक्ष्मी तनू-विरली-भू 1 P. **-***v. t.* तनूकृ 8 U, विरलीकृ.

Rascal, *s.* धूर्तः, दुर्जनः, जाल्मः, शठः, कितवः, दुरात्मन् *m.*, दुर्वृत्तः, खलः, पापात्मा, निंद्यचरितः, अधम-जघन्य-वृत्ति.. **-ity,** *s.* धूर्तता, दौर्जन्यं, दौरात्म्यं, कैतवं, शाठ्यं, खलता, पापवृत्ति *f.*, अधम-नीच-वर्तनं. **-ly,** *a. See* (*s.*).

Rase, *v. t.* प्रमृज् 2 P or c., विलुप् c.; घृष् 1 P, उल्लिख् 6 P. **2** भूमिसात्कृ 8 U; *See* **Raze, Erase. -ure,** *s.* प्रमार्जनं, विलोपनं.

Rash, *a.* क्षिप्र-अविमृश्य-असमीक्ष्य-कारिन्, अविवेकिन्, अपरिणामदर्शिन्, साहसिन्, साहसिक (की *f.*), अदूरदर्शिन्, असावधान. **2** (Of acts) असमीक्ष्य &c. कृत; अविमृष्ट, सरभस, साहसिक, अविचार-असमीक्षा-पूर्व; better ex. by 'r.-ly.' **-***s.* **Eruption, Pimple,** q.v. **-ly,** *adv.* असमीक्ष्य, अविमृश्य, सहसा, अविवेकेन, अविचार्य, अनालोच्य, अनवेक्षा-अविवेक-पूर्वं, सरभसं, क्षिप्रं, उत्तापेन, सावेगं. **-ness,** *s.* असमीक्ष्य-अविमृश्य-कारिता, साहसं, अविवेकः, अविचारः, असमीक्षा, अनवेक्षा, रभसः, आवेगः, उत्तापः.

Rasher, *s.* (वल्लूर) खंडः, छेदः.

Rasp, *s.* सं-,घर्षणी. **-***v. t.* घर्षण्या घृष् 1 P.

Rat, *s.* आखुः, मूष(षि)कः, बिलेशयः, उंदुरुः, खनिकः; 'I smell a r.' किमप्य-निष्टं-अशुभं-आशंकते मे मनः. **-***v. i.* कार्यात् अन्यपक्षं अवलंब् 1 A or आश्रि 1 U.

Ratan, *s.* वेतसः, वेणुः, वेत्रः-त्रं, वानीरः, वंजुलः; 'crackling r.' कीचकः.

Rate, *s.* मूल्यं, अर्घः, मूल्य-अर्घ-प्रमाणं, वस्नः, अवक्रयः. **2** मानं, प्र-परि°. **3** वेगः. गति *f.*, गतिमान-प्रमाणं. **4** नियत-निरूपित-मूल्यं-वेतनं. **5** करः, शुल्कं, बलिः; 'at any r.' येन केन प्रकारेण; तावत्; 'market-r.' आपणिकः; अर्घबलाबलं. **-***v. t.* अर्घ-मूल्यं-निर्णी 1 P or सं-स्था c., (स्थापयति) or निरूप् 10 or सं-ख्या c. **2** प्रमाणं निरूप्; oft. ex. by गण् 10,

मन् 4 A.; *See* **Consider.** **3** निंद् 1 P, उपालभ् 1 A; *See* **Reproach.**

Rather, *adv.* Ex. by वरं with न च-न पुनः; for 'than'; *See* **Prefer;** 'I would r. die than be disgraced' वरं मृत्युर्न पुनरपमानः; 'I had r. not go there' वरं तत्र न गत एव, यदि न गच्छेयं तर्हि वरं-श्रेयः-स्यात्. **2** ईषत्, किंचित्, किमपि, किंचिदिव; 'r. less' ईषदून, किंचिन्न्यून.

Ratify, *v. t.* स्थिरीकृ 8 U, दृढीकृ, सत्याकृ, दृढयति-सत्यापयति-(D), संस्तंभ् 9 P or c. प्रमाणीकृ. **-ier,** *s.* सत्यापकः, संस्तंभकः. **-ication,** *s.* स्थिरी-दृढी-करणं, संस्तंभनं, सत्यापनं, सत्यंकारः.

Ratio, *s.* संबंधः, प्रमाणं.

Ratiocinate, *v. i.* युक्तिपूर्व-सहेतुकं-उपपद् c. or विचर् c. or वितर्क् 10; *See* **Argue.** **-ion,** *s.* वितर्कः, विचारः, युक्तिवादः.

Ration, *s.* अल्पपरिमाणं, आहारांशः, निरूपिताहारभागः.

Rational, *a.* विचारवत्, सचेतन, सचेतस्, विवेकिन्, सज्ञान, व्युत्पत्तिमत्, व्युत्पन्न, प्रतिबोधवत्, चिच्छक्ति- ज्ञानशक्ति-संपन्न. **2** युक्त, उपपन्न, सयुक्तिक, न्याय्य, यथोचित, यथायोग्य, न्यायानुरूप, युक्तिसिद्ध, उपपत्तिमत्, न्यायानुसारिन्. **-ism,** *s.* हेतु-कारण-वादः, हैतुकत्वं. **-ist,** *s.* हेतु-न्याय-वादिन् *m.*, हैतुकः **-ity, -ness,** *s.* ज्ञानशक्ति *f.*, चिच्छक्तिः, ज्ञानं, अव-प्रति-बोधः, चेतनत्वं, तर्क-विचार-शक्तिः. **2** युक्तता, न्याय्यता, उपपत्ति *f.* **-ly,** *adv.* न्यायतः, युक्तिपूर्वं, न्यायानुसारेण, तर्क-विवेक-द्वारेण. **-Rationale,** *s.* उपपत्तिः.

Rattle, *v. i.* क्वण्-ध्वन्-स्वन्-रण् 1 P, शिंज् 2 A, वि-रु 2 P, झणझणायते (D.); (as a wheel) संक्रीड् 1 P, (संक्रीडति चक्रं S. K.). **2** प्रजल्प् 1 P, प्रलप् 1 P. **-v. t.** Causal of roots above. **-ing,** *s.* क्वणनं, शिंजितं, ध्वनिः, क्वणितं, वि-,रावः, झणझणापितं; संक्रीडितं. **2** प्रलपितं, प्रजल्पनं. **3** (Instrument) शिंजिनी, क्वणनी.

Rancous, *a.* परुष (स्वन).

Ravage, *v. t.* वि-उप-प्लु 1 A, उप-द्रु 1 P, प्र-सं-बाध् 1 A, अव-मृद् 9 P, उच्छिद् 7 P, विनश् c., उद्ध्वंस् c. **-s.** वि-उप-प्लवः, संबाधा, उपद्रवः, अवमर्दः, उच्छेदः, विनाशः, उद्ध्वंसः. **-er,** *s.* उपप्लवकारिन् *m.*, प्र-संबाधकः, अवमर्दकः, उच्छेदकः.

Rave, *v. i.* (भ्रमात्-उन्मत्तवत्) प्रलप् 1 P, प्रजल्प् 1 P, बुद्धिभ्रमेण वद् 1 P. **2** उन्मद् 4 P, नष्टचेतन-बुद्धिभ्रष्ट-*a.* भू 1 P. **-ing,** *s.* वि-भ्रम-प्रलापः; चित्तविप्लवः-विभ्रमः, चैतन्यनाशः. **-ingly,** *adv.* उन्मत्तवत्, भ्रांतवत्, भ्रांतचेतसा, बुद्धिभ्रमेण.

Ravel, *v. t.* संग्रंथ् 9 P, संश्लिष् c., जटिलीकृ 8 U; *See* **Entangle.** **2** विश्लिष् c., उद्-ग्रंथ्. **-ing,** *s.* विश्लिष्टतंतुः.

Raven, *s.* द्रोणकाकः, काकोलः. **-v.** गृध् 4 P, अतिलोभेन भक्ष् 10 or ग्रस् 1 A. **-ous,** *a.* घस्मर, अतिक्षुधार्त-क्षुधातुर, अतिलोलुप, आमिष-लोलुप, अतिबुभुक्षु. **-ously,** *adv.* अति-घस्मरवत्, अतिलोलुपतया.

Ravine, *s.* कंदरः, दरीभूः, दरी, द्रोणी.

Ravish, *v. t.* प्रसह्य-बलात्कारेण-अभिगम् 1 P or भुज् 7 A or रम् 1 A, आ-प्र-धृष् c., दुष् c. (दूषयति), परा-परि-मृश् 6 P; *See* **Rape.** **2** बलाद् अपहृ 1 P or नी 1 P. **3** (चित्तं) हृ, आकृष् 1 P, मुह् c., वि-लुभ् c., अत्यंत-परमं-आनंद् c. or हृष् c.; *See* **Attract.** **-er,** *s.* आ-,धर्षकः, हठदूषकः, अपहर्तृ *m.* **-ing,** *s.* धर्षणं, बलसंभोगः, संग्रहः; *See* **Rape,** -*a.* हारिन्, मोहिन्, चित्ताकर्षिन्; हारिणा गीतरागेण (S. 1) 'by the r. melody of song'. **-ment,** *s.* अपहरणं, धर्षणं, दूषणं, &c. **2** हर्षोन्मादः, चित्तमोदः, मनोहरणं.

Raw, *a.* आम, अपक्व, असिद्ध, असंस्कृत. **2** (Fruit) आम, अपक्व, अपरिणत, अकठोर, अप्रौढ. **3** (Mind) अपरिणत, अपरिपक्व, अपक्व; (person) अपरिणत-अकठोर-अपक्व-मति-बुद्धि; अदृष्टकर्मन्; not 'mature' q. v. **4** निश्चर्मन्, त्वग्रहित. **5** आर्द्रशीतल. **6** जलामिश्रित, असंसृष्ट; 'r. flesh' क्रव्यं; आमामिषं; 'smell of r. flesh' विस्रं, आमगंधः; 'r. fruit' शलाटु *m. f. n.* **-ness,** *s.* अपाकः, आमता, अपरिणामः, अपरिपाकः; अपक्वबुद्धित्वं, मत्यपरिपाकः &c.

Ray, *s.* किरणः, करः, रश्मिः, अंशुः, उष्णः, पादः, मयूखः, मरीचिः, दीधितिः, गभस्तिः, धामन् *n.*, बाणिः, भानुः, अभीशुः-षुः; 'a pencil of r. s' अंशुजालं.

Raze, *v. t.* उच्छिद् 7 P, अवसद् c., निपत् c., ध्वंस् c., विनश् c.; उन्मूल् 10, उद्धृ 1 P; *See* **Erase,** also; 'r. to the ground' भूमिसात्कृ 8 U. **-ure,** *s.* उच्छेदः, विनाशः, विध्वंसः.

Razor, *s.* क्षुरः; 'r.-case' क्षुरभांडं; 'r.-strop' क्षुरतेजनी.

Re, as a prefix of verbs, ex. by पुनर् or प्रति; 're-consider' पुनः विचर् c.; 're-fill' पुनः पूर् 10, &c.

Reach, *v. t.* आप् 5 P, आ-समा-सद् c., उपा-आ-गम् 1 P or या 2 P, प्रति-प्र-पद् 4 A; *See* **Arrive.** **2** अधिगम्, अश्नु 5 A, विद् 6 U, लभ् 1 A; *See* **Get.** **3** (Hand)

प्र-सृ c., दा 3 U, उच्छ्रि 1 U. **4** (Extend to) व्याप्, या, गम्; प्रसृ 1 P, विस्तृ-वितन्-pass.'; oft. ex. by पर्यंत, प्रमाण, in comp.; (in height) मात्र (स्त्री *f.*), दघ्न (ह्रस्वी *f.*), द्वयस (सी *f.*); वृत्तांतेन श्रवणविषयप्रापिणा (R. xiv. 87) 'by the account r. ing (her) ears'; इदं प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव (Ka. 136) 'must have probably r. ed the ears of' &c. **-s.** गोचरः, विषयः, पथिन् *m.* **2** प्रसरः, पर्यंतः, प्रमाणं; 'the utmost r.' पारः; 'within the r. of' गम्य, ग्राह्य, लभ्य, विषय in comp.; धीगम्य, हस्तप्राप्य, प्रांशु-लभ्य, &c.; 'beyond the r. of' अविषय, अतीत, अतिग, विषयातीत, अगोचर, अग्राह्य, अगम्य in comp.; अति pr.; बोधातीत, नयनागोचर, बोधविषय, अतिमानुष, &c. **-ing,** *a.* गामिन्, प्रापिन्, ग in comp.; better by (*v.*).

React, *v. i.* प्रति-कृ 8 U, प्रतिहन् 2 P, प्रत्या-हन्. **-ion,** *s.* प्रतिक्रिया, प्रतिकारः; प्रतिघातः, प्रत्याघातः.

Read, *v.* पठ् 1 P, वच् c.; अधि-इ 2 A, अधि-गम् 1 P; 'r. out' निर्वच् c., श्रु c.; 'r. to oneself' अनुवच् c.; 'r. through' अशेषतः पठ्, पारं गम् or दृश् 1 P, साद्यंतं पठ, दृ 1 P; 'he who has r. through the Vedas' श्रुतिपारदृश्वन् *m.* वेदपारंगतः; 'well-r.' अधीतिन्, (अधीती चतुर्ष्वाम्नायेषु D. K. II. 5), स्वधीत, विद्यासंपन्न; *See* **Learned. -er,** *s.* वाचकः, पठितृ *m.*, अध्येता, अधीयानः, अध्ययन-पठन-कृत् *m.* **-ing,** *s* पाठः, पठनं, अध्ययनं, अधिगमनं, वाचनं, अनुवाचनं, श्रावणं; 'this is a various r.' इति वा पाठः, पाठांतरमेतत्, पाठ-भेदोऽयं; 'r. through' पारायणं, अशेषपठनं; 'suspension of r.' अनध्यायः, अनध्ययनं.

Ready, *a.* सज्ज, सिद्ध, उपकल्प्त, सज्जीभूत-कृत, आयोजित, उपस्थित; सन्नद्ध; उप-परि-कल्पित; 'to get r.' सज्जीकृ 8 U, उप-परि-कल्प् c., उप-स्था c., (सबाणासनं रथमुपस्थापय S. 2), सन्नह् 4 P or c.; *See* **Prepare;** 'to be r.' सज्जीभू; (food) सिद्ध, संस्कृत, निष्पन्न. **2** (Of persons) उद्यत, सिद्ध, सज्ज, सन्नद्ध, उद्युक्त, उन्मुख, अभिमुख; oft. by desid.; कूलं पिपतिषति 'is r. to drop down'; 'r. to go' गंतुमुद्यत, गमनोद्यत, गमनोन्मुख; 'stands r. to burst forth' भेदोन्मुखं तिष्ठति (V. 2.). **3** प्रत्युत्पन्न, तीक्ष्ण, कुशाग्र, सूक्ष्म, समयोपयुक्त, कालोचित. **4** शीघ्र, त्वरित, द्रुत, अविलंबित, क्षिप्र; कुशल, निपुण, दक्ष, पटु, लघु. **5** सुकर, सुगम, सुख, अनायासिन् **6** उत्सुक, इच्छु, सकाम, oft. ex. by मनः or काम with inf.; 'r. at hand' उप-स्थित, हस्तगत, निकटवर्तिन्; 'having r. wit,' 'r.-witted' प्रत्युत्पन्नमति-धी-बुद्धि, विदग्ध. **-ily,** *adv.* कामं, कामतः, प्रकामं, इच्छापूर्वं, सोत्साहं, सोत्सुकं. **2** झटिति, शीघ्रं, सपदि, अचिरात्, आशु, अविलंबितं; *See* **Quickly. 3** सुखेन, अनायासेन, सुखं, अयत्नेन, अक्लेशेन, सुख in comp. **-iness,** *s.* सिद्धता, सज्जता, सिद्धि *f.* **2** सकामत्वं, इच्छा, औत्सुक्यं, उत्साहः अविलंबः, शीघ्रता, तीक्ष्णता, सूक्ष्मता, प्रत्युत्पन्नता; दक्षता, &c.

Real, *a.* सत्य, अवितथ, वास्तविक-तात्विक-(की *f.*), अकृत्रिम, परमार्थ, यथार्थ, तथ्य, अकल्पित, अकपट, अन्वर्थ. **2** (Property) स्थावर; 'to take to be r.' परमार्थेन ग्रह् 9 U; *See* **Earnest. -ity,** *s.* सत्यता, याथार्थ्यं, सत्यं, तथ्यं, तत्त्वं; 'un-r.' मिथ्यात्वं, असारता-त्वं, निःसारता; 'ar.' सत्यं, तत्त्वं, वस्तु *n.*, 'in r.' वस्तुतः, तत्त्वतः, परमार्थतः. **-ly,** *adv.* वस्तुतः, परमार्थतः, तत्त्वतः, यथार्थं, सत्यमेव, नूनं खलु; 'r. speaking' वस्तुवृत्तेन, परमार्थदृष्ट्या, तत्त्वतः, वस्तुतः. **-Realize,** *v. t.* साध् c.; परि-,पूर् 10, संपद् c.; *See* **Get. 2** प्रत्यक्षीकृ 8 U, सत्याकृ, प्रत्यक्षं अनुभू 1 P. **-ation,** *s.* साधनं, सिद्धि *f.*, निष्पत्ति *f.*, संपादनं, पूरणं, प्रत्यक्षीकरणं; 'r. of an object' कृतार्थता, इष्टसिद्धिः.

Realm, *s.* राष्ट्रं, विषयः, राज्यं; *See* **Kingdom. 2** प्र-,देशः, लोकः, भुवनं; 'r. s below the earth' अधोलोकाः, पाताललोकाः, अधो-भुवनं.

Re-animate, *v. t.* पुनर्-जीव् c. **2** *See* **Refresh.**

Reap, *v. t.* (Corn) लू 9 U, छिद् 7 P, अव-कृत् 6 P, दो 4 P; छित्त्वा संग्रह् 9 P or सं-चि 5 U. **2** लभ् 1 A, प्राप् 5 P, भुज् 7 A भज् 1 A, अनुभू 1 P, आ-स्वाद् 1 A; स्वकर्म-फलभागी भवतु (Mu. 1) 'let him r. the fruit of his own deeds'; 'as you sow, so you r.' यथा बीजं तथांकुरः. **-er,** *s.* लवितृ *m.*, लवकः, शस्यच्छिद्, शस्यसंग्राहिन् संचयिन् *m.* **-ing,** *s.* लवनं, छेदनं, संग्रहः, संचयः; 'r.-hook' लवित्रं, दात्रं, शस्यकर्तनी.

Rear, *s.* पृष्ठं, पार्ष्णिः, पृष्ठभागः-दशः; 'in the r.' पृष्ठतः, पश्चात्; 'we having fallen in the r.' अस्मास्ववहीनेषु (S. 2). **2** (Of an army) पृष्ठं, पार्ष्णिः, प्रत्यासा(स)रः, सैन्यपृष्ठं, परि-प्रति-ग्रहः, पतद्ग्रहः; 'one who attacks the r.' पार्ष्णिग्राहः; 'r.-guard' पार्ष्णित्रं. **-***v. t.* उत्-स्था c. (उत्थापयति), उन्नी 1 P, उच्छ्रि 1 U, उद्यम् 1 A,

उन्नम् c.(उन्नमयति); *See* **Raise.** **2** परि-संवृध् c.,परि-,पुष् 1, 4, 9 P, or c., वि-नी 1 P, प्रति-परि-पा c. (पालयति), संभृ 3 U; *See* **Nourish.** **-ing,** *s.* उत्थापनं, उच्छ्रयः उन्नमनं, **2** पोषणं, भरणं, संवर्धनं, पालनं, विनयः.

Reason, °*s.* (The faculty) मति-बुद्धि-व्युत्पत्ति *f.*, विवेकः,प्रज्ञा, विचारणाशक्ति *f.*, ज्ञानं, चिच्छक्तिः., तर्क-अनुमान-शक्तिः; *See* **Intellect.** **2** उपपत्ति *f.*, युक्ति *f.*, युक्तता, न्यायः,न्याय्यता, सामंजस्यं, याथार्थ्यं,हेतुः. **3** हेतुः, कारणं, निमित्तं, प्रयोजनं, (gen. with loc.); 'for what r.' किन्निमित्तं,कुतः, केन हेतुना,कस्य हेतोः,किमर्थं; 'for this r.' अतः, अनेन हेतुना, अस्मात्कारणात्; 'by reason of' ex. by abl. or instr.; हेतुना, कारणात्, अर्थं; 'for some r.' केनापि कारणेन. **-***v. i.* वि-,तर्क् 10, ऊह् 1 A, अनु-मा 3 A, 2 P, युक्तिवादेन साध् c. or प्रति-पद् c.; विचार् c.; *See* **Argue;** 'r. ing faculty' विवेकः, धीशक्ति *f.*, विचारः. **-able,** *a.* **Rational,** q. v. **2** युक्त, न्याय्य, उचित, योग्य, उपपन्न, यथार्थ, न्याय-युक्ति-सिद्ध, यथान्याय; *See* **Just** also; 'to be r.' घट् 1 A, उपपद् 4 A, युज् pass. **3** परि-,मित, नियत, अनतिमहत्, नातिगुरु, मर्यादानतिक्रांत. **-ableness,** *s.* न्याय्यता, औचित्यं, युक्ति *f.*, उपपत्तिः, याथार्थ्यं, युक्तता; परिमितता, अनतिक्रमः, &c. **-ably,** *adv.* न्यायतः, युक्तिपूर्वं, सोपपत्तिकं, युक्ततः, यथान्यायं, यथोचितं, न्यायानुसारेण. **2** परिमितं, नियतं. **-er,** *s.* तार्किकः,तर्किन् *m.*,नैयायिकः, हेतुवादिन् *m.*, ऊहिन् *m.*, विचारकः, न्यायविद् *m.* **-ing,** *s.* वि-,तर्कः, विचारः, ऊहः-हनं, अध्याहारः, ऊहापोहः, न्यायः, अनुमानं; 'art of r.' तर्कशास्त्रं-विद्या. **-less,** *a.* निर्बुद्धि, ज्ञानहीन. **2** अहेतुक, निष्कारण,

Rebate, *v. t.* *See* **Blunt.** [अनिमित्त.

Rebel, *s.* राजद्रोहिन् *m.*, राजापथ्यकारी, राजद्रुह् *m.*, राजप्रतिरोधी. **-***v. i.* (राज्ञे) द्रुह् 4 P, अभिद्रुह् (with acc.); द्युत्था 1 A, प्रतियुध् 4 A, राजशासनं लंघ् 1 A, 10 or अतिक्रम् 1 U, 4 P. **-lion,** *s.* प्रकृति-कोपः, राजाभिद्रोहः, प्रजा or प्रकृति-क्षोभः or प्रकोपः,आज्ञा or शासन-अतिक्रमः or उल्लंघनं. **-lious,** *a.* राजद्रुह्, राजापथ्यकारिन्, राजाभिद्रोहिन्, &c.; *See* **Mutiny,-eer,** &c.

Rebound, *v. t.* उत्पत् 1 P, (पातितोपि कराघातैरुत्पतत्येव कंदुकः); उत्प्लु 1 A, प्रतिहन् pass. **-***s.* उत्पतनं, प्रतिघातः.

Rebuff, *v. t.* प्रति-परा-हन् 2 P; पराभू 1 P, पराजि 1 A. **2** प्रत्यादिश् 6 P, निराकृ 8 U. **-***s.* प्रतिघातः; पराभवः; पराजयः; प्रत्यादेशः; *See* **Repulse.**

Rebuke, *v. t.* निंद् 1 P, उपालभ् 1 A, आक्रुश् 1 P, गर्ह् 1, 10 A, निर्-,भर्त्स् 10 A. **-***s.* निंदा, उपालंभः, निर्भर्त्सना, आक्रोशः; वाग्दंडः; *See* **Censure.**

Rebut, *v. t.* *See* **Refute, Repel.**

Recalcitrant, *a.* *See* **Refractory** under **Refract.**

Recall, *v. t.* प्रत्याह्वे 1 P, नि-प्रत्या-वृत् c., प्रत्यानी 1 P, प्रत्यादा 3 A. **2** (To mind) स्मृ 1 P, अनुचिंत् 10. **3** वि-लुप् 6 P or c., निवृत् c., प्रत्यानी, खंड् 10, निरस् 4 U, प्रत्यादिश् 6 P. **-***s.* प्रत्याह्वानं, निवर्तनं, प्रत्यानयनं, प्रत्यादानं.

Recant, *v. t.* प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, खंड् 10, विलुप् c. **-ation,** *s.* प्रत्याख्यानं, प्रत्यादेशः, खंडनं, विलोपः, विपरीतवादः.

Recapitulate, *v. t.* संक्षेपतः कथ् 10 or वर्ण् 10, विषयसारं वर्ण्, भाषणसारं अनुवद् 1 P. **-ion,** *s.* संक्षेपतः वर्णनं, संक्षेपेण अनुवादः; (of past events) सिंहावलोकनं.

Recede, *v. i.* अपसृ 1 P, अपा-परा-नि-वृत् 1 A, अपसृप् 1 P, अपक्रम् 1 U, 4 P, अपगम् 1 P, अप-या-इ 2 P. **-ing,** *s.* अपसरणं, अपक्रमणं, अपयानं, &c.

Receive, *v. t.* आ-दा 3 A, प्रति-इष् 6 P, ग्रह् 9 U, प्रति-परि-°, प्रति-आ-पद् 4 A, स्वीकृ 8 U, अंगीकृ. **2** आप् 5 P, आधिगम् 1 P, लभ् 1 A; *See* **Get.** **3** प्रविश् c.; *See* **Admit** 4 (A guest) प्रत्युद्-गम्-व्रज् 1 P, प्रत्युद्-इ-या 2 P, सं-मन् c., सं-भू c., सत्कृ, आ 6 A, स्वागतं वद् 1 P or ख्याह् 1 P. **5** आ-धा 3 U, ग्रह्, आ-दा, धृ 1 P, 10. **-ed,** *a.* आदत्त, आत्त, गृहीत, लब्ध, सत्कृत, संभावित, &c. **2** लोकप्रसिद्ध, अभिमत, प्रचलित, अभ्युपेत; 'r. practice' लोकाचारः, प्रचलितो व्यवहारः; 'r. doctrine' आम्नायः, संप्रदायः. **-er,-Recipient,** *s.* प्रतिग्राहकः, परि-प्रति-ग्राहिन्,ग्रहीतृ, आदातृ all *m.* प्रतीच्छकः. **2** आशयः, आधारः, भाजनं, नि-आधानं. **-Receipt,** *s.* आदानं, ग्रहणं, प्राप्ति *f.* **2** आयः, लाभः, उदयः, फलं, आगमः, आदायः. **3** स्वीकारपत्रं, अभ्युपगमलेखः, प्रतिग्रहपत्रं-लेखः; 'or the creditor shall give a r. in his own hand' धनी चोपगतं दद्यात् (धनं) स्वहस्तपरिचिह्नितं (Y. II. 93). **4** (Recipe) योगः, कल्पः, संस्कारलेखः. **-Receptacle,** *s.* आधारः,आ-नि-धानं, भाजनं,आशयः,पात्रं, निधिः, आश्रयः, आस्पदं, पदं; 'r. of bile' पित्ताशयः; आमाशयः, &c. **-Reception,** *s.* परि-प्रति-ग्रहः,आदानं, ग्रहणं, स्वी-अंगी-कारः, प्रवेशः-शनं. **2** संभावना, उपचारः, प्रत्युद्गमः, सत्कारः, संमानः, आदरः.

Recent, *a.* नव, अभिनव, नूतन, प्रत्यग्र, अचिर, अप्राचीन, अदीर्घकालीन. **-ly,** *adv.* *See* **Lately**

Receptacle, Reception, } *See* under **Receive.**

Recess, *s.* विविक्तं स्थानं, निगूढस्थानं; कोणः, निभृत-गुप्त-स्थानं. **2** निवृत्ति-विश्राम-स्थानं, आरामः. **3** विरामः, विश्रांति *f.*, क्षणः, कार्य-त्यागः-निवृत्ति *f.*, विश्रामः, विश्रामकालः.

Recipe, *s.* *See* **Receipt,** 4 under **Receive.**

Reciprocal, *a.* अन्योन्य, परस्पर, इतरेतर, व्यतिकर, मिथः, in comp.; oft. ex by व्यति pr.; *See* **Mutual.** **2** अन्योन्यानुगामिन्, परस्परानुवर्तिन्, अनुपूर्व. **-ly,** *adv.* परस्परं, इतरेतरं, मिथः. **-ness, -Reciprocity,** *s.* परस्परता, व्यतिकरः, व्यतिषंगः, व्यति(ती)हारः, विनिमयः, परि(री)वर्तः. **-Reciprocate,** *v. t.* परस्परं परिवृत् c., विनि-मे 1 A, व्यतिहृ 1 P; 'to r. assistance' प्रत्युपकृ 8 U; *See* **Exchange.** **-ion,** *s.* विनिमयः, व्यतिहारः, परिवर्तः.

Recite, *v. t.* पठ् 1 P, उदीर् c., उच्चर् c., अनुवद् 1 P, उदाहृ 1 P, उद्-गृ 6 P. **2** वर्ण् 10, कथ् 10, आ-ख्या 2 P, व्याहृ; *See* **Tell.** **-al, -ation,** *s.* पठनं, उदाहारः, उच्चारः, उच्चारणं, अनुवादः. **2** कथनं, आख्यानं, वर्णनं. **-er,** *s.* पठकः, अनुवादकः, उच्चारकः, आख्यायकः.

Reck, *v. i.* गण् 10, अवेक्ष् 1 A; *See* **Care.** **-less,** *a.* प्रमत्त, अनवहित, असावधान, निरपे(वे)क्ष, साहसिन्. **-lessly,** *adv.* असावधानं, प्रमादेन, निःशंकं, अविचार्य. **-lessness,** *s.* प्रमादः, अनवधानं, साहसं, साहसशीलता.

Reckon, *v. t.* गण् 10, परि-सं-ख्या 2 P, कल् 10 (कलयति). **2** मन् 4 A, गण्, भू c. — *v. i.* वि-,तर्क् 10, अनु-मा 3 A, 2 P, ऊह् 1 A. **2** मन्, बुध् 1 P, *See* **Consider;** 'r. upon' आ-अव-लंब् 1 A, आश्रि 1 U, विश्वस् 2 P; 'r. with' दैवं परिशुध् c. **-er,** *s.* गणकः, गणयितृ *m.* **-ing,** *s.* गणनं-ना, परि-संख्यानं. **2** गणनापत्रं. **3** व्ययपत्रं. **4** मानं, गणना, मात्रा.

Reclaim, *v. t.* सत्पथे सन्मार्गे-प्रवृत् c. or नी 1 P, or नियुज् 7 A, 10, दुर्मार्गात्-दुष्कर्मणः-नि-परा-वृत् c. or विरम् c., दुर्मार्गं त्यज् c. **2** कृषियोग्य-*a.*, कृ 8 U. **3** पुनः लभ् 1 A or ग्रहृ 9 U. **-Reclamation,** *s.* पापनिवृत्ति *f.*, दुर्मार्गपरावर्तनं; कुपथत्यागः. **2** पुनर्ग्रहणं; पुनर्लाभः-अवाप्ति *f.*

Recline, *v. i.* अव-आ-लंब् 1 A, समा-आ-श्रि 1 U. **2** शी 2 A, सं-उप-विश् 6 P, आस् 2 A; अधि-आस्, अधि-शी (with acc.), निषद् 1 P, विश्रम् 4 P; *See* **Lie.** — *v. t.* नि-धा 3 U, उप-धा; *See* **Lean.** **-ing,** *a.* आलंबिन्, आश्रित, अवलंबित. **2** आ-अव-नम्र; शयान; संविष्ट, निषण्ण.

Recluse, *s.* परिव्राज् *m.*, संन्यासिन् *m.*, विविक्त-एकांत-वासिन्-सेविन् *m.*, वानप्रस्थः; 'female r.' परिव्राजिका. — *a.* विविक्त, निर्जन *See* **Lonely.** **-ness,** *s.* आरण्यकव्रतं, विविक्तसेवा, परिव्रजनं.

Recognize, *v. t.* प्रति-,अभि-ज्ञा 9 U, संविद् 2 A, परिच्छिद् 7 P, अनु-स्मृ 1 P, निश्चि 5 U, निर्णी 1 P; 'not properly r. ed' न तत्त्वतः परिच्छिन्नः. **2** स्वी-अंगी-कृ 8 U, प्रति-पद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P, ग्रहृ 9 U, प्रमाणीकृ. **-ance,** *s.* अंगीकारपत्रं, प्रातिभाव्यं, दर्शनप्रातिभाव्यं (r. bond); 'entered into a r. bond' दर्शनप्रतिभुवं ददौ. **-Recognition,** *s.* प्रति-,अभिज्ञा-ज्ञानं, परिच्छेदः. **2** अंगी-स्वी-कारः, प्रतिपत्ति *f.*, अभ्युपगमः.

Recoil, *v. i.* वि-परा-वृत् 1 A, व्यपवृत्; परा-पत् 1 P. — *s.* (अकस्मात्) परा-वि-वर्तः-र्तनं, परापतनं.

Recollect, *v. t.* स्मृ 1 P, अनु-सं-°, अनु-ध्यै 1 P, अनुचिंत् 10, अनुबुध् 4 A, 1 P. **2** (Oneself) धैर्यं अवष्टभ् 9 P or अवलंब् 1 A; *See* **Courage;** 'he tries to r.' सुस्मूर्षते. **-ion,** *s.* स्मृति *f.*, स्मरणं, अनुचिंतनं, अनुबोधः; 'I am a sage having r. of my former birth' अहं जातिस्मरः मुनिः (Ka. 355).

Recommend, *v. t.* श्लाघ् 1 A, प्रशंस् 1 P; *See* **Praise.** **2** निक्षिप् 6 P, सं-,ऋ c. (अर्पयति); *See* **Entrust;** स्तुतिपूर्वकं निक्षिप् or उपन्यस् 4 U; or gen. ex. by स्तु 2 U, प्रशंस्; गुणान् प्रशंस्; 'I r. this boy to your care' अयं बालको भवतावेक्षणीय इति मे विनतिः; 'I shall, therefore, r. you to Damayanti तदहं विदधे तव स्तवं दमयंत्याः सविधे (N. II. 47); 'I beg to r. him to your kind notice' तस्मिन् कृपादृष्टिं पातयतु or तं स्निग्धदृष्ट्या पश्यतु भवान् इति मे प्रार्थना. **-ation,** *s.* गुणवर्णनं-प्रशंसा-कीर्तनं. **2** गुणवर्णनपत्रं, प्रशंसालेखः. **3** उपदेशः, अनुशासनं, प्रबोधनं. **4** अनुग्रह-प्रसाद-कारणं, आदरहेतुः 'a fair face is a good r.' आकृतिविशेषेष्वादरः पदं करोति (M. 1.). **-atory,** *a.* गुणश्लाघिन्, प्रशंसाकरिन्.

Recompense, *v. t.* शुध् c., निष्कृ 8 U, प्रतिकृ, प्रतिफलं-निष्कृतिं दा 3 U, निस्तृ c.; (क्षतिं) पूर् 10 &c.; *See* **Compensate.** **2** मूल्यं दा; परितुष् c., सं-भू c.; *See* **Reward.** — *s.* पारितोषिकं, मूल्यं, प्रतिफलं; निष्कृति *f.*,

निस्तारः, शुद्धि *f.*, निर्यातनं, प्रतिक्रिया; पूरणं; क्षतिनिष्कृतिः- पूरणं.

Reconcile, *v. t.* सं-धा 3 U, सं-धद् c. (घटयति), संमिल् c., द्वेषं-वैरं शम् c. (शमयति), सख्यं कृ 8 U; प्रसद् c., अनुनी 1 P, सांत्व् 10, सं-परि-तुष् c.; 'you are not yet r. ed' नाद्यापि प्रसादं गृह्णासि (M. 4.), न अनुनीयसे, प्रसन्ना न भवसि; 'easy to be r. ed' आशुसंधेय. **2** (Statement &c.) विसंवादं-विरोधं-अपनी 1 P or अपा-निराकृ, ऐक्यतां-एकवाक्यतां-संगतिं-कृ, समा-धा. **3** (Quarrels &c.) प्रशम् c., सं-धा, निराकृ. **-ed,** *a.* कृतसंधि, शांतवैर, प्रसादित, एकीकृत; 'to be r.' प्रसद् 1 P, मैत्र्यं गम् 1 P, प्रसादं ग्रह् 9 U, तोषं गम्, संमिल् 6 P. **-er,** *s.* संधातृ *m.*, समाधाता, संधिकृत् *m.* **-ment, -Reconciliation,** *s.* संधानं, संघटनं, प्रसादनं, संमेलनं, वैरशमनं, सख्यकरणं. **2** संधिः, सामन् *n.*, वैरशांतिं *f.*, पुनः सख्यं-मैत्री, सांत्वनं, अनुनयः, ऐक्यं. **3** समाधानं, संगति *f.*, एकवाक्यता, विरोधशमनं.

Recondite, *a.* गहन, नि-,गूढ, गूढार्थ, दुर्बोध, रहस्य, दुर्ज्ञेय, गहनार्थ.

Reconnoitre, *v. t.* निपुणं-सूक्ष्मं-परीक्ष् 1 A or निरूप् 10 or अनुसं-धा 3 U, गवेष् 10.

Record, *s.* लेख्यं, लेखः, पत्रं, पत्रकं, पट्टः, लेखप्रमाणं (evidence on r.). **-***v. t.* अभि-, लिख् 6 P, लेख्ये-पत्रे-आरुह् c. or निविश् c. or ऋ c. (अर्पयति); *See* **Commit. -er,** *s.* लेखकः, लिपिकारः, कायस्थः (court-officer).

Recount, *v. t.* कथ् 10, आ-ख्या 2 P, वर्ण् 10, निविद् c., परि-,कृत् 10; *See* **Tell.**

Recoup, *v. t.* पूर् 10, प्रतिवि-धा 3 U पूनर् लभ् 1 A.

Recourse, *s.* आ-सं-उपा-श्रयः, आ-अव-लंबः, **2** शरणं, गतिः *f.*, (श्रीहरिर्मे गतिः); 'have r. to' श्रि 1 U, आ-उपा-समा-सं°, आ-स्था 1 P, आ-अव-लंब् 1 A; उपगम् 1 P.

Recover, *v. i.* आरोग्यं लभ् 1 A, रोगाद् विमुच् pass.; oft. by निर्, वि, गत in comp.; निर्विषः गौतमः (M. 4.) 'has r. ed from (the effects of) poison'; प्रकृतिं आपद् 4 A, सुस्थ-प्रकृतिस्थ-*a.* भू 1 P, रोगमुक्त-निरामय-*a.* भू; पूर्वस्थितिं प्राप् 5 P. **2** (From fainting) संज्ञां-चेतनां-लभ्; *See* below. **-***v. t.* (पुनः) लभ्, प्राप्, विद् 6 U, प्रति-ा-पद्; प्रत्यवाप्, प्रत्यादा 3 A, प्रतिग्रह् 9 P, प्रत्याद्द 1 P, प्रत्युज्जृ 1 P; 'r. consciousness' संज्ञां-चेतनां-लभ् or प्राप्, प्रकृतिं-संज्ञां प्रति-आ-पद्, प्रकृतिस्थ-*a.* भू. **2** रोगं हृ or नश् c. or साध् c. or शम् c., नष्टज-स्वस्थ-*a.* कृ 8 U; *See* **Cure;** 'she r. ed him from poison' सा तं निर्विषं चकार. **-ed,** *a.* प्रतिलब्ध, प्रत्याहृत, पुनर्गृहीत, &c. **2** (From sickness) गत-नष्ट-शांत-रोग, नीरोग, निरामय, रोगमुक्त, स्वस्थ, प्रकृतिस्थ, उत्थित; oft. by मुक्त, गत, in comp.; 'r. from fever' ज्वरमुक्त; 'r. from swooning' नष्ट-गत-मोह; 'r. from poison' निर्विष, &c. **3** (From fainting) लब्ध-संज्ञ-चेतन, प्रकृतिमापन्न, प्रकृतिस्थ, चेतनापन्न. **-y,** *s.* पुनर्लाभः, पुनःप्राप्ति *f.*, पुनरादानं, प्रतिपत्ति *f.*, अधिगमनं, प्रत्युद्धारः. **2** स्वास्थ्यलाभः, आरोग्यप्राप्तिः, प्रकृतिलाभः, स्वास्थ्यं, निरामयत्वं, आरोग्यं, रोगमुक्ति *f.*

Recreant, *a.* धर्मभ्रष्ट, त्यक्त-लंघित-स्वधर्म, पतित. **2** कातर, भीरु, क्लीब; *See* **Coward.**

Recreate, *v. t.* (Oneself) विश्रम् 4 P, विह् 1 P, रम् 1 A, क्रीड् 1 P. **2** आ-समाप्रत्या-श्वस् c., आनंद् c., विनुद् c., रम् c. (रमयति), सं-परि-तुष् c.; *See* **Please, Refresh. -ion,** *s.* विश्रामः, विनोदः-र्दनं, विहारः, विहरणं, क्रीडा, कौतुकं, मनोरंजनं. **-ive,** *a.* सुखकर (री *f.*), मनोरंजन (नी *f.*), विनोदशील.

Recrement, *s. See* **Dross.**

Recriminate, *v.* प्रत्यभियुज् 7 A, 10, प्रत्यभिशंस् 1 P. **-ion,** *s.* प्रत्यभियोगः, प्रत्यारोपः; 'crimination and r.' परस्परदोषारोपः. **-ive, -ory,** *a.* प्रत्यभियोगिन्.

Recrudescence, *s.* पुनः प्रसर्पणं or उद्भवः. **-Recrudescent,** *a.* पुनः प्रसर्पिन्.

Recruit, *v. t.* शक्तिं वृध् c., प्रबलीकृ 8 U, आश्वस् c., आप्यै c., समा-प्रतिसमा-धा 3 U, सुस्थ-*a.* कृ; 'to r. the strength of' बाजीकृ. **2** नवसैनिकैः पूर् 10. **-***v. i.* 'r. one's strength' बलं-सत्त्वं लभ् 1 A, स्वतेजः-वीर्यं प्राप् 5 P, सुस्थ-*a.* भू. **-***s.* नूतन-नव-सैनिकः. **-ed,** *a.* लब्ध-प्राण-बल, वर्धित-सत्त्व, आप्यायित, प्रत्याश्वस्त. **2** नवसैनिक-युक्त-पूर्ण.

Rectangle, *s.* समकोणः, समचतुरस्रं. **-Rectangular,** *a.* समकोण, समचतुरस्र.

Rectify, *v. t.* समा-प्रतिसमा-धा 3 U, शुध् c. **-ication,** *s.* समाधानं, शोधनं.

Rectilineal, *a.* सरलरेखाविशिष्ट.

Rectitude, *s.* सारल्यं, आर्जवं, दाक्षिण्यं, न्यायिता, शौचं, सत्यशीलता, सद्वर्तनं, सदाचारः; 'path of r.' सन्मार्गः, सुपथः, नीतिमार्गः-पथः; 'deviation from the path of r.' सत्पथत्यागः-भ्रंशः, उत्पथगमनं.

Rector, *s.* नायकः, अध्यक्षः. **2** ग्रामाचार्यः.

Recumbent, *a.* पार्श्वशय, अर्धकायेन शयान, कुक्षिशय, संविष्ट.

Recuperate, *v. t.* पुनर् लभ् 1 A.

Recur, *v. i.* प्रति-,आ-वृत् 1 A, पुनर् आगम् 1 P, or आपत् 1 P or सं-पद् 4 A or सं-भू 1 P or वह् 1 A or उप-स्था 1 P; (to the mind) आविः-प्रादुः-भू, उद्-इ 2 P, स्फुर् 6 P, स्मृ pass. **2** शरणं गम् or प्रपद्. **-rence, -rency,** *s.* प्रत्यावृत्ति *f.*, पुनर्वर्तनं, पुनर्घटनं-आपातः-उपस्थानं-संभवः. **2** स्मरणं, स्फुरणं, प्रादुर्भावः, उदयः. **-rent, -ring,** *a.* आवर्तक, प्रत्यावर्तिन्.

Recusant, *a.* प्रतीप; *See* **Obstinate.**

Red, *a.* रक्त, लोहित, शोण (blood-r.), रक्त-लोहित-वर्ण,अरुण (dark r.), कषाय, शोणित; 'r.-hot' उत्तप्त, ज्वलत्, अभि-सं-तप्त, अग्निवर्ण; 'r.-lead' सिंदूरं; *See* under **Lead.** **-s.** (R. colour) रक्तवर्णः, अरुणिमन् *m.*, लोहितः, रक्तः. **-den,** *v. t.* लोहितीकृ 8 U, रक्तीकृ &c. **-v. i.** रक्तीभू 1 P, लोहितायते (D.). **-dish,** *a.* आरक्त-लोहित, ईषद्रक्त, &c. **-ness,** *s.* रक्तत्वं, लौहित्यं, रक्तिमा, अरुणिमा.

Redact, *v. t. See* **Edit. -ion,** *s. See* **Edition** (1)

Redeem, *v. t.* अव-क्री 1P, निष्क्री 9 U, परिक्री 9 A, धनं दत्त्वा मोक्ष् 10; मुच् c., मोक्ष, वि-निर्-°, प्रत्या-दा 3 A, उप-नी 1 U; 'a pledge to be r. ed at a fixed time' कृतकालोपनेयः आधिः (V. M. 66). **2** परि-त्रै 1 A, उद्-धृ 1 P, 10, निस्तृ c. **3** पूर् 10, प्रतिकृ 8 U; *See* **Atone** for; 'he has this r.-ing virtue in him' अयं तस्य गुणोऽन्यान्दोषान् प्रमार्ष्टि-लोपयति **-er,** *s.* परिक्रेतृ *m.*, निष्क्रयिन् *m.* **2** त्रातृ *m.*, मोक्षकः, उद्धर्तृ *m.*, तारकः. **-Redemption,** *s.* निष्क्रयः, परिक्रयः-यणं. **2** परि-,त्राणं, उद्धारः, मोक्षः-क्षणं, मुक्ति *f.*, तारणं.

Redolent, *a.* सुगंधि, सपरिमल, सुरभि; *See* **Fragrant;** 'to make r.' वास् 10, सुरभीकृ 8 U.

Redouble, *v. t.* द्विगुणीकृ 8 U, पुनः पुनः कृ; अविरतोद्यमेन वृध् c. **-ed,** *a.* विवृद्ध, द्विगुणित, पुनः पुनः कृत.

Redoubt, *s,* दुर्गरचना. **-able,** *a.* भीम, विक्रांत, महापराक्रम, महाप्रताप, उरुविक्रम.

Redound, *v. i.* साध् c., आवह् 1 P, सं-पद् c.; क्लृप् 1 A, सं-पद् 4 A (with dat.,) भू with dat.; 'will r.' to thy glory' तव यशसे भवेत्-कल्पत &c. **2** अव-सो 4 P; परिणम् 1 P; oft. ex. by अंतः, परिणामः. **3 Overflow,** q. v.

Redress, *v. t* प्रतिकृ 8 U, निराकृ, समा-धा 3 U; उद्धृ 1 P, मुच् c. (persons); 'r. one's grievances' दुःखाद्-मुच् c. or उद्धृ. **-s.** प्रति(ती)कारः, प्रतिक्रिया, समाधानं, उद्धारः.

Reduce, *v. t.* पूर्वस्थितिं नी 1 P, प्रत्यादिश् 6 P. **2** (Bring to a state) ex. by नी, गम् c., कृ 8 U or सात्कृ; 'r. to subjection' आत्मवशं नी, वशीकृ; 'r. to ashes' भस्मसात्कृ, भस्मीकृ, भस्मावशेषं नी or कृ; 'r. to a wretched state' दीनावस्थां नी; 'r. ed to a skeleton of bones' अस्थिमात्रावशिष्ट, कंकालशेष; 'who has r. ed kings to the state of tributaries' करदीकृतभूपालः. **3** न्यूनीकृ, अल्पीकृ, ह्रस् c., लघयति (D.), लघूकृ; वि-प्र-कृष् 1 P, (विप्रकर्षत्यलक्ष्मीं U. 5); अपकृष्; 'r. in price' अर्घतः पत् c.; 'r. the strength' बलं शिथिलीकृ or अपचि 5 U or क्षि 1, 5 P. **4** (Person) कृशीकृ, क्षीणीकृ, क्षे-क्षि c. (क्षपयति), शक्तिं अप-चि or अवसद् c. **5** वशीकृ, जि 1 P, पराजि 1 A, स्ववशं नी. **6** (In Math.) रूपं दा 3 U, रूपेण कथ् 10; 'r. to a system' व्यव-स्था c., क्रमेण विन्यस् 4 U or विरच् 10. **-ed,** *a.* पूर्ववद्भूत, कृत, भूत, गमित, आपन्न, गत; 'r. to misery' कृच्छ्रगत, कृच्छ्रापन्न, कष्टापन्न; 'r. to ashes' भस्मीकृत, भस्मीभूत. **2** वशीकृत, न्यूनीकृत;क्षीणबल &c.; 'you appear to be much r.' अतीव क्षामः-कृशगात्रः-दृश्यसे; अपचितं गात्रं (S. 2) 'a body r. in bulk,' 'r. in strength' क्षीणबल, शिथिलबल, क्षीण, कृश. **-Reduction,** *s.* करणं, नयनं, गमनं, &c. **2** ह्रासः, अप-विप्रकर्षः, अपचयः, न्यूनीकरणं, न्यूनता, शैथिल्यं. **3** पराजयः, वशीकरणं, पराभवः.

Redundant, *a.* अतिरिक्त, समधिक उद्रिक्त, उत्सिक्त, अत्यंत; व्यर्थ, पुनरुक्तभूत, अतिशय in comp. **-ly,** *adv.* सातिशयं, उद्रिक्तं. **-Redundancy,** *s.* आधिक्यं, अतिरेकः, उत्सेकः, उद्वर्तः; पौनरुक्त्यं, व्यर्थता; *See* **Excess, -ive.**

Reduplicate, *v. t.* द्विगुणीकृ 8 U. **2** (In grammar) अभ्यस् 4 P (syliable); आम्रेडयति (D.) (word). **-ion,** *s.* अभ्यासः, आम्रेडितं, आम्रेडनं, द्विरुक्ति *f.*,

Reed, *s.* नडः-लः, धमनः, पोटगलः; वेतसः, वेत्रं, वेणुः, वंशः; 'r. for writing', 'r.-pen' कलमः. **-y,** *a.* नड्वल, नल-वेत्र-मय (यी *f.*), वेतसपूर्ण.

Reef, *s.* शिलातः, शिलोच्चयः-श्रेणी, शैलसेतुः. **-v. t.** संह 1 P; *See* **Contract.**

Reek, *v. i.* बाष्पं उद्-भू 6 P or उद्गम् c. or उद्गम् 1 P or उत्क्षिप् 6 P, बाष्पायते (D.). **-s.** बाष्पः, धूमिका. **-ing, -y,** *a.* बाष्पोद्गारिन्, बाष्पमय (यी *f.*).

Reel, *v. i.* प्र-,स्खल्, 1 P, पार्श्वे पत् 1 P, सं-वि-चल् 1P.-*s.* स्खलनं,विचलनं.**2** आवापनं.

Refection, *s.* अल्प or लघु-आहारः or भोजनं, उपाहारः. **-Refectory,** *s.* उपाहारशाला.

Refer, *v. i.* उद्दिश् 6 P, अधिकृ 8 U, लक्षी-कृ; *See* **Allude, Advert;** आश्रि 1 U, अपेक्ष् 1 A, संबंध्-अनुषंज्-pass.; 'it does not r. to me' न मत्संबद्धं तत्; oft. by विषय, पर, in comp.: ब्रह्मविषयाणि वाक्यांतराणि (S. B. 114). 'r. ing to Brahman': संदिह्यमानानि वाक्यानि ब्रह्मपरतया निर्णीतानि (S. B. 166) 'have been proved to r to Brahman.'.-*v. t.* Ex. by दृश् 1 P, निरूप् 10, प्रच्छ् 6 P, ऋ c. (अर्पयति), प्रति-पद् c.; निर्दिश् 6 P; 'I r. you to the sage about it' तद्विषये मुनिमेव पृच्छ; 'r. the word to the dictionary' कोशे तं शब्दं निरूपय; 'the matter must be r.-ed to the judge for opinion' अयमर्थः अभिप्रायार्थं प्राड्-विवाकाय निवेदनीयः-प्रतिपादनीयः-निर्देष्टव्यः. **2** आरुह् c.; आसंज् c.; संबंध् 9 P. **-ee,** *s.* प्रमाणपुरुषः, मध्यस्थः, निर्णेतृ *m.* **-ence,** *s.* अर्पणं निवेदनं, निर्देशः &c. **2** उद्देशः, संबंधः, अनुषंगः, अपेक्षा, आश्रयः, विषयः, संपर्कः, अन्वयः, अनुसंधानं; 'a r. is here made to a mythological story' अत्र पुरावृत्तकथा अनुसंधेया (Mallinatha on K. I. 21); oft. ex. by आलोकनं, आलोचनं; 'on a r. to the book again' पुनः पुस्तकं आलोक्य &c.; भवद्भिर्दिष्टस्थलं पुनरालोच्य &c.; 'in or with r to' अधिकृत्य, उद्दिश्य, आश्रित्य, अपेक्ष्य, अपेक्षयासंबंधेन-विषये in comp.

Refine, *v. t.* वि-,शुध् c., विमलीकृ 8 U, प्र-,मृज् 2 P. **2** संस्कृ,परिष्कृ, उपस्कृ, विनी 1U. -*v. i.* शुध् 4 P, विमली भू 1P **-ed,** *a.* वि-,शुद्ध,शोधित,हृतमल; 'r. gold' प्रसूटं-संस्कारशुद्धं-हेम. **2** संस्कृत, संस्कारवत्, परिष्कृत, प्रबुद्ध; विनीत, शिष्ट, सभ्य. **3** अति-,सूक्ष्म. **-ment,** *s.* शोधनं, वि-,शुद्धि *f.*, शुद्धता, प्रमार्जनं. **2** संस्कारः, परिष्कारः, शिष्टता, सौजन्यं, चित्तप्रबोधः, शुद्धिः; 'r. of manners' विनयः, आचारसौजन्यं, सभ्याचारत्वं; 'a man of r.' शिष्टाचारः, विनीतः. **3** अति-,सूक्ष्मता. **-er,** *s.* सं-,शोधकः, शोधयितृ *m.*, मलहारिन् *m.*

Refit, *v. t.* *See* **Repair.**

Reflect, *v. i.* चिंतू 10, ध्यै 1 P, विचर् c., विगण् 10,भू c.,तर्क् 10,विमृश् 6P, आलोच्-पर्यालोच् 10. **2** (On) आ-अधि-क्षिप् 6 P, निंद् 1 P, अव-ज्ञा 9 U; *See* **Censure.** -*v. t.* प्रतिक्षिप्, परा-प्रत्यावृत् c., प्रतिबिंबयति (D.); 'a lake r. ing stars' तारा-प्रतिबिंबं सरः; 'this action r. s great credit on you' इदं ते चरितं अतीव प्रशस्यं. **-ed,** *a.* प्रतिबिंबित, परावर्तित, संक्रांत, प्रतिफलित; 'to be r.' मुच्छ् 1 P, संक्रम् 1 U, 4 P, परावृत् 1 A, प्रतिफल् 1 P; हर्म्येषु मुच्छति न चंद्रपादाः(R. xvi.18): मणिकुट्टिमसंक्रांतप्रतिबिंबतया. (Ka.9.) **-ing,** *a* परावर्तनकारिन्, परावर्तिन्. **2** चिंता-ध्यान-शील, विचारशील. **-ion,** *s.* चिंता; विचारः, विमर्शः, भावना, ध्यानं. **2** आ-अधि-क्षेपः, आक्षारणं. **3** परावर्तनं, प्रतिक्षेपः, संक्रांति *f.* **4** प्रतिबिंबः-बं, प्रतिच्छाया, प्रतिफलं-छाया, प्रतिमा,प्रतिमूर्ति *f.* -रूपं. **-or,** *s.* आदर्शः,दर्पणः-णं, प्रतिक्षेपकः, परावर्तकः. **2** विचारकः. **-Reflexible,** *a.* परावर्तनीय. **-Reflexive,** *a.* पूर्वसंबंधिन्; 'a r. verb' कर्मकर्तृवाच्यं. **-ly,** *adv.* कर्मकर्तरि.

Refluent, *a.* परावर्तिन्. **-Reflux, Reflu-ence,** *s.* परावर्तः, प्रतिस्यंदः.

Reform, *v. t.* दोषं अपनी 1 P or खंड् 10 or अपाकृ 8 U or निवृत् c.; पापात् निवृत् c. or विरम् c.; दुर्मतिं नश् c., (of persons). **2** शुध् c., परि-वि-सं-°, समा-प्रतिसमा-धा 3 U, प्रतिकृ. **3** पुनः कृ of कल्प् c. or वि-धा. -*v. i.* पापात् नि-परा-वृत् 1 A or विरम् 1 P, पापमार्गं त्यज् 1 P. **-s,** **-ation,** *s.* पाप-दोष-निवृत्ति *f.*-त्यागः, दोषच्छेदः-खंडनं-शोधनं-समाधानं; पापप्रतिकारः, संशोधनं, परिवर्तनं; (religious) धर्मपरिवर्तनं क्रांति *f.* **-atory,** *s.* शोधनालयः, **-ed,** *a.* निवृत्त or त्यक्त-पाप or दोष, विरत-हृत-दोष, संशोधित. **-er,** *s.* निवर्तकः, संशोधकः, दोष-पाप-च्छिद् *m.* **2** धर्मप्रवर्तकः.

Refract, *v. t.* परावृत् c., वक्रीकृ 8 U; 'to be r.-ed' वक्रीभू 1 P, परावृत् 1 A. **-ion,** *s.* वक्रीभवनं-करणं, परावर्तनं, वक्रीभावः. **-Refractory,** *a.* विप्रतीप, अविधेय, अविनेय, अवश्य, अनिवार्य, शासनलंघिन्; *See* **Perverse;** 'do not show a r. spirit towards thy husband' भर्तुः प्रतीपं मा स्म गमः (S. 4); 'to be r.' प्रतीपायते (D.). **-iness,** *s.* प्रतीपता, वक्रता, दुःशीलं, वक्रभावः, अविधेयता.

Refragable, *a.* छेद्य, खंडनीय, भेद्य.

Refrain, *v. t.* नि-सं-यम् 1 P, निग्रह् 9 P, निरु 5 U or c, संरुध् 1 P; *See* **Control.** -*v. i.* निवृत् 1 A, विरम् 1 P, (with abl.); परिहृ 1 P, वि-,वृज् 10, त्यज् 1 P; *See* **Abstain, Cease, Forbear.** -*s.* ध्रुवकः.

Refrangible, *a.* परावर्तनीय. [अनुपदं.

Refresh, *v. t.* समा-प्रत्या-आ-श्वस् c., आनंद् c., जीव् c., आ-प्र-ह्लाद् c., सुखयति (D.).

2 नवीकृ 8 U, (एते वयं पुनर्नवीकृताः स्मः S. 5.); श्रमं अपहृ 1 P or छिद् 7 P or अपनी 1 P, विश्रम् c.; बलं-सत्त्वं वृध् c., आप्यै c. **3** निर्वा c. (वापयति), शीतलयति (D.), शीतलीकृ; *See* **Cool. -ed,** *a.* हृत or गत-क्लम or श्रम, विश्रांत, आप्यायित, आश्वासित, नवीकृत, छिन्नश्रम. **-ing,** *a.* आह्लादन (नी *f.*), क्लम-श्रम-विनोदिन्, आनंद-सुख-प्रद, श्रम-क्लम-च्छिद्, श्रमापह, क्लांतिहर. **-ment,** *s.* आह्लादनं, श्रम or क्लम-अपहारः or विनोदनं, आश्वासनं, श्रम-क्लांति-च्छेदः, विश्रांति *f.*, विश्रामः. **2** अभ्यवहारः, लघ्वाहारः, उपाहारः; 'morning r.' प्रातराशः, कल्यवर्तः.

Refrigerate, *v. t.* तापं-दाहं-हृ 1 P or नश् c. or छिद् 7 P, निर्वा c. (वापयति), शीतलीकृ 8 U; *See* **Cool. -ion,** *s.* ताप-दाह-च्छेदः, निर्वापणं. **-Refrigerant,** *a.* निर्वापक, ताप-दाह-हर. **-***s.* उष्णनिर्वापणं, तापशमनं.

Refuge, *s.* आश्रयः, संश्रयः, शरणं, गतिं *f.*; (person) शरण्यः, आश्रयभूतः, पालकः, रक्षकः, त्रातृ *m.* **2** उपायः, प्र-,युक्तिं *f.*, गतिः, साधनं; 'giving r.' शरण्यः &c; 'take r. with' शरणं या 2 P or गम् 1 P or प्रपद् 4 A, उपा-आ-सं-श्रि 1 U, अवलंब् 1 A, शरणार्थं गम् &c; 'seeking r.' शरणार्थिन्; 'come for r.' शरणं प्रपन्नः, शरणागतः; 'having only one r.' अनन्यगतिकः. **-Refugee,** *s.* शरणं प्रपन्नः, शरणागतः, शरणार्थिन् *m.* आश्रितः, अवलंबितः.

Refulgent, *a.* देदीप्यमान, विभ्राजमान, भास्वत्, उज्ज्वल, आतितेजस्विन्, प्रद्योतमान; *See* **Bright. -Refulgence,** *s.* अतिप्रभा-तेजस् *n.*, औज्ज्वल्यं.

Refund, *v. t.* प्रतिदा 3 U, प्रति-ऋ c. (अर्पयति.)

Refuse, *v. t.* प्रत्या-ख्या 2 P, नि-प्रति-षिध् 1 P, प्रत्याचक्ष् 2 A, निराकृ 8 U, प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, वि-प्रति-हन् 2 P, न संमन् 4 A or ग्रह् 9 U or अंगीकृ or प्रतीष् 6 P, अवधीर् 10; 'pray, do not r. my request' नार्हसि मे प्रणयं विहंतुं (R. II. 58). **2** (Followed by inf.) Ex. by a sentence with यच्, यद् &c. (Say, q. v.). -*s.* उच्छिष्टं, अवशिष्टं, अवशेषः, शेषः-र्षः; असारः, मलं. -*a.* उच्छिष्ट, असार, अवशिष्टि.

Refute, *v. t.* निराकृ 8 U, निरस् 4 U, प्रतिक्षिप् 6 P, खंड् 10, बाध् 1 A, अधरीकृ, प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, निर्धू 5, 9 U, 6 P. **-ation,** *s.* निरासः, निरसनं, खंडनं, निराकरणं, प्रतिक्षेपः, प्रत्याख्यानं.

Regain, *v. t.* पुनः लभ् 1 A or प्राप् 5 P, प्रतिपद् 4 P; *See* **Recover.**

Regal, *a.* राजकीय, राजार्ह, राजोचित.

Regale, *v. t.* संतृप् c., संतुष् c., आह्लाद् c., आनंद् c. **2** आश्वस् c., आप्यै c, संवृध् c.; *See* **Refresh,** 'r. oneself' उत्तमाज्ञेन संतुष् 4 P or संतृप् 4 P or आत्मानं संतुष् c., उत्सवं कृ 8 U.

Regalia, *s.* राजचिह्नानि-लक्षणानि-लिंगानि, राजोपचारः

Regard, *v. t.* आदृ 6 A, प्रति-अव-ईक्ष् 1 A, संमन् c. पूज् 10, नि-,सेव्, 1 A. **2** ईक्ष्, दृश् 1 P, आ-अव-लोक् 1 A, 10, आ-,लक्ष् 10; *See* **Look. 3** मन् 4 A, वि-,गण् 10. **4** अव-धा 3 U, अवेक्ष्, सावधान-*a.* भू, विगण्, आदृ. **5** सेव्, पा c. (पालयति), अनु-ष्ठा 1 P; *See* **Observe. 6** उद्दिश् 6 P, अपेक्ष्; संबंध् 9 P. -*s.* आदरः, संमानः, पूजा, अवेक्षा. **2** अवधानं, मनोयोगः, अवेक्षा. **3** दृष्टि *f.*, ईक्षणं; *See* **Look. 4** स्नेहः, प्रणयः, अनुरागः, प्रीति *f.* **5** विचारः, अवेक्षा, अपेक्षा, अनुसंधानं, गणना, उद्देशः, संबंधः, अन्वयः; विषयः; 'having r. to the result' फलापेक्षया; 'with r. to' उद्दिश्य, अधिकृत्य, अंतरेण, अपेक्ष्य, (with acc.); अपेक्षया, विषये, गत-*a.* in comp.; 'a scandal with r. to Mālavikā' मालविकागतं कौलीनं (M. 3); भर्तृगता-विषया-चिंता &c. **-ful,** *a.* अवे (पे)क्षक, अवहित, सावधान, सापेक्ष. **-fully,** *adv.* सापेक्षं, सावधानं. **-ing,** *a.* सापेक्ष, संबंधिन्, गत-विषय- in comp.; *See* (*s.*). **-less,** *a.* निरपेक्ष, अनपेक्ष, उदासीन, विरक्त, अनुत्सुक, in comp. gen.; oft. by अनादृत्य, अनवेक्ष्य, अगणयित्वा. **-lessly,** *adv.* निरपेक्षं, उपेक्षया. **-lessness,** *s.* अनपेक्षा, उपेक्षा.

Regatta, *s.* नौकाक्रीडा.

Regenerate, *v. t.* पुनर् जन् c. (जनयति) or जीव् c. or उद्-धृ 1 P, 10, or उत्था c. उत्थापयति). -*a.*, **-ed,** *a.* पुनर्जात, पुनर्भव, पुनर्जन्मन, पुनरुज्जीवित. **-ion,** *s.* पुनरुज्जीवनं, पुनरुत्पत्ति *f.*, पुनर्जन्मन् *n.*; उत्थापनं, उद्धारः.

Regent, *s.* पालः in comp.; शासकः, अधिपतिः, शास्तृ *m.* 'r.s of the eight quarters' अष्ट दिक्पालाः. **2** शून्यपालः; राजप्रतिनिधिः. **-Regency,** *s.* शासनं. **2** राजप्रतिनिधि-मंडलं.

Regicide, *s.* राजवधः-हत्या-हिंसा-घातः. **2** (Person) राजहन् *m.*, राजघातकः, राजघः.

Regime, *s.* See **Government.**

Regimen, *s.* अन्नपानविधिः, पथ्यापथ्यनियमः. 'one observing r.' पथ्याशिन्.

Regiment, *s.* सैन्यदलं-गुल्मं-गणः-ह्यूहः; **Regimentals,** *s.* सैनिकवेषः.

Region, *s.* प्र-,देशः, लोकः, भुवनं; विषयः, राष्ट्रं, चक्रं, मंडलं; (of the sky) दिश् *f.*, काष्ठा, आशा; *See* **Direction;** 'r. of the heart' हृदयदेशः; नाडीचक्रं &c.

Register, *s.* लेख्यं, लेखः, पत्रिका, पंजिका; गणनापत्रं. **-v.** *t.* पत्रिकायां लिख् 6 P or निविश् c. **-Registrar,** *s.* लेखकः, पंजिकाधिकृतः. **-Registry, Registration,** *s.* नामलिखनं, पत्रिकायां निवेशनं or आरोपणं. 2 लिखनस्थानं.

Regnant, *a.* शासक, अधिकारिन्, राज्याधिकारिन्.

Regorge, *v. t.* उद्गम् 1 P, उद्-गृ 6 P, निः सृ c..

Regress, *s.* प्रतीपगति *f*, परावर्तनं. **-v.** *i.* परावृत् 1 A, प्रत्यावृत्. **-ion,** *s.* प्रतीपगमनं, प्रत्यावर्तनं.

Regret, *v. t.* अनुशुच् 1 P, अनुतप् 4 A: *See* **Lament;** 'he died r. ed by all' मृतः सर्वैरनुशोचितश्च; न वाप्यनुशोचिता (U. 3) 'nor was she (her absence) r. ed.' oft. ex. by दुःखित *a.* or दुःखं 'I r. I cannot go with you' त्वया सह गंतुमसमर्थोस्मीति दुःखितोहं. 2 **Repent,** q. v. **-s.** दुःखं, अनुशोकः, अनुतापः, खेदः, मनस्तापः, उद्वेगः; *See* **Grief. -ful,** *a.* दुःखित, दुःखाकुल, अनुतप्त, अनुशोकार्त, उद्विग्न, खिन्न, सोत्कंठ.

Regular, *a.* नियत, नियमानुसारिन्, नैयमिक-वैधिक-(की *f.*), विध्यनुरूप, सूत्र-विधि-अनुसारिन्; 'not at r. hours' अनियतवेलं (S. 2). 2 अनुपूर्व, अनुक्रमागत, यथाक्रम, क्रमानुगत, अनुलोम, क्रमानुसारिन्. 3 नियतकालिक (की *f.*) नियतवेल. 4 व्य-(व्या)वहारिक-आचारिक-(की *f.*), नित्य, यथामार्ग, यथारीति. 4 (Of persons) नियमानुसारिन्, नियमनिष्ठ-पर-शील, विधि-नियम-अनुवर्तिन्; व्यवस्थित, अत्यक्तक्रम, अव्यभिचारिन्, नियतवृत्ति. **-ity,** *s.* नियतत्वं, विध्यनुसारः, नियमः, सूत्रानुसारः, नैयमिकत्वं. 2 पर्यायः; अनुक्रमः, परिपाटी *f.*, व्यवस्था, परंपरा, आनुपूर्व्यं, आनुलोम्यं; *See* **Order.** 3 विधि-नियम-निष्ठा, नियमानुसारित्वं, विध्यनुवर्तनं, क्रमात्यागः, व्यवस्थिति *f.*, विधि-नियम-परता. 4 (Of arrangement) विरचनं-ना, व्यूहः-हनं, विन्यासः. **-ly,** *adv.* यथा-अनु-क्रमं, अनुपूर्वेशः, आनुपूर्व्येण, अनुलोमं, आनुलोम्येन, क्रमशः, क्रमेण, पर्यायेण. 2 यथाविधि, विधिवत्, विधितः, यथानियम, यथासूत्रं, विधिपूर्वकं, विधि-नियम-अनुसारेण. 3 नित्यं, अनुज्झितक्रमं, नियतक्रमेण, नियतवेलायां.

Regulate, *v. t.* सं-,वि-धा 3 U, परिकल्प् c., क्रमेण विन्यस् 4 U, विरच् 10, व्यव-स्था c. (स्थापयति). 2 वि-,नियम् 1 P, वि-धा; अनुशास् 2 P, नि-,यंत्र् 10: *See* **Rule, Control;** ये ह्रे कालं विधत्तः (S. 1) 'who r. time.' 3 यथाविधि व्यव-स्था c. or विधा, प्रमाणं निरूप् 10. **-ion,** *s.* विधानं, व्यवस्थापनं, यंत्रणं, शासनं, &c. 2 व्यवस्था वि-,नियमः, शासनं, विधिः, स्थिति *f.*, मर्यादा, क्रमः. **-or,** *s.* शासकः, संविधातृ *m.*, वि-,नियंता, शास्ता.

Rehearse, *v. t.* पठ् 1 P, अनुवद् 1 P. 2 कथ् 10, वर्ण् 10; *See* **Narrate.** 3 प्रयोगात् पूर्वं अभिनी 1 P or नट् 10. **-al,** *s.* पठनं, अनुवादः; कथनं, आख्यानं, पूर्वप्रयोगः, पूर्वाभिनयः.

Reign, *v. i.* प्र-,शास् 2 P, राज्यं-महीं &c. शास् or अव् 1 P or भुज् 7 U. 2 **Prevail,** q. v. **-s.** शासनं, राज्यपालनं, अधिपत्यं, अधिकारः; better by (*v.*) with loc. abs.: 'during Rama's r.' रामे महीं शासति; 'after a r. of 12 years' द्वादशाब्दान् भुक्तक्षितौ तस्मिन्. 2 राज्यशासनकालः, राज्यकालः. **-ing,** *a.* राजपदारूढ, शासत्, राज्याधिकारिन्.

Reimburse, *v. t.* प्रतिदा 3 U, निष्कृ 8 U, अपाकृ, पृ 10, शुध् c.

Rein, *s.* अभीशुः-षुः, ग्रहः. रश्मिः; 'by drawing in the r. s' रश्मिसंयमनात् (S. 1): 'give the r. s to' वशं या 2 P: आयत्तीभू 1 P, अधीन-*a.* भू; 'r. s of government' राज्यसूत्राणि. **-v.** *t.* निसं-यम् 1 P, नि-प्र-ग्रह् 9 P; *See* **Control;** 'r. in the horses' प्रगृह्णतां वाजिनः (S. 1).

Reins, *s.* कटि-टी *f.*, कटि-श्रोणी-देशः. 2 वृक्कौ.

Reinforce, *v. t.* **Recruit.** q. v. **-ment,** *s.* सैन्यं, सेनासामग्री.

Reinstate, *v. t.* प्रति-ष्ठा c. (-ष्ठापयति), पुनः स्था c. or नियुज् 7 A, 10. **-ment,** *s.* प्रतिष्ठापनं, पुननियोगः, पुनःस्थापनं.

Reiterate, *v. t.* **Repeat,** q. v. 2 पुनः पुनः कृ 8 U. **-ed,** *a.* पुनः पुनरुक्त; पौनःपुनिक (की *f.*). **-ion,** *s.* पुनर्वचनं, आम्रेडनं, पुनरुक्ति *f.*, पौनःपुन्यं.

Reject, *v. t.* अवधीर् 10, निराकृ 8 U, प्रत्या-ख्या 2 P, वि-हन् 2 P, प्रत्याचक्ष् 2 A; प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, निधूं 5, 9 U, प्रति-अप-क्षिप् 6 P, त्यज् 1 P; *See* **Refuse. -ion,** *s.* अवधीरणं-णा, निराकरणं, प्रत्यादेशः, प्रत्याख्यानं, निरसनं.

Rejoice, *v. i.* प्री pass, मुद् 1 A, आनंद् 1 P, सं-परि-तुष् 4 P, हृष् 4 P, रम् 1 A, उल्लस् 1 P; *See* **Delight,** 'I r. to see you' प्रीतोस्मि ते दर्शनात्, त्वद्दर्शनेन मुदितोस्मि; 'this is to be r. ed at' एतदभिनंदनीयं (S. 5). **-v.** *t.* Causal of roots above. **-ing,** *a.* आनंदद्, हर्षावह, हर्षकर

(रि f.). 2 प्रीयमाण, मुदित, हृष्ट. -s. आनंदः, हर्षः, प्रमोदः, उत्सवः.

Rejoin, v. See Answer. -**Rejoinder,** s. प्रतिवचनं, उत्तरं, प्रत्युक्ति f.

Rejuvenate, v. t. बल-सत्व-वृध् c., आ-प्यै c.

Relapse, v. i. पुनः पत् 1 P or आगम् 1 P or प्राप् 5 P; oft ex. by पुनः with other words; 'r.-ed into a feverish state' ज्वरेण पुनरभ्यभूयत, पुनः ज्वरातुरो बभूव; 'r. ed into vice' पुनर्दुर्मार्गं गंतुं प्रचक्रमे, सत्पथात् भ्रष्टः, सन्मार्गं अत्यजत्; 'r. ed into his natural joviality सहजामानंदवृत्तिं प्रत्यपद्यत. -s. पुनःपतनं, आवृत्ति f., प्रत्यागमनं, पूर्वावस्थाप्राप्ति f.

Relate, v. i. (To) उद्दिश् 6 P, अपेक्ष् 1 A, अनुषंज्-संबंध् pass.; by deriv. in ईय, or विषय in comp.; 'r. ing to Sastras' शास्त्रीय, शास्त्रविषय; 'news r. ing to the king's murder' राजघातविषयकः-संबद्धः-वृत्तांतः; See Refer. -v. t. कथ् 10, आ-ख्या 2 P, वर्ण् 10, शंस् 1 P, चक्ष् 2 A, आ-निवेद् c; See Tell. -ed, a. कथित, ख्यात, वर्णित, &c. 2 सं-अनु-बद्ध,अनुषक्त, अन्वित, संसक्त, संपृक्त, संबंधिन्, संपर्किन्, in comp. 3 संबंधिन्, सजाति, सजातीय, एक-स-गोत्र, सकुल्य, गोत्रज, एकशरीरान्वय. -er, s. आख्यायकः, कथयितृ m. -ing, a. (To) संबंधिन्, विषय in comp.; See Refer. -ion, s. संबंधः, अन्वयः, संदर्भः, संसर्गः, संपर्कः, अनुषंगः, भावः; 'mutual r.' व्यतिषंगः, अन्योन्यसंबंधः, आकांक्षा (between a word and its meaning); 'intimate r.' समवाय-नित्य-संबंधः; 'the r. of the container and the thing contained' आधाराधेयभावः. 2 बंधुता, ज्ञातिभावः, शरीरसंबंधः, शरीरान्वयः, सजातित्वं, सगोत्रता, सपिंडता. 3 बंधुः, बांधवः, ज्ञातिः, गोत्रजः, सगोत्रजः, सकुल्यः, संबंधी, सपिंडः (to the 7th degree), समानोदकः (8th to 14th degree); समानाभिः, सोदर्यः, समानोदरः (by blood); 'r. s collectively' बांधवगणः-जनः. बंधु-ज्ञाति-वर्गः. 4 आ-उपा-ख्यानं, वर्णनं, कथनं, निरूपणं, कीर्तनं. -ionship, s. बंधुता, सनाभिता, ज्ञातिभावः, संबंधः; 'near r.' प्रत्यासन्नता; 'distant r.' व्यवहितता. -ive, s. सगोत्रः, सकुल्यः, बांधवः, बंधुः, ज्ञातिः; See Relation. -a. सापेक्ष, अविविक्त, अन्यसापेक्ष, अकेवल; 'r. importance' तारतम्यं. 2 अन्योन्यान्वित. 3 संबंधिन्, विषयक, in comp.; अनुविद्ध, अनुषक्त, संबद्ध, सान्वय, उद्दिष्ट. 4 संबंधवाचिन्. -ively, adv. अन्यापेक्षया, अन्यसापेक्षं, अपेक्ष्य; See Comparative.

Relax, v. t. शिथिलीकृ 8 U, शिथिलयति (D.), श्रथ्-श्रंथ् 1, 9 P., 10, वि-,स्रंस् c., विगल् c. 2 मुच् 6 P, or c., विसृज् 6 P. 3 शिथिलीकृ, प्र-शम् c. (शमयति), न्यूनीकृ, लघूकृ, मंदीकृ, (मंदीचकार मरणव्यवसायबुद्धिं K. iv. 45); 'r. ing their efforts' शिथिलितप्रयत्नाः. 4 उद्-श्रंथ् 9 P, विसं-धा 3 U; 'r. the bowels' विरिच् 7 P or c.; See Purge; 'r. the mind' मनः विश्रम् c., or विश्रम् c. -v. i. शिथिलीभू 1 P, श्लथ् 1 P, श्रथ् 1 A, स्रंस् 1 A, शिथिलायते-मंदायते (D.). 2 प्र-उप-शम् 4 P, न्यूनी-भू. -ation, s. शैथिल्यं, विस्रंसः, प्रश्रथः, मुक्तिः f. 2 प्र-उप-शमः-शांतिः f., न्यूनीभावः. 3 विनोदः, विश्रामः, उद्योगविरतिः f.-निवृत्तिः f.- शैथिल्यं. -ed, a. शिथिलित, शिथिल, प्र-,श्लथ, मुक्त, स्रस्त, विगलित; 'having r. his hold' मुक्त or शिथिलित-ग्रहः or हस्तः.

Relay, s. विश्रामदायी जवाश्वगणः or सेवकगणः.

Release, v. t. मोक्ष् 10, मुच् 6 P or c., वि-निह्-°, उद्भू 1 P, निस्तृ c., विसृज् 6 P; See Free, -s. वि-मुक्तिः f., मोक्षः, मोचनं, उद्धारः, निस्तारः. -er, s. मोचकः, मोक्षकः, उद्धर्तृ m.

Relegate, v. t. वि-वस् c. 2 ऋ c. (अर्पयति).

Relent, v. i. करुणामृदु-करुणार्द्र-मृदुचित्त-भू 1 P; अनुकंप् 1 A, दयार्द्रीभू, करुणया द्रु 1 P; 'his heart r. ed' तस्य मनो मार्दवमभजत, कठिनतामजहात्; 'being appeased, he r. ed' सचानुनीतो मृदुतामगच्छत (R. v. 54); किमपि सानुक्रोशः कृतः (S. 4) 'somewhat r. ed'. -less, a. निर्दय, निष्करुण, निरनुक्रोश, क्रूर, कठोर, कठिन-पाषाण-हृदय, निर्घृण; See Cruel. -lessly, adv. निर्दयं, निष्करुणं, कठोरं.

Relevant, a. प्रास्ताविक (की f.), प्रस्तुत, प्रस्तुतानुषंगिन्, प्रासंगिक (की f.), प्रस्ताव-सदृश (शी f.)-उचित-अनुरूप, प्रसंगोचित. -ly, adv. प्रस्तावसदृशं, प्रासंगिकं. -Relevance,-cy, s. प्रस्तावौचित्यं, प्रस्ताव-संगति f., प्रस्तुतानुसारः-अन्वयः, प्रकरणानुसारः, प्रास्ताविकत्वं.

Relic, s. अव-शिष्ट-शेषः-षं, शेषभागः; शवः-वं, मृतशरीरं.

Relict, s. See Widow.

Relieve, v. t. (persons) (दुःखात् &c.) मुच् 6 P or c., मोक्ष् 10,उद्भू 1 P; दुःखं &c. अपनी 1 P or शम् c. (शमयति) or परिह 2 (Pain &c.) प्र-शम् c., परिह, दूरीकृ; लघयति (D.), विश्रम् c., लघूकृ; See Alleviate, 'I feel myself to be r. ed' ममात्मा विशदः जातः (S. 4), निश्चितोहं.

3 उपक्रु, साहाय्यं दा 3 U, अनुग्रह् 9 P. 4 (Guard &c.) विश्रम् c., नियोगात् वि-श्रामं दा. **-ed,** *a.* उद्धृत, मुक्त, शांत, शमित &c.; 'r. of anxiety' वीतचिंत, निश्चिंत, निःशल्य (मनः); 'r. of pain' शांतदुःख. **-Relief,** *s.* (दुःखात्) मोचनं, मोक्षः, उद्धारः, शमनं, मुक्ति *f.*, अपहरणं, अपनयनं, परिहारः. 2 सुखं, उप-प्र-शमः, निर्वापणं, चिंता-प्रशमः-शांति *f.* स्वास्थ्यं, निर्वृत्तिः, विश्रामः, निश्चिंतता, एकपदे एव दुःखविश्रामं ददाति (U. 6) 'gives r. to my sorrow'; कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3). 3 उपकारः, साहाय्यं; 'she brought her lovely limbs into r.' पुपोष लावण्यमयान् विशेषान् (K. 1. 25).

Religion, *s.* धर्मः. 2 Piety, q. v. **-Religious,** *a.* धर्म्य, धर्म-देव- in comp.; 'r. rites' धर्मक्रियाः. 2 धर्मात्मन्, पुण्यशील, धर्माचारिन्, व्रतिन्, धर्मनिष्ट, धार्मिक (की *f.*); *See* **Pious, -ly,** *adv.* धार्मिकवत्, ईश्वरभक्त्या. **-ness,** *s.* धार्मिकत्वं, धर्मनिष्ठा, धर्मपरता.

Relinquish, *v. t.* त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, मुच् 6 P. **-ment,** *s.* त्यागः, उत्सर्गः, मोचनं; *See* **Abandon, -ment.**

Reliquary, *s.* अवशिष्टाधारः-भाजनं.

Relish, *v. t.* स्वादू c., रस् 10, सुरसीकृ 8 U, स्वादूकृ. 2 आस्वाद् 1 A. 3 अभि-, रुच् 1 A, अभिनंद् 1 P; *See* **Like,** *s.* रसः, आ-, स्वादः-स्वादनं, रुचि *f.*; 'has lost r. for dates' पिंडखर्जूरैरुद्वेजित (S. 2). 2 अभि-, रुचिः, अभिलाषः, इच्छा. 3 अव-उप-दंशः.

Reluctant, *a* अनिच्छत्, विमनस्, अनिच्छु, असंतुष्ट, अकाम, निष्काम, वि-पराङ्-मुख, विमत. **-ly,** *adv.* बलात्, अनिच्छया, अकामं-मतः-मेन, by (*a.*), 'he went out r.' अनिच्छन्नपि निर्जगाम. **-Reluctance,** *s.* अनिच्छा, अकामः, असंतोषः, वैमनस्यं, विमुखता, अरुचि *f.*

Rely, *v. i.* (On) विश्वस् 2 P, प्रति-इ 2 P. विश्रंभ् 1 A; श्रद्धा 3 U. 2 आ अव-लंब् 1 A, आ-सं-श्रि 1 U; oft. ex. by आयत्त, अधीन, तंत्र in comp.; 'I r. on you alone' भवानेव ममाश्रयः-शरणं. **-iance,** *s.* विश्वासः, प्रत्ययः, विश्रंभः, श्रद्धा. 2 अवलंबः-बनं, आ-सं-श्रयः, शरणं. **-ing,** *a.* अवलंबिन्, आश्रित, विश्वासिन्, जातप्रत्यय.

Remain, *v. i.* अव-स्था 1 A, स्था 1 P, आस् 2 A, वृत् 1 A; *See* **Continue.** 2 नि-, वस् 1 P, स्था, अधि-ष्ठा. 3 शिष् pass., अव-पॉर-उत्°-, उद्-वृत्; 'he r. ed only' in memory (his name only r. ed) स्मर्तव्यशेषं नीतः; 'r. ing after what is eaten' भुक्तावशिष्टं, भूक्तशेषं (अन्नं); 'those who r. ed alive' हतशेषाः. **-ing,** *a.* अव-,शिष्ट-शेष, उद्वृत्त; 'pass the r. months' शेषान्मासान्गमय; 'during the r. part of his life' आयुःशेषे. **-Remains,** *s.* अस्थ्यादिशेषः, अस्थीनि. **-Remainder,** *s.* अव-, शेषः-र्षं-शिष्टं, उद्वर्तः, शेषभागः; (in arithmetic) शेषं, अंतरं; (of men) ex. by अन्य, इतर; *See* **Other;** 'subtracting 4 from 10 the r. is 6' दशसु चतुर्भिर्विवर्जितेषु षट् शेषं or षड् अवशिष्यंते.

Remand, *v. t.* पुनः प्र-हि 5 P or आह्वे 1 P.

